# न्यायसूत्रव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

यादवपुरविश्वविद्यालयस्य संस्कृतविभागे **विद्यावारिधिः**
(पि-एइच.डि.) - इत्युपाधये समर्प्यमाणशोधप्रबन्धः

गवेषकः
**दीपक-गराइ**
संस्कृतविभागस्य यादवपुरविश्वविद्यालयस्य
**पञ्जिकरणसंख्या – A00SA1501418**

तत्त्वावधायकाः
**प्राध्यापकाः प्रो.ड. तपनशङ्करभट्टाचार्याः**
संस्कृतविभागस्य
यादवपुरविश्वविद्यालयस्य

संस्कृतविभागः
यादवपुरविश्वविद्यालयः
यादवपुरम्,कलिकाता,७०००३२
२०२३

# Nyāyasūtravyākhyāne Nyāyabhāṣyakāra-Nyāyavṛttikārayormatasamīkṣaṇam

Thesis to the Department of Sanskrit, Jadavpur University for the Degree of
**Doctor of Philosophy**


**Submitted by:**
**Dipak Gorai**
Department of Sanskrit
Jadavpur University
Registration No –A00SA1501418



**Supervisor:**
**Professor Dr. Tapan Sankar Bhattacharyya**
Department of Sanskrit
Jadavpur University



Department of Sanskrit
Jadavpur University
Jadavpur, Kolkata-700032
2023

# Certified that the thesis entitled

'न्यायसूत्रव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्' Submitted by me, for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my own work carried out under the Supervision of **Professor Dr. Tapan Sankar Bhattacharyya, Professor, Department of Sanskrit, Jadavpur University**, and that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/ elsewhere.

………………………………..
Countersigned by
The Supervisor:
**Prof. Tapan Sankar Bhattacharyya**

…………………………………..
Candidate:
**Dipak Gorai**

# कृतज्ञतासमर्पणम्

अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्। का कथा तत्र गवेषणारूपगुरुगम्भीरविषये। साहाय्यं विना तत्कर्म ततोऽपि कठिनतरं जायते। किन्तु सहाये सति अतिकठिनोऽपि विषयः सरलायते, अनायासेन च सिद्ध्यते। सहायमन्तरेण मादृशस्य मन्दबुद्धेरपीदं शोधकर्म न सम्भवपरं सुसाध्यं वा स्यात्। अतोऽवसरोऽयं कार्तज्ञ्यज्ञापनाय सहायं कृतवद्भ्यः कृतवतीभ्यश्च। **'न्यायसूत्रव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्'** इति शीर्षकाङ्किकतस्य शोधप्रबन्धस्यास्य रचनायां बहूनां स्नेहगर्भानां परामर्शकानां तथा एकाधिकप्रतिष्ठानानां साहाय्यं सश्रद्धं स्मरणीयम्।

तत्र सर्वादौ अशेषगुणाकारस्य ईश्वरस्य कृपाकटाक्षात् तथा पित्रोराशिषा चिकीर्षितः शोधप्रबन्धोऽयं समाप्त इति तेषां चरणारविन्दद्वन्द्वं वन्दे। यादवपुर-विश्वविद्यालयस्य संस्कृताध्ययनविभागे विद्यावारिधिः (पि-एइच्.डि.) इत्युपाधये सर्वथा मे मार्गनिर्देशनं कृतवद्भ्यः सर्वदा च स्नेहाशिषा प्रवृत्तिं विदधद्भ्यः अध्यापकवर्येभ्यो प्रो.ड. तपनशङ्करभट्टाचार्यमहोदयेभ्यः भूयांसि नमांसि, कार्तज्ञ्यं, श्रद्धाञ्जलिञ्च विज्ञापयामि, ये विषयचयने, कार्यकरणस्वातन्त्र्यानुमोदने, परामर्शदाने, विषयनिरीक्षणे, विलम्बे सति पुनः त्वरया कार्यसम्पादने च बहुधा मां प्रोत्साहितवन्तः। तथा च सर्वेभ्यः यादवपुरविश्वविद्यालयस्य संस्कृताध्ययन-विभागस्य प्रत्यक्षाप्रत्यक्षतया सहायकेभ्यः अध्यापकेभ्यः नितरं कार्तज्ञ्यं निवेदयामि।

'सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।'

- इति भणितिं स्मारं स्मारं मम जनकं मुरलीदेवं जननीं शिवानीदेवीञ्च सश्रद्धं प्रणमामि। पित्रोराधमर्ण्यं न वाक्यैः प्रकाशयितुं शक्यते। मानसिकशक्तिप्रदानेन, विविधग्रन्थादिप्रदानेन, चोदयित्र्यै प्रियायै धर्मपत्न्यै रूपादेव्यै प्रेमस्नेहादिकं विज्ञाप्यते।

विषयेऽस्मिन् पश्चिमबङ्गराज्यविश्वविद्यालयस्य संस्कृतविभागाध्यापकानां ड. सेख-साबिर-आलि-महाभागानां, बाँकुडाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षपादानां ड.सन्तु-सिंहमहाभागानां परोक्षापरोक्षरूपेण प्रोत्साहितकारिणां स्नेहगर्भं साहाय्यम् अपि अनुस्मर्तव्यम्। तान् प्रत्यप्यहं कृतज्ञतां समर्पयामि।

अस्य शोधप्रबन्धस्य लेखनाय यादवपुरविश्वविद्यालयस्थसंस्कृताध्ययनविभागस्य, रामकृष्णमठविवेकानन्दवेदविद्यालयस्य, रामकृष्णमिशन्विद्यामन्दिरस्य तथा पश्चिमबङ्गराज्यविश्वाविद्यालयस्य ग्रन्थागारस्य ग्रन्थानां निर्बाधं समासादनं कृतमिति तत्रत्येभ्यः अध्यक्षेभ्यः कार्तज्ञ्यं विज्ञाप्यते।

अपि च अस्मिन् कार्ये सस्नेहं निरतं साहायीभूतेभ्यः मम अग्रजतुल्येभ्यः श्रीमान् उत्तमविश्वासः, श्रीमान् विवेककर्मकारः, हाराधन-गराइ इति एतेभ्यः तथा च साहाय्यं कृतवद्भ्यः मित्रतुल्यसहपाठिभ्यः श्रीजीव-गोस्वामी इत्येतेभ्यः तथा अनुजतुल्येभ्यः श्रीसुव्रत-गायनः इत्येतेभ्यः धन्यताभावसुरभितं समादरप्रसूनं समर्पयामि। अन्तिमे प्रत्यक्षाप्रत्यक्षरूपेण सर्वेभ्यः सहायकेभ्यः कार्तज्ञ्यं विनिवेदयामि।

--इति विनीतः

दीपक-गराइः

# सूचीपत्रम्


| विषयः | पृष्ठाङ्कः |
|---|---|
| प्रस्तावना- | i-iii |
| शब्दसंकेतः- | अ |
| **प्रथमोऽध्यायः** | |
| उपोद्घातः- | १-२१ |
| **द्वितीयोऽध्यायः** | |
| भाष्यकारस्य वात्स्यायनस्य परिचयः कृतिश्च - | २२-३४ |
| **तृतीयोऽध्यायः** | |
| न्यायसूत्रवृत्तिकारस्य विश्वनाथन्यायपञ्चाननस्य परिचयः कृतिश्च- | ३५-४१ |
| **चतुर्थोऽध्यायः** | |
| प्रमाणव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम् - | ४२-१३९ |
| **पञ्चमोऽध्यायः** | |
| प्रमेयव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम् - | १४०-२२२ |

## षष्ठोऽध्यायः

न्यायाङ्गव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम् - २२३-२७४

## सप्तमोऽध्यायः

कथातदङ्गव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम् - २७५-३०५

उपसंहृतिः- ३०६-३१६

अनुशीलितग्रन्थसूची - ३१७-३२६

# प्रस्तावना

सूत्रोपनिबद्धन्यायशास्त्रावबोधने अस्मदीयानां स्वल्पमतीनां सकाशे दुष्करमेव। तेन एतच्च शास्त्रमस्माकं समीपे मरुतुल्यम्। तेन अर्थज्ञानरूपजलाभावात् पिपासूनां पाठकानां शास्त्रस्यास्याध्ययनेऽपि स्वरसो न दृश्यते। अत एतद् दूरुहं महामूल्यञ्च शास्त्रमधिगन्तुं केनापि सहायकेन प्रयोजनमस्ति। यद्द्वारा अस्माकं ग्रन्थार्थोऽवगतो भविष्यति तथा ग्रन्थेषु अस्माकमनायासेनैव प्रवेशः स्यात्। तद्धि टीका एव। टीकया एवास्माकं ग्रन्थार्थोऽवगतो भवति, अपि च ग्रन्थेषु प्रवेशोऽपि सुलभो भवत्यस्माकम्। अत उक्तं टीकास्वरूपविषये शब्दकल्पद्रुमे - 'टीक्यते गम्यते प्रविश्यते ज्ञायते वानया' इति। उक्तञ्च वाचस्पत्ये - 'टीक्यते गम्यते ग्रन्थार्थोऽनया' इति। किन्तु टीकाकारैस्तु अत्र मरुतुल्यं शास्त्रमिदं स्वप्रतिभावैदुष्येण अर्थज्ञानरूपजलं निष्काष्य पाठकानां स्वरसः सम्भावितः।

तत्र प्रथमतो न्यायसूत्राणि व्याख्यातुकामो महर्षिवात्स्यायनो भाष्यरूपेण न्यायसूत्राणि व्याख्यापयामास। परं भाष्यमिदं नैकानां स्वल्पधीमतां पाठकानां सकाशे दुर्बोध्यमासीत्। अत एतद्भाष्योपरि उद्द्योतकरेण व्याख्या कृता *न्यायवार्त्तिक*रूपेण। एवं न्यायवार्त्तिकोपरि वाचस्पतिमिश्रेन व्याख्या कृता *न्यायवार्त्तिकतात्पर्यटीका*रूपेण, अस्याः टीकायाः टीका तु महानैयायिकेनोदयनाचार्येण रचिता *न्यायवार्त्तिकतात्पर्यपरिशुद्धि*नाम्ना। किञ्च, न्यायसूत्रमाधारीकृत्य आचार्यविश्वनाथन्यायपञ्चननेन *न्यायसूत्रवृत्तिः* रचिता।

अस्य न्यायदर्शनस्य व्याख्याधारा सरणिद्वयमवलम्ब्य प्रवहति। तत्र *भाष्य-वार्त्तिक-तात्पर्यटीका-परिशुद्धि*रूपैका धारा या खलु नैयायिकेषु '*चतुर्ग्रन्थिका*' - नाम्ना प्रसिद्धा। इयं व्याख्याधारा विचारविस्तरेण शास्त्रस्यागाधं गाम्भीर्यविपुलं विद्योतयन्ती सम्प्रदायसम्मतान् सिद्धान्तान् सर्वतोभावेन परिरक्षति प्रतिपक्षिणां मतानि सयुक्ति निराकुरुते च। व्याख्योपव्याख्याभिः प्रतिपक्षिभिः बौद्धदार्शनिकैराक्षिप्तानां समाधानैः समुपवृंतेयं चतुर्ग्रन्थिका शास्त्रस्याभिवृद्धये सुचिरादेव कल्प्यते।

अपरस्यां सरणौ प्रवर्तमाना धारा तु न्यायसूत्रवृत्तिनाम्ना परिचितास्ति। अत्र धारया विश्वनाथन्यायपञ्चाननादिमहाभागानां न्यायसूत्रवृत्त्यादयः एव गृह्यन्ते। प्रायः सूत्राभिप्रायाणां संक्षेपेण बोधनाय वृत्तिस्तद्विद्भिः प्रणीयते। अत्र शास्त्रस्य सिद्धान्ताः सूत्राणां तात्पर्यञ्च साधु प्रकाशन्ते। न्यायदर्शनस्य प्राचीनयुगाद् आरभ्य नव्ययुगपर्यन्तम् एतत् व्याख्याधाराद्वयं प्रचलदस्ति।

यद्यपि न्यायसूत्रोपरिरचितटीकानां भाष्य-वार्त्तिक-तात्पर्य-वृत्तिप्रभृतीनां व्याख्या अनेकत्र दृश्यते, परं टीकानामेकत्र विचारमूलकं निबन्धं न दृश्यते। अत्र निबन्धे मया विशेषतः न्यायसूत्राणामर्थावबोधने व्याख्यां कुर्वद्भ्यां न्यायभाष्यकारन्यायसूत्रवृत्तिकाराभ्यां यत्सारल्यं प्रदर्शितं तथा कुत्र कुत्र स्वकीयमतमुपस्थापितं तथा कुत्र कुत्र अधिकतया विचारः कृतः, कुत्र च मतविरोधो दृश्यते इत्येवं तयोः टीकयोः वैलक्षण्यतात्पर्यं वितन्यते। किञ्च, स्थलविशेषे प्रसङ्गात् *वार्त्तिक-तात्पर्यादि*टीकानामपि वैलक्षण्यं पर्यालोकयितम्। अपि च, *न्यायमञ्जरी*कारस्याचार्यजयन्तभट्टस्यापि मतं स्थानविशेषे पर्यालोचितम्।

यद्युच्यते न्यायभाष्यविषये तथा न्यायसूत्रवृत्तिविषये बहवो ग्रन्थाः समुपलभ्यन्ते तर्हि कथं पुनः अनयोर्व्याख्याने प्रवृत्तिरिति पृष्टस्य पेषणं मृतस्य मरणं यथा इति चेन्न, तत्र उभयोः टीकयोः पृथक् पृथक् पर्यालोचनं दृश्यते किन्तु उभयोर्वैलक्षण्यविषये कोऽपि ग्रन्थो नोपलभ्यते। अतः टीकयोरुभयोः वैलक्षण्यं विस्तरशः प्रतिपादयितुं ममैष प्रयासः। किञ्च, भविष्यति गवेषकाणां कृतेऽपि मद्गवेषणापत्रं सहायकं भवेदिति मन्ये।

किञ्च, दशाह्निकसमन्वितपञ्चाध्यायात्मकं न्यायसूत्रमवलम्ब्य विरचितं *न्यायभाष्यं न्यायसूत्रवृत्तिः* च तादृशकायविशिष्टम्। किञ्च, न्यायभाष्यन्यायसूत्रवृत्त्योः भाषागतकाठिन्यं तथा दुर्बोध्यत्वं सर्वैरेव विद्वद्भिर्विदितमेव। अतः प्रत्येकसूत्रमाधारीकृत्य अनयोः टीकाग्रन्थयोः सम्पूर्णतः पर्यालोचनं नितरां दुःसाध्यमेव। अतो न्यायदर्शनस्य मुख्यसूत्राणां यत्र यत्र न्यायभाष्यतः न्यायसूत्रवृत्तेर्वैलक्षण्यमाचक्षते ते एव विषयाः मद्गवेषणापत्रे विशदतया पर्यालोचिताः। किञ्च, न्यायदर्शनस्य सुदीर्घकायत्वाद् अत्र केवलं प्रथमाध्यायमाश्रित्यैव न्यायभाष्यन्यायसूत्रवृत्त्योर्वैलक्षण्यमुपवर्ण्यते, पक्षान्तरे तु न्यायदर्शनस्य षोडश पदार्था अपि प्रतिपादिताः भविष्यन्ति। किञ्च, प्रसङ्गात्तु न्यायदर्शनस्य सूत्रान्तराणामालोचना विहिता।

-इति विनीतः

दीपक-गराइः

# शब्दसंकेतः

अ. = अध्यायः

अधि. = अधिकरणम्

अ.को.= अमरकोषः

अनु.चि. = अनुमानचिन्तामणिः

अभि.चि.= अभिधानचिन्तामणिः

ऋ.वे.भा.भू. = ऋग्वेदभाष्यभूमिका

का.सं. = कारिकासंख्य

का.सू. = कामसूत्रम्

कौ.अ. = कौटिल्यार्थशास्त्रम्

छा.उ.= छान्दोग्योपनिषद्

तत्त्व.चि.= तत्त्वचिन्तामणिः

तर्क.= तर्कसंग्रहः

तृ.स्क.= तृतीयस्कन्दः

द.स्क. =दशमस्कन्दः

नै.च.= नैषधचरितम्

न्या.कु.= न्यायकुसुमाञ्जलिः

न्या.द.= न्यायदर्शनम्

न्या.भा. = न्यायभाष्यम्

न्या.म.= न्यायमञ्जरी

न्या.वा. = न्यायवार्त्तिकम्

न्या.वा.तात्= न्यायवार्त्तिकतात्पर्यटीका

न्या.सि.मु. = न्यायसिद्धान्तमुक्तावली

न्या.सू.= न्यायसूत्रम्

न्या.सू.वृ. =न्यायसूत्रवृत्तिः

प.पु.=पद्मपुराणम्

पा.सू. = पाणिनीयसूत्रम्

पृ. = पृष्ठाङ्कः

प्र. = प्रकरणम्

प्रतिमा.= प्रतिमानाटकम्

बृ.आ.उ.= बृहदारण्यकोपनिषद्

ब्रह्माण्ड.पु.=ब्रह्माण्डपुराणम्

भा.परि.= भाषापरिच्छेदः

म.भा. = महाभाष्यम्

मनु.= मनुसंहिता

महा.= महाभारतम्

याज्ञ.= याज्ञवल्क्यसंहिता

वि.पु.= विष्णुपुराणम्

वै.सू.= वैशेषिकसूत्रम्

श्लो.= श्लोकसंख्या

शान्ति.= शान्तिपर्व

श्रीमद्भा.= श्रीमद्भागवतम्

सां.का.= सांख्यकारिका

# न्यायसूत्रव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

# न्यायसूत्रव्याख्याने न्यायभाष्यकारन्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

## ।।प्रथमोऽध्यायः।।

## उपोद्घातः

अखिलपदार्थजातं प्रत्यक्षीकुर्वाणानां तत्रभवतां दिव्यचक्षुषां महर्षीणां जीवजगद्विषयकान् प्रश्नान् समाधातुं प्राणभृतां मङ्गलकामनया च दर्शनशास्त्रमिदं सत्यासत्यनिकषभूतं महार्घमुपायनमिति विपश्चिदपश्चिमा जानन्त्येव। यद्यपि दर्शनस्य कापि निर्दिष्टसंज्ञा नास्ति तथापि व्युत्पत्त्या दर्शनशास्त्रमभिव्यनक्ति केचित्। तथाहि दृश्यते साक्षात्क्रियते परमात्मादिसंज्ञासंज्ञितः परमपुरुषो येन तद्दर्शनमिति। भारतीयदर्शनशास्त्राध्ययनं विना भारतीयसंस्कृतेः सभ्यतायाश्च आत्मानमवगन्तुं यथार्थतया न शक्नुयुः। दर्शनशास्त्रेणैव ते गतार्थतां लभन्ते। भारतवर्षस्य पुण्यतीर्थे अद्यावधि दर्शनशास्त्रस्य अध्यात्मज्ञानगौरवात्मक-विजयध्वजा उड्डीयमाना आचक्षते। किं बहुना, न केवलं भारतीयवाङ्मये विश्ववाङ्मयेऽपि भारतीयदर्शनशास्त्राणां गुरुत्वं तथा स्थानमानादिकम् अतीवाभिनन्दनार्हमिति विश्वविद्वांसः जानन्त्येव।

'अर्थ्यते यत्तत्' इति विग्रहे प्रार्थनार्थक-अर्थधातोः कर्मणि घञ्प्रत्यये निष्पन्नस्य अर्थशब्दस्यार्थो हि 'प्रार्थनाविषयः'। 'पुरुषाणाम् अर्थाः' इति विग्रहे

षष्ठीतत्पुरुषसमासे निष्पन्नस्य 'पुरुषार्थाः' इति पदस्यार्थो हि पुरुषकामनाविषयः। संस्कृतवाङ्मये पुरुषार्थो हि चतुर्धा विभज्यते। ते च पुरुषार्थाः- धर्मः, अर्थः, कामः मोक्षश्चेति । किञ्च, मोक्षो हि प्रतिपाद्यविषयो भवति यस्य शास्त्रस्य, तच्छास्त्र हि मोक्षप्रतिपादकम् । दर्शनं हि मोक्षप्रतिपादकशास्त्रम्।

दर्शनशब्दस्य व्युत्पत्त्यर्थादपि मोक्षशास्त्रमेव दर्शनपदवाच्यमिति प्रबोध्यते। 'दृशिर् प्रेक्षणे' इति ज्ञानार्थकदृश्-धातोरुत्तरं 'दृश्यतेऽनेन' इति करणवाच्ये ल्युट्प्रत्यये निष्पन्नदर्शनशब्दस्यार्थो हि ज्ञानसाधनं ज्ञानोपायो वा। अत एव ज्ञानवाचिदृश्-धातोः सकर्मकत्वाद् अत्र प्रश्नो जायते यद् अत्र ज्ञानक्रियायाः कर्म विषयो वा कः ? यदि घटादिः विषयरूपेण कल्प्यते चेत्तदा 'दृश्यते ज्ञायते घटादिरनेन' इति विग्रहे दर्शनं नाम चक्षुरादि इन्द्रियमेव बोध्यते। परमत्र दर्शनशब्देन तादृशपदार्थः न बोध्यते। अतो घटादिकर्म पदार्थरूपेण न स्वीकर्तुं शक्यते। किन्तु तर्हि अत्र कर्म किम् ? अत्रोच्यते – सामान्यतः निखिलपदार्थेषु ज्ञानक्रियायाः प्राप्तिष्वपि "आत्मा वाऽरे द्रष्टव्यः श्रोतव्योः मन्तव्यो निदिध्यासितव्यः" इति श्रुतिसामर्थ्यात् आत्मा एव ज्ञानक्रियायाः कर्मरूपेण ग्रहीतव्यः। अत एव 'आत्मा दृश्यते ज्ञायते अनेन' इति विग्रहे आत्मज्ञानस्य साधनमेव दर्शनमिति वक्तुं शक्यते। आत्मस्वरूपसाक्षात्कारेणैव मुक्तिमेति मनुष्यः। दर्शनशास्त्रे तदुपायाः प्रतिपादिताः। अत एव दर्शनशब्दस्यार्थो हि आत्मस्वरूपसाक्षात्कारोपायः। यतो हि तदुपायः दर्शनशास्त्रेषु प्रतिपादितोऽस्ति, अतः स्वप्रतिपादकत्वसम्बन्धेन दर्शनपदस्य लक्ष्यार्थो हि दर्शनशास्त्रमेव भवति। अपि च, दर्शनशास्त्रम् आत्मस्वरूपसाक्षात्कारसाधनं सत् मोक्षप्रतिपादकं भवति। अतो दर्शनशास्त्रमेव मोक्षशास्त्रमिति उररीकार्यम्।

आस्तिकनास्तिकदिशा भारतीयदर्शनं द्विधा प्रसिद्धम्। तत्र चार्वाकजैनबौद्धेति नाम्ना ख्यातानि नास्तिकदर्शनानि सन्ति। आस्तिकदर्शनानि च न्यायवैशेषिकसांख्ययोगमीमांसावेदान्तसंज्ञकानि। अत्रास्तिकत्वं नाम वेदप्रामाण्याङ्गीकर्तृत्वं नास्तिकत्वञ्च वेदप्रामाण्यानङ्गीकर्तृत्वं बोध्यम्। तथाह्युच्यते 'वेदप्रामाण्याभ्युपगन्तार आस्तिकाः तद्विपरीताश्च नास्तिकाः' इति। किञ्च, 'अस्ति वेदः प्रमाणम्' इति मतिर्येषां त आस्तिकाः, 'नास्ति वेदः प्रमाणमि'ति मतिर्येषां ते नास्तिका इति तद्व्युत्पत्तेः। आचार्यमनुनापि वेदनिन्दकत्वमास्तिकनास्तिकत्वे प्रपञ्चितम्। तदुक्तं तेन –

'योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः ।
स साधुभिर्वहिष्कार्यो नास्तिको वेदनिन्दकः॥'[१] इति ।

किञ्च, अस्ति भारतीयदर्शनस्य न्यायदर्शनं प्रवेशद्वारमिव। दर्शनस्यास्य ज्ञानमन्तरेण संस्कृतवाङ्मयस्योच्चतराणां ग्रन्थानां यथार्थतयावबोधोऽपि भवितुं नार्हति। अत उच्यते - 'न्यायशास्त्रं सर्वशास्त्रोपकारकम् ' इति ।

अपि च, निखिलदर्शनशास्त्रान्तर्गतस्य न्यायदर्शनस्याध्ययनं विना कस्यापि वाग्व्यवहारपाटव्यमपि नायाति। वेदोपनिषदादिशास्त्रेषु जीवानां परमपुरुषार्थरूपमोक्षलाभार्थं यदेवात्मादितत्त्वसाक्षात्कारः परमकर्तव्यतया उपदिष्टः तदेव तत्त्वं न्यायशास्त्रेऽपि किञ्चित् भिन्नतया प्रतिपादितत्वात् तस्य दर्शनशास्त्रत्वमभिव्यञ्जितम्। अतः न्यायदर्शनस्य महत्त्वं गुरुत्वञ्च अनस्वीकार्यम्।

निपूर्वकात् 'इण् गतौ' इत्यस्मात् धातोरुत्तरं करणवाच्ये 'हलश्च'[२] इति सूत्रानुसारं घञ्प्रत्यये नि+√इण्+घञ् इति स्थिते धातुप्रत्यययोरनुबन्धलोपे 'अचो

---

[१] मनुसंहिता - २/११

ञ्णिति'[३] इति सूत्रेण धातोः वृद्धौ ऐकारे 'एचोऽयवायावः'[४] इति सूत्रेण आयादेशे नि+आय इति स्थिते 'इको यणचि'[५] इति सूत्रेण सन्धिकार्ये यणादेशे न्याय इति शब्दनिष्पत्तिः। तेन नीयते प्राप्यते मोक्षो येनासौ न्यायः। अपि च, नीयते अधिगम्यते विवक्षितार्थसिद्धिः अनेनेति न्यायः। न्यायसूत्रभाष्यकारेण वात्स्यायनेन तु न्यायशब्दस्यार्थविषये निगदितं यत् 'प्रमाणैर्थपरीक्षणं न्यायः'[६] इति। तन्मते प्रत्यक्षागमाश्रितमनुमानम् अन्वीक्षा इत्युच्यते। तया अन्वीक्षया प्रवर्तितं शास्त्रम् आन्वीक्षिकी न्यायविद्या न्यायशास्त्रमित्युच्यते। किञ्च, प्रत्यक्षागमविरुद्धमनुमानं न्यायाभास उच्यते। तदुक्तं न्यायसूत्रभाष्यकारेण - 'कः पुनरयं न्यायः? प्रमाणैर्थपरीक्षणं न्यायः। प्रत्यक्षागमाश्रितमनुमानं साऽन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्याऽन्वीक्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी-न्यायविद्या-न्यायशास्त्रम्। यत् पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति'[७] इति। एतेन वक्तुं शक्यते यत् न्यायशास्त्रं हि अनुमानमूलकशास्त्रम्। तेनानुमानस्य कियन्महत्त्वं तत्प्रतीयते। किञ्च, आन्वीक्षिकीविद्यायाः (न्यायविद्याया अनुमानविद्याया वा ) उपकारिताविषये कौटिल्येनाभिमतं- 'बालाबले चैतासां हेतुमन्वीक्ष्यमाणा लोकस्योपकरोति , व्यसनेऽभ्युदये च बुद्धिमुपस्थापयति , प्रज्ञावाक्यक्रियावैशारद्यञ्च करोति '[८] इति। अपि चोक्तं तेन–

'प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।

---

[२] पा.सू.-३/३/१२१

[३] पा.सू.-७/२/११५

[४] पा.सू.-६/१/७८

[५] पा.सू.-६/१/७७

[६] न्या.भा.,न्या.द., (नारायणमिश्रसम्पादितम्), पृ-८

[७] तदेव

[८] कौ.अर्थ.,पृ-४७

आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।'[९] इति ।

किञ्च, वार्त्तिककारेण उद्द्योतकरेण *न्यायवार्त्तिके* न्यायस्य लक्षणमेवमुक्तं- 'समस्तप्रमाणव्यापारादर्थाधिगतिर्न्यायः'[१०]। अतः उद्द्योतकरमतेऽपि प्रमाणादर्थाधिगम एव न्यायः। परन्तु अत्रेदं बोद्धव्यं यत् प्रमाणैरर्थ-परीक्षणकाले प्रमाणानां सहायको भवति तर्कः। अत उक्तं प्रमाणानाम-नुग्राहकस्तर्कः। वरदराजेनापि *तार्किकरक्षायामुक्तं* - 'प्रत्यक्षादेः प्रमाणस्य तर्कोऽनुग्राहको भवेत्'[११]। उक्तञ्च *मानमेयोदयग्रन्थे* 'यतः प्रत्यक्षशब्दादि-प्रमाणान्यखिलान्यपि तर्कं विना न जीवन्ति प्रत्यक्षे तावदीक्ष्यताम्। तस्मात् सर्वप्रमाणानां तर्कोऽनुग्राहकः स्थितः।'[१२] इति। तेन च न्यायशब्दस्यायमेवार्थः पर्यवसितो भवति- तर्कानुग्रहेण प्रत्यक्षादिप्रमाणानि आधारीकृत्य केषाञ्चन सिद्धान्तानां परीक्षणं न्यायः। एतादृशस्य न्यायस्य यद्दर्शनमनुभवस्तदेव न्यायदर्शनं न्यायशास्त्रं न्यायविद्या वा। न्यायशास्त्रस्यास्य नामान्तराणि यथा आन्वीक्षिकी, न्यायविस्तरः, तर्कशास्त्रं, तर्कविद्या, हेतुशास्त्रं, हेतुविद्या, वादविद्या, प्रमाणशास्त्रम्, अनुमानशास्त्रं, नीतिशास्त्रं, वाकोवाक्यम्, तक्की, विंसीत्यादीनि। ननु न्यायशास्त्रस्य न्यायविद्यायाः वा कथमेतादृशं नामधेयत्वमिति जिज्ञासा क्रमेण अधस्तात् निरस्यते।

तथाहि अनु पश्चात् ईक्षणं मननं वेति अन्वीक्षणं शास्त्रानुसारं मननं वेत्यर्थः। तदुक्तं जयन्तभट्टेन *न्यायमञ्जर्यां*- ''प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षण-

---

[९] तदेव,पृ-४८

[१०]न्या.वा., न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३८

[११]ता.र.,पृ-१९३

[१२]मानमेयोदयः, पृ.-७१-७९

मन्वीक्षा अनुमानमित्यर्थः। तद्व्युत्पादकं शास्त्रमन्वीक्षिकम्"[१३] इति। भाष्येऽपि भाषितं भाष्यकारवात्स्यायनेन- "प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तते इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्"[१४] इति। मन्वादिशास्त्रेष्वपि न्यायशास्त्रस्य आन्वीक्षिकीनामधेयत्वं दरीदृश्यते। उक्तं हि *मनुसंहितायां* –

" त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिञ्च शाश्वतीम्।

आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भाश्च लोकतः।।"[१५] इति। तथाहि *श्रीमद्भागवस्य* तृतीयस्कन्धे दृश्यते –

"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च।

एवं व्याहृतश्चासन् प्रणवो ह्यस्य दहूतः ।।"[१६] इति ।

ऋषिर्याज्ञवल्क्यो हि *याज्ञवल्क्यसंहितायां* सुष्ठु राज्यशासनार्थं त्रय्यादिविद्याभिः सह आन्वीक्षिकीविद्याशिक्षार्थं राज्ञे उपदिदेश। कौटिल्यार्थ-शास्त्रेऽपि आन्वीक्षिकीविद्यायाः उल्लेखः प्राप्यते। *नैषधचरिते* दशमसर्गे आन्वीक्षिकी मोक्षोपयोगिशास्त्रतया उल्लिखिता। तदुक्तं *नैषधचरिते*- "आन्वीक्षिकीं यद्दशनद्विमालीं तां मुक्तिकामा कलितां प्रतीमः"[१७] इति। न केवलं मन्वादिशास्त्रेष्वपि तु *महाभारते*ऽपि न्यायशास्त्रस्य आन्वीक्षिकीनामधेयत्वं दरीदृश्यते। तथाहि *महाभारतस्य* शान्तिपर्वणि जनकयाज्ञवल्क्यसंवादे

---

[१३] न्या.म., पृ-९

[१४] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः) पृ-२८-२९

[१५]मनु., ७-४३

[१६]श्रीमद्भा.,तृ.स्क.

[१७]नै.च.(द.स.) श्लो.८२,पृ-४१३

एतन्मतसमर्थं वाक्यं परिलक्ष्यते- "श्रवणम् ईक्षा युक्तालोचनमन्वीक्षातत्प्रधाना-मान्वीक्षिकीं चतुर्थीं त्रयीं वार्तां दण्डनीतिञ्चापेक्ष्य" इति ।

न्यायसूत्रवृत्तिकारस्य आचार्यविश्वनाथस्य मते मन्वादिप्रोक्ता इयमान्वीक्षिकी न्याशास्त्रमेव। अस्याः आन्वीक्षिकीविद्यायाः महत्त्वविषये भाष्यकारेण भाषितमिदं वचः-

"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।।"[१८] इति ।

अनुरूपमेव *कौटिल्यार्थशास्त्रे* आन्वीक्षिकीविद्याया महत्त्वं प्रतिपादयन्नाह-

"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।"[१९] इति ।

अत्रेदं ज्ञेयं यत् कौटिल्येन *अर्थशास्त्रे* "सांख्यं योगः लोकायतञ्चेति आन्वीक्षिकी"[२०] इति आन्वीक्षिकीविद्यायाः यो भेदो दर्शितः तत्र लोकायतशब्देन न्यायशास्त्रमेव अधिगम्यते। आचार्यकौटिल्येनात्र आन्वीक्षिकीशब्देन सांख्ययोगयोरपि ग्रहणं कृतं, परं भाष्यकृता आदिमसूत्रभाष्ये केवलं न्यायशास्त्रमेव अधिगृहीतम्। अमरकोषेऽपि आन्वीक्षिकीशब्देन तर्कविद्यैव प्रतिपादिता। उक्तं हि-

"आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः।"[२१] इति।

---

[१८].न्या.द.,(सम्पा.फणिभूषणतर्कवागीशः) पृ-६०

[१९]कौ.अ.,पृ-४८

[२०]तदेव,पृ-४७

[२१]अ.को,पृ-३९

किञ्च, पुराणेषु तथा स्मृतिशास्त्रेषु न्याविद्येयं चतुर्दशविद्यासु परिगण्यते। तदुक्तं याज्ञवल्क्यसंहितायां-

“पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।”[२२] इति ।

न्यायमञ्जर्यामपि न्यायविद्यायाश्चतुर्दशविद्यासु उल्लेखो दृश्यते। तदुक्तम्–

“अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।

पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश।।”[२३] इति।

एवं महाभारतस्य शान्तिपर्वणि इन्द्रकाश्यपसंवादे यः आन्वीक्षिकीशब्दः प्रयुक्तस्तत्र आन्वीक्षिकीपदेन नास्तिकतर्कविद्या एव बोधिता। तदुक्तं महाभारतस्य शान्तिपर्वणि-

“आन्वीक्षिकी तर्कविद्यामनुरक्तो निरर्थिकाम् ।”[२४] इति ।

किन्तु अन्यत्र तु आन्वीक्षिकीपदेन आस्तिकतर्कविद्यैव बोधिता। अत एव राजशेखरसुरिणा आन्वीक्षिकीविद्यायाः भेदद्वयं कल्पितं काव्यमीमांसायाम् ।

तथा च, विष्णुपुराणेऽपि अष्टादशविद्यासु न्यायविद्यायाः उल्लेखो दृश्यते। परं तत्र न्यायविस्तरपदेन न्यायशब्दं न्यायविद्या वा गम्यते। तदुक्तं-

“अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।

पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दशः।।

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।

---

[२२]याज्ञ., १/३

[२३]न्या.म.,पृ-९

[२४]महा.,शान्ति.

अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव तु।।" इति।

इयम् आन्वीक्षिकी एव न्याय इति नाम्ना प्रसिद्धा। वात्स्यायनमते परार्थानुमितौ प्रयोज्यं प्रतिज्ञादिपञ्चावयवात्मकं वाक्यं न्यायः। अतः तत्प्रतिपादकं शास्त्रमपि न्यायशास्त्रम् ।

प्रमाणमूलकत्वान्न्यायशास्त्रस्यास्य प्रमाणशास्त्रमित्यभिधापि दृश्यते। ननु एवमभिधेयत्वे किं कारणम् ? तथाहि दर्शनशास्त्रस्य विषयविवेचनं तु द्विधा क्रियते। तद्धि लक्ष्यैकचक्षुषा लक्षणैकचक्षुषा चेति। तत्र ये तावद्दार्शनिकाः लक्ष्यैकचक्षुषा ते तु आदौ लक्ष्यं स्थिरीकृत्य तदनन्तरं तदनुरूपं लक्षणं कुर्वन्ति। यथा अद्वैतवेदान्तशास्त्रे वेदान्तिनः आदौ जीवब्रह्मणोः ऐक्यरूपलक्ष्यं स्थिरीकृत्य ततश्च तदपेक्षितानि प्रमाणानि सिद्धान्तान् चोपस्थापयन्ति। सांख्यिकाः मीमासकाः अपि लक्ष्यैकचक्षुषापर्यायाः। एवं ये तावद्दार्शनिकाः लक्षणैकाचक्षुषाः ते तु आदौ लक्षणं विनिर्माय तदनन्तरं तदनुसारि लक्ष्यं प्रतिस्थापयन्ति। यथा न्यायवैशेषिकादयः। अत एव नैयायिकाः स्वग्रन्थेषु प्रमेयानां पुष्टिं विधातुं प्रमाणानां महत्त्वं स्वीकुर्वन्ति। तेन प्रमाणानां महत्त्वात् प्रमाणमूलकत्वाद्वा तेषां शास्त्रं प्रमाणशास्त्रमिति सर्वे उररीकुर्वन्ति।

तथा च, न्यायशास्त्रमिदं तर्कविद्या तर्कशास्त्रं वेत्यपि कथ्यते। शास्त्रस्यास्य एतादृशनामकरणे किं बीजमिति चेदुच्यते – नैयायिकैः न्यायशास्त्रे मोक्षप्रतिपादकेषु षोडशपदार्थेषु तर्कनामकपदार्थोऽपि स्वीकृतः। न्यायशास्त्रे तत्तर्कपदार्थस्य लक्षणमेवं निगदितम्- "अविज्ञाततत्त्वेऽर्थे कारणोपपत्तिस्तत्त्व-ज्ञानार्थमुहस्तर्कः"[२५] इति। किन्तु तर्कभाषाकारस्य केशवमिश्रस्य तथा

[२५].न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-२७

तर्कसंग्रहकारस्य अन्नंभट्टस्य मते तु "तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः"[२६] इत्येवं प्रकारेण तर्कशब्दस्य व्युत्पत्तिदर्शनात् प्रतीयते यत् तर्कशब्देन तत्तच्छास्त्रप्रतिपाद्याः पदार्थाः अपि बोध्यन्ते। एवञ्च तर्कभाषायां तर्कशब्देन प्रमाणादिषोडशपदार्थानां बोधः, तच्छास्त्रे प्रमाणादिषोडशपदार्थानामेव प्रतिपादनात्। एवं तर्कसंग्रहेऽपि तर्कशब्देन द्रव्यगुणादयः सप्तपदार्थाः एव बोध्याः तच्छास्त्रे तेषामेव प्रतिपादनात्। एतेन निश्चीयते यत् तर्कशब्दस्य पदार्थात्मकत्वग्रहणात् तत्सम्बन्धिशास्त्रं तर्कशास्त्रमित्युच्यते। किञ्च, "सा एव विद्या या विमुक्तये" इति धिया न्यायशास्त्रस्य मोक्षजनकत्वात् मुक्तिप्रतिपादकत्वाच्च विद्यात्वं सिद्धम्। अत एव तस्य न्यायशास्त्रस्य तर्कविद्या इत्यपि समाख्या परिलक्ष्यते। तथा च, प्रमाणैः प्रमेयसिद्धिः तर्कनामकपदार्थं व्यतिरिच्य प्रायः न सम्भवति । किञ्च, संशयितस्यार्थस्य संशयनिरसनेऽपि तर्केण प्रयोजनमस्ति यतः तर्कानुगृहीतः न्यायः संशयितेऽर्थे एव प्रवर्तते। अत उक्तं भाष्यकारेण वात्स्यायनेन - "नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि संशयितेऽर्थे।"[२७] इति ।किञ्चात्राभिधेयं यत् तर्केणैव कस्याश्चित् समस्यायाः समाधानं सम्भवेत् अथवा तर्केणैव संशयानः स्वसंशयं दूरीकृत्य निर्णयं सिद्धान्तं वा उपगच्छति। एवमेव न्यायशास्त्रे तर्कस्य महत्त्वं गुरुत्वं च विचार्य न्यायशास्त्रस्य तर्कशास्त्रं तर्कविद्या वेति अभिधा उपन्यस्ता ।

अनुमानशास्त्रमिति न्यायशास्त्रस्याभिधानन्तरम्। सर्वैरेव भारतीय-दार्शनिकैः केवलं चार्वाकमृते प्रमेयसिद्धौ अनुमानप्रमाणमङ्गीकृतम्। किन्तु समेषामेव दार्शनिकसम्प्रदायानां शास्त्रमनुमानशास्त्रमिति नोच्यते , परं केवलं

---

[२६] तर्कसंग्रहः (सत्कारिशर्मासम्पादितः),पृ-१५-१६

[२७] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः)पृ-२७

न्यायशास्त्रमेवानुमानशास्त्रमित्युच्यते। अत्र कारणानुसन्धाने उच्यते यत् केवलं नैयायिकैरेव वेदस्य प्रामाण्ये अनुमानप्रमाणमुपस्थापितम् , अपरेषां मध्ये तु कैश्चिद् वेदस्य प्रामाण्यमेव नाङ्गीकृतं, कैश्चित्तु वेदस्य प्रामाण्ये स्वीकृतेऽपि तस्य प्रामाण्ये अनुमानप्रमाणं न प्रदर्शितं केवलं वेदार्थविचारे एव अनुमानप्रमाणं प्रदर्शितम्। तद्यथा बौद्धदार्शनिकैः वेदस्य प्रामाण्यमेव नाङ्गीकृतम्। किञ्च, सांख्ययोगैः स्वशास्त्रप्रतिपाद्यविषयान् प्रतिपादयितुम् अनुमानप्रमाणमुपकल्पितम्। मीमांसकैः स्मृतिशास्त्राणां प्रामाण्यकल्पे अनुमानं प्रदर्शितम्। वेदान्तिभिः उपनिषद्वचनानां प्रामाण्यकल्पे अनुमानं प्रदर्शितं, न तु वेदस्य प्रामाण्यकल्पे। अतो निश्चीयते यन्न्यायशास्त्रमनुमानशास्त्रमिति।

न्यायशास्त्रं हेतुशास्त्रं हेतुविद्या वेत्यप्युच्यते। शास्त्रमिदं हेतुप्राधान्यात् हेतुं विना किमपि तत्त्वं न प्रतिपाद्यते। अतस्तादृशनामकरणमिति अभ्युपेयम्।

वादशब्देनैव न्यायशास्त्रस्य प्रतिपाद्यत्वसंसूचनात् न्यायशास्त्रं वादशास्त्रतयापि उच्यते। अत एव वादलक्षणमुदीरितं न्यायसूत्रकारेण महर्षिगौतमेन -

"प्रमाणतर्कसाधनोपलम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः वादः"[२८] इति।

न्यायशास्त्रस्य वाकोवाक्यशास्त्रतयापि अभिधा प्राप्यते। तथाहि छान्दोग्योपनिषदि नारदोक्तं यत् वाकोवाक्यं पदं समुपलभ्यते तत्रापि वाकोवाक्यं तर्कशास्त्रमित्येवं तर्कशास्त्रतया व्याख्यातं शंकराचार्येण। तत्प्रसङ्गतोऽत्र नारदाभियुक्तिरपि प्रदीयते –

[२८] न्या.सू.-१/२/१

“ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम् ।
इतिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यां राशिं दैवं निधिं
वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां
नक्षत्रविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्येमि”[२१] इति।

योगशास्त्रमित्यपि न्यायशास्त्रस्याभिधानन्तरं दृश्यते। एवंविधे नामकरणे हेतुस्तावत् – जैनन्याये (*रत्नाकरावतारिकायां*) बहुत्र ‘अत्र योगः’ इत्येवं प्रकारेण केषाञ्चन मतवादाः उपस्थापिताः ये मतवादाः महर्षिपतञ्जलिप्रणीते योगशास्त्रे नोपलभ्यते परं न्यायवैशेषिकदर्शनयोस्तु एतादृशानां मतवादानां समर्थनं परिलक्ष्यते। अतः कल्प्यते प्राचीनाः न्यायशास्त्रार्थे योगशब्दस्य योगशास्त्रशब्दस्य वा प्रयोगं कुर्वन्ति स्म, तदनुसारञ्च न्यायमतावलम्बिनः योगाः यौगिकाः वेत्युच्यन्ते। किञ्च, योगबलेन महर्षिरक्षपादः षोडशपदार्थस्वरूपं विज्ञाय न्यायसूत्रं व्यरचि। महर्षिः कणादश्च द्रव्यादिपदार्थानां तत्त्वज्ञानं लब्ध्वा वैशेषिकसूत्राणि विरचयामास इति प्रसिद्धजनश्रुतिरपि दृश्यते। अत एव तादृशप्रसिद्धिवशात् न्यायमतावलम्बिनः यौगाः इत्यभिधीयन्ते।

तथा च, उभयदर्शने परमाणुकरणवादस्वीकारात् परमाणुद्वयसंयोगः एव सृष्टेः प्रथमं प्रधानञ्च कारणम्। अतो मन्ये नैयायिकाः न्यायमतालम्बिनो वा योगा इत्युच्यन्ते। एवमेव न्यायशास्त्रस्य पूर्वोक्तानि सर्वाण्येव नामधेयानि याथार्थ्यमुपगच्छन्ति।

न्यायशास्त्रस्य सामान्यतः स्तरत्रयं दृश्यते – प्राचीनस्तरः, मध्ययुगीयस्तरो नव्ययुगीयस्तरश्चेति। तत्र प्राचीनयुगीयस्तरस्तावत्

---

[२१]छा.उ.-७/१/२

ख्रीष्टपूर्वतृतीयशतकादारभ्य ख्रीष्टियनवमशतकस्य पूर्वार्धं यावत्। पण्डित-प्रवरस्यानन्तलालठाकुरमहाभागस्य मते स्तरेऽस्मिन् येषां ग्रन्थानां ग्रहणं व्यवस्थापितं तदनुसारमेव एतादृशं कालनिर्धारणं समुचितं मन्ये। तथाहि प्राचीनयुगीरस्तरेऽस्मिन् मूलग्रन्थरूपेण महर्षिगौतमप्रणीतस्य न्यायसूत्रस्य प्राधान्यं दृश्यते। ततश्च पारम्पर्येण तट्टीकादीनामिति ज्ञेयम्। किन्तु उदयनाचार्यः ख्रीष्टियैकादशशतके एव तात्पर्यपरिशुद्धिटीकां व्यरचि। अतः स प्राचीनयुगीयनैयायिको भवितुं नार्हति तथापि अत्र तस्य नामग्रहणं टीकाकर्तृपारम्पर्यात्।

मध्ययुगीयस्तर आसीत्सम्भवतः नवमशताब्द्याः उत्तरार्धादारभ्य गङ्गेशोपाध्यायात् प्राक्कालं यावत्। अर्थात् नवमशताब्द्याः उत्तरार्धादारभ्य द्वादशशतकं यावत्। स्तरेऽस्मिन् न्यायसूत्रोपरि भासर्वज्ञविरचितः न्यायसार एव मूलग्रन्थरूपेण आद्रियते। अपि च, स्तरेऽस्मिन् न्यायसूत्रोपरि निर्भरता, वैशेषिकदर्शनेन सह मतानैक्यं, न्यायभाष्यस्य समर्थनं, न्यायवार्तिकस्य चासमर्थनं दरीदृश्यते। किञ्च, अस्मिन्नेव स्तरे जयन्तभट्टस्य न्यायमञ्जरी तथा भासर्वज्ञस्य न्यायभूषणञ्च परिगण्येते।

नव्ययुगीयस्तरस्तु द्वादशशतकात् तत्त्वचिन्तामणिकारस्य आचार्यगङ्गेशोपाध्यायस्य कालादारभ्यते। स्तरेऽस्मिन् मणिकण्ठविरचितं न्यायरत्नं गङ्गेशोपाध्यायविरचिता तत्त्वचिन्तामणिश्चेति ग्रन्थद्वयमाद्रियते। किञ्च, स्तरेऽस्मिन् न्यायसूत्रस्यावमानना, वैशेषिकदर्शनस्य समर्थनं, प्राभाकरमीमांसकैः सह प्रतिद्वन्दिता च दरीदृश्यन्ते। वस्तुतस्तु तत्त्वचिन्तामणिरिति ग्रन्थरत्नात् न्यायदर्शनस्य नवीनो युगः प्रारब्धः। अमुमेव

ग्रन्थरत्नमधिकृत्य टीकाटीप्पण्यादिना न्यायशास्त्रस्य या नव्या धारा निःसृता प्रसृता च सैव नव्यन्यायपदेन लोके व्यपदिश्यते।

किञ्च, न्यायशास्त्रमिदं महर्षिगौतमैरुपसृष्टम्। महर्षिगौतमः 'अक्षपादः' इत्यपराभिधानेनापि लोकेऽभिधीयते। पाश्चात्यपण्डितस्य ज्याकोविमहोदयस्य मते न्यायसूत्राणां रचना ईशवीयद्वितीयपञ्चमशताब्द्योर्मध्ये जाता।[३०] किञ्च, न्यायसूत्रोपरि वात्स्यायनाचार्यकृतं *न्यायभाष्यं* परां प्रसिद्धिं गतम्। केषाञ्चन नये न्यायभाष्यस्य रचना ईशवीये चतुःशततमे वर्षे एवाभूत्। तत्रोपन्यस्तं सर्वं भाष्याकाराभिमतं बौद्धाचार्येण वसुबन्धुना दिङ्नागेन च स्वस्वकृतौ खण्डितम्। अतः उद्योतकरेण न्यायभाष्योपरि *न्यायवार्त्तिकमि*ति टीका रचिता यत्र वसुबन्धुदिङ्नागयोः संशयनिरसनं जातम्। उद्योतकरेण प्रायः षष्ठशताब्दोत्तरार्धसप्तमशताब्दपूर्वार्धयोर्मध्ये न्यायवार्त्तिकस्य रचना कृता इति केषाञ्चिन्मतम्।[३१] किन्तु तदपि वार्त्तिककाराभिमतं खण्डितं धर्मकीर्तिना स्वकृतौ। ततः वाचस्पतिमिश्रेण न्यायभाष्यवार्त्तिकोपरि *न्यायभाष्यवार्त्तिकतात्पर्यटीका* आटीकिता धर्मकीर्तेः मतञ्च खण्डितम्। अयमेव वाचस्पतिमिश्रः अद्वैतवेदान्ते शंकरभाष्यभामतीकाररूपेण, सांख्यदर्शने च सांख्यतत्त्वकौमुदीकाररूपेण च परां ख्यातिं प्राप्तः। अथ कालान्तरे वाचस्पतिमिश्राभिमतमपि खण्डितं बौद्धाचार्येण ज्ञानमिश्रेण स्वकृतौ। अयं वाचस्पतिमिश्रः ख्रीष्टियनवमशताब्द्याः पूर्वार्धे एव तात्पर्यटीकां विरचयामास। ततः तात्पर्यटीकोपरि उदयनाचार्येण *तात्पर्यपरिशुद्धि*नाम्नी टीका व्यरचि। तत्र तेन ज्ञानश्रीमिश्रस्याभिमतं खण्डितम्। इतःपरं वैदेशिकाक्रमणात् बौद्धप्रतिपक्षाणाम् उत्खातो जातः। पक्षप्रतिपक्षाभ्यां

[३०] Journal of the American Oriental Society, pp-2.12

[३१] A Primer of Indian Logic, Kuppu Swami, Introduction,P-XXX

तर्कविद्यापारम्पर्यमपि विनष्टम्। किञ्च, सम्प्रति उपलभ्यमानं न्यायसूत्रं कदा केन व्यरचि तद्विषये मतानैक्यं दृश्यते। केचन कथयन्ति यत् अक्षपाद एव सम्प्रति उपलभ्यमानस्य न्यायसूत्रस्य प्रणेता, गौतमस्तु न्यायशास्त्रस्य प्रवक्ता। कैश्चनोच्यते यत् मेथातिथिरेव न्यायसूत्रस्य रचयिता। तेषामेतादृशयुक्त्युपस्थापने युक्तिर्हि महाकविभासस्य प्रतिमानाटके उपन्यस्तं वचः। महाकविभासस्य प्रतिमानाटके दृश्यते यत् राक्षसराजो रावणः सीतादेवीसकाशे न्यायशास्त्रे मेधातिथेः छात्ररूपेण आत्मपरिचयं ददन् कथयति- "भोः काश्यपगोत्रोऽस्मि। साङ्गोपाङ्गं वेदमधीये, मानवीयं धर्मशास्त्रं, माहेश्वरं योगशास्त्रं, वार्हस्पत्यमर्थशास्त्रं, मेथातिथेर्न्यायशास्त्रं प्राचेतसं श्राद्धकल्पञ्च।"[३२] इति।अत्रायमाशयो यत् सुरेन्द्रनाथदाशगुप्तमहाभागानां मते अक्षपाद एव न्यायसूत्रस्य प्रणेता कर्ता वा, न गौतमः, न वा मेधातिथिरिति।

न्यायसूत्ररचयिताविषये मतानैक्ये मुख्यं कारणं खलु अक्षपादगौतमयोः निवासस्थलम्। रामायणानुसारं सीतास्वयम्बरगमनकाले रामचन्द्रः ऋषिगौतमस्याश्रमं गतवान्। तत्र गत्वा च तेन गौतमपत्नीमहल्यां ररक्ष। एतेन प्रतीयते महर्षिगौतमस्याश्रमः मिथिलायाः सन्निकटे एव स्यात्। अपि च, अधुना 'द्वारभाङ्गा' इति स्थानात् पूर्वोत्तरस्यां दिशि प्रायः अष्टाविंशतिक्रोशात्मके दूरे गौतमस्थाननामकं किञ्चित् प्रसिद्धस्थानं वर्तते, यत्र गौतमकुण्डनामकः कश्चित् जलाशयोऽपि वर्तते। तथा च, तत्र प्रतिवत्सरं चैत्रनवमीतिथौ गौतमस्मरणार्थं जनसमारोहो भवति। सर्वमेतद्विचार्य वक्तुं शक्यते यद् गौतमस्य निवासस्थलं मिथिलायाः सन्निकटे एव स्यात्। किन्तु ब्रह्माण्डपुराणानुसारमक्षपादस्य

[३२]प्रतिमा,(प.अं.)पृ-१३७

निवासस्थानं प्रभासयत्तनं काठियावाडमेव स्यात्।[३३] अत एव एतयोर्निवासस्थलयोर्मध्ये ऐक्यं तु असम्भवमेव। अतो वरं मेधातिथिगौतमयोः अभिन्नत्वं समधिकं युक्तिग्राह्यं लोकपरम्परया पुराणादिसम्मतकथया। महाभारतस्य शान्तिपर्वणि अपि एतयोरभिन्नत्वं प्रदर्शितम्। तथा च, आचार्यविश्वश्वरेण गौतमाक्षपादयोः निवासस्थलमूलकसमस्यायाः समाधनं स्वसम्पादितायाः तर्कभाषायाः भूमिकायां कथञ्चित् आलिखितम्। तन्नये न्यायशास्त्रस्य क्रमविकाशे उभयोरेव गौतमाक्षपादयोः महत्त्वं वर्तते इति तु निश्चप्रचम्, नात्र संशयलेशः। प्राचीनन्यायस्य विकाशे तु अध्यात्मप्रधानयुगः तर्कप्रधानयुगश्चेति युगद्वयमेव स्पष्टं प्रतीयते। एतयोर्मध्ये अध्यात्मप्रधानयुगस्य अर्थात् प्रमेयप्रधानयुगस्य साध्यप्रधानयुगस्य वा निर्माता गौतमः। तर्कप्रधानयुगस्य अर्थात् प्रमाणप्रधानयुगस्य निर्माता तु अक्षपाद एव। यद्यप्यधुना प्रमेयशब्दस्य स्थाने प्रामाण्यशब्दस्य प्रयोगः अधिकयुक्तिप्रदः। एतत्तु अक्षपादकृतस्य प्रतिसंस्कारस्यैव फलम्। एतेन प्रतीयते यत् इतः प्राक् गौतमस्य न्यायशास्त्रम् उपनिषदादिवत् अध्यात्मविद्याप्रतिपादकशास्त्ररूपेण परिगण्यते स्म। तस्मादुपनिषदादितः पृथक्करणार्थमेव अक्षपादेन प्रमाणप्रधानशास्त्रतया न्यायशास्त्रमिदं प्रतिसंस्कृतम्। एवमेव प्राचीनन्यायस्य निर्माणं गौतमाक्षपादयोरुभयोरेव सम्मिलितप्रयासस्य फलमित्यभ्युपेयम्।

मतान्तरे गौतमप्रणीतस्य न्यायशास्त्रस्य प्रतिसंस्कारः न्यायसूत्रे आचार्येणाक्षपादेनैव कृतः। अतः सम्प्रत्युपलभ्यमानं न्यायसूत्रमक्षपादेनैव कृतमिति कथने नासङ्गतिः स्यात्। अपि च, एतदपि सत्यं यत् गौतमात् पूर्वमपि

---

[३३] ब्रह्माण्ड.पु.स.-२३

तर्कशास्त्रम् आसीदेव, इदानीन्तु न दृश्यते सम्प्रदायस्य अनादित्वात्। अत उक्तं मनुना–

"आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।"[३४] इति ।

किञ्च, भाष्यकारादिभिरपि अक्षपादसंस्कृतं न्यायशास्त्रमधिकृत्यैव भाष्यादिकं प्रणीतम्, अत्र तु तेषां वचनमेव प्रमाणम्। तथाहि भाष्यकारेण वात्स्यायनेन अक्षपादस्य न्यायसूत्रकर्तृत्वं स्वीकृत्य न्यायभाष्यान्ते निगदितं-

"योऽक्षपादमृषिं न्यायः प्रत्यभाद् वदतां वरम्।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत्।।"[३५] इति।

वार्त्तिकारेणोद्योतकरेण चापि अक्षपादस्य न्यायसूत्रकर्तृत्वमङ्गीकृत्य *न्यायवार्त्तिका*दौ उक्तं –

"यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।
कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः।।"[३६] इति।

वाचस्पतिमिश्रेणापि अक्षपादस्य न्यायसूत्रकर्तृत्वं स्वीकृत्य *तात्पर्यटीकायां* गदितम्–

"अथ भगवताक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते, व्युत्पादिते च भगवता पक्षिलस्वामिना, किमपरमवशिष्यते यदर्थं वार्तिकारम्भ इति शङ्कां

---

[34] मनु.सं.-१२/१०६

[35] न्या.भा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१२००

[36] न्या.वा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-१

निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादपूर्वकं वार्त्तिकारम्भप्रयोजनं दर्शयति – यदक्षपाद इति।''[३७] इति ।

अपि च, तेन *तात्पर्यटीकायां* मङ्गलाचरणेऽपि अक्षपादस्यैव नाम उच्चारितं न तु गौतमस्य–

''नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने।
निधये वाग्विशुद्धीनामक्षपादाय तायिने।।
ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा।
न्यायवार्तिकतात्पर्यटीकास्माभिर्विधास्यते।।''[३८] इति ।

किं बहुना, *तात्पर्यपरिशुद्धि*टीकायामपि महर्षेरक्षपादस्य न्यायसूत्रकर्तृत्वं स्वीकृतम्। अपि च, *तार्किकरक्षायां* वरदराजेन 'अक्षचरणपक्षिलमुनिप्रभृतयो वर्णयन्ति'[३९] इति। तट्टीकायां मल्लिनाथेनापि निगदितम् - 'अक्षचरणपक्षिलौ सूत्रभाष्यकारौ' इति। एवं न्यायसूत्रकृद्भिरेव साक्षात् यत्र अक्षपादस्य न्यायसूत्रकर्तृत्वं वारं वारमुद्घोषितं, न क्वचित् गौतमस्य नामोल्लिखितम्।

अपि च, तन्न्यायसूत्रम् अष्टविंशत्युत्तरपञ्चशतसूत्रैरुपनिबद्धम्। सूत्रञ्च –

'अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।'[४०] इति ।

---

[३७]न्या.वा.,तात्,न्या,द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-१

[३८]तत्रैव

[३९]ता.र,.अ.-१,पृ-२

[४०] पराशरोपपुराणम्

अतः सूत्रोपनिबद्धन्यायशास्त्रावबोधने अस्मदीयानां स्वल्पमतीनां सकाशे दुष्करमेव। तेन एतच्च शास्त्रमस्माकं समीपे मरुतुल्यम्। तेन अर्थज्ञानरूपजलाभावात् पिपासूनां पाठकानां शास्त्रस्यास्याध्ययनेऽपि स्वरसो न दृश्यते। अत एतद् दूरुहं महामूल्यञ्च शास्त्रमधिगन्तुं केनापि सहायकेन प्रयोजनमस्ति। यद्द्वारा अस्माकं ग्रन्थार्थोऽवगतो भविष्यति तथा ग्रन्थेषु अस्माकमनायासेनैव प्रवेशः स्यात्। तद्धि टीका एव। टीकया एवास्माकं ग्रन्थार्थोऽवगतो भवति, अपि च ग्रन्थेषु प्रवेशोऽपि सुलभो भवत्यस्माकम्। अत उक्तं टीकास्वरूपविषये शब्दकल्पद्रुमे - 'टीक्यते गम्यते प्रविश्यते ज्ञायते वानया' इति। उक्तञ्च वाचस्पत्ये - 'टीक्यते गम्यते ग्रन्थार्थोऽनया' इति। किन्तु टीकाकारैस्तु अत्र मरुतुल्यं शास्त्रमिदं स्वप्रतिभावैदुष्येण अर्थज्ञानरूपजलं निष्काष्य पाठकानां स्वरसः सम्भावितः।

तत्र प्रथमतो न्यायसूत्राणि व्याख्यातुकामो महर्षिवात्स्यायनो भाष्यरूपेण न्यायसूत्राणि व्याख्यापयामास। परं भाष्यमिदं नैकानां स्वल्पधीमतां पाठकानां सकाशे दुर्बोध्यमासीत्। अत एतद्भाष्योपरि उद्द्योतकरेण व्याख्या कृता न्यायवार्त्तिकरूपेण। एवं न्यायवार्त्तिकोपरि वाचस्पतिमिश्रेन व्याख्या कृता न्यायवार्त्तिकतात्पर्यटीकारूपेण, अस्याः टीकायाः टीका तु महानैयायिकेनोदयनाचार्येण रचिता *न्यायवार्त्तिकतात्पर्यपरिशुद्धि*नाम्ना। किञ्च, न्यायसूत्रमाधारीकृत्य आचार्यविश्वनाथन्यायपञ्चननेन *न्यायसूत्रवृत्तिः* रचिता।

अस्य न्यायदर्शनस्य व्याख्याधारा सरणिद्वयमवलम्ब्य प्रवहति। तत्र भाष्य-वार्त्तिक-तात्पर्यटीका-परिशुद्धिरूपैका धारा या खलु नैयायिकेषु 'चतुर्ग्रन्थिका' - नाम्ना प्रसिद्धा। इयं व्याख्याधारा विचारविस्तरेण शास्त्रस्यागाधं

गाम्भीर्यविपुलं विद्योतयन्ती सम्प्रदायसम्मतान् सिद्धान्तान् सर्वतोभावेन परिरक्षति प्रतिपक्षिणां मतानि सयुक्ति निराकुरुते च। व्याख्योपव्याख्याभिः प्रतिपक्षिभिः बौद्धदार्शनिकैराक्षिप्तानां समाधानैः समुपवृंतेयं चतुर्ग्रन्थिका शास्त्रस्याभिवृद्धये सुचिरादेव कल्प्यते।

अपरस्यां सरणौ प्रवर्तमाना धारा तु न्यायसूत्रवृत्तिनाम्ना परिचितास्ति। अत्र धारया विश्वनाथन्यायपञ्चाननादिमहाभागानां न्यायसूत्रवृत्त्यादयः एव गृह्यन्ते। प्रायः सूत्राभिप्रायाणां संक्षेपेण बोधनाय वृत्तिस्तद्विद्भिः प्रणीयते। अत्र शास्त्रस्य सिद्धान्ताः सूत्राणां तात्पर्यञ्च साधु प्रकाशन्ते। न्यायदर्शनस्य प्राचीनयुगाद् आरभ्य नव्ययुगपर्यन्तम् एतत् व्याख्याधाराद्वयं प्रचलदस्ति।

यद्यपि न्यायसूत्रोपरिरचितटीकानां भाष्य-वार्त्तिक-तात्पर्य-वृत्तिप्रभृतीनां व्याख्या अनेकत्र दृश्यते, परं टीकानामेकत्र विचारमूलकं निबन्धं न दृश्यते। अत्र निबन्धे मया विशेषतः न्यायसूत्राणामर्थावबोधने व्याख्यां कुर्वद्भ्यां न्यायभाष्यकारन्यायसूत्रवृत्तिकाराभ्यां यत्सारल्यं प्रदर्शितं तथा कुत्र कुत्र स्वकीयमतमुपस्थापितं तथा कुत्र कुत्र अधिकतया विचारः कृतः, कुत्र च मतविरोधो दृश्यते इत्येवं तयोः टीकयोः वैलक्षण्यतात्पर्यं वितन्यते। किञ्च, स्थलविशेषे प्रसङ्गात् *वार्त्तिक-तात्पर्या*दिटीकानामपि वैलक्षण्यं पर्यालोकयितम्। अपि च, *न्यायमञ्जरी*कारस्याचार्यजयन्तभट्टस्यापि मतं स्थानविशेषे पर्यालोचितम्।

यद्युच्यते न्यायभाष्यविषये तथा न्यायसूत्रवृत्तिविषये बहवो ग्रन्थाः समुपलभ्यन्ते तर्हि कथं पुनः अनयोर्व्याख्याने प्रवृत्तिरिति पृष्टस्य पेषणं मृतस्य मरणं यथा इति चेन्न, तत्र उभयोः टीकयोः पृथक् पृथक् पर्यालोचनं दृश्यते किन्तु

उभयोर्वैलक्षण्यविषये कोऽपि ग्रन्थो नोपलभ्यते। अतः टीकयोरुभयोः वैलक्षण्यं विस्तरशः प्रतिपादयितुं ममैष प्रयासः। किञ्च, भविष्यति गवेषकाणां कृतेऽपि मद्गवेषणापत्रं सहायकं भवेदिति मन्ये।

किञ्च, दशाह्निकसमन्वितपञ्चाध्यायात्मकं न्यायसूत्रमवलम्ब्य विरचितं *न्यायभाष्यं न्यायसूत्रवृत्तिः* च तादृशकायविशिष्टम्। किञ्च, न्यायभाष्यन्यायसूत्रवृत्त्योः भाषागतकाठिन्यं तथा दुर्बोध्यत्वं सर्वैरेव विद्वद्भिर्विदितमेव। अतः प्रत्येकसूत्रमाधारीकृत्य अनयोः टीकाग्रन्थयोः सम्पूर्णतः पर्यालोचनं नितरां दुःसाध्यमेव। अतो न्यायदर्शनस्य मुख्यसूत्राणां यत्र यत्र न्यायभाष्यतः न्यायसूत्रवृत्तेर्वैलक्षण्यमाचक्षते ते एव विषयाः मद्गवेषणापत्रे विशदतया पर्यालोचिताः। किञ्च, न्यायदर्शनस्य सुदीर्घकायत्वाद् अत्र केवलं प्रथमाध्यायमाश्रित्यैव न्यायभाष्यन्यायसूत्रवृत्त्योर्वैलक्षण्यमुपवर्ण्यते, पक्षान्तरे तु न्यायदर्शनस्य षोडश पदार्था अपि प्रतिपादिताः भविष्यन्ति। किञ्च, प्रसङ्गात्तु न्यायदर्शनस्य सूत्रान्तराणामालोचना विहिता।

# ।।द्वितीयोऽध्यायः।।

## भाष्यकारस्य वात्स्यायनस्य परिचयः कृतिश्च

महर्षिणा अक्षपादेन विरचितस्य न्यायसूत्रस्य भाष्यं विरचितं वात्स्यायनेन इति निर्विवादभणितिरस्ति पण्डितसमाजे। किन्तु भाष्यकारस्य प्रकृतः परिचयः अद्यापि सम्यक्तया कुत्रापि न प्राप्यते। तस्य प्रकृतं नाम किमासीदित्येतद्विषये विपश्चितां मतवैभिन्न्यं परिलक्ष्यते। किञ्च, स कदा कुत्र जनिं लेभे तद्विषयेऽपि प्रायः सम्यक्तया वक्तुं न शक्यते। तस्य जनिकालविषये यत्किञ्चित् तत्त्वं विविधशास्त्रेषु प्राप्यते तत्तु सर्वमनुमीयते। अतः प्रस्तुताध्याये आदौ भाष्यकारस्य नामवैभिन्न्येऽपि प्रकृतनामधेयत्वं प्रस्तूय तस्य जन्मकालविषये सम्भाव्यं मतं यथामति उपस्थापयिष्यामि।

विविधनामसत्त्वेऽपि भाष्यकारस्य वात्स्यायन इति नाम एव अधिकव्यवहारप्रदो दृश्यते वात्स्यगोत्रसम्भूतत्वात्। तस्य सांसारिकनाम आसीत् मल्लनागः। एवं क्वचित्तस्य पक्षिलस्वामीति संज्ञा, क्वचित् पक्षिलमुनिः, क्वचित् केवलं पक्षिल इति, क्वचिच्च कौटिल्येन तस्य सायुज्यं कल्पयित्वा तस्य कौटिल्यः, चाणक्यः, विष्णुगुप्तश्चेत्यादि नामधेयत्वमपि उररीकृतम्। अत एव *अभिधानचिन्तामणौ* हैमचन्द्रसूनिणा निगदितं-

"वात्स्यायनो मल्लनागः कौटिल्यश्चणकात्मजः।

द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः।।"[४१] इति।

---

[४१]अभि.चि.,मर्त्य.,पृ-५१८

पुनश्च हेमचन्द्रसुरिणा अभिधानचिन्तामणौ वात्स्यायनस्य यानि अष्टौ नामानि उल्लिखितानि, तेषु द्रामिलः अङ्गुलश्चेति नामद्वयस्याप्रसिद्धत्वात् तद् भाष्यकारस्य वात्स्यायनस्यैव वचनात् एतत् निश्चप्रचमेव वक्तुं शक्यते यद् वात्स्यायनः पक्षिलस्वामी पक्षिलमुनिर्वा समान एव जनः, यस्य न्यायभाष्यकर्तृत्वं निर्विवादं स्वीक्रियते सर्वैः दार्शनिकैः। एवञ्चान्यत्रापि पक्षिलस्वामिनो वात्स्यायनस्य न्यायभाष्यकर्तृत्वं संसूच्यते। तदुक्तं श्रीवाचस्पतिमिश्रेण- “अथ भगवता अक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते व्याख्याते च भगवता पक्षिलस्वामिना किमपरमवशिष्यते यदर्थे वार्त्तिकारम्भ इति शङ्कां निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादपूर्वकं वार्त्तिकारम्भप्रयोजनं दर्शयति”[४२] इति। विषयेऽस्मिन् श्रीमाधवाचार्यस्याभिप्रायो हि- “पक्षिलस्वामिना च सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैर्विभज्यमाना” इति।

*न्यायवार्तिकतात्पर्यटीकाया*माचार्यवाचस्पतिमिश्रेण उपमानसूत्रस्य भाष्यव्याख्याप्रसङ्गे तथा *तार्किकरक्षायां* वरदराजेन उपमानव्याख्यायां ‘भगवान् भाष्यकारः’ इत्युक्तम्। तेन प्रतीयते यद् उद्योतकरादिभिराचार्यैः भाष्यकारः अक्षपादप्रतिमः, भगवान्, पक्षिलमुनिः, पक्षिलस्वामी इत्यादिभिः संज्ञाभिरभिहितः आसीत्। अत्र एतदपि प्रतीयते यद् अक्षपादप्रतिमः, भगवान्, मुनिः स्वामी चेति अभिधा तस्य नाम्नः विशेषत्वेन उपनाम्ना स्थले स्थले व्यवहृता, तस्य प्रकृतं नाम तु मन्ये पक्षिल इत्येवासीत्। तस्यैतादृशविशेषत्वे सम्भाव्यं कारणं हि तस्य ऋषित्वं तपःप्रभावसम्पन्नत्वं वा। तथाहि अक्षपादर्षितुल्यत्वात्तस्याक्षपादप्रतिम इति संज्ञा, तस्य भगवदादिसंज्ञापि ऋषितुल्यत्वात्।

---

[४२]न्या.वा.तात्,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१-२

किञ्च, योगवशिष्टरामायणस्य वैराग्यप्रकरणे अन्तिमभागे वर्णितेषु मुनिषु वात्स्यायनस्य नामोल्लिखितं दृश्यते। आचार्यवाचस्पतिमिश्रेण भाष्यकारस्य पक्षिलस्वामीति संज्ञा स्वीकृता। *तार्किकरक्षायां* वरदराजेन तथा तट्टीकायां मल्लिनाथेन भाष्यकारस्य पक्षिलमुनिरिति नामधेयत्वं स्वीकृतम्। तदुक्तं वरदराजेन - 'अक्षचरणपक्षिलमुनिप्रभृतयो वर्णयन्ति'[४३] इति। तारानाथतर्कवाचस्पतिमते पक्षिलशब्दस्यार्थो हि 'गौतमसूत्रभाष्यकारः मुनिविशेषः' इति। किञ्च, तेन वात्स्यायनभाष्यमपि 'वात्स्यायनमुनिकृतं भाष्यम्' इति नाम्नाभिहितम्। दयानन्दस्वामिना तस्य 'ऋग्वेदादिभाष्यभूमिका' इति ग्रन्थे न्यायभाष्यकारो वात्स्यायनमुनिरासीदित्यभिहितम्।[४४] आचार्येणोद्योतकरेण न्यायवार्त्तिकान्ते भाष्यकारः वात्स्यायनः 'अक्षपादप्रतीमः' इत्यभिधयाभिहितः।[४५]

भाष्यकारेण सहार्थशास्त्रकारस्य कौटिल्यस्य सायुज्यं कल्पयित्वा केचन विद्वांसः प्राहुर्यत् कौटिल्य एव न्यायभाष्यकार इति। परं तेषां मते न युक्तिग्राह्यम्। कथमिति चेदुच्यते यत् पक्षिलस्वामी वात्स्यायनो वा कौटिल्यस्य नामान्तरमासीदिति प्रमाणद्वारा प्रतिपादयितुं शक्यते चेत् कौटिल्यो न्यायभाष्यकार आसीदित्यपि वक्तुमलम्। एवं कौटिल्यस्य न्यायभाष्यकर्तृत्वं, चाणक्यस्य विष्णुगुप्तस्यापि न्यायभाष्यकर्तृत्वं प्रतिस्थापितं भवेत् समानपुरुषात्। किन्तु भाष्यकारेण सह कौटिल्यस्य सायुज्यकल्पनं प्रायः असम्भवमेव। ननु तयोः सायुज्यकल्पनं कथमसम्भवम् ? अत्रोच्यते– केचन विद्वांसः मन्यन्ते यत्

---

[४३]ता.र.,अ.-१,पृ-२

[४४]ऋ.वे.भा.भू,पृ-१६

[४५]यदक्षपादप्रतीमो भाष्यं वात्स्यायनो जगौ ।
अकारि महतस्तस्य भरद्वाजेन वार्त्तिकम् ।।(सम्पा.अनन्तलालठाकुरः,न्या.वा.,पृ-५३०)

कौटिल्येनार्थशास्त्रस्य विद्योद्देशप्रकरणे आन्वीक्षिकीविद्यायाः प्रशंसायां यदुक्तं भाष्यकारेणापि चतुर्थचरणं विहायानुरूपमेवोक्तम्।[४६]

न्यायभाष्यस्य चतुर्थप्रकरणं दृष्ट्वा विद्वांसः चिन्तयन्ति यद् भाष्यकारकृतार्थशास्त्रस्य विद्योद्देशे विद्योद्देशप्रकरणे आन्वीक्षिकी विद्या प्रकीर्तिता। अतस्तेषां मते भाष्यकारस्तथा कौटिल्यः समान एव पुरुषः। अपि च, कौटिल्येनार्थशास्त्रान्ते यः शास्त्रोद्धरणप्रसङ्गः उपस्थापितस्तेन तु न्यायशास्त्रोद्धरणमेव गम्यते। तथाहि प्राप्यते –

येन शास्त्रञ्च शस्त्रञ्च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।[४७] इति।

परन्तु एतेन भाष्यकारकौटिल्ययोः समानकर्तृत्वं न सङ्गच्छते, 'विद्योद्देशे प्रकीर्तिता' इति कथनात् न्यायभाष्यापेक्षया अर्थशास्त्रस्य प्राक्प्रणयनत्वं संगच्छते, तस्य प्रणयनत्वाच्च तत्र न्यायशास्त्रोद्धरणप्रसङ्गः अप्रामाणिकः स्यात् तदापि अकरणात्। अतः परस्परयोर्वचनविरोधात् तयोः सायुज्यकल्पनमसम्भवम्। सायुज्यकल्पनासम्भवाच्च तयोः समानकर्तृत्वमपि व्याहन्यते।

अपि चात्र एतदपि वक्तुमलं यत् कौटिल्यः न्यायभाष्यं विरच्य पूर्वोक्तश्लोकेन यदि आन्वीक्षिकीविद्यां कीर्तयितुमिच्छेत् तर्हि अवश्यमेव तेन 'विद्योद्देशे प्रकीर्तिता' इति अस्पष्टमनुक्त्वा स्पष्टतया 'अर्थशास्त्रे प्रकीर्तिता' इत्येवं कथयेत्। परन्तु तेन तन्न कृतम्। अपि च, अथवा 'विद्योद्देशे' इति पदं यदि

---

[४६] प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ।। (तारा, न्या.द.(भाष्ये),पृ-६४)
[४७] कौ.अ.अधि-१५,प्र.-१८०,श्लो.-७३,पृ-२८३

अर्थशास्त्रस्य विद्योद्देशप्रकरणार्थे बहुविदितं स्यात् तर्हि 'विद्योद्देशे' इत्युक्ते पण्डितानाम् 'अर्थशास्त्रस्य विद्योद्देशप्रकरणे' इत्येवार्थबोधो जायते। किन्तु उद्योतकरादीनां पण्डितानां वचसि तादृशः अर्थबोधः न भवति। वस्तुतस्तु न्यायभाष्यकारेणादौ'सेयमान्वीक्षिकी' इत्युक्त्वा पूर्वोक्तश्लोकस्य चतुर्थप्रकरणे 'विद्योद्देशे प्रकीर्तिता' इत्युक्तम्। तेन ज्ञायते यत् 'विद्योद्देशे' अर्थात् त्रय्यादिचतुर्विधविद्यानाम् उद्देशस्थले आन्वीक्षिकीविद्या प्रकीर्तिता। इयमान्वीक्षिकी विद्यैव शास्त्रोक्तचतुर्विधविद्यासु चतुर्थी विद्या। न्यायमञ्जरीकारस्य जयन्तभट्टस्यापि अनुरूपमभिप्रायः। अत एव तेन न्यायमञ्जर्यां भाष्यकारमतोपस्थापनकाले तस्यैव श्लोकस्य चतुर्थे चरणे 'विद्योद्देशे प्रकीर्तिता' इति अनुक्त्वा 'विद्योद्देशे परीक्षिता' इत्युक्तम्।[४८] अर्थशास्त्रस्यान्ते कौटिल्येन शास्त्रोद्धरणं, नन्दराज्योद्धरणमिति यदुक्तं तेन तु एतत् कथमपि न प्रतीयते यत् न्यायसूत्रभाष्यं तेनैव विरचितम् । श्लोकेऽस्मिन् मन्ये स एतदेव वक्तुकाम आसीत् यत् विविधशास्त्रेभ्यः उद्धृतं राजनीतिसमुच्चयमेव शास्त्रोद्धरणं नन्दराज्योद्धरणं वा। एवं शास्त्रोद्धरणात् नन्दराज्योद्धरणाद्वा परं तेन अर्थशास्त्रं व्यरचि। अर्थशास्त्रमध्ये कौटिल्यस्य नामोल्लेखो दृश्यते, अर्थशास्त्रान्ते विष्णुगुप्तस्य च परिचयः प्राप्यते। किञ्च ऐतिहासिकतथ्यानुसारं विष्णुगुप्त एव कौटिल्यः, चाणक्यस्तस्य नामान्तरं , तेनैव मौर्यवंशस्य (गुप्त) उद्धरणं जातम्। मन्ये तदेव तथ्यं परिवेशितमर्थशास्त्रान्ते। अत्र बोध्यं यत् कौटिल्यो यदि न्यायसूत्रभाष्यकारो भवेत् तर्हि अवश्यमर्थशास्त्रे तस्य वात्स्यायननामधेयत्वमुल्लिखितं स्यात्। अथवा न्यायभाष्ये कुत्रचिदवश्यमेव तस्य कौटिल्य इति नामोल्लिखितं स्यात्। अथवा उद्योतकरादयः अवश्यमेव तस्य कौटिल्य इति सुप्रसिद्धनाम्नः उल्लेखं कुर्युः। परन्तु

[४८] न्या.म.,पृ-१८

नापि कुत्रचित् स्थले कौटिल्यस्य वात्स्यायनरूपेण परिचयः प्राप्यते, नापि कुत्रचित् स्थले उद्योतकरादिभिराचार्यैः एतादृशसुप्रसिद्धनाम्नः उल्लेखः कृतः। किन्तु एकस्मिन्नेव अर्थशास्त्रे क्वचित् कौटिल्यस्य ग्रन्थकर्तृत्वं प्रतीयते क्वचित्तु शास्त्रान्ते विष्णुगुप्तस्य ग्रन्थकर्तृत्वं प्रतीयते। एतेन ज्ञायते यत् कौटिल्यस्तथा विष्णुगुप्तः समान एव पुरुषः।

किञ्चार्थशास्त्रस्यान्ते विष्णुगुप्तस्य यः परिचः प्राप्यते तत्र तु स एक एव पुरुषः सूत्रकर्तृत्वेन भाष्यकर्तृत्वेन चोक्तः-

"दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं भाष्यञ्च।।"[४९] इति।

स च जनः न न्यायसूत्रकारो भवितुमर्हति महर्षिगौतमस्याक्षपादस्य वा न्यायसूत्रकर्तृत्वेन प्रसिद्धात्, न वा न्यायभाष्यकारो भवितुमर्हति एकत्र तस्योभयकर्तृत्वकथनात्। अत्रार्थशास्त्रस्य सूत्रकर्तृत्वेन भाष्यकर्तृत्वेन च स व्याख्यातः। अतः निश्चीयते यत् विष्णुगुप्तः भाष्यकारो वात्स्यायनो भवितुं नार्हति। एवं कौटिल्योऽपि न, नापि चणकात्मजः, चाणक्यः कौटिल्यस्य नामान्तरात्। अतः वात्स्यायनः पक्षिलस्वामी वा एव न्यायभाष्यकारो, नात्र संशयः।[५०] किन्तु तारानाथतर्कतीर्थमहोदयेनोक्तं यद् अयं श्लोकः सर्वेषु पाण्डुलिपिषु नोपलभ्यते।[५१]

अत्रैकः प्रश्नो जायते यद् वात्स्यायनो यदि न्यायभाष्यकारः तर्हि कामसूत्रकारः वात्स्यायन एव स आसीदिति वक्तुमलं न वेति ? अत्रेदमुत्तरं- न,

---

[४९] कौ.अ.(ग्रन्थान्ते) पृ-२८३

[५०] 'योऽक्षपादमृषिं न्यायः प्रत्यभाद् वदतां वरम् ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ।।' इति। (न्या.भा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१२००)

[५१] तत्रैव

कामसूत्रकारः वात्स्यायनः न्यायभाष्यकारो भवितुं नार्हति, यतः कामसूत्रस्य टीकाकारेण यशोधरेण कामसूत्रकारस्य वात्स्यायनस्य वात्स्यायनः मल्लनागश्चेति नामद्वयमुक्तम्। वात्स्यायनस्तस्य गोत्रनिमित्तकं नाम, मल्लनागस्तु तस्य सांस्कारिकं नाम। तदुक्तं यशोधरेण- "वात्स्यायन इति गोत्रनिमित्ता संज्ञा, मल्लनाग इति सांस्कारिकी "[५२] इति।

अत्रायमाशयो यत् यशोधरेण वात्स्यायनस्य नामान्तरतया मल्लनाग इति नामोल्लिखितं न तु पक्षिलस्वामी, न वा पक्षिलमुनिः, न वा पक्षिल इति नामधेयत्वमुक्तम्। अतः प्रतीयते यद् भाष्यकारः वात्स्यायनस्तथा कामसूत्रकारो वात्स्यायनो न तु समानः पुरुषः। यदि तु भाष्यकारः कामसूत्रकारः समान एव पुरुषः स्यात्तर्हि भाष्यकारस्य वात्स्यायनस्य नामान्तरतया बहुप्रसिद्धं पक्षिलनामधेयत्वमवश्यमुल्लिखितं स्यात्। परन्तु तन्न यशोधरोक्त्या प्रतीयते । न केवलमेतदेव तयोर्भिन्नत्वे कारणम्, अपि तु शास्त्रवैषम्यमपि तयोः पृथक्त्वे अधिकं कारणम्। तथाहि न्यायभाष्यस्य कामसूत्रस्य च भाषा तथा ग्रन्थारम्भप्रणाली एकीरूपतां न भजेते। कामसूत्रस्य प्रारम्भे मङ्गलाचरणं दृश्यते। परन्तु न्यायभाष्यस्य प्रारम्भे मङ्गलाचरणं नास्ति। किञ्च 'वत्स यञ् युनि फक् वत्से युवापत्यं वात्स्यायनः' इति व्युत्पत्त्यनुसारं वत्सस्य युवा गोत्रापत्यं पुमान् वात्स्यायन इत्यर्थे वात्स्यायनशब्दनिष्पत्तेः यः कोऽपि वत्सगोत्रियः वात्स्यायनः भवितुमर्हति, तेन तु वत्सगोत्रत्वाद् यथा भाष्यकारः वात्स्यायनो भवितुमर्हति तथैव कामसूत्रकारोऽपि वात्स्यायनो भवितुमर्हति। किन्तु तयोः प्रसिद्धं नामान्तरमेव तयोः भेदे कारणम्। तथाहि कामसूत्रकारस्य मल्लनाग इति

[५२]का.सू.अधि.-१,अ.-२,सू.टी.-१९

सांस्कारिकं नामधेयत्वं पक्षिलस्वामिना सह तस्य सायुज्यं व्याहन्यते। अतः कामसूत्रकारो वात्स्यायनो न्यायभाष्यकर्ता भवितुं नार्हति।

ननु कौटिल्य एव कामसूत्रकारो वात्स्यायनो भवितुमर्हति वा ? इति चेदुच्यते कौटिल्य एव कामसूत्रकारो वात्स्यायन इति यदि प्रमातुं शक्यते तर्हि कौटिल्यवात्स्यायनयोः सायुज्यं कल्पयित्वा कौटिल्यस्य न्यायसूत्रभाष्यकर्तृत्वमपि भणितुं शक्नुयात्। किन्तु अहो! अत्र कौटिल्यवात्स्यायनयोः सायुज्य कल्पनमसम्भवमिव प्रतीयते। कथमिति चेदुच्यते कामसूत्रकारेण वात्स्यायनेन कामसूत्रमध्ये अन्ते वा कुत्रापि कौटिल्यस्य विष्णुगुप्तस्य वा ग्रन्थकर्तृत्वेन परिचयः न प्रदत्तः, न वा तस्य नामान्तरतया कुत्रापि स्वशास्त्रे परशास्त्रे वा कौटिल्यादिनाम्नामुल्लेखो दृश्यते। अपि च, कामसूत्रार्थशास्त्रयोर्मध्ये अस्ति भाषागतवैषम्यम्। किञ्च तयोः सायुज्यकल्पनासाफल्येऽपि कौटिल्यस्य न्यायभाष्यकर्तृत्वं कथमपि न संगच्छते, कथम् ? अत्रोच्यते- न्यायभाष्यकारमते सांख्यशास्त्रं न आन्वीक्षिकीविद्यामध्ये परिगणितं दृश्यते। न्यायभाष्ये आन्वीक्षिकीशब्दस्य "प्रमाणैरर्थपरीक्षणं न्यायः, प्रत्यक्षागमाश्रितमनुमानम्, साऽन्वीक्षा, प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा। तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या, न्यायशास्त्रम् "[५३] - इत्येवं विशेषव्युत्पत्तिं स्वीकार्य तदनुसारम् आन्वीक्षिकीशब्देन सांख्यशास्त्रं, योगशास्त्रं वा गम्यते। किन्तु अर्थशास्त्रे आन्वीक्षिकीशब्देन सांख्यशास्त्रं, योगशास्त्रं, लोकायतशास्त्रञ्च बोध्यते। तदुक्तं कौटिल्येन - "सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी "[५४] इति। अपि च, कौटिल्यवात्स्यायनयोर्मध्ये अस्ति गोत्रविषयको भेदः। कामसूत्रकारेण *कामसूत्रे*

---

[५३] न्या.भा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३८-३९

[५४] कौ.अ.अधि.-१,प्र.-१,पृ-४

कुत्रापि आन्वीक्षिक्याः उल्लेखो न कृतः। किन्तु कौटिल्येन आन्वीक्षिकीविद्यायाः उल्लेखः कृतः।

तथा च, उद्योतकरजयन्तभट्टादीनां मतेऽपि आन्वीक्षिकीविद्याविषये मतवैषम्यात् अर्थशास्त्रकारः कौटिल्य एव न्यायभाष्यकार इति अविश्वास्यमेव स्यात्। किञ्च कौटिल्यस्तथा भाष्यकारो वात्स्यायनो यदि समान एव पुरुषः स्यात्तर्हि भाष्यकारः कौटिल्यवत् आन्वीक्षिकीशब्दस्य व्यवहारं कुर्यात्, अथवा कौटिल्यः भाष्यकारवत् आन्वीक्षिकीशब्दस्य इति।

न्यायभाष्यकारस्य वात्स्यायनस्य जन्मभूमिविषयेऽपि मतवैभिन्न्यं दृश्यते पण्डितसमाजे। अतो भाष्यकारः वात्स्यायनः कस्मिन् देशे जनिं लेभे इत्यस्मिन् विषये निश्चयेन वक्तुं नालम्। केषाञ्चन मते स दाक्षिणात्यवासी, केषाञ्चन मते च स मिथिलावासी इति। पाश्चात्यैतिहासिकानां नये भाष्यकारः कथमपि तृतीयशतकात्पूर्ववर्ती भवितुं नार्हति। किन्तु फणिभूषणतर्कवागीश-महोदयस्य मते वात्स्यायन आसीत् शून्यवादिनः बौद्धपण्डितस्य नागार्जुनस्य पूर्ववर्ती। किन्तु नागार्जुनस्य कालविषये तेन किमपि नोक्तम्। ऐतिहासिरकतथ्या-नुसारं बौद्धाचार्यस्य नागार्जुनस्य कालो हि १८० ईशवीयतः २५० ईशवीयं यावत्। अतः तत्पूर्ववर्तित्वात् भाष्यकारस्य वात्स्यायनस्य कालो भवेत् द्वितीयं शतकम्। *पद्मपुराणस्य* रामाश्वमेधप्रकरणेऽपि वात्स्यायनस्य चर्चा परिलक्ष्यते।[५५]

केषाञ्चन विदुषां मते महर्षिं पतञ्जलिमाश्रित्य ‘ दश दाडिमानि सन्ति ’ इत्युदाहरणानां समुल्लेखात् वात्स्यायनः महर्षेः पतञ्जलेः समनन्तरमेव जनिं लेभे इति वक्तुमलम्। अपि च, ‘ दश दाडिमानि सन्ति’ इत्युदाहरणेन भाष्यकारस्य

---

[५५]ततः परं धराधरं पृष्टवान् भुजगेश्वरम् ।
वात्स्यायनो मुनिवरः कथामेतां सुनिर्मलाम् ।। (प.पु.)

वात्स्यायनस्य मैथिलत्वं याथार्थ्येन सुनिश्चितं भवति, यतः दाडिमादिफलानि प्राग्विशेषतः मिथिलादेशे एव समुपलभ्यन्ते स्म। केषाञ्चन मते विक्रमतः पूर्वं प्रथमशताब्द्यां वात्स्यायनस्य जनिरभूत्। ड.शशीवालागौडमहोदयानां नये तस्य जनिकालः स्यात् चतुर्थशताब्द्याः प्रारम्भकालः, यतः पञ्चमशताब्द्याम् उद्भटबौद्धदार्शनिकस्य दिङ्नागस्य प्रमाणसमुच्चयनामकग्रन्थे वात्स्यायनस्य भाष्यखण्डनं समुपलभ्यते। यद्वा भवतु पाश्चात्यपण्डितानां मते भाष्यकारो वात्स्यायनः तृतीयशताब्द्याः पूर्ववर्ती कदापि भवितुं नार्हति।

किञ्च, प्रतीच्यानां प्राच्यानां चैतिहासिकानां नये भाष्यकार-वात्स्यायनस्य कालः आसीत् ख्रीष्टीयचतुर्थशतकं पञ्चमशतकं वा। तेषां मते ख्रीष्टपूर्ववर्ती कौटिल्यः कदापि न्यायभाष्यकारो भवितुं नालम्। वात्स्यायनभाष्यस्य भाषां पर्यालोच्य न्यायदर्शनग्रन्थस्य भूमिकायां महामहोपाध्यायेन फणिभूषणतर्कवागीशमहाभागेन न्यायभाष्यकारस्य कालः ख्रीष्टीयपञ्चम-शतकात् प्राक् निर्धारितः। तन्नये भाष्यकारवात्स्यायनः ख्रीष्टपूर्ववर्ती।[५६] केषाञ्चन मते ‘लङ्कावतारसूत्रम्’‘माध्यमिकसूत्रमि’त्यादि बौद्धग्रन्थविरचनात् परमेव न्यायभाष्यं विरचितम्, न्यायसूत्रभाष्ये बौद्धमतोपस्थापनपूर्वकं तन्निरसनदर्शनात्। परन्तु फणिभूषणतर्कवागीश-महोदयस्य नये मतमिदं न युक्तियुक्तम्। तत्र तस्य एतद् व्याख्यानं यद् वात्स्यायनो यदि लङ्कावतारसूत्रात् माध्यमिकसूत्राच्च परं न्यायभाष्यं विरच्य बौद्धमतखण्डनं कुर्यात्तर्हि तत्र भाष्ये सकलबौद्धप्रतिपादितानां प्रतीत्यसमुत्पादादीनां पारिभाषिकशब्दानां प्रयोगः अवश्यमेव स्यात्, अथवा माध्यमिकसूत्रसमर्थितं

[५६] न्या.द.,(सम्पा.फणिभूषणतर्कवागीशः)पृ-४४-४५

बौद्धमतं विशेषतया समालोचितं स्यात्। परन्तु न्यायभाष्ये तथा न दृश्यते । न्यायभाष्ये सामान्यतः संक्षेपेण बौद्धमतनिरसनं तत्र परवर्तिकालस्य मुख्यबौद्धपण्डितानां मुख्यसिद्धान्तः विशेषतया नालोचितः। वात्स्यायनः प्राचीनबौद्धानामभ्युदयकाले न्यायभाष्यं रचयामास। न्यायभाष्यकारः प्राचीनबौद्धदार्शनिकान् लक्ष्यीकृत्य 'नास्तिकः''अनात्मवादी''क्षणिकवादी' चेत्यादिवाक्यप्रयोगं कृत्वा बौद्धमते दोषं प्रदर्शयामास। फणिभूषणतर्कवागीश-महोदयस्य मते वस्तुतस्तु न्यायभाष्ये बौद्धमतमेव नास्ति, तत्र यन्मतं दृश्यते तत्तु दार्शनिकैः ऋषिभिः उपनिषत्सु पूर्वपक्षरूपेण प्रतिपादितः नास्तिकमतविशेषः, यच्च मतं परवर्तिकाले बौद्धैः समर्थितम्। अतो *न्यायसूत्रभाष्ये* 'नास्तिक' 'अनात्मवादी' चेत्यादिशब्ददर्शनात् निश्चयेन एतद्वक्तुं न शक्यते यन्न्यायभाष्यं बौद्धदर्शनात्परं विरचितम्। उद्योतकरस्य *न्यायवार्त्तिके* यथा दिङ्नागादीनां बौद्धाचार्याणां ग्रन्थोल्लेखो दृश्यते न तथा वात्स्यायनस्य *न्यायभाष्ये*। किञ्च, महामहोपाध्यायविन्ध्येश्वरीप्रसादद्विवेदीमहोदयोऽपि बौद्धयुगपूर्ववर्तिनं कालमेव भाष्यकारस्य वात्स्यायनस्य कालतया गणयति स्म। किं बहुना, विश्वकोषेऽपि प्राप्यते यत् 'वात्स्यायनभाष्ये कुत्रापि बौद्धप्रसङ्गः नास्ति'। किन्तु विन्ध्येश्वरीप्रसादमहोदयस्य मतं न युक्तिग्राह्यं, यतः वात्स्यायन-वाचस्पतिमिश्रादीनां वचनात् प्रतीयते यत् बौद्धदार्शनिकानामभ्युदयात् परं वात्स्यायनेन न्यायसूत्रोद्धरणं न्यायभाष्यविरचनं विहितम्। किञ्च, तात्पर्यटीकाकारस्य वाचस्पतिमिश्रस्य वचसि स्पष्टं प्रतीयते यत् भाष्यकारात् पूर्वमपि न्यायसूत्रस्य व्याख्या जाता। भाष्यकारेण एकया एव भाषया स्वमतपरमतयोः कालातीतहेत्वाभासस्वरूपं व्याख्याय परमते एव उदाहरणं

प्रदर्शितम्। तत्र बौद्धविशेषेण अन्यरूपं सूत्रार्थं व्याख्याय यद्दोषं प्रदर्शयामास भाष्यकारेण 'तादृशः सूत्रार्थः न प्रकृतार्थः' इत्युक्त्वा तद्दोषस्य निरसनं कृतम्।[५७] एतेन ज्ञायते यत् बौद्धदार्शनिकानामभ्युदयात्परं न्यायभाष्यं विरचितम्।

वात्स्यायन आसीद् अर्वाचीनबौद्धपण्डितात् दिङ्नागात् बहुपूर्ववर्ती, कथमिति चेदुच्यते श्रीमद्वाचस्पतिमिश्रेण तात्पर्यटीकायाः प्रारम्भे उद्योतकरस्य वार्त्तिकरचनायां प्रयोजनमेवं व्याख्यातं यद् अर्वाचीनदिङ्नागादिभिः कुतर्कतमसा न्यायशास्त्रमाच्छादितम्, अतः तत्तमसः अपनयनाय उद्योतकरस्य वार्त्तिकरचना। ख्रीष्टपूर्ववर्तिनः बौद्धनृपतेः अशोकात् प्रागेव बौद्धदार्शनिकानामभ्युदयो जातः। परन्तु दिङ्नागस्य प्राक्काले एव बौद्धदार्शनिकानां न्यायशास्त्रचर्चा, प्रमाणकाण्डे विशेषपर्यालोचनं, बौद्धन्यायग्रन्थनिर्माणमित्यादिकं सर्वं जातम्। वात्स्यायनभाष्ये प्रमाणकाण्डे यतो बौद्धमते विशेषतया नालोचितं दृश्यते अतो वक्तुं शक्यते यद् वात्स्यायनो दिङ्नागात् बहुपूर्ववर्ती आसीत्। वात्स्यायनः दिङ्नागात् किञ्चित् पूर्ववर्ती स्याच्चेत्तस्य भाष्ये प्रमाणकाण्डे अवश्यमेव बौद्धमतमुपस्थापितं स्यात्। वात्स्यायनेन न्यायभाष्ये पाणिनिसूत्रमुद्धृतम्।[५८] अतः स पाणिनेरपि परवर्ती, एवं तेन भाष्ये पतञ्जलिकृतं महाभाष्यवचनं समुद्धृतम्। अतः स महाभाष्यकारपतञ्जलेरपि उत्तरवर्ती इति वक्तुं शक्यते[५९], किन्तु तेन महाभाष्यवाक्यमुद्धृतं न वेति निश्चिततया वक्तुं न शक्यते, तस्य वचनस्य चिरन्तनत्वात्, पाठान्तरात् अयथार्थत्वाच्च।[६०] बौद्धाचार्येण दिङ्नागेन तस्य *'प्रमाणसमुच्चय'*ग्रन्थे वात्स्यायनस्य भाष्यवचने विरोधः प्रादर्शि। अतो

---

[५७]एवं व्यवस्थिते भाष्यकारः सूत्रं स्वपरमतश्लिष्टं व्याचष्टे, कालात्ययेन संशयकालात्ययेन युक्तो यस्यार्थैकदेशः। (न्या.भा.,न्या.द., (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च) पृ-३६८)

[५८]न्या.भा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-६०९-६१०

[५९]तदेव, पृ-११७९-११८०

[६०]म.भा.'बृद्धिरादैच्' (१.१.१) सूत्रं द्रष्टव्यम्।

भाष्यकारः दिङ्नागात् पूर्ववर्तीति नात्र संशयः, किन्तु दिङ्नागस्य कालो निश्चिततया वक्तुं नालम्। *विश्वकोषे* दिङ्नागस्य कालः ख्रीष्टीयद्वितीयशतकं तृतीयशतकं वा निर्धारितम्। अतः तदनुसारं भाष्यकारः ततः प्राचीनः। परन्तु बहुदर्शिनो महामहोपाध्यायस्य श्रीसतीशचन्द्रविद्याभूषणमहोदयस्य मते '*बौद्धन्याय*'*प्रबन्धे*[६१] *प्रमाणसमुच्चये* दिङ्नागः कालिदासस्य समसामयिकः आसीदर्थात् कालिदासस्य कालानुसारं भाष्यकारस्य काल आसीत् ख्रीष्टीयपञ्चमशतकस्यान्तिमभागः। किन्तु जार्मानपण्डितेन जेकोविमहोदयेन भाष्यकारस्य वात्स्यायनस्य कालः ख्रीष्टीयचतुर्थशतकमुदीरितम्।[६२]

---

[६१]सा.प.प.,(तृ.सं.), पृ-१३२१

[६२]Journal of the American Oriental Society, Vol. 31,1911

# ।।तृतीयोऽध्यायः।।

## न्यायसूत्रवृत्तिकारस्य विश्वनाथन्यायपञ्चाननस्य परिचयः कृतिश्च

न्यायप्रस्थानस्य सकलनैयायिकाः, येषां लक्ष्यमासीत् न्यायदर्शनस्य मूलतत्त्वम् अनायासेन पाठकानां सकाशे परिवेशनम्, तेषु अन्यतमः साफल्यवान् आसीत् विश्वनाथन्यायपञ्चननः महाभागः। न्यायप्रस्थानस्य त्रिषु युगेषु स हि नव्ययुगीयः तथा बङ्गीयन्यायसम्प्रदायस्य पण्डितः आसीत्। तस्य पिता आसीत् नदीयावास्तव्यः पण्डितः विद्यानिवासः। आचार्यविश्वनाथस्तु विद्यानिवासस्य ज्यैष्ठपुत्रः आसीत्। अत एव विश्वनाथेन *न्यायसूत्रवृत्तेः* प्रारम्भे मङ्गलश्लोके निगदितं - "विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य" इति। स चासीत् वैष्णवधर्मालम्बी। गोपिनाथकविराजमते – आचार्यविश्वनाथेन अवसरजीवनस्य तथा आध्यात्मिकजीवनस्य अन्तिमवत्सरः वृन्दावने एव अतिवाहितः। तेन हि न्यायसूत्रवृत्तिरीयं १५७६ बङ्गाब्दे १६५४ ख्रीष्टाब्दे वा रचिता। मतान्तरे तु १६३४ ख्रीष्टाब्दे इति कथ्यते । एतेनानुमीयते यद् आचार्यविश्वनाथ आसीत् सप्तदशशतकीयः इति।

आचार्यविश्वनाथन्यायपञ्चाननमहाभागेन आचार्यरघुनाथशिरोमणि-रचितपदार्थतत्त्वनिरूपणग्रन्थस्योपरि *तत्त्वालोकनाम्ना* एका टीका रचिता। विश्वनाथन्यायपञ्चाननमहाभागस्य कृतिषु अन्यतमो हि *भाषापरिच्छेदः कारिकावली* वा। ग्रन्थस्यास्योपरि तेनैव टीका आलिखिता *न्यायसिद्धान्तमुक्तावली* इति नाम्ना। टीकाग्रन्थोऽयं न्यायवैशेषिकग्रन्थेषु प्रमुखस्थानं भजते।

किन्तु दीनेशचन्द्रभट्टाचार्यमहोदयेन विविधयुक्तिभिः प्रतिष्ठापितं यत् विश्वनाथन्यायपञ्चाननमहाभागो न हि *भाषापरिच्छेदग्रन्थस्य* रचयिता इति। तथाहि तन्मतानुसारं *'भाषापरिच्छेदः', 'मुक्तावली'* इति ग्रन्थद्वयं प्रायेण ३०० वत्सरं यावत् विद्यानिवासपुत्रविश्वनाथसिद्धान्तपञ्चाननस्य रचना इति भारतवर्षस्य सर्वत्र परिगृहीतमतत्वेन प्रचलति। किन्तु इदानीं निःसन्देहं प्रमाणीभवति यद् ग्रन्थद्वयं न हि विश्वनाथस्य रचना इति, किन्तु कृष्णदाससार्वभौमस्य रचना इति। अत्र दीनेशचन्द्रभाट्टाचार्येण पञ्चविधप्रमाणानां प्रदर्शनं कृतम्। तदेवाधस्तात् आलोच्यते।

क)पुथिप्रमाणम्- प्रायः २० वत्सरपूर्वं '*भाषापरिच्छेदः*' इति ग्रन्थस्य एकः पुथिग्रन्थः अस्माकं हस्तगतोऽभूत्। तत्रान्तिमे लिखितमासीत्- "तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।।श्रीः।। इति महामहोपाध्याय-श्रीकृष्णदाससार्वभौमभट्टाचार्यविरचितो *भाषापरिच्छेदः*..." इति। १५ वत्सरं पूर्वं कुमिल्लानगर्याः 'राममाला'-ग्रन्थालये श्रीहट्टात् प्रायः २५० वत्सरं पूर्वं लिखितं '*भाषापरिच्छेदः*', '*सिद्धान्तमुक्तावली*' इति पुथिग्रन्थद्वयं संगृहीतमभूत्। तत्र पुष्पिका आसीत्- "इति महामहोपाध्याय-श्रीकृष्णदाससार्वभौमभट्टाचार्य-विरचितो *भाषापरिच्छेदः* समाप्तः।। वागीश्वर्य्याः पदद्वन्द्वं निधाय हृदि सर्वदा। लिखिता पुस्तिका चैषा सतां चित्तविहारिणी।। श्रीरामः शरणम्। मधुसूदनसद्व्याख्यास्वर्गङ्गाकणसम्भवा। शुद्धिर्या जायते सा किं बुधान्तरवचोऽम्भसा।।" (८/२ पत्रम्) इति , "इति श्रीयुतमहामहोपाध्यायश्रीकृष्णदाससार्वभौमभट्टाचार्य-विरचिता *सिद्धान्त-मुक्तावली* सम्पूर्णा।।" (७६/२ पत्रम्) इति च। किञ्च, ग्रन्थमध्ये "विष्णोर्वक्षसि

विश्वनाथकृतिना'' इति पाठोऽस्ति (९/१ पत्रे), किन्तु पार्श्वे संशोध्य लिखितं 'कृष्णदासः' इति। स्वर्गीयहरप्रसादशास्त्रिमहाशयः सोसाइटि इत्यत्र *भाषापरिच्छेदस्य* एकपुथिग्रन्थस्य परीक्षां कृतवान् (No. 10799 R- पत्रसंख्या 7) , तन्मते - ''ascribed wrongly to Krisnadasa Sarvabhauma.'' इति।

वंशवाटिविद्यासमाजस्य अन्तिमनैयायिकश्रीनाथतर्कालङ्कारस्य (मृत्युः १३१६ वङ्गाब्दे) गृहे मुक्तावलीपुथिग्रन्थस्य पुष्पिकायां (८५/२ पत्रे) प्राप्तम्- ''इति श्रीयुतमहामहोपाध्यायश्रीकृष्णदाससार्वभौमभट्टाचार्य-विरचिता *सिद्धान्तमुक्तावली* सम्पूर्णा। शकाब्दः १७८५। श्री-आलोकचन्द्रदेवशर्मणः स्वाक्षरं स्वीयपाठार्थं।।'' इति। अस्मिन् पुथिग्रन्थेऽपि 'विश्वनाथकृतिना' इति पाठस्य पार्श्वे कृष्णदासरूपेण संशोधितम्। वर्धमानस्य सातगाछियानिवासिनः विख्यातनैयायिकदुलालतर्कवागीशस्य संग्रहे एकस्य खण्डितमुक्तावलीपुथिग्रन्थस्य प्रारम्भे तृतीयश्लोके पाठोऽस्ति - ''विष्णोर्वक्षति कृष्णदास-कृतिना'' इति। नवद्वीपराजस्य गुरुवंशस्य वाहिरगाछिनिवासिनः विख्यातपण्डितरघुमणि-विद्याभूषणस्य पुस्तकेषु मुक्तावलीपुथिग्रन्थस्य प्रारम्भे 'कृष्णदासकृतिना' इति पाठः आसीत्, अनन्तरं पार्श्वे विश्वनाथरूपेण संशोधितम्। शिउडीस्थानस्य रतनग्रन्थागारे ३०४१ संख्यकपुथिग्रन्थः 'महामहोपाध्यायकृष्णदाससार्वभौम-रचितभाषापरिच्छेदः' (पत्रसंख्या-१०) इति। श्रीहट्ट्-त्रिपुरातः वर्धमान-वीरभूमपर्यन्तं वङ्गस्य नानास्थाने एतेषां पुथिग्रन्थानाम् आविष्कारेण कृष्णदास-विश्वनाथयोः संघर्षः न हि अवहेलनीयः।

ख) मुक्तावलीग्रन्थस्य प्राचीनतमटीका '*मुक्तावल्युल्लास*' एव विश्वनाथपञ्चाननस्य पूर्वं रचिता। पुणायाः अयं पुथिग्रन्थः (No. 301 of 1895-1902) दीनेशचन्द्रभट्टाचार्यादिभिः सम्यक् परीक्षितः (पत्रसंख्या-१-४५,५९-६४, जनद्वयस्य स्वाक्षरम्) पुथिग्रन्थस्य एका पृष्टा न प्राप्यते। तस्य ग्रन्थस्य अन्तिमपत्रे लिपिकाललिखितमासीत् १५३३ शकाब्दः (List of Mss.,B.O.R.I. 1925,p.11)। पुथिग्रन्थोऽयम् अतीवजीर्णः, प्रायः ३०० वत्सरपुरातनः।

ग्रन्थारम्भस्य श्लोकोद्धारं कृत्वा लिख्यते –

"नयनानन्द(संवदोह) निदानं पुरुषोत्तमम्।
वृन्दावनसमासीनमुद्दामचरितं नूमः।।
परारेः श्रीयु...(चर)णाम्भोजमाश्रये।
अ(ज्ञ) मूढमनोभृङ्गमोक्षलक्ष्मीरसायनम्।।
नवीनकथनं क्वापि क्वापि ग्रन्थान्तरस्थितम्।
विश्वनाथककृति...तिमारभते बुधा।।

('विघ्नापनत्तरे') कृतं मङ्गलं शिष्यशिक्षार्थं व्याख्यातृश्रोतृणाम् अनुषङ्गतो मङ्गलाय च निबध्नाति-(चूडा)मणि-कृत इति।" इति। अत्र टीकायाः नाम एकत्रास्ति - "इति श्रीमुक्तावलि-उल्लासे वायुग्रन्थरहस्यं समाप्तम्" (६२/२) इति। मूलस्य व्याख्या तु अतीवसंक्षिप्ता। किन्तु प्रत्येकप्रकरणे पाण्डित्यपूर्णवादग्रन्थसंयुक्तत्वात् टीकायाः कायः वर्धितः – एवकारवादः (७-९ पत्रे), चित्ररूपग्रन्थः (२७/१ पत्रे उल्लिखितः), तेजोग्रन्थरहस्यम् (६०/१पत्रे), सन्निकर्षवादः ६४/२ पत्रे उल्लिखितः) इत्यादिः।

वङ्गे नव्यन्यायस्येतिहासे मुक्तावल्युल्लासकाररूपेण विश्वनाथस्य नाम हि अतीवमूल्यरूपाभिनवाविष्कारेषु परिगण्यते। ग्रन्थमध्ये मिश्रः (अर्थात् पक्षधरः, २/२, ३/१), उपायकृतः (३/२), दीधितिकृतः (३९/२, ६२/१), उच्छृङ्खलाः (३०/२), नव्योक्तम् (६/१) इत्यादिव्यतीततया 'विस्तरजन्मकृत-पदार्थरहस्ये स्पष्टः' (३५/१) इत्युक्त्वा स्वरचितग्रन्थान्तरस्य निर्देशो विद्यते। किञ्च, सादृश्यग्रन्थे निम्नोक्तपाण्डित्यपूर्णसन्दर्भो विद्यते - "ननु उपमानोपमेयत्वं यदैकस्यैव वस्तुनः। इन्दुरिन्दुरिवश्रीमानित्यादौ तद(न)द्वयः।। इत्यादौ, उपमानोपमेयत्वे एकस्यैवैकवाक्ये। अनन्वय इत्यत्र न केवलं भाति...तद्विलासाः (काव्यप्रकाशः, १० उल्लासः) इत्यादौ च ...तल्लक्षणाव्याप्तिः स्वभेदस्य स्वावृत्तित्वादि(ति) चेन्न। अनन्वयालङ्कारस्थले निरुपमत्वस्य कवितात्पर्यविषयत्वात्। एकस्यैवेत्युपमाव्यवच्छेदाय इत्याहुर्गुरुचरणाः चक्रवर्त्तिनस्तु एकस्यैवेत्यनेन भिन्नशब्दबोध्यत्वव्यवच्छेदो। बोध्यते, अस्याः मुखमिव अस्याः वक्त्रमित्यादौ नानाद्वयः किन्तूपमैव्येत्याहुः। तन्न" (१२-१३ पत्रे) इति। अयं चक्रवर्ती हि परमानन्दः (काव्यप्रकाशः, झालकीकर-सं,पृ-७०५)। उल्लासकारेण कतिपयस्थलेषु *मुक्तावल्याः* पूर्वतनव्याख्यावचनं उद्धृतम् (२/१, ५/२, ४०/१ पत्रे) तथा मूलमुक्तावल्याः कुत्रचित् स्थले गुरुतरपाठभेदस्य सूचना कृता। यथा वायुग्रन्थे (६१/१ पत्रे)- "मूले प्राणादिरिति। अत्रादिपदग्राह्य अपानव्यानोदानसमानाः अयं चैकोऽपि तत्तत्स्थानादिवशात् नानासंज्ञां लभत इति नानुपपत्तिः, भेदकल्पनायां मानाभावात्।" इति। अधुना प्रचलितपाठः- "प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्ग-मनादिनानाक्रियावशाच्च नानासंज्ञां लभत इति " इति तु *दीनकर्यां* गृहीतः तथा *रौद्रीटीका*यामपि स्वीकृतः।

ग) *मुक्तावल्याः* इयं *रौद्रीटीका* भवानन्दसिद्धान्तवागीशस्य पौत्ररुद्रतर्कवागीशकृता इति विषये तु इदानीं न सन्देहावसरः। तत्स्थले रौद्रीव्याख्या तु - "प्राणस्यैक्ये प्राणादिपञ्चत्वानुपत्तिरत आह प्राण इति। नानासंज्ञां – प्राणापानादिसंज्ञा। तथा च तत्र पञ्चत्वं नास्त्येव किन्तु संज्ञापञ्चत्वोपाधिकपञ्चत्वमिति भावः" इति। अयं रुद्रः काशीनिवासी भिन्नसम्प्रदायभुक्तः समकालीनविश्वनाथपञ्चाननग्रन्थस्य उपटीकां नवद्वीपे तिष्ठन् रचयिष्यतीति तु असम्भवमेव। द्वितीयतः तेन यत् *मुक्तावल्याः* पाठः व्याख्यापितः, तद्धि अर्वाचीनपाठः – उल्लासकारस्य व्याख्यावचनं तथा तदतिरिक्ता एका व्याख्या अस्मिन् पाठे प्रक्षिप्ता। एतेन बुध्यते, प्रामाणिकपाठोद्धारकारिणा उल्लासकारेण विश्वनाथेन सह रुद्रस्य व्यवधानकालः अत्यल्पः आसीत् तथा *उल्लासटीका* १५७५-१६०० खीष्टाब्दे रचिता स्यात् इति तु निश्चप्रचम्। उल्लासस्य पूर्वमपि *मुक्तावल्याः* व्याख्या आसीत्। अतो *मुक्तावल्याः* रचनाकालः कथमपि १५५० खीष्टाब्दस्य परं न स्यात्, तथा तत्काले विश्वनाथस्य जन्मत्वेऽपि शैशवकालः न अतिक्रान्तः। विश्वनाथन्यायपञ्चाननः १५५६ शकाब्दे (१६३४ खीष्टाब्दे) वृन्दावने *गौतमसूत्रवृत्तिं* रचितवान् तथा *मुक्तावली* रचिता अभूत् प्रायेण १०० वत्सरं पूर्वम्।

घ) विश्वनाथन्यायपञ्चाननेन *गौतमसूत्रवृत्तौ* उपमानप्रमाणस्य व्याख्यास्थले उदाहरणं प्रदत्तम्- "इयमोषधी विषहरणीत्युपमित्या विषयीक्रियते" (न्या.सू.-१/१/६) इति। इदं-शब्दस्य प्रयोगः अत्र स्थले भाष्यवार्त्तिकादि-प्रायसमस्तप्रामाणिकग्रन्थानुरूपः। *मुक्तावल्याः* उदाहरणं तु स्वतन्त्रं- "तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः। न तु 'अयं

गवयपदवाच्यः' इत्युपमितिः, गवयान्तरे शक्तिग्रहाभावप्रसङ्गात्।" इति। एतत्तु तत्त्वालोककारवाचस्पतिमिश्रस्य मतानुसारम्। मुक्तावलीकारः तथा गौतमसूत्रवृत्तिकारः पृथक् व्यक्तिः इति विषये तु एतदेव प्रकृष्टं प्रमाणम् (I.H.Q. XXIV,pp.156-61 द्रष्टव्यम्)।

ङ) नवद्वीपे एकः सुप्राचीनमैथिलाक्षरपुथिग्रन्थः भट्टाचार्यादिभिः दृष्टः- तस्य ग्रन्थस्य प्रथमपत्रं नासीत्, किन्तु अन्तिमपत्रे लिखितमासीत्- 'इति *सिद्धान्तमुक्तावली* समाप्ता।' ततश्च लिखितमासीत् - "खौआल सं श्रीउमानन्देन लिपितैषा पुस्तीति।। देशीय सक ।। २०५ दुइ शए पाच सका तारिख ३ अग्रहन।" इति। अयं 'देशीय शक' इति लक्ष्मणाब्दः, परगणातिसनः किंवा वर्तमानद्वारभाङ्गाराज्यस्य प्रवर्तितः कश्चित सनविशेषः स्यात्। सिद्धकामेश्वरवंशस्य प्रतिष्ठातः शकस्य गणितः स्यात्- तेन च लिपिकालः स्यात् १६०० शताब्द्याः तृतीयपादे। तत्काले विश्वनाथन्यायपञ्चाननस्य बाल्यत्वम् अतिक्रान्तं न वा विषये सन्देहो विद्यते। एवं पञ्चविधप्रमाणेन दीनेशचन्द्रभट्टाचार्येण स्वकीयग्रन्थे (वाङ्गालीर सारस्वत अवदान- वङ्गे नव्यन्यायचर्चा) *भाषापरिच्छेद*कारः तथा *मुक्तावली*कारः *न्यायसूत्रवृत्ति*कार-विश्वनाथन्यायपञ्चाननतः भिन्नः इति प्रतिपादितम्। तथा *भाषापरिच्छेद*ग्रन्थः *सिद्धान्तमुक्तावली*ग्रन्थश्च कृष्णदाससार्वभौमस्य कृतिरिति दीनेशचन्द्रभट्टाचार्य-स्याशयः। किन्तु मतमिदं पञ्चाननशास्त्रिमहाभागेन मुक्तावलीसंग्रहनामक-टीकाग्रन्थस्य प्रारम्भे ग्रन्थावतरणिकांशे विविधयुक्तिभिः खण्डितम्।

# ।।चतुर्थोऽध्यायः।।

## प्रमाणव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

न्यायशास्त्रे प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति सूत्रकारेण मर्हषिगौतमेन अक्षपादेन वा न्यायसूत्रग्रन्थस्यादावेव प्रथमसूत्रे समुद्घोषितम्। अतो मोक्षप्राप्तये निःश्रेयसाधिगमाय वा प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानमेव न्यायशास्त्रस्य मुख्यं प्रतिपाद्यम्। किञ्च,निखिलं जगदिदं पदार्थात्मकम्। सत्त्ववन्तः पदार्थाः अवश्यमेव प्रमेयाः। तेषां च प्रमेयपदार्थानामस्तित्वं तथा प्रामाण्यं प्रमाणद्वारैव सिध्यति। अपि च, दर्शनेषु भिन्नाः भिन्नाः पदार्थाः (प्रमेयपदार्थाः) स्वीकृताः। यस्य कस्यापि पदार्थस्य तत्त्वज्ञानं तु प्रमाणादेव भवतीति विमर्शकानां निर्णयः। तथाह्युच्यते‘ -मानाधीना मेयसिद्धिरि’ति[६३], ‘ प्रमेयसिद्धिः प्रमाणाद्धि[६४]’ इति च। किञ्च, यस्य कस्यचिद् दार्शनिकसम्प्रदायस्य मतानुकूल्ये प्रमाणमवश्यमेव स्वीकार्यम्। विनैव प्रमाणं न किञ्चित् कस्यापि मतग्राह्यं भवति। अतः स्वेषां युक्तिप्रतिपादनार्थं तैस्तैस्तदनुसारि प्रमाणमपि उपस्थातव्यम्। परन्तु प्रमाणतत्त्वज्ञानं विना अनुपजाततत्त्व-ज्ञानकप्रमाणेन कस्यापि पदार्थस्य तत्त्वज्ञानं न सम्भवति। अतः प्रमेयपदार्थानामपि तत्त्वज्ञानं नोत्पद्यते तथा सति मुक्तिलाभोऽपि न संघटते जीवानाम् । तेनोन्मत्तप्रलापवदसङ्गतमुपहासास्पदञ्च स्याद्दर्शनशास्त्रम्। अस्या

[६३] श्लोकवार्त्तिकम्

[६४]सां.का.- ४

आशङ्कायाः समुचितमुत्तरं प्रादर्शि न्यायभाष्यकारेण वात्स्यायनेन *न्यायसूत्रभाष्ये*- 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसमार्थ्यादर्थवत्प्रमाणम्।'[६५] इति।

किञ्च, प्रमाणाधीना सर्वेषां व्यवस्थितिः इत्यत्र समेषां प्रमाणवादिनामैकमत्यम्। एतच्च प्रमाणं प्रत्यक्षानुमानादिरूपं बहुविधम्। प्रमाणेषु चानुमानं मूर्धन्यं तस्य प्रत्यक्षागमाभ्यामिक्षितस्य पुनरीक्षणरूपत्वात्। स्पष्टमिदं यत् प्रत्यक्षेक्षितमपि पदार्थं विपश्चित्तावान्नाभ्युपैति यावत् सोऽनुमाननिकषे कषणमासाद्य नानवद्यता बिभर्ति। उक्तं यथा वाचस्पतिमिश्रेण-'प्रत्यक्षपरिकलित-मप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः।' इति।

अनुमानमहिमानमाकलयन् महर्षिवात्स्यायनः सत्यमेव बभाषे-

'प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥'[६६] इति ।

तत्र 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसा-धिगमः' इति न्यायदर्शनस्य तावत् प्रथमं सूत्रम्। अत्र सूत्रे प्रमाणप्रमेयादिपदानि द्वन्द्वसमासनिष्पन्नानि इति तु भाष्यवार्त्तिकादिषु स्पष्टमेव। अत्र द्वन्द्वसमासस्वीकारे तात्पर्यं तावत् न केवलम् एकस्य पदार्थस्य द्वयोः पदार्थयोर्वा तत्त्वज्ञाने जीवो मोक्षमधिगच्छति किन्तु षोडशानां पदार्थानां तत्त्वज्ञानादेव जीवो मुक्तिमेतीत्येवावबोधयितुं 'सर्वपदार्थप्रधानो द्वन्द्वसमासः' स्वीकृतो

---

[६५]न्या.भा., न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-१-२
[६६]तदेव, पृ-१५

वार्त्तिकारादिभिः। किञ्च वार्त्तिककारेण तात्पर्यकारेण च विग्रहवाक्ये वचनस्य किं स्वरूपं स्याद् इति आलोचयतापि अधिकविचारे न स्वरसः प्रदर्शितः। किन्तु *न्यायसूत्रवृत्तौ* तु विश्वनाथन्यायपञ्चाननेन विस्तरशो व्याख्या कृता। सूत्रस्य विग्रहवाक्यं तथा भाष्यस्थितवचनपदतात्पर्यं सर्वमेव व्याख्यातं तेन।

तथाहि भिन्नसमासे स्वीकृते तु यत्किञ्चित् पदार्थविशेषस्य प्राधान्यात् तत्तत्पदार्थानामेव निःश्रेयसलाभे साधकत्वं स्यात्, न तु सर्वेषां पदार्थानाम्। किन्तु निःश्रेयसलाभे सर्वेषामेव पदार्थनां साधकत्वमस्तीति प्रतिपादयितुमेव प्रस्तुतसूत्रे द्वन्द्वसमासः स्वीकार्यः एव। *न्यायवार्त्तिक*कारेणापि वक्तव्यमिदं समर्थयता निगदितं –

"सर्वे एते प्रमाणादयो विज्ञेया इति। अन्यथा हि समासान्तरपरिग्रहाद्विशेषणत्वेनोपयुक्तानां प्रमाणादीनामविज्ञेयता स्यात्।"[६७] इति।

ननु द्वन्द्वसमासस्य भेदे विधानात् प्रस्तुतसूत्रे समासस्यावयवानां प्रमाणप्रमेयादीनां पदार्थात्मकत्वेन अभेदत्वात् कथं द्वन्द्वसमास उपपन्नः? संशयस्यास्य निरसनं तु आचार्यविश्वनाथेन न्यायसूत्रवृत्तौ सम्यक्तया विहितम्। तथाहि समासस्य अवयवानां प्रमाणप्रमेयादीनां पदार्थात्मकत्वेन अभिन्नत्वेऽपि पदार्थतावच्छेदकधर्मरूपेण भेदसम्भवात् द्वन्द्वसमासः सम्भाव्यः। अत्रायमाशयः प्रमाणमिति पदस्यार्थो हि प्रमितिकरणमिति। प्रमितिकरणे च पदार्थता अस्ति। तत्पदार्थतायाः अवच्छेदकत्वं हि 'प्रमितिकरणत्वम्' इति। एवञ्च 'प्रमेयम्' इति पदस्यार्थो हि 'प्रमितिविषयः' इति। प्रमितिविषये चास्ति पदार्थता। अत एव

[६७] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२९

तत्पदार्थतावच्छेदकधर्मो हि 'प्रमितिविषयत्वम्' इति। इदानीं 'प्रमाणम्' 'प्रमेयम्' च इति उभयस्यैव न्यायशास्त्रसम्मतप्रमेयत्वात् तयोर्भेदः असत्त्वेऽपि तयोः पदार्थतावच्छेदकधर्मेण प्रमितिकरणत्वेन प्रमितिविषयत्वेन च वा तयोः भेदसम्भवाद् द्वन्द्वसमासः समुचित एव। तदुक्तं *न्यायसूत्रवृत्तौ* विश्वनाथेन- "अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः। यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवः, तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र विस्तरः।"[६८] इति।

अत्र 'अन्यत्र विस्तरः' इति पदेन विषयोऽयम् अन्यत्र *सिद्धान्तमुक्तावल्यादौ* विशदतया पर्यालोचितः इति विज्ञेयः।

किञ्च, पदार्थतावच्छेदकभेदे द्वन्द्वसमासे स्वीकृतेऽपि एकः संशयः समुदेति। तथाहि 'घटः घटः घटः' इत्यत्र स्वरूपैकशेषे 'घटाः' इति पदनिष्पत्तिर्जायते। अत्र 'घटाः' इति पदे प्रयुक्तबहुवचनेन अनेकघटानां बोधनसम्भवात् तेषाञ्च पदार्थतावच्छेदकधर्मः 'घटत्वम्' इति समानत्वात् एकत्वाद्वा भेदोऽनुपपन्नः। अपि च, स्वरूपैकशेषः इति द्वन्द्वसमासस्य अपवादत्वात् तथा उत्सर्गापवादयोः विषयैक्यात् द्वन्द्वसमासविषये स्वरूपैकशेषः प्रवृत्तो भवतीति वक्तुं शक्यते। अर्थात् 'घटाः' इत्यत्र द्वन्द्वसमासः स्वरूपैकशेषेण बाधितो भवति। किन्तु बहुघटस्थले तु 'घटत्वम्' इति पदार्थतावच्छेदकत्वधर्मस्यैक्यात् पदार्थतावच्छेदकभेदस्याविद्यमानत्वाद् द्वन्द्वसमासस्य प्रवृत्तिरेव न भवति तथा द्वन्द्वसमासस्य अविषयत्वात् तत्र स्वरूपैकशेषस्यापि प्रवृत्तिर्न स्यात्। किन्तु प्रकृतस्थले तु स्वरूपैकशेषस्य विषयः लक्ष्यते, तेनानुमीयते यत् खलु तत्स्थले

[६८]न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३१

द्वन्द्वसमासस्य प्रवृत्तिरभूत्। तथा सति घटत्वजातेः पदार्थतावच्छेदकस्यैक-निबन्धनाभेदस्थलेऽपि यदि द्वन्द्वः प्रवृत्तो भवति चेत् पदार्थतावच्छेदकभेदः द्वन्द्वसमासनियामकः इति वक्तुं नालम्। तेन च प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्था-नानाम् इति स्थले पदार्थतावच्छेदकभेदेनैव द्वन्द्वसमासोऽभूत् इति वक्तुं शक्यते। यतो हि पदार्थतानवच्छेदकभेदो न द्वन्द्वनियामकः। अपि च, यद्युच्यते 'घटाः' इति स्थले स्वरूपैकशेषस्य प्रवृत्तिर्नाभूत्। स्थलेऽस्मिन् एकघटपदोत्तरबहुवचनेन बहुत्वस्य बोधः। अत एव द्वन्द्वसमासस्य पदार्थतावच्छेदकभेदबोधकत्वस्य नानुपत्तिरिति। अत्रेदं वक्तव्यं यत्- 'सकृदुच्चारितः शब्दः सकृदर्थं गमयति' इति न्यायेन एकघटपदेन बहुघटबोधनासम्भवात् एकघटे च बहुवचनप्रयोज्य-बहुत्वसंख्यायाः बाधात् शाब्दबोधस्य वैकल्यप्रसक्तिः स्यात्। अत एव 'घटाः' इति स्थले जस्-विभक्तिः बहुघटपदप्रकृतिकः इति स्वीकार्यम्। तेन चात्र स्वरूपैकशेषः कल्पनीयः। तथा सत्यपि पूर्वोक्तविप्रपत्तिः आपतेत्।

एवंविधसंशयस्य निरसने इदमेव वक्तव्यं यत् द्वन्द्वसमासः क्वचित् पदार्थभेदे क्वचिच्च पदार्थतावच्छेदभेदे भवति। अत एव 'घटाः' इत्यत्र बहुघटस्य पारस्परिकभेदसत्त्वात् (यथा एतद्घटो न तद्घटः, तद्घटो न अमुकघटः इत्येवम्) पदार्थभेदे द्वन्द्वस्य प्रवृत्तिः सत्त्वेऽपि तद् अपवादभूतस्वरूपैकशेषेण बाधितो भवति। तथा च, प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानाम् इति स्थले पदार्थतावच्छेदक-भेदेनैव द्वन्द्वसमासः उपपन्नो निर्बाधः ।

किञ्च, केचन विदुषः 'सकृदुच्चारितः शब्दः सकृदर्थं गमयति' इति व्युत्पत्तिमनुदृत्य स्वरूपैकशेषं न स्वीकुर्वन्ति। अत एव अनुमितौ 'नेष्यत एव एकशेषः सकृदित्यादि-व्युत्पत्तेरनभ्युपगमात्' इति भट्टाचार्यग्रन्थः सङ्गतो भवति। तेन च तेषां नये पूर्वालोचिता आपत्तिः न सङ्गता भवति, पदार्थतावच्छेदक-धर्मभेदेन तत्र द्वन्द्वसमासो भवति इत्यत्रापि नानुपपत्तिः।

किन्तु अत्रेयं शङ्का जायते यत् क्वचित् पदार्थभेदः क्वचिच्च पदार्थतावच्छेदकभेदः द्वन्द्वसमासनियामको भवति इत्यत्र तु अननुगमोऽपि भवति। किन्तु लक्षणधर्मः एव यत् तत्सर्वदा अनुगतः स्यादिति। शङ्कायाः अस्याः निरसने इदमेव समुचितमुत्तरं यत् अत्रापि अनुगम एव भवति। कथमिति चेदुच्यते– पदजन्यप्रतिपत्तिविषयत्वमेव द्वन्द्वसमासस्य नियामकं भवति। तत्तु पदार्थभेदे तिष्ठति तथा पदार्थतावच्छेदकभेदेऽपि तिष्ठति। यथा 'अहिनकुलम्' इत्यत्र पदार्थभेदे द्वन्द्वसमासो विहितः। तत्र अहिपदोपस्थापितः अहिपदार्थः तथा नकुलपदोपस्थापितः नकुलपदार्थः, तयोः अहिनकुलयोः भेदप्रतीतिबलात् प्रतिपत्तिविषयः ज्ञानविषयो वा भवति, तद्भेदे च पदजन्यप्रतिपत्तिविषयत्वमपि विद्यते। अत्रेदमपि लक्षणीयं यत् स्थलेऽस्मिन् पदार्थतावच्छेदकभेदोऽपि वर्तते। एवञ्च प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानाम् इति स्थलेऽपि प्रमाणपदोपस्थाप्यपदार्थता-वच्छेदकस्य प्रमितिकरणत्वस्य तथा प्रमेयपदोपस्थाप्यपदार्थतावच्छेदकस्य प्रमितिविषयत्वस्य भेदः ज्ञानस्य विषयीभूतत्वात् तादृशभेदे पदजन्यप्रतिपत्ति-

विषयत्वं वर्तते एव। अत एव तत्र पदजन्यप्रतिपत्तिविषयत्वरूपेण अनुगमो भवत्येव इति निःशङ्कं वक्तुमलम्।

ततश्च आचार्यविश्वनाथेन द्वन्द्वसमासस्य व्यासवाक्यं किंविधं स्यादिति विस्तरशो निगदितम्। तेनादौ भाष्यकारस्य तथा सम्प्रदायविदः मतमुपस्थापितं, ततस्तस्य व्याख्यानं विधाय पुनः स्वमतमुपस्थापितं विश्लेषितञ्चापि।

तथाहि भाष्यकारस्य तथा सम्प्रदायविदो मते विग्रहवाक्यमेवं स्यात् 'प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि चे'ति। तदुक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ*- "...यथाश्रुतभाष्यानुसारिणः प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति"[६९] इति।

'निर्देशे यथावचनं विग्रहः' इति भाष्यस्थितवचनस्य 'निर्देशः' इति पदस्यार्थः किं स्यादिति विषयेऽस्मिन् भाष्यकारेण वात्स्यायनेन व्याख्यानं न प्रदत्तम्। विषयेऽस्मिन् आचार्यविश्वनाथेन दिग्दर्शनमकारि। तथाहि निर्देशपदेन लक्षणसूत्रस्थितवचनं निर्दिष्टम् उत विभागसूत्रस्थितवचनं निर्दिष्टम् उत उभयमेव? अत्रायमाशयः प्रमाणप्रमेयादिपदार्थानां परं यैः सूत्रैः लक्षणं विभागश्च आलोचितः तेषु सूत्रेषु तत्तत्पदार्थानां यद्वचनमुपस्थापितं तद्वचनानुसारमेव व्यासवाक्यं निर्मातव्यम्। यथा प्रमाणविभागसूत्रे[७०] 'प्रमाणानि' इति बहुवचनान्ततया प्रयुक्तम्। अत एव व्यासव्याक्येऽपि 'प्रमाणानि च' इत्येवं

[६९]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३१

[७०]प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि , सूत्रसंख्या-१/१/३

बहुवचनान्ततया एव प्रयोगो विधेयः। एवं प्रमेयविभागसूत्रे[७१] 'प्रमेयम्' इति एकवचनान्ततया प्रयुक्तम्। अत एव व्यासवाक्येऽपि 'प्रमेयञ्च' इत्येवम् एकवचनान्ततया प्रयोगः स्यात्। एवं संशयादिपदार्थानां क्षेत्रे तत्तत्पदार्थानां लक्षणविभागसूत्रे यद्वचनेन यत्पदार्थः प्रयुक्तः, व्यासवाक्येऽपि तद्वचनं ग्रहणीयम्। अर्थात् यत्र एकवचनमस्ति तत्रैकवचनं, यत्र द्विवचनमस्ति तत्र द्विवचनं, यत्र च बहुवचनं दृश्यते तत्र बहुवचनमेव करणीयमिति ध्येयम्।

अधुना अत्रायं प्रश्नः उदेति यत् निर्देशपदेन तर्हि किं बोध्यं – लक्षणसूत्रं विभागसूत्रम् उत उभयमेव ? अत्र तृतीयपक्षं न यक्तियुक्तम् , क्वचित् क्वचित् लक्षणसूत्रे तथा विभागसूत्रे भिन्नभिन्नवचनप्रतिपादनात्। यथा निग्रहस्थानपदार्थस्य लक्षणसूत्रे[७२] एकवचनं तथा विभागसूत्रे[७३] बहुवचनं प्रचक्षते। नापि द्वितीयपक्षं, तर्कपदार्थस्य केवलं लक्षणसूत्रदृष्टत्वात्। नापि प्रथमपक्षं युक्तम्, प्रमाणादिपदार्थानां सम्भवेऽपि जातिनिग्रहस्थानपदार्थयोः विरोधः परिलक्ष्यते, तयोः पदार्थयोः भाष्यानुसारिव्यासवाक्ये बहुवचनग्रहणात् लक्षणसूत्रे च तयोरेकवचनात्।

सर्वं पर्यालोच्य इदमेव वक्तुं शक्यते यत् निर्देशपदेन विभागसूत्रमेव ग्रहणीयम्। तथा सति प्रमाणादिपदार्थानां तर्कपदार्थं व्यतिरिच्य वचनं प्रस्तुतभाष्यानुसारिव्यासवाक्यवत् स्यात्। किं बहुना, तत्र तर्कपदविषये या समस्या दृश्यते तत्र इयं युक्तिरेव अनुसरणीया। तेन च तस्याः समस्यायाः समाधिरपि स्यात्। तथाहि तत्र यदि सूक्ष्मेक्षिकया दृष्ट्या विचार्यते चेत् इदमेव

[७१]आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ,सूत्रसंख्या-१/१/३

[७२]विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्,न्या.सू.-१/२/१९

[७३]तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम्,न्या.सू.-१/२/२०

प्रकाशितं भवति यत् तर्कपदार्थस्य एकसंख्यकत्वात् तत्र पृथग् विभागसूत्रं न्यायसूत्रकारेण न व्यरचि। अपि च, लक्षणसूत्रे तर्कपदार्थस्य ग्रहणात् 'तर्कः' इत्यनेन यथा तर्कपदार्थस्य लक्षणं विहितं तथा तस्य विभागोऽपि सूचितः, तर्कपदोत्तरैकवचनसुप्प्रत्ययस्य ग्रहणात्। अत एव तर्कपदार्थस्य लक्षणसूत्रमेव तस्य विभागसूत्रमिति उररीकरणीयम्। यथा यज्ञदत्तस्य एकमात्रपुत्रः देवदत्तः। तेन देवदत्ते ज्येष्ठत्वं मध्यमत्वं कनिष्ठत्वञ्च आरोपितं भवति। तथैव तर्कपदार्थेऽपि एकत्वादिरूपेण विभागः आरोप्यते व्यपदेशिवद्भावेन। अतो लक्षणसूत्रे तर्कपदस्यैकवचनत्वेऽपि तस्य द्वित्वं बहुत्वं वा सिद्धं भवति व्यपदेशिवद्भावेन। तेन च तर्कपदार्थस्य लक्षणसूत्रं विभागसूत्रमपि इति विज्ञेयम्। अत एव व्यासवाक्ये 'तर्कश्च' इति पदप्रयोगः साधुरेव।

आचार्यफणिभूषणतर्कवागीशमहोदयेनापि विषयेऽस्मिन् भाष्यकारस्य मतं न्यायसूत्रकारविश्वनाथन्यायपञ्चाननवदेव तदीयन्यायदर्शनग्रन्थे सुष्ठु व्याख्यातम्।[७४] आचार्यजयन्तभट्टस्यापि विषयेऽस्मिन् समनैवाभियुक्तिः। किञ्च, प्राचीनमतेऽपि तदेव भाष्यार्थः इति प्रकाशटीकाकारेण वर्द्धमानोपाध्याय-महोदयेनापि निगदितम्।

अपि च, मतान्तरे 'निर्देशः' इति पदं भिन्नतया व्याख्यातम्। तथाहि तात्पर्यपरिशुद्धिकारेण उदयनाचार्येण निगदितं यत् 'निर्देशः' इत्यनेन पदार्थविभागः सूचितः। अर्थात् 'निर्देशः' इति पदेन कः पदार्थः कतिविधया विभक्तः इत्येवं निर्देशः प्रदत्तः। कस्मिंश्चित् सूत्रे तद् संख्यावाचकशब्दद्वारा उच्यते, कस्मिंश्चिच्च सूत्रे तन्नोक्त्वापि सूत्रार्थपर्यालोचनद्वारा तदधिगम्यते। तद्धि

---

[७४]न्या.द.(सम्पा.फणिभूषणतर्कवागीशः), पृ-२०-२१

'आर्थनिर्देशः'। तदनुसारेणैव तत्र वचनग्रहणपूर्वकं व्यासवाक्ये तद्वचनस्यैव प्रयोगो विधेयः। यथा संशयलक्षणसूत्रस्य[७५] अर्थं पर्यालोच्य 'संशयः त्रिविधः पञ्चविधो वा' इति ज्ञानं जायते। ततश्च तत्र सूत्रे 'संशयः' इति एकवचनान्ततया प्रयोगः सत्त्वेऽपि व्यायवाक्यनिर्माणकाले 'संशयाश्च' इति बहुवचनान्ततया एव प्रयोगः करणीयः। एवञ्च दृष्टान्तलक्षणसूत्रे[७६] 'दृष्टान्तः' इति एकवचनान्ततया प्रयोगः सत्त्वेऽपि दृष्टान्तस्य द्वैविध्यात् 'दृष्टान्तौ च' इति द्विवचनान्ततया व्यासवाक्ये प्रयोगः समुचितो भवति। यत्र तु तन्निर्देशो न दृश्यते तत्र तु लक्षणसूत्रस्थित-वचनानुसारमेव व्यासवाक्यं निर्मातव्यम्। विषयेऽस्मिन् उदयनाचार्येण तदनुरूप-युक्तिरपि उपस्थापिता।

ननु प्रथमन्यायसूत्रे कथं प्रमाणपदार्थस्यादावेवोल्लेख इति तु सूत्रादेव स्पष्टं न भवतीति। तर्हि कथमभ्युपेयमस्माभिरिति जिज्ञासायां तु भाष्यादि एव शरणं भवति। भाष्यनये तु यस्य कस्यापि पदार्थस्य तत्त्वज्ञानं प्रमाणादेव भवति। तदुच्यते- 'मानाधीना मेयसिद्धिरि'[७७]ति , किञ्च 'प्रमेयसिद्धिः प्रमाणाद्धि'[७८] इति च।

किन्तु न्यायसूत्रवृत्तिकारेण विषयेऽस्मिन् विस्तरश आलोचितम्। तन्मते तु न्यायशास्त्रस्य मुख्यं प्रयोजनं तावन्मोक्षलाभः। मोक्षलाभश्चात्माद्यपवर्गान्त-द्वादशप्रमेयपदार्थानां तत्त्वज्ञानादेव भवति। अत एव प्रस्तुतसूत्रे प्रमेयपदार्थस्यै-वादावुल्लेखः करणीय इति चेन्न, तेषां द्वादशप्रमेयपदार्थानां तत्त्वज्ञानं तु

[७५]समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः। (न्या.सू.-१/१/२३)

[७६]लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः।(न्या.सू.-१/१/२५)

[७७] श्लोकवार्त्तिकम्

[७८] सां.का.-४

प्रमाणपदार्थाधीनम्। अतो प्रमाणपदार्थस्यादावुल्लेखः समीचीन एव। तदुक्तं वृत्तिकारेण- 'अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशः, ततोऽवसरतो बुभुत्सितप्रमेयस्य ततश्च पदार्थव्यवस्थापनस्य न्यायाधीनतया न्याये निरूपनीयेऽभ्यर्हितयोर्न्यायिपूर्वाङ्गयोः संशयप्रयोजनयोः, तत्राभ्यर्हिततया संशयस्य प्रथमम्।'[७९] इति।

किञ्च, अविगीतशिष्टाचारविषयत्वाद् वेदबोधितकर्तव्यताकं मङ्गलं ग्रन्थादौ महर्षिगौतमेनाचरितं न वेति न्यायसूत्रग्रन्थे वयं सन्दिहाना एव। सन्देहस्यास्य निराकरणं तु न्यायसूत्रवृत्तिकारेण विश्वनाथन्यायपञ्चाननमहाभागेन कृतं स्वकृतौ *न्यायसूत्रवृत्तौ*। तथाहि महर्षिणा अक्षपादेन न्यायसूत्रस्यादिमसूत्रे आदावेव प्रमाणशब्दस्योल्लेखात् 'अभ्यर्हितं पूर्वम्' इति न्यायेन तस्य प्रमाणपदार्थस्य मुख्यत्वं ध्वनितम्। तत्र प्रथमसूत्रे प्रमाणशब्दस्य *महाभारतस्य विष्णुसहस्रनामस्तोत्रे* 'प्रमाणं तु प्राणनिलयः प्राणभृत्प्राणजीवनः, तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः'[८०] इति स्थले वर्तमानत्वात्, तेन च माङ्गलिकत्वात् प्रमाणशब्दोच्चारणेनैव मङ्गलमाचरितम्। तदुक्तं वृत्तिकारेण- 'अत्र केचित्– सूत्रादौ मङ्गलाकरणेन मङ्गलं न प्रामाणिकमित्यत्र सूत्रकृतां तात्पर्यं वर्णयन्ति, तदसत्, कृतस्याप्यनिबन्धनसम्भवात् , विघ्नाभावनिर्णयेना-

[७९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२

[८०] महा.,अनुशासनपर्व,वि.ना.सह.,श्लो.-११६

करणसम्भवाच्च। वयन्तु 'प्रमाणं प्राणनिलयः'- इति भगवन्नामगणनान्तःपाति-प्रमाणशब्दस्योच्चारणमेव मङ्गलमिति ब्रूमः'[८१] इति।

किञ्च, केषाञ्चन विदुषां मते भाष्यकारेण वात्स्यायनेन न्यायसूत्रभाष्यस्यादौ 'ॐ नमः प्रमाणाय' इत्येवं प्रकारेण मङ्गलमाचरता प्रमाणशब्दस्य मुख्यत्वं प्रतिपादितम्। अतः ईश्वरवाचकत्वादपि तस्य प्राधान्यं ध्वन्यते। अत्रेदं ज्ञेयं यत् महामहोपाध्यायपण्डितफणिभूषणतर्कवागीशमहोदयस्य मते यद्यपि केषुचित् पुस्तकेषु भाष्यारम्भे 'ॐ नमः प्रमाणाय' इत्येवं पाठः प्राप्यते परन्तु 'तद्वचनं भाष्यकारस्यैव' इति कथने प्रामाण्यं नास्ति।[८२] परन्तु ख्रीष्टीयदशमशताब्द्यां 'न्यायकन्दली' इति टीकायाः प्रारम्भे श्रीधरभट्टेन लिखितं यत् न्यायभाष्यकारेण पक्षिलस्वामिना नमस्कारपूर्वकं मङ्गलमाचरितं परन्तु भाष्यारम्भे तन्न लिपिबद्धम्।

### ❖ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः[८३]

महर्षिगौतमेन प्रथमन्यायसूत्रेण न्यायशास्त्रस्य प्रतिपाद्याः षोडश पदार्थाः न्यायशास्त्रस्य च प्रयोजनं निःश्रेयसं तथा तेषां परस्परसम्बन्धस्य सूचना कृता। किन्तु परीक्षामृते तत्प्रयोजनं तथा सम्बन्धस्य निर्णयः न स्यात्। अत एव महर्षिणा गौतमेन प्रस्तुतसूत्रेणानेन एव तत्परीक्षा कृता। अर्थात् महर्षिणा स्वस्य

[८१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-६०-६१

[८२] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-०१

[८३] न्यायसूत्रम्-१/१/२

राद्धान्तं ज्ञापयित्वा पूर्वोक्तप्रयोजनं सम्बन्धश्च समर्थितः। प्रस्तुतसूत्रमिदं तस्य सिद्धान्तसूत्रमिति विज्ञेयम्। यतो हि पूर्वपक्षमृते सिद्धान्तप्रकाशः न संगतो भवति, अत एव भाष्यकारेण महर्षिणा वात्स्यायनेन आदौ पूर्वपक्षस्य सूचना कृता ततः प्रस्तुतसूत्रस्य अवतारणा कृता। भाष्यकारस्य शेषोक्तेन 'तत्त्वज्ञानात्' इति पदेन सह प्रस्तुतसूत्रस्य संयोजनं विज्ञेयम्।

किञ्च, महर्षिणा गौतमेन प्रस्तुतसूत्रेऽस्मिन् तत्त्वज्ञानपदस्य उल्लेखः न कृतः तथापि तेन परवर्तिकाले चतुर्थाध्यायस्य द्वितीयाह्निकस्य पञ्चत्रिंशत्तमे 'मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात्'[८४] इति सूत्रे तत्त्वज्ञानपदस्योल्लेखः कृतः। तदनुसारेणैव भाष्यकारेण वात्स्यायनेन प्रस्तुतसूत्रस्यावतारणायाः पूर्वं 'तत्त्वज्ञानात्' इति पदस्य उल्लेखः कृतः। वस्तुतस्तु तत्त्वज्ञानं विना भिन्नोपायेन मिथ्याज्ञानस्य निवृत्तिः न भवति। तत्त्वज्ञानप्रयुक्तेनैव मिथ्याज्ञानस्य अविद्यायाः वा निवृत्तिः भवति- एतत् समर्थयता शङ्कराचार्येणापि महर्षिगौतमप्रणीतं युक्तियुक्तं सूत्रमिदम् उद्धृतम्। ततः प्राक् तेन निगदितं - 'तथा चाचार्यप्रणीतं न्यायोपवृंहितं सूत्रम्।'[८५] इति। वृत्तिकारेणापि तत्त्वज्ञानपदस्य सोपयोगिता प्रदर्शिता *न्यायसूत्रवृत्तौ* भिन्नरूपेण। तथा च, निःश्रेयसस्य विभागद्वयं प्रदर्शितम्। किञ्च, महर्षिगौतमकृतस्य द्वितीयन्यायसूत्रस्य अवतारणायाः प्रयोजनं किम् ? इत्यपि चर्चितम् वृत्तिकारेण विश्वनाथेन। तदुक्तं तेन - ''ननु तत्त्वज्ञानस्य न साक्षादेव निःश्रेयसहेतुत्वम्। निःश्रेयसं तावद् द्विविधं परापरभेदात्। तत्रापरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव, तदप्यवधारितात्मतत्त्वस्य नैरन्तर्या-

---

[८४] न्यायसूत्रम्-४/२/३५

[८५] वेदान्तदर्शनम्, चतुर्थसूत्रभाष्यम् ,

भ्यासापहृतमिथ्याज्ञानस्य प्रारब्धं कर्म उपभुञ्जानस्य। परं तु क्रमेण, तत्र क्रमप्रतिपादनायेदं सूत्रमिति।"[८६] इति।

तथाहि 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति न्यायदर्शनस्य प्रथमसूत्रे षोडशपदार्थानाम् उद्देशः विहितः। परं न्यायशास्त्रस्य त्रिविधा प्रवृत्तिः- उद्देशः लक्षणं परीक्षा चेति। तदनुसारमेव प्रथमन्यायसूत्रे षोडशपदार्थानाम् उद्देशः कृतः। द्वितीयसूत्रे तु लक्षणं कार्यम् इति। अन्यथा तु न्यायशास्त्रस्य प्रवृत्तिक्रमभङ्गः स्यात्। प्रकृतस्थले तत्किं कृतम् ? अत एव न्यायमञ्जरीकारेण आचार्यजयन्तभट्टेनापि प्रथमन्यायसूत्रस्य व्याख्यानन्तरं लक्षणसूत्रस्य व्याख्याप्रसङ्गे निगदितं यत् द्वितीयन्यायसूत्रं न हि पदार्थलक्षणोपयोगि, अतस्तेन सूत्रस्यास्य व्याख्या न करिष्यते। तदुक्तं तेन *न्यायमञ्जर्यां* - "तदिहोद्देशस्तावद् व्याख्यातः। अस्माभिस्तु लक्षणसूत्राण्येव व्याख्यास्यन्ते।...प्रथमसूत्रानन्तरं – दुःखजन्मेत्यादि द्वितीयं सूत्रं लक्षणानौपायिक-त्वान्नेह विवृतम्।"[८७] इति। तर्हि महर्षिगौतमेन द्वितीयसूत्रस्यावतारणं कथं कृतम्? अत्र वक्तव्यं यत् – तत्त्वसाक्षात्काररूपचरम-तत्त्वज्ञाने सति मुमुक्षूणां स्वशरीरे अवस्थानं न सम्भवति। यतो हि *छान्दोग्योपनिषदि* आम्नातम् - "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति। यदि मुमुक्षूणां तत्त्वज्ञानान्तरं स्वशरीरे अवस्थानं सम्भवं न भवति चेत्तदा शास्त्रसम्प्रदायः विच्छिन्नो भवेत्। अथवा तत्त्वज्ञानानन्तरमेव निःश्रेयसाधिगमः भवति चेत् शास्त्रसम्प्रदायः

---

[८६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च) ,पृ-६९-७०

[८७] न्यायमञ्जरी, पृ-७०

वातपुत्रीयशास्त्रतुल्यः स्यात्। तदुक्तं *न्यायवार्त्तिके* - "अथ तत्त्वज्ञानानन्तरमपवर्गो वातपुत्रीयं शास्त्रं स्यात्, न तत्त्वदृक्पूर्वकमिति। न, निःश्रेयसस्य परापरभेदात्।"[८८] इति। उक्तञ्च *तात्पर्यटीकायां* - "...तच्चेत्तत्त्वज्ञानानन्तरम्, सम्प्रदायोच्छेदो वातपुत्रीयं वा शास्त्रं स्यात्।"[८९] इति। यदि उच्यते अस्तु तदा तत्त्वज्ञानानन्तरं निःश्रेयसं न भवतु, तेन किम्- इत्यपि वक्तुं नालम्, यतो हि प्रथमन्यायसूत्रे महर्षिगौतमेन प्रतिज्ञा कृता यत् प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसलाभो भवेदिति। यद्यपि तेन साक्षात् प्रतिज्ञा न कृता तथाहि तत्त्वज्ञाननिःश्रेयसयोः कार्यकारणभावः प्रदर्शितः। अतः चरमतत्त्वज्ञानं निःश्रेयसस्य कारणं न स्यात्। अत्रेदमुक्तम् आचार्यविश्वनाथेन न्यायसूत्रवृत्तौ - " निःश्रेयसं तावत् द्विविधं परापरभेदात्।"[९०] इति। अत्रायमाशयो यत् महर्षिगौतमस्य तात्पर्यं तावत् अपवर्गरूपनिःश्रेयसं द्विविधं परमपरञ्च। परनिःश्रेयसं हि निर्वाणमुक्तिः चरममुक्तिर्वा। तथा च, अपरं हि जीवन्मुक्तिः। तत्त्वज्ञानानन्तरं यत् मुक्तिर्भवति तद्धि जीवन्मुक्तिः। अस्यामवस्थायां मुक्तपुरुषस्य शरीरं तिष्ठति। किञ्च, जीवन्मुक्तिः कस्य भवति तथा जीवन्मुक्तपुरुषस्य कीदृशी दशा भवत्येतद्विषये आचार्यविश्वनाथेन निगदितं- "तदप्यवधारितात्मतत्त्वस्य नैरन्तर्याभ्यासापहृतमिथ्याज्ञानस्य प्रारब्धं कर्मोपभुञ्जानस्य।"[९१] इति।

आत्मतत्त्वज्ञानेऽपि निरन्तराभ्यासेन यः मिथ्याज्ञानं दुरीकृतवान् स हि जीवन्मुक्तः। आत्मज्ञानानन्तरं तत्त्वदर्शिपुरुषस्य सञ्चितकर्मणः तथा

---

[८८] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-६७

[८९] न्या.वा.तात्.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-६७

[९०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-६९

[९१] तत्रैव

क्रियमाणकर्मणः फलं नष्टं भवति तथापि प्रारब्धकर्मणः फलं ध्वस्तं न भवति। प्रारब्धकर्म हि भोगेन नष्टं भवति। अत एवोच्यते –

"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति।

एवञ्च, अत्रैकः प्रश्नः समुदेति यत् तत्त्वज्ञानेन यदि प्रारब्धकर्मनाशो न भवति चेत् तर्हि कथमुच्यते - 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते ' इति? अत्रैतद् वक्तुं शक्यते यत्– अत्र सर्वपदं हि सञ्चितकर्मपरकं तथा क्रियमाणकर्मपरकम्। अर्थात् ज्ञानाग्निर्हि सञ्चितकर्म तथा क्रियमाणकर्म विनाशयति। तेन हि प्रारब्धकर्म भोगनाश्यमेव भवति। एतन्मतानुसारं कश्चित् जीवन्मुक्तपुरुषः योगशक्तिप्रभावेन शीघ्रं बहुकार्यव्यूहं विनिर्माय तत्तच्छरीरे विभिन्नस्थाने सकलप्रारब्धकर्मणां फलम् उपभोग्य परक्षणे निर्वाणमुक्तिं विन्दते। परन्तु नैके जीवन्मुक्तपुरुषाः परमेश्वरनियोगानुसारं सुदीर्घकालं जीविताः सन्तः शास्त्रादिभिः नानाविधतत्त्वानामुपदेशं प्रदत्तवन्तः। अत एव परममुक्तिः विदेहमुक्तिर्वा क्रमानुसारमेव भवति। तत्क्रममेव प्रस्फुटयितुं सूत्रस्यास्य अवतारणा। तदुक्तं *न्यायसूत्रवृत्तौ* - ' ...तत्र क्रमप्रतिपादनायेदं सूत्रमिति।'[९२] इति। एतेन मुक्तिरपि द्विविधः परः अपरश्चेति न्यायसिद्धान्तोऽपि संसूचितः। पण्डितप्रवरफणिभूषणतर्कवागीशमहोदयमते प्रथमन्यायसूत्रे षोडश पदार्थाः तथा न्यायशास्त्रस्य प्रयोजनं तथा तयोः सम्बन्धः संसूचितः। द्वितीयन्यायसूत्रे तु प्रयोजनसम्बन्धयोः परीक्षा दर्शिता। *न्यायवार्त्तिकतात्पर्यटीका*कारेणापि प्रयोजनसम्बन्धनिर्णयस्य परीक्षार्थं द्वितीयं सूत्रमिति निगदितम्। तदुक्तं *तात्पर्यटीका*कारेण- "तदेवं प्रथमसूत्रेण शास्त्रस्याभिधेयप्रयोजनसम्बन्धान् दर्शयता

[९२] न्या.सू.वृ.,न्या.द,(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-७०

पदार्थाः प्रमाणादय उद्दिष्टाः, तेषां च लक्षणमुक्त्वा तत्परीक्षा वर्तयिष्यते अपरीक्ष्य तत्त्वनिर्णयायोगात्। न चानिर्णीतप्रयोजनसम्बन्धानां लक्षणपरीक्षयो-रवकाशः। न च प्रयोजनसम्बन्धनिर्णयः परीक्षां विनेति तत्परीक्षार्थं द्वितीयं सूत्रम्।"[९३] इति। किन्तु *न्यायमञ्जरी*कारेण तु द्वितीयन्यायसूत्रं न कस्यापि न्यायसूत्रस्य लक्षणोपयोगि इति कृत्वा तेन प्रथमसूत्रस्य वर्णनानन्तरं द्वितीयसूत्रं न व्याख्यापितम्। तथापि तेन द्वितीयसूत्रमिदम् अपवर्गस्य उपयोगि इति कृत्वा अपवर्गपरीक्षाकाले सूत्रस्यास्य व्याख्याने स्वरसः प्रदर्शितः। तदुक्तं जयन्तभट्टेन - " अपवर्गपरीक्षाशेषभूतत्वात्तु तदवसर एव निर्णयिष्यते।"[९४] इति।

किञ्च, '...तदनन्तरापायादपवर्गः' इत्यस्मिन् वाक्ये 'तदनन्तरापायाद्' इति पदस्य व्याख्यानकाले महर्षिवात्स्यायनस्यौदासिन्यं परिलक्ष्यते। पण्डितप्रवरेण आचार्यविश्वनाथेन 'तदनन्तरापायाद्' इति पदस्य व्याख्यां कुर्वता निगदितं - " तदनन्तरस्य तत्सन्निहितस्य पूर्वपूर्वस्यापायाद्...।"[९५] इति। शेषे तेनैवोक्तं - " दुःखाभावादपवर्गः"[९६] इति।

'तदनन्तरापायादपवर्गः' इत्यत्र 'अपायात्' इति पदे प्रयुक्तपञ्चमी-विभक्तेः कोऽर्थः? यतो हि अन्तिमे दुःखापायाद् अपवर्गः भवति। वस्तुतः दुःखस्य अपायस्तथा अपवर्गः न हि भिन्नपदार्थः। यद्दुःखाभावः तदेव अपवर्गः। महर्षिगौतमेनापि स्वयमेव अपवर्गसूत्रे उक्तं - "तदत्यन्तविमोक्षोऽपवर्गः"[९७] इति। अर्थात् दुःखस्य आत्यन्तिकाभावो हि अपवर्गः इति ज्ञेयम्। अत एवात्र नैकेषां नये

---

[९३] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-६७

[९४] न्यायमञ्जरी, पृ- ७०

[९५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-७०

[९६] तदेव, पृ-७४

[९७] न्या.सू.-१/१/२२

पञ्चमी विभक्तिः अभेदार्थिका। किन्तु सूत्रे 'तदनन्तरापायाद्' इति पदं विद्यते। अर्थात् तत्पदेन कदाचित् मिथ्याज्ञानम्, कदाचिद् दोषः, कदाचित् प्रवृत्तिः, कदाचित् जन्म, कदाचित्तु दुःखमपि बोध्यं भवति। अत्रैतत्सत्यं यत् दुःखाभावेन सह अपवर्गस्य अभेदसम्बन्धो विद्यते। किन्तु मिथ्याज्ञानाभावेन सह, दोषाभावेन सह, प्रवृत्त्यभावेन सह तथा जन्माभावेन सह अपवर्गस्य अभेदसम्बन्धो न विद्यते। यदि 'दुःखापायादपवर्गः' इति सूत्रं स्यात्तदा तु वक्तुमलं यत्, अत्र पञ्चमी विभक्तिः अभेदार्थिका। किन्तु तत्तु महर्षिणा न विवक्षितम्। तेन हि सूत्रे निगदितं यत् 'तदनन्तरापायादपवर्गः' इति। वस्तुतः मिथ्याज्ञानाभावप्रयोज्यो हि दोषाभावः, दोषाभावप्रयोज्यो हि प्रवृत्त्यभावः, प्रवृत्त्यभावप्रयोज्यो हि जन्माभावः, जन्माभावप्रयोज्यो हि दुःखाभावः तथा दुःखाभावाभिन्नो हि अपवर्गः इति क्रमस्तु विज्ञेयः। न हि अपवर्गः केवलं दुःखापायाद् भवति अपि तु जन्माद्यपायोऽपि तत्र प्रयोजकरूपेण वर्तमानः विद्यते। अत एव जन्मादिप्रत्येकाभावेन सह अपवर्गस्य प्रयोज्यप्रयोजकभावरूपसम्बन्धः वर्तते। अत एव महानैयायिकेन फणिभूषण-तर्कवागीशेन उक्तं तत्कृतन्यायदर्शनग्रन्थे - " তাই অপবর্গরূপ চরম দুঃখাপায়ে অপবর্গের প্রয়োজকত্ব সম্ভব না হইলেও মহর্ষি বহুর অনুরোধে 'তদনন্তরাপায়াৎ' এই রূপই প্রয়োগ করিয়াছেন। "[९८] इति।

यद्यपि वृत्तिकारेण विश्वनाथेन प्रयोज्यप्रयोजकभावः इत्येवं नोक्तं तथापि 'प्रयोजकत्वं प्रयोज्यत्वं वा' इति वाक्यात् तदेवार्थः प्रकाशते। यथा घटज्ञाने घटज्ञानयोः विषयविषयिभावरूपसम्बन्धः विद्यते। अत्र घटः विषयो भवति ज्ञानञ्च विषयि। पुनश्च घटे ज्ञानमस्ति विषयतासम्बन्धेन अथवा घटः ज्ञाने

---

[९८] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-६८

तिष्ठति विषयितासम्बन्धेन – इत्यपि वक्तुं शक्यते। प्रस्तुतस्थले प्रयोज्यप्रयोजक-भावरूपसम्बन्धः वर्तते- इति साक्षात् न कथनेऽपि जन्माद्यभावः अपवर्गे प्रयोज्यत्वसम्बन्धेन अथवा अपवर्गः जन्माद्यभावे तिष्ठति प्रयोजकत्वसम्बन्धेन– इति कथनेऽपि तदेव तात्पर्यं विवक्षितम्।

इदानीमेकः प्रश्नः समुदेति यत् प्रयोज्यप्रयोजकत्वभावरूपसम्बन्धः किं प्रसिद्धः संयोगः, समवायः, स्वरूपः इत्यादिसम्बन्धेभ्यः अतिरिक्तः अनतिरिक्तो वा? तदुत्तरे तु वृत्तिकारेण निगदितं यत् तद्धि एकः स्वरूपसम्बन्धः एव। स्वरूपसम्बन्धः यथा एकः सम्बन्धः तथैव तद्धि सम्बन्धिरूपोऽपि भवति। यथा दण्डाभावात् घटाभावो जायते। अत्र दण्डाभावघटाभावयोः स्वरूपसम्बन्धो विद्यते। तद्धि सम्बन्धिनः स्वरूपः। एवं तत्रापि जन्माद्यभावापवर्गयोः विद्यमानः प्रयोज्यत्वसम्बन्धः प्रयोजकत्वसम्बन्धो वा वस्तुतः स्वरूपसम्बन्धः एव। तद्धि तस्य सम्बन्धिनोः जन्माद्यभावापवर्गयोः स्वरूपः।

किञ्च, पुनः एका शङ्का जागरिता भवति यत् 'तदनन्तरापायादपवर्गः' इत्यत्र प्रथमतः पञ्चम्यर्थः प्रयोजकत्वम् उक्त्वा पुनः विकल्पपक्षे प्रयोज्यत्वं कथम् उक्तम् ? एतदुत्तरे तु एतद्वक्तुं शक्यते यत् तदनन्तरापायपदस्यार्थः मिथ्याज्ञानादेः अनन्तरापायः, पञ्चम्यर्थः प्रयोजकत्वम्, अपवर्गपदस्यार्थः मोक्षः, सुपदस्यार्थः उक्तप्रकृत्यर्थः। अत्रेदं ज्ञेयं यत् तदनन्तरापायपदार्थस्यैव मोक्षं प्रति प्रयोजकत्वं तिष्ठतीति कृत्वा तदनन्तरापायपदार्थः मोक्षेण सह स्वनिरूपकत्वसम्बन्धेन अन्वितो भवति। तेनात्र शाब्दबोधः स्यात्- 'मिथ्याज्ञानाद्यपायनिष्ठप्रयोजकत्व-निरूपकः मोक्षः' इति। किन्त एष स्वनिरूपकत्वसम्बन्धः वृत्त्यनियामकसम्बन्धो भवति। एषः सम्बन्धः अभावप्रतियोगितावच्छेदकसम्बन्धो न भवति

प्राचीननैयायिकानां नये। 'तदनन्तरापायादपवर्गः न तु मिथ्याज्ञानादेव ' इत्यत्र तु उक्तनिरूपकत्वसम्बन्धः एव अभावप्रतियोगितावच्छेदकसम्बन्धरूपेण स्वीक्रियते। तेन तु उक्तमतेन विरोधो भवति। अत एव गदाधरभट्टाचार्येण व्युत्पत्तिवादस्य प्रथमाकारके निगदितं - "मैवं- 'राज्ञः पुरुषः' इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकमन्यथा 'पुरुषः न राज्ञः' इत्यादौ पुरुषे राजस्वत्वाद्यभावबोधानुपपत्तेः। न हि तत्र स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभाव एव प्रतीयते न तु राजस्वत्वाद्यभाव इति सम्भवति – स्वत्वादिसम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रसिद्धेः।"[९९] इति।

अत्र पञ्चम्यर्थः प्रयोजकत्वस्वीकारे एषा आपत्तिः दृश्यते। अत एव वृत्तिकारेण विश्वनाथेन दोषनिवारणाय अत्र विकल्पपक्षे पञ्चम्यर्थः प्रयोज्यत्वमुररीकृतम। एतत्पक्षे तदनन्तरापायपदार्थस्य स्वनिरूपितत्वसम्बन्धेन पञ्चम्यर्थः प्रयोज्यत्वसम्बन्धे अन्वितो भवति, अपवर्गपदार्थः एवात्र प्रयोज्यत्वात् पञ्चम्यर्थस्य स्वाश्रयत्वसम्बन्धेन अपवर्गपदार्थे अन्वयो भवति। तेनात्रैवं शाब्दबोधः स्यात् - 'मिथ्याज्ञानाद्यपायनिरूपितप्रयोज्यत्वाश्रयः मोक्षः' इति। 'तदनन्तरापायादपवर्गः न तु मिथ्याज्ञानादेव' इत्यत्र पूर्ववत् स्वनिरूपकत्वसम्बन्धः प्रतियोगितावच्छेदकसम्बन्धो न भवति, किन्तु स्वाश्रयत्वसम्बन्ध एव स्यात्। स्वाश्रयत्वसम्बन्धस्तु वृत्तिनियामक एव। अत एव प्रागुक्तदोषो निवार्यते। अत एव वृत्तिकारेण प्रयोजकत्वरूपेण पञ्चम्यर्थं परित्याज्य प्रयोज्यत्वरूपेण

---

[९९] व्युत्पत्तिवादः, पृ-१५८

पञ्चम्यर्थः विकल्पपक्षे अनुसृतः। तदुक्तं विश्वनाथेन न्यायसूत्रवृत्तौ- "प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः। दण्डाभावाद् घटाभावः इतिवत् स्वरूपसम्बन्धविशेष एव तत्।"[१००] इति।

अन्तिमे विश्वनाथेनोक्तं यत् यतः दुःखापायः एव अपवर्गः, अतः अपवर्गः दुःखापायप्रयुक्त इति कथने उचितं न स्यात्। अत एव सूत्रे तत्स्थले पञ्चमीविभक्तेः अभेदार्थः बोध्यः। किन्तु पञ्चमीविभक्तेः अभेदार्थस्तु कुत्रापि न परिलक्ष्यते, अतः विश्वनाथेन अन्तिमे उक्तं यत् अथवा सूत्रे अपवर्गशब्देन अपवर्गव्यवहारपर्यन्तं विवक्षितमिति। अत्रायमाशयः अपवर्गः दुःखापायस्वरूपः तथापि अपवर्गव्यवहारः अर्थात् अन्यलोके अमुकस्य अपवर्गः अभवत् इत्यादिशब्दप्रयोगेण तद् अपवर्गः दुःखस्य अपायप्रयुक्तः इति बोध्यम्। तदुक्तं विश्वनाथेन- "यद्यपि दुःखापायान्नापवर्गः किन्तु स एव सः, तथाप्यभेद एव तत्र पञ्चम्यर्थः। अपवर्गपदं वा तद्व्यवहारपरम्।"[१०१] इति।

अपवर्गलाभस्य क्रमस्तु भाष्यकारेण तथा वृत्तिकारेण उभयाभ्यां वर्णितः स्वस्वव्याख्यारीत्यनुसारम्। तथाहि भाष्यकारेण द्वादशप्रमेयपदार्थेषु मिथ्याज्ञान-प्रकारं प्रदर्शयता तेन अपवर्गलाभक्रमः व्याख्यापितः। तेनोक्तं यत् यदा तत्त्वज्ञानजन्यस्य मिथ्याज्ञानस्य निवृत्तिर्भवति, तदा मिथ्याज्ञानविनाशे (तत्कार्याणाम्) दोषाणां निवृत्तिर्भवति। दोषाणां निवृत्तौ तु प्रवृत्तिः (धर्माधर्मरूपा) निवृत्ता भवति। ततश्च प्रवृत्त्यपाये जन्म निवृत्तं भवति। जन्मनिवृत्तौ तु दुःखानां निवृत्तिर्भवति। ततश्च दुःखनिवृत्तौ दुःखानामात्यन्तिक-

---

[१००] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-७०-७१

[१०१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८३

निवृत्तौ वा आत्यन्तिकापवर्गरूपः परममुक्तिरूपो वा निःश्रेयसलाभो भवति। तदुक्तं वात्स्यायनेन न्यायभाष्ये- "यदा तु तत्त्वज्ञाना-न्मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःख्यापाये चात्यन्तिकोऽपवर्गो निःश्रेयसमिति।" इति।[१०२]

किञ्चात्रावधेयं यत् भाष्यकारेण वात्स्यायनेन मिथ्याज्ञानं वर्णयता द्वादशप्रमेयपदार्थेषु मिथ्याज्ञानं कीदृशं भवेदिति विषये प्रत्येकप्रमेयपदार्थे पृथक् पृथक् मिथ्याज्ञानप्रकारः प्रदर्शितः।[१०३]

पण्डितचूडामणिना न्यायसूत्रवृत्तिकारेण आचार्यविश्वनाथेन अपवर्ग-लाभस्य क्रमं वर्णयता निगदितं- "दुःखादीनां मध्ये यदुत्तरोत्तरम्, तेषामपाये तदनन्तरस्य तत्सन्निहितस्य पूर्वपूर्वस्यापायादपवर्गः।...तदयमर्थः तत्त्वज्ञानेन विरोधितयाऽपहृते मिथ्याज्ञाने, कारणाभावाच्च निवृत्ते रागद्वेषात्मके दोषे, तदभावाच्च प्रवृत्तेर्धर्माधर्मात्मिकाया अनुत्पत्तौ, तदभावाच्च जन्मनो विशिष्टशरीरसम्बन्धस्याभावाद् दुःखाभावादपवर्गः।"[१०४] इति। अत्रायमाशयः- 'दुःखादीनाम्' इति पदं बहुव्रीहिसमासनिष्पन्नम्। दुःखम् आदिः येषां ते दुःखादयः, तेषाम्। अत्र तद्गुणसंविज्ञानबहुव्रीहिसमासनिष्पन्नदुःखादिपदेन सूत्रोल्लिखिताः दुःखम्, जन्म, प्रवृत्तिः, दोषः, मिथ्याज्ञानमित्येते पदार्थाः बोध्याः। अत एव दुःखादिषु ये तावत् परवर्विनः तेषामपाये तदव्यवहितपूर्ववर्तिनः पदार्थस्य अपायो भवति। अन्तिमे दुःखापाये अपवर्गलाभो भवति। अर्थात् तत्त्वज्ञानस्य विरोधिरूपेण मिथ्याज्ञाने अपहृते कारणाभावात् (मिथ्याज्ञानस्य कार्यस्य)

---

[१०२] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-७८-८०

[१०३] विस्तरशस्तु वात्स्यायनभाष्यं द्रष्टव्यम्,न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-६८-६९

[१०४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-७०-७५

रागद्वेषरूपदोषस्य निवृत्तिः भवति चेत् तद्दोषाभावात् धर्माधर्मात्मकप्रवृत्तेरपायो भवति, तदपाये तु विशिष्टशरीरसम्बन्धस्य जन्मनः निवृत्तिर्भवति, तदभावाच्च दुःखाभावे अपवर्गलाभो भवतीति विशेषतयानुसन्धेयम्।

पण्डितप्रवरेण भाष्यकारेण वात्स्यायनेन उदाहरणसहयोगेन अपवर्गलाभस्य पूर्वपूर्वावस्थायाः (मिथ्याज्ञानदोषप्रवृत्तिजन्मदुःखानाम्) सम्यक् वर्णनं कृतम्।[१०५]

किन्तु विषयेऽस्मिन् आचार्यविश्वनाथस्य किमपि वचनं न प्राप्यते। किञ्च, प्रसङ्गतः एतद्विज्ञेयं यत् तत्त्वज्ञानमपि भाष्यकारेण वात्स्यायनेन विशदतया उपवर्णितम्। तथा च, दुःखविषये, जन्मविषये, प्रवृत्तिविषये दोषविषये च तत्त्वज्ञानं किंप्रकारकं स्यादिति विषयेऽपि भाष्यकारेण चर्चा विहिता। तदुक्तं तेन- "तत्त्वज्ञानन्तु खलु मिथ्याज्ञानविपर्ययेण व्याख्यातम्। आत्मनि तावदस्तीति, अनात्मन्यनात्मेति, एवं दुःखे अनित्ये अत्राणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम्, प्रवृत्तौ – अस्ति कर्म, अस्ति कर्मफलमिति, दोषेषु – दोषनिमित्तोऽयं संसार इति, प्रेत्यभावे खल्वस्ति जन्तुर्जीवः सत्त्व आत्मा वा, यः प्रेत्य भवेदिति, निमित्तवज्जन्म, निमित्तवान् जन्मोपरम इत्यनादिः प्रेत्यभावोऽपवर्गान्त इति, नैमित्तिकः सन् प्रेत्यभावः प्रवृत्तिनिमित्त इति, सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेद-प्रतिसन्धानाभ्यां प्रवर्तत इति, अपवर्गे – शान्तः खल्वयं सर्वविप्रयोगः सर्वोपरमोऽपवर्गः, बहु च कृच्छ्रं घोरं पापकं लुप्यत इति कथं बुद्धिमान् सर्वदुःखोच्छेदं

---

[१०५] द्रष्टव्यम्, न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-६८-७१

सर्वदुःखासंविदमपवर्गं न रोचयेदिति, तद्यथा मधुविषसम्पृक्तान्नमनादेयमिति, एवं सुखं दुःखानुषक्तमनादेयमिति।"[१०६] इति। एतेन भाष्यव्याख्यातः तत्त्वज्ञानविषये पाठकानां सुस्पष्टं ज्ञानं भवति। किन्तु वृत्तिकारेण विश्वनाथेनात्र तत्त्वज्ञानविषये किमपि न गदितम्।

किञ्च, किन्तु आचार्यविश्वनाथेन अपवर्गलाभस्य क्रमे प्रवृत्तिदोषयोः कार्यकारणभावे व्यभिचारं प्रदर्शयता पुनः तस्य समाधानमकारि। तथाहि पूर्वं दृष्टं यत् तत्र दोषपदेन रागो द्वेषश्च विवक्षितः। रागो द्वेषश्च यथाक्रमं धर्मम् अधर्मं च प्रति कारणं भवति। किन्तु कैश्चित् तु रागो द्वेषश्च धर्मं प्रति तथा अधर्मं प्रति कारणं भवतीति न मन्यते। यतो हि कदाचिद् दृश्यते यत् विनापि इच्छां गङ्गास्नानादिना पुरुषस्य धर्मो जायते। तथा द्वेषाभावेऽपि हिंसा भवति चेत् पुरुषस्य अधर्मो जायते। अत एव रागद्वेषरूपदोषाभावेऽपि तत्तत्कार्यस्य धर्मस्य अधर्मस्य च उत्पत्तौ व्यतिरेकव्यभिचारो भवति। तेन च रागः द्वेषश्च धर्मम् अधर्मं च प्रति कारणं न भवति। यद्युच्यते रागः द्वेषश्च धर्मम् अधर्मञ्च प्रति कारणं न भवतु, तेन का क्षतिः? इति चेत्तदापि एतत्कथनं नोचितं स्यात्। यतो हि तदा दोषाभावे प्रवृत्त्यपायो भवति इत्यपि कथितुं न शक्यते। तेन च, 'तदनन्तरापायाद्' इति पदपि व्यर्थं स्यात्।

अस्य समाधानं तु विश्वनाथेन *न्यायसूत्रवृत्तौ* भणितम्। तथाहि अत्र दोषपदस्यार्थो हि 'मिथ्याज्ञानवासना' इति। मिथ्याज्ञानवासना नाम मिथ्याज्ञानजन्यसंस्कारविशेषः। अत एव वस्तुतः इच्छात्मकस्य रागात्मकस्य वा दोषस्य अभावे मिथ्याज्ञानजन्यसंस्कारवशादेव तत्र गङ्गाजलसंयोगादिना धर्मो जायते। तथा च, जीवन्मुक्तपुरुषस्यापि मिथ्याज्ञानजन्यसंस्काराभावात्

[१०६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८२-८३

धर्माधर्मयोः उत्पत्तिर्न भवति। अत एव गङ्गाजलस्पर्शिपुरुषस्य कारणरूपमिथ्याज्ञानजन्यसंस्कारात्मकदोषसत्त्वात् कार्यरूपधर्मस्योत्पत्तिर्भवति। अत एवात्र कार्यकारणभावस्य व्यभिचारो न दृष्टः। किञ्च, जीवन्मुक्तपुरुषविषये कारणरूपमिथ्याज्ञानजन्यसंस्कारात्मकदोषाभावात् तत्कार्यरूपधर्माधर्मयोः उत्पत्तिर्न भवति। अत एवात्रापि व्यभिचारो न भवति। तदुक्तं वृत्तिकारेण *न्यायसूत्रवृत्तौ* - "वस्तुतो विनापीच्छां गङ्गाजलसंयोगादिना धर्मादिसम्भवाद् व्यभिचारः, तस्मान्मिथ्याज्ञानवासनैवात्र दोषः, तस्याश्च मिथ्याज्ञाननाशात् तत्कालीनतत्त्वज्ञानवासनातो वा नाश इत्यपि वदन्ति।" इति। [१०७]

अत्रापि एको विषयो लक्षणीयो यत् तत्र दोषपदस्य मिथ्याज्ञानजन्यसंस्काररूपार्थः महर्षिगौतमेन न विवक्षितः। यतो हि तेन अस्मिन्नर्थे दोषपदस्य कुत्रापि व्यवहारः न कृतः। तथा च, मिथ्याज्ञाननाशात् मिथ्याज्ञानजन्यसंस्कारस्यापि नाशो भवतीत्यपि वक्तुं नालम्। यतो हि मिथ्याज्ञाननाशेऽपि तज्जन्यसंस्कारः तिष्ठति एव। वार्त्तिककारेणापि उक्तं यत् ये तावत् रागाः द्वेषाश्चाधुनापि न उत्पन्नाः, ते तु कारणरूपमिथ्याज्ञानाभावात् पुनः उत्पन्नाः न भविष्यन्ति। परन्तु ये रागाः द्वेषाश्च उत्पन्नाः तेषां कथमपायः स्यात् ? अत्र वार्त्तिककारस्याभिमतं यत् वैराग्यवशादेव तेषामपायो भविष्यतीति। तदुक्तं वार्त्तिककारेण- " कारणं मिथ्याज्ञानं कार्याः रागादयः। न च कारणं विना कार्यं भवितुमर्हति। ते तावदनुत्पन्ना रागादयस्ते कारणाभावान्माभूवन्। ये तूत्पन्नास्ते कथम् ? तेषामपि वैराग्यान्निवृत्तिः।"[१०८] इति।

[१०७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८०

[१०८] न्या.वा., न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-८०

अत एव भिन्नसमाधनम् अभिव्यक्तयता वृत्तिकारेण विश्वनाथेन भणितं- “तस्याश्च मिथ्याज्ञाननाशात् तत्कालीनतत्त्वज्ञानवासनातो वा नाश इत्यपि वदन्ति।”[१०९] इति। अत्रायमाशयः – ज्ञानं नष्टं भवति चेत् तज्जन्यसंस्कारः तिष्ठति एव। किन्तु तदा तत्त्वज्ञानजन्यसंस्कारेण मिथ्याज्ञानजन्यसंस्कारो विनष्टो भवति। अत एव तदा तत्त्वज्ञानजन्यसंस्कारसत्त्वात् जीवन्मुक्तपुरुषस्य उत्कटः रागः द्वेषश्च न पुनः उत्पद्यते। किञ्च, ‘इति वदन्ति’ इति वाक्यांशेन महर्षिणा विश्वनाथेन अपरपण्डितानां मतम् अभिव्यक्तमिति ध्येयम्।

## ❖ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[११०]

न्यायशास्त्रे त्रिविधा प्रवृत्तिः – उद्देशः लक्षणं परीक्षा चेति। उद्देशो यत्क्रमेण भवति लक्षणं परीक्षा चापि तत्क्रमेणैव करणीया भवति। क्रमभङ्गस्तु नाभिप्रेतः इति पूर्वमेव सूचितम्। अनन्तरं नाम सप्रयोजनाभिधेयप्रकरणानन्तरं लक्षणप्रकरणारम्भे युगपत् षोडशपदार्थानां लक्षणं करणीयं भवति। अत्रायं प्रश्नो भवति यत् षोडशपदार्थेषु सर्वादौ कस्य पदार्थस्य लक्षणं करणीयम् ? अत्रोत्तरे विश्वनाथेन निगदितं - “यथोद्देशं लक्षणस्यापेक्षितत्वात्...”[१११] इति। अर्थात् यत्क्रमेण उद्देशो विहितः तत्क्रमेणैव लक्षणं करणीयम्। अत एव नियमानुसारं प्रथमन्यायसूत्रे आदौ प्रमाणपदार्थस्य उद्दिष्टत्वात् प्रमाणपदार्थस्य लक्षणं विधेयम्। अत्रेदं लक्षणीयं यत् सूत्रेऽस्मिन् यथा प्रमाणपदार्थस्य लक्षणं कृतं तथैव तस्य

[१०९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), तत्रैव

[११०] न्यायसूत्रम्-१/१/३

[१११] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८९

(प्रमाणपदार्थस्य) विभागोऽपि विहितः। अतो विश्वनाथेन भणितं न्यायसूत्रवृत्तौ - "...प्रथमोद्दिष्टं प्रमाणं लक्षयति विभजते च..."[११२] इति। अत्र विभागः कथं कृतः? इति प्रश्नस्योत्तरे वक्तुं शक्यते यत् महर्षिणा अक्षपादेन परवर्तिकाले प्रत्यक्षादिचतुर्विधप्रमाणानां लक्षणं कृतं किन्तु तदतिरिक्तप्रमाणं सम्मतं न वा इति विषये संशयः तिष्ठति एव। यतो हि सजातीयविजातीयाभ्यां व्यावृत्तिर्हि लक्षणव्यापारः। तेन पदार्थानां संख्यानियमः नाधिगम्यते। अतः पदार्थः कतिविधः इति निश्चयार्थमेवात्र सूत्रे विभागः प्रदर्शितः। उद्योतकरेणापि न्यायवार्त्तिके गदितं- "तस्मात् संशयनिवृत्त्यर्थं युक्तो विभागोद्देश इति।"[११३] इति। अत एव विश्वनाथेन उक्तं *न्यायसूत्रवृत्तौ* -"...लक्षयति विभजते च..."[११४] इति। अत एव महर्षिगौतमेन सूत्रेणैकेन कार्यद्वयं सम्पादितमिति न्यायमञ्जरीकारेणापि भणितम्–

"एकेनानेन सूत्रेण द्वयञ्चाह महामुनिः।
प्रमाणेषु चतुःसंख्या तथा सामान्यलक्षणम्।।"[११५] इति।

प्रमाणपदार्थस्य सामान्यलक्षणज्ञानाभावे सति विशेषलक्षणज्ञानं न अनायाससाध्यमिति कृत्वा आदौ प्रमाणपदार्थस्य सामान्यलक्षणं वक्तव्यम्। परन्तु महर्षिगौतमेन प्रमाणपदार्थस्य सामान्यलक्षणसूत्रं नोक्तम्। प्राचीनकाले नैके पण्डिताः महर्षिगौतमकृतन्यायसूत्रस्य एषः न्यूनतादोषः उल्लिखितः इति लोकश्रुतिः। अतो वाचस्पतिमिश्रेण उक्तदोषपरिहारार्थं भाष्यकारस्य पूर्वोक्तवचनस्य तात्पर्यं व्याख्यायता निगदितं यत् सूत्रमिदं प्रमाणपदार्थस्य

---

[११२] तत्रैव

[११३] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६

[११४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८९

[११५] न्यायमञ्जरी,पृ-१५४

विभागनिरूपणार्थं कथितं तथापि सूत्रे शेषोक्तप्रमाणपदोल्लेखात् प्रमाणस्य सामान्यलक्षणमपि सूचितं भवति। यतो हि सूत्रे बह्वर्थसूचितं भवति।[११६] अत एव तात्पर्यटीकाकारेण वाचस्पतिमिश्रेण निगदितं - "...यद्यपि विभागपरमेतत् सूत्रम्, तथापि प्रमाणपदसमभिव्याहृतं सत् सामर्थ्यात् प्रमाणत्वमपि लक्षयतीति। तथाहि- प्रमीयतेऽनेनेत्यस्य वाक्यस्यार्थे प्रमाणपदप्रयोगः, प्रमा च स्मृतेरन्या अर्थाव्यभिचारी स्वतन्त्रः परिच्छेदः। तस्माद्विभागपरादपि सूत्रात् प्रतीयमानं प्रमाणसामान्यलक्षणमपेक्षितं संगृहीतमिति प्रमाणत्वोपगृहीतानां प्रत्यक्षादीनां युक्तो विभागः।"[११७] इति।

प्रमाणपदमिदं 'प्रमीयतेऽनेन' इति विग्रहे प्रपूर्वकज्ञानवाचिमाधातोरुत्तरं करणवाच्ये ल्युट्प्रत्यये निष्पन्नम्। अत्र प्रशब्दस्यार्थः प्रकर्षः। प्रकर्षश्च तद्वति तत्प्रकारकत्वरूपविशिष्टो भवति। अत्र प्रकृतस्थले तत्पदेन प्रकारः बोध्यः। अत एव तत्प्रकारविशिष्टपदार्थे तत्प्रकारकत्वमेव प्रकर्षः। अर्थात् कस्मिंश्चित् ज्ञाने यदि एवं भवति – तज्ज्ञानं यत्पदार्थविषयकं भवति, तत्पदार्थः यत्प्रकारको भवति, यदि तत्प्रकारकपदार्थ एव ज्ञाने भासितो भवति चेत् तदा तज्ज्ञानं प्रमा भवति, अर्थात् तज्ज्ञाने प्रकर्षोऽस्ति इति वक्तुमलम्। यथा – रजतत्वप्रकारकरजतपदार्थः रजतत्वप्रकाररूपेणैव ज्ञाने भासितो भवति चेत् रजतज्ञानं प्रमा भवति। न्यायकुसुमाञ्जलिग्रन्थे उदयनाचार्येण यथार्थानुभवः प्रमा इति निगदितम्। तदुक्तं तेन- " यथार्थानुभवो मानमनपेक्षतयेष्यते "[११८] इति।

---

[११६] उक्तं हि वाचस्पतिमिश्रेण भामत्यां - " सूत्रञ्च बह्वर्थसूचनाद् भवति।" इति।

[११७] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८४-८५

[११८] न्यायकुसुमाञ्जलिः,चतुर्थस्तवकः,पृ-१९१

एवंविधप्रमायाः करणं भवति प्रमाणम्। अत एव शूक्तौ रजतज्ञाने सति तज्ज्ञाने शुक्तित्वप्रकारकशुक्तिः शुक्तित्वप्रकारकरूपेण अभासितत्वे रजतत्वप्रकाररूपेण भासितत्वात् ज्ञाने प्रकर्षाभावात् तादृशभ्रमज्ञानस्य करणे प्रमाणलक्षणस्यातिव्याप्तिर्न भवति। तदुक्तं न्यायसूत्रवृत्तौ आचार्यविश्वनाथेन - " अत्र च तद्वति तत्प्रकारकत्वरूपप्रकर्षविशिष्टज्ञानं प्रशब्दविशिष्टेन माधातुना प्रत्याय्यते, तत्करणत्वं प्रमाणत्वम्।"[११९] इति।

प्रस्तुतसूत्रस्यालोचनावेलायां भाष्यकारेण पृथक्तया प्रमाणपदस्य व्याख्या न कृता तथा प्रमाणस्य सामान्यलक्षणमपि न प्रादर्शि किन्तु परवर्तिकाले 'उपलब्धिसाधनानि प्रमाणानि' इत्यादिसन्दर्भैः उपलब्धेः करणत्वमेव प्रमाणस्य सामान्यलक्षणम् इति प्रमाणशब्दव्युत्पत्त्या एव अधिगम्यते इति भाष्यकारस्याशयः।

अथवा मन्नये प्रथमन्यायसूत्रस्य व्याख्यानवेलायां भाष्यारम्भे वा प्रमाणपदस्य विस्तरशः व्याख्या भाष्यकारेण वात्स्यायनेन कृता इति कृत्वा पुनः प्रस्तुतसूत्रस्य व्याख्यानकाले प्रमाणपदस्य व्याख्यायां स्वरसः नादर्शि इति विज्ञेयम्।

प्रमाणस्वरूपस्य व्याख्यां कुर्वता वार्त्तिककारेण पूर्वं निगदितम् - " उपलब्धिहेतुः प्रमाणम्, उपलब्धिहेतुत्वं प्रमाणत्वम्। यदुपलब्धिनिमित्तं तत् प्रमाणमिति।"[१२०] इति। हेतुशब्देनात्र करणरूपहेतुः विवक्षितः।

प्रमाणपदस्य व्याख्यानकाले पण्डितप्रवरेण आचार्यफणिभूषणतर्कवागीशमहोदयेन निगदितं - " এই সূত্রোক্ত 'প্রমাণ' শব্দটি প্রপূর্বক

---

[११९] न्या.सू.वृ,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८९

[१२०] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-१५-१६

মাধাতুর উত্তর করণবাচ্যে ল্যুট্ প্রত্যয়সিদ্ধ। সুতরাং প্রমাজ্ঞানের করণত্বই যে, প্রমাণের সামান্য লক্ষণ, ইহা উক্ত 'প্রমাণ' শব্দের দ্বারাই বোঝা যায়।"[১২১] इति।

प्रस्तुतसूत्रस्य व्याख्यानकाले ज्ञानविषये तथा स्मृतिविषये चर्चा तु भाष्ये नोपलभ्यते, परं विश्वनाथकृतन्यायसूत्रवृत्तौ तु उपलभ्यते। तथाहि ज्ञानं हि द्विविधम् – अनुभवः स्मृतिश्च। अनुभवो यदि यथार्थो भवति चेत् अर्थात् तद्वति तत्प्रकारको भवति तदा स्मृतिरपि यथार्थो भवति। अत्र ज्ञानमित्युच्यमाने यदि निर्विशेषं ज्ञानं बोध्यते चेत् तदा यथार्थस्मृतेः करणे प्रमाणलक्षणस्य संगतित्वात् तत्रातिव्याप्तिः भवति। अत एवाचार्यविश्वनाथेन न्यायसूत्रवृत्तौ भणितं- "ज्ञानञ्चात्र अनुभवो विवक्षितः। तेन स्मृतिकरणे नातिव्याप्तिः।"[१२२] इति।

किञ्च जैनदार्शनिकाः परोक्षप्रमाणरूपेण स्मृतेरुल्लेखः कृतः। अत एव प्रमाणमीमांसायामुक्तम्- "अविशदः परोक्षम्। स्मृतिप्रत्यभिज्ञानानुमानागमा-स्तद्विधयः।"[१२३] इति। अतो न्यायकुसुमाञ्जलिग्रन्थे उदयनाचार्येण स्मृतेः प्रमात्वम् 'अनपेक्षतया' इति पदोल्लेखेन निवारितम्। विषयेऽस्मिन् भाष्यकारेण न किमपि आलोचितं स्पष्टतः। परन्तु पण्डितप्रवरेण आचार्यफणिभूषणतर्कवागीशमहोदयेन प्रस्तुतसूत्रस्य भाष्यं व्याख्यायता निगदितं तत्कृतबङ्गीय*न्यायदर्शन*ग्रन्थे- "যে বিষয় পূর্বে কোনো প্রমাণের দ্বারা অধিগত বা অনুভূত হইয়াছে, সেই বিষয়ের সংস্কারজন্য যে স্মরণরূপ জ্ঞান, তাহাই স্মৃতি। কিন্তু সেই স্থলে সেই স্মরণের করণ পূর্বানুভবের যাহা করণ, তাহাই সে বিষয়ে প্রমাণ হওয়ায় পৃথক্ প্রমাণ স্বীকার অনাবশ্যক।"[১২৪] इति।

---

[१२१].न्या.द.(सम्पा.फणिभूषणतर्कवागीशः), पृ-८४

[१२२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८९-९०

[१२३] प्रमाणमीमांसा- १/२/१/२

[१२४] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-८४

लक्षितप्रमाणपदार्थानां विभागोऽपि प्रस्तुतसूत्रेण कृतः। प्रत्यक्षम्, अनुमानम्, उपमानं शब्दश्चेति चत्वारि न्यायसम्मतप्रमाणानि। अत्रैकः प्रश्नः आयाति यत् 'चत्वारि प्रमाणानि' इत्येवं संख्यावचनशब्दः सूत्रे न श्रुतो भवति तथा 'प्रत्यक्षादीन्येव' इत्येवंविधः एवकारस्यापि उल्लेखो नास्ति तर्हि कथमवगच्छेत् यत् चत्वारि एव प्रमाणानि ? अत्रोत्तरं हि – शब्दशक्तेः स्वभावनियमाद् एव तन्नियमावगमो भवति। यथा 'गर्गांस्त्रीन् भोजय' इति कथने संख्यावाचिशब्दोल्लेखात् त्रित्वमात्रमेव बोधयति तथैव 'यज्ञदत्तदेवदत्तौ आनय' इति कथनेऽपि संख्यावाचिद्वित्वबोधकशब्दाभावेऽपि तथा अवधारणवाच्यैवकारस्य प्रयोगाभावेऽपि उक्तद्वित्वमात्रम् आनेष्यति इत्येवं नियमितद्वित्वस्य बोधो भवति। एवमत्र स्थले प्रत्यक्षम्, अनुमानम्, उपमानं शब्दश्च प्रमाणानि इति कथनेऽपि शब्दशक्तिप्रभावेन तदतिरिक्तं तदपेक्षा वा न्यूनप्रमाणं नास्ति इति बोधयति। अथवा प्रथमसूत्रस्य विग्रहवाक्ये 'प्रमाणानि' इति बहुवचनान्तपदात् प्रमाणस्य बहुत्वं तावत् ज्ञातं भवति। ततश्च पुनः प्रस्तुतसूत्रे प्रमाणचतुष्टयस्य उल्लेखात् तद्बहुत्वं चतुष्टयत्वमिति बोधयति इति विशेषतोऽनुसन्धेयम्। उक्तं हि *न्यायवार्त्तिके* - "यदि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति विभागो न क्रियते, नियमो न गम्यते चत्वार्य्येव प्रमाणानीति।"[१२५] इति।

इदानीमेकः प्रश्नः उदेति यत् उद्देशः लक्षणं परीक्षा चेति त्रिविधा शास्त्रस्य प्रवृत्तिः इति कथनं किम् असङ्गतं न भवति ? यतो हि शास्त्रे पदार्थस्य उद्देशः लक्षणं परीक्षा इति त्रितयं विहायापि प्रमाणम्, सिद्धान्तः, छलः

[१२५] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६

इत्यादिपदार्थानां विभागोऽपि कृतः। अत एव विभागमादाय शास्त्रस्य चतुर्धा प्रवृत्तिः इति कथनं किं समीचीनं न भवति ? संशयस्यास्य विचारे स्वरसः वात्स्यायनकृते *न्यायसूत्रभाष्ये* न दृष्टः परं विश्वनाथकृते *न्यायसूत्रवृत्तौ* दृष्टः। तथाहि विषयेऽस्मिन् विश्वनाथेन भणितं- "विभागस्योद्देश एवान्तर्भूतत्वादयं विशेषोद्देशः।"[१२६] इति। अत्रायमाशयः – विभागस्तु उद्देशमध्ये एवान्तर्गतः। किञ्च, एष खलु विशेषोद्देशः। इदानीं पुनः प्रश्नः भवति यत् विभागः कथमुद्देशमध्येऽन्तर्गतो भवति ? तथा कथञ्च विभागं विशेषोद्देश इति वदति ? अत्रोत्तरे उच्यते यत् लक्षणसामान्यवशादेव विभागोऽपि उद्देशः इत्युच्यते। उद्देशस्य लक्षणं तु 'नामधेयेन पदार्थमात्राभिधानमुद्देशः' इति। अर्थात् नाममात्रेण पदार्थमात्रस्य अभिधानम् उद्देशः इत्युच्यते। 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति सूत्रेऽपि नामोल्लेखेन प्रत्यक्षादिप्रमाणपदार्थमात्रस्याभिधानं कृतमित्यतः एतदपि उद्देशो भवति। अत एव विभागोऽपि उद्देशान्तर्गतत्वात् शास्त्रस्य त्रिविधैव प्रवृत्तिरिति ध्येयम्। तदुक्तम् उद्द्योतकरेण *न्यायवार्त्तिके*- "त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्युक्तम्, उद्दिष्टविभागश्च न त्रिविधायां शास्त्रप्रवृत्तावन्तर्भवतीति। तस्मादुद्दिष्टविभागो न युक्तः। न, उद्दिष्टविभागस्योद्देश एवान्तर्भावात्। उद्दिष्टविभाग उद्देश एवान्तर्भवतीति। कस्मात् ? लक्षणसामान्यात्। "[१२७] इति।

प्रस्तुतसूत्रस्यास्य व्याख्यानं तु वृत्तिकारेण विश्वनाथेन इतोऽधिकं न कृतं तथा सूत्रस्यास्याधिकव्याख्याने आचार्यविश्वनाथस्य स्वरसो न दृष्टः। परन्तु पण्डितशिरोमणिना महर्षिवात्स्यायनेन प्रस्तुतसूत्रस्य इतोऽपि अधिकव्याख्यानं

---

[१२६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-९०

[१२७] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८५-८६

प्रदत्तं तत्कृतन्यायसूत्रभाष्ये। तथाहि प्रमाणेषु अन्यतमं हि प्रत्यक्षम्। किन्तु प्रत्यक्षशब्दस्य का व्युत्पत्तिः, किं विग्रहवाक्यं तथा कः समासो भवेत् इत्यादिविषये वृत्तिकारेण किमपि नालोचितं प्रस्तुतसूत्रेऽस्मिन्।[१२८] किन्तु भाष्यकारेण तद्विस्तरशः आलोचितम्। तथाहि भाष्यकारेण तत्र प्रत्यक्षशब्दस्य व्युत्पत्तिः दर्शिता - "अक्षस्याक्षस्य प्रति विषयं वृत्तिः प्रत्यक्षम्।"[१२९] इति।

किन्तु अत्र एका शङ्का उदिता भवति यत् भाष्यकारेण अव्ययीभावसमासं परित्यज्य कथं प्रादिसमासः एवोररीकृतः? शङ्कायाः अस्याः निरसने वक्तुं शक्यते यत् अव्ययीभावसमासनिष्पन्नस्य पदस्य नित्यतया क्लीबलिङ्गे एव प्रयोगः स्यात्। एवं सति प्रत्यक्षा बुद्धिः, प्रत्यक्षः घटः, प्रत्यक्षं ज्ञानम् इत्यादिव्यवहारोऽपि न संघटते। किन्तु 'प्रतिगतमक्षं प्रत्यक्षम्' इत्यर्थे " अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इत्यनेन प्रादिसमासे स्वीकृते तु प्रत्यक्षशब्दोऽयं पुंसि स्त्रियाञ्चापि प्रयुक्तो भवितुमर्हति। यद्यपि "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति नियमानुसारमक्षशब्दस्य लिङ्गानुसारं प्रत्यक्षमित्येव नित्यमेव क्लीबत्वं स्यात्तथापि " द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः" इति वार्त्तिकेन तस्य प्रतिसिद्धत्वात् प्रत्यक्षा बुद्धिः, प्रत्यक्षः घटः इत्यादिप्रयोग उपपन्नो भवति, न च कापि व्यवहारापत्तिः स्यात्।

अत्रेदं ज्ञेयं यत् प्रत्यक्षशब्दान्तर्गताक्षशब्दस्यार्थो हि 'इन्द्रियम्'। प्रत्यक्षशब्दस्य त्रिविधार्थे प्रयोगो भवति – १. इन्द्रियजन्यप्रत्यक्षरूपज्ञानम्, २. तज्ज्ञानस्य विषयः, ३. प्रत्यक्षनामकप्रमाणञ्च। अत एवार्थभेदेन तत्समासभेदोऽपि भवति। तद्विषये वैमत्यमपि दृश्यते टीकाकारेषु। तथाहि वार्त्तिककारेण

---

[१२८] यद्यपि वृत्तिकारेण तत्तत्प्रमाणलक्षणसूत्रे तत्तत्प्रमाणविषये विस्तरशः आलोचितम्।

[१२९] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६

उद्द्योतकरेणादौ अव्ययीभावसमासम् उक्त्वा ततः प्रादिसमासोऽपि प्रपञ्चितः। तदुक्तं तेन *न्यायवार्त्तिके* - "अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षमिति। अयं सूत्रविवक्षायामव्ययीभावः समासः। अन्यथा तु वस्तुनिर्देशो न समासः, समासे हि अक्षस्येति षष्ठी न श्रूयते। कः पुनरयं समासः ? प्रादिसमासोऽयं द्रष्टव्यः प्रतिगतमक्षं प्रत्यक्षमिति, यथा- उपगतो गोभिः 'उपगुरि'ति "[१३०] इति। आचार्यवाचस्पतिमिश्रेण स्वकृततात्पर्यटीकायां व्याख्यापितं यत् 'प्रत्यक्ष'-शब्दस्य अन्यार्थे प्रादिसमासत्वेऽपि प्रत्यक्षप्रमाणार्थे सूत्रोक्तप्रत्यक्षशब्दस्य अव्ययीभावसमासः स्यात्। तदुक्तं *तात्पर्यटीका*कारेण- "अक्षस्याक्षस्येति भाष्यमनुभाष्य तात्पर्यमाह – अयं च सूत्रविवक्षायामिति। अक्षमक्षं प्रति वर्तते इति विगृह्याव्ययीभावे कृते सर्वेन्द्रियावरोधो भवति। ...यदि सूत्रगतस्य प्रत्यक्षपदस्याव्ययीभावः समासोऽन्यत्र पुनरस्य कः समास इति पृच्छति – कः पुनरिति ? उत्तरम् – प्रादिसमास इति।"[१३१] इति।

तत्र 'अक्षमक्षं प्रति वर्तते' इत्येव उक्तसमासस्य विग्रहवाक्यं स्यात्। पण्डितशिरोमणिना आचार्यफणिभूषणतर्कवागीशमहोदयेन निगदितं यत् 'अक्षस्याक्षस्य प्रति' इत्यादिवाक्येन भाष्यकारेण विग्रहवाक्यस्यार्थः एव प्रकाशितः, न हि तद्विग्रहवाक्यम्। यतो हि तद्वाक्ये प्रतिशब्दयोगेन षष्ठीविभक्तेः प्रयोगः न स्यात्, प्रतियोगे द्वितीयाविभक्तिविधानात्। तदुक्तं फणिभूषणतर्क-वागीशमहोदयेन बङ्गीय*न्यायदर्शन*ग्रन्थे - "ভাষ্যকার 'অক্ষস্য অক্ষস্য' ইত্যাদিবাক্যের দ্বারা উক্ত বিগ্রহবাক্যের অর্থই প্রকাশ করিয়াছেন, কিন্তু উহা বিগ্রহবাক্য নহে। কারণ, তাহা হইলে উক্ত

---

[१३०] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६-८८

[१३१] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६-८७

বাক্যে ষষ্ঠী বিভক্তির প্রয়োগ হইতে পারে না। 'প্রতি' শব্দের যোগে দ্বিতীয়া বিভক্তিরই বিধান হইয়াছে। "[१३२] इति।

किञ्चात्र विज्ञेयं यत् मतमिदं वार्त्तिककारस्य तथा तात्पर्यकारस्यापि इति पूर्वमेव तत्तन्मतमुल्लिखितम्।

भाष्यकारेण प्रत्यक्षशब्दस्य व्युत्पत्तिगातार्थं प्रदर्श्य न विरमितः अपि तु इतोऽपि अधिकव्याख्याने स्वरसः प्रदर्शितः। तथाहि 'अक्षमक्षं प्रति वर्तते' इति विग्रहवाक्ये 'वर्तते' इति क्रियापदेन यत् वृत्तितागतार्थः द्योतितः, तदेव भाष्यकारेण वृत्तिशब्देन प्रकाशितः। वाचस्पतिमिश्रनये तु - 'वृत्तिरिति हि व्यापारः'[१३३]। इन्द्रियजन्यप्रत्यक्षज्ञाने अपेक्षितचरमकारणरूपव्यापारः एव इन्द्रियवृत्तिः। अत्र 'प्रति'-शब्देन सकलेन्द्रियाणां संग्रहत्वात् प्रत्येकेन्द्रियस्य स्वस्वविषये तद्व्यापाररूपवृत्तिरेव प्रत्यक्षशब्देन बोध्यते। किन्तु तद् उक्तप्रत्यक्षशब्दस्य व्युत्पत्तिमात्रलभ्यार्थः। प्रत्यक्षप्रमाणस्य प्रकृतलक्षणं तु महर्षिणा परवर्तिसूत्रेण निगदितम्।

किञ्च स्वस्वविषये इन्द्रियाणां वृत्तिः किमिति विषये भाष्यकारेण भणितं - " वृत्तिस्तु सन्निकर्षो ज्ञानं वा"[१३४] इति। अर्थात् इन्द्रियग्राह्यविषयेण सह तदिन्द्रियस्य यत् सन्निकर्षः सम्बन्धो वा जायते तज्जन्यतद्विषयस्य आदौ प्रत्यक्षरूपज्ञानं जायते। तत्र तत्सन्निकर्षः तदिन्द्रियस्य प्रथमः वृत्तिः व्यापारो वा इति ध्येयम्। अपि च, ग्राह्यविषयेण सह इन्द्रियाणां सन्निकर्षरूपः वृत्तिः व्यापारो वा यथा प्रत्यक्षप्रमाणं भवति तथैव तत्सन्निकर्षजन्यं यत् प्रत्यक्षज्ञानं जायते.

---

[१३२] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-८७

[१३३] न्या.वा.तात्., न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८७

[१३४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६

तदपि प्रत्यक्षप्रमाणम्। यतो हि तदपि परं हानबुद्धेः अथवा उपादानबुद्धेः अथवा उपेक्षाबुद्धेः इत्यादिरूपप्रत्यक्षप्रमायाः करणं भवति। अत एवोक्तं भाष्यकारेण - " यदा ज्ञानम्, तदा हानोपादानोपेक्षाबुद्धयः फलम्।"[१३५] इति। प्रत्यक्षप्रमाणस्य व्याख्यायाम् आचार्यजयन्तभट्टेन सामग्रीरूपप्रमाणस्य फलं प्रत्यक्षज्ञानमपि हानादिबुद्धिरूपफले प्रत्यक्षप्रमाणमित्युक्तम्। तदुक्तं तेन *न्यायमञ्जर्यां*- "प्रमाणतायां सामग्र्यास्तज्ज्ञानं फलमिष्यते। तस्य प्रमाणाभावे तु फलं हानादिबुद्धयः।"[१३६] इति।

किन्तु कश्चित् सम्प्रदायः इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं न स्वीकरोति। अत उद्द्योतकरेण भणितं - "केचित्तु सन्निकर्षमेव प्रत्यक्षं वर्णयन्ति, न तन्न्याय्यं प्रमाणाभावात्।"[१३७] इति। अत्र प्रसङ्गान्मतमुल्लिखितम्। विस्तरः व्याख्या तु फणिभूषणमहोदयस्य बङ्गीयन्यायदर्शनग्रन्थस्य प्रथमखण्डस्य ९५ पृष्ठायामुपलभ्यते।

भाष्यकारेण प्रस्तुतसूत्रस्यालोचनावेलायाम् अनुमानप्रमाणस्यापि वर्णना प्रदत्ता। भाष्यकारः अनुमानशब्दस्य व्युत्पत्तिं प्रदर्शयन्नाह - "मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम्।"[१३८] इति। अनुमानस्य प्रकृतहेतुः लिङ्गम् इत्युच्यते। वाचस्पतिमिश्रेणापि तल्लिङ्गविशिष्टधर्मी एव लिङ्गी इत्युक्त्वा व्याख्यापितम्। किन्तु अनुमानसूत्रभाष्ये भाष्यकारस्य वचनात् ज्ञायते यत् लिङ्गव्यापकानुमेयधर्म एव लिङ्गी इति। 'अनु'-शब्दस्यार्थोऽत्र पश्चात्। अनुमानस्य धर्मिपदार्थविषये अनुमेयधर्मस्य व्याप्तिविशिष्टलिङ्गस्य 'मितम्'

---

[१३५] तदेव, पृ-८७

[१३६] न्यायमञ्जरी,पृ-६६

[१३७] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-९०

[१३८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८८

अर्थात् यथार्थरूपेण निश्चयो भवति चेत् अर्थात् तल्लिङ्गपरामर्शस्य पश्चात् तदनुमेयधर्मरूपलिङ्गिनः यत् 'मानम्' अर्थात् यथार्थज्ञानं जायते, तत्करणमनुमानप्रमाणम्। 'अनुमानम्' इति शब्दो यदि भाववाच्यनिष्पन्नः स्यात् तदा अनुमितिरूपज्ञानम् इत्यर्थं बोधयति। तदनुसारमेव उद्द्योतकरेणात्र भाष्यकारोक्तं 'मानम्' 'प्रमितिः' वा जायते, तदेव 'अनुमान'-शब्दस्य व्युत्पत्तिलभ्यः अर्थः।

उपमानप्रमाणस्य तथा शब्दप्रमाणस्य व्याख्या प्रस्तुतसूत्रे न्यायसूत्रवृत्तिकारेण न प्रदत्ता। तेन हि तत्तल्लक्षणसूत्रे तत्तत्प्रमाणं व्याख्यातम्। किन्तु भाष्यकारेण तु उपमानप्रमाणस्य तथा शब्दप्रमाणस्य व्युत्पत्तिगतव्याख्या स्वरूपगतव्याख्या च प्रस्तुतसूत्रे कृता। तथाहि भाष्यकारेण 'उपमान'-शब्दस्य व्युत्पत्तिं प्रदर्शयता उक्तम् - " उपमानं सामीप्यमानम्, यथा- गौरेवं गवय इति। सामीप्यन्तु सामान्ययोगः।"[१३९] इति। अर्थात् सामीप्यमानम् उपमानं भवति। सामीप्यं नाम सादृश्यम्। 'मानम्' इति शब्देनात्र प्रत्यक्षरूपयथार्थज्ञानमेव ज्ञेयम्। एतद्विषये विशदः व्याख्या तु उपमानलक्षणसूत्रभाष्ये प्राप्यते। तत्सूत्रस्य व्याख्यानकाले सर्वम् आलोचयिष्यते। सूत्रोक्तप्रमाणबोधकस्य 'शब्दः' इति शब्दस्य व्युत्पत्तिं प्रदर्शयन्नाह भाष्यकारः - " शब्दः शब्द्यतेऽनेनार्थ इत्यभिधीयते ज्ञायते।"[१४०] इति। अर्थात् यद्द्वारा अर्थः शब्दितो भवति। एवंरूपेण व्युत्पत्त्यनुसारेण 'शब्द'-धातोरुत्तरं करणवाच्ये अल्-प्रत्ययेन निष्पन्नस्य 'शब्द'-शब्दस्य अर्थस्तावत् 'अर्थविशेषबोधसाधनम्' इति।

---

[१३९] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-९०

[१४०] तत्रैव

प्रस्तुतसूत्रस्य व्याख्यानकाले भाष्यकारेण प्रमाणसम्प्लवस्य व्याख्या कृता। यद्धि वृत्तिकारेण विषयेऽस्मिन् किमपि नालोचितम्। वृत्तौ अनुल्लेखात् प्रमाणसम्प्लवः विश्वनाथनये स्वीकृतो न वेति विषये जिज्ञासा तिष्ठति एव। किन्तु भाष्यकारेण प्रमाणसम्प्लवस्य विशदः व्याख्या प्रदत्ता न्यायसूत्रभाष्ये। तथाहि प्रमातृजनस्य एकस्मिन् प्रमेयविषये अनेकप्रमाणानां संकरः 'अभिसम्प्लवः' तथा असंकरः 'व्यवस्था' इत्युच्यते। तदुक्तं *भाष्ये* - "प्रमातुः प्रमातव्येऽर्थे प्रमाणानां संकरोऽभिसम्प्लवः, असंकरो व्यवस्थेति।"[१४१] इति।

अनेकानि प्रमाणानि किम् एकस्मिन् प्रमेयपदार्थे अभिसम्प्लवन्ते तथा क्रमशः विषयो भवति वा ? अथवा स्वस्वविषये व्यवस्थापितो भवति ? अत्रोत्तरं तु उभयथा भवति। अर्थात् एकस्मिन् विषये अनेकानां प्रमाणानां संकरो भवति अपि च एकमात्रप्रमाणस्य व्यवस्था भवति इत्येवमुभयस्य उदाहरणं दृश्यते। तथाहि 'आत्मा अस्ति' इति ज्ञानम् , यथा आप्तोपदेशात् शब्दप्रमाणात् वा जायते तथैव आत्मविषये अनुमानमपि दृश्यते- इच्छा, द्वेषः, प्रयत्नः, सुखं, दुःखं तथा ज्ञानम् आत्मनो लिङ्गं तथा अनुमापकम्।[१४२] अपि च, युञ्जानव्यक्तेः ध्यानादिपरायणयोगविशेषस्य वा योगसमाधिजातं प्रत्यक्षमपि भवति। आत्ममनसोः संयोगविशेषप्रयुक्तात्मा प्रत्यक्षः भवति।[१४३] किञ्च, 'इह अग्निरस्ति' इत्येवम् आप्तवाक्यात् शब्दप्रमाणाद्वा अग्नेः प्रतीतिर्भवति। तथा धूमदर्शनेन अग्निः अनुमितः भवति। अग्निसन्निकृष्टव्यक्तेः अग्निः प्रत्यक्षतः ज्ञायते। इत्येवं एकस्मिन् प्रमेयविषये प्रमाणानां संकरः अभिसम्प्लवो वा भवति।

---

[141] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-९३

[142] १/१/१० इति न्यायसूत्रं द्रष्टव्यम्

[143] वैशेषिकदर्शनस्य ९/१/२१ इति सूत्रं द्रष्टव्यम्

किञ्च, प्रमाणस्य असंकरं व्यवस्था वा यथा - 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति श्रुतिवाक्यमेव (स्वर्गविषये प्रमाणम्) – विषयेऽस्मिन् लौकिकजनस्य स्वर्गविषये लिङ्गदर्शनम् अनुमानप्रमाणं वा नास्ति, प्रत्यक्षप्रमाणमपि नास्ति। अर्थात् अलौकिकस्वर्गादिपदार्थविषये शास्त्रभिन्नप्रमाणाभावात् प्रमाणव्यवस्था एव स्वीकार्या। अत एव भाष्यकारेण निगदितं - " किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते ? अथ प्रतिप्रमेयं व्यवतिष्ठन्त इति ? उभयथा दर्शनम्, 'अस्त्यात्मा' इत्याप्तोपदेशात्प्रतीयते, तत्रानुमानम् - 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् (१/१/१०)' इति, प्रत्यक्षं-युञ्जानस्य योगसमाधिजनात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति। अग्निराप्तोपदेशात्प्रतीयते 'अत्राग्निः' इति, प्रत्यासीदता धूमदर्शनेनानुमीयते, प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते। व्यवस्था पुनः- 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति, लौकिकस्य स्वर्गे न लिङ्गदर्शनम्, न प्रत्यक्षम्।"[१४४] इति।

पूर्वोक्तरूपप्रमाणसम्प्लवः न सर्वेषां सम्मतः। प्राचीनकालेऽपि तद्विषये विवादो दृष्टः। अत एव भाष्यकारेण उक्तम् - 'उभयथादर्शनम्' इति। अर्थात् प्रमाणसम्प्लवः प्रमाणव्यवस्था च उभयस्य उदाहरणदृष्टत्वात् उभयमेव स्वीकार्यम्। भाष्यकारेण यथाक्रमम् अलौकिकविषये तथा लौकिकविषये उभययोः उदाहरणं प्रदर्श्य ततः 'सा चेयं प्रमितिः प्रत्यक्षपरा' इत्यादिसन्दर्भेण उक्तः 'प्रमाणसम्प्लवः' स्वीकार्यः इति विषये समासतः युक्तिरपि प्रदर्शितः। भाष्यनये प्रमाता हि कश्चित् विषयं प्रथमतः शब्दप्रमाणेन विज्ञाय, तद्विषये दृढतरज्ञानार्थम् अनुमानप्रमाणेनापि तज्ज्ञातुं चिकीर्षति। अतः क्रमेण तस्य प्रमातुः तद्विषये शब्दः,

[१४४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-९१-९२

अनुमितिः, प्रत्यक्षञ्च इति प्रमितित्रयं जातं भवति, तन्मध्ये प्रत्यक्षमेव प्रधानम्। कारणं प्रत्यक्षं भवति चेत् तद्विषये जिज्ञासा न जागरिता भवति। अत एव एतादृशस्थले 'प्रमाणसम्प्लवः' अवश्यमेव स्वीकार्यः। महर्षिगौतमेनापि परवर्तिकाले 'प्रमाणतस्चार्थप्रतिपत्तेः'[१४५] इति सूत्रे 'प्रमाणतः' इति पदप्रयोगेन उक्तसिद्धान्तस्य सूचना कृता। तदनुसारमेव भाष्यारम्भे वात्स्यायनेनापि 'प्रमाणतः' इति पदप्रयोगेन तदेव प्रकाशितम्।

महानैयायिकेन जयन्तभट्टेन विषयेऽस्मिन् बहुधा विचार्य भणितं यत् प्रमाणसम्प्लवमस्वीकृत्य बौद्धसम्पदायोऽपि अनुमानस्य प्रामाण्यं स्थापयितुं न समर्थो भविष्यति इति। जयन्तभट्टेन सर्वं विज्ञाय धर्मकीर्तिः प्रभृतिपण्डितानां मतमुल्लेखपूर्वकं खण्डितम्। यद्वा भवतु, वस्तुतः एकविषये अनेकप्रमाणानां संकररूपः 'प्रमाणसम्प्लवः' स्वीकार्यः तथा अनेकस्थले तदावश्यकमपि भवति। अत एव बृहदारण्यकोपनिषदः याज्ञवल्क्य-मैत्रेयीसंवादे "आत्मा वा अरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।"[१४६] इति श्रुतिवाक्येन एकस्मिन् आत्मविषये एव यथाक्रमं शब्दः, अनुमानं प्रत्यक्षञ्च इति प्रमाणत्रितयलब्धज्ञानस्य कर्तव्यता उपदिष्टा अभवत्। तदनुसारमेव भाष्यकारेण आत्मविषये उक्तरूपप्रमाणसंप्लवस्योदाहरणं प्रदर्शितम्। लौकिकविषयेऽपि प्रमाणसम्प्लवः स्वीकार्यो भवति। यथा रोगनिर्णयार्थं प्रमाणत्रितयम् आवश्यकं भवति। अतः चरकसंहितायाः विमानस्थानस्य चतुर्थाध्याये निगदितं - "त्रिविधं खलु रोगविशेषविज्ञानं भवति, तद्यथा, आप्तोपदेशः प्रत्यक्षमनुमानञ्चेति।"[१४७] इति।

---

[१४५] न्या.सू., ४/२/२९

[१४६] बृ.आ.उ,याज्ञवल्क्य-मैत्रेयीसंवादः

[१४७] चरकसंहिता, चतुर्थाध्यायः

निदानस्य चतुर्थश्लोकस्य टीकायां पण्डितविजयरक्षितेनापि 'प्रमाणसम्प्लवस्यापि दृष्टत्वात्' इत्यादिसन्दर्भेण तत्समर्थितम्।

## ❖ इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं ज्ञानं प्रत्यक्षम्[१४८]

इन्द्रियस्यार्थेन सन्निकर्षाद् यज्ज्ञानमुत्पद्यते तत् प्रत्यक्षमिति सामान्यतः सूत्रार्थः। किन्तु सूत्रात्तु प्रत्यक्षशब्दस्य का व्युत्पत्तिः समासो वा इति तु नावगम्यते। तदर्थं तु भाष्यादि एव शरणम्। यद्यपि भाष्यकारेण सूत्रस्यास्य व्याख्यानवेलायां प्रत्यक्षशब्दस्य व्युत्पत्तिः समासो वा न दर्शितः किन्तु तेन हि पूर्वसूत्रे (प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि)[१४९] आलोचितमेव। अत एव वार्त्तिकारेण तथा तात्पर्यकारेणापि तत्रैव प्रत्यक्षशब्दस्य वर्णनं प्रदत्तम्। अपि च, न्यायसूत्रवृत्तिकारेण तु तत्र किमपि नालोचयतापि प्रस्तुतसूत्रस्य व्याख्यानवेलायां तेन प्रत्यक्षशब्दस्य व्युत्पत्तिर्दर्शिता। तथाहि भाष्यकारस्तु प्रत्यक्षशब्दस्य तत्र व्युत्पत्तिं प्रदर्शयन्नाह - 'अक्षस्याक्षस्य प्रति विषयं वृत्तिः प्रत्यक्षम्।'[१५०] इति ।

किन्तु अत्र संशयो जायते यद् अव्ययीभावसमासं परित्यज्य कथं प्रादिसमास एवोररीकृतः ? अत्रोच्यते – अव्ययीभावसमासनिष्पन्नस्य पदस्य नित्यतया क्लीबलिङ्गे एव प्रयोगः स्यात्। तथा सति प्रत्यक्षा बुद्धिः, प्रत्यक्षः घटः इत्यादिव्यवहारोऽपि न जायेत। किन्तु 'प्रतिगतमक्षं प्रत्यक्षम्' इत्यर्थे 'अत्यादयः

---

[१४८]न्या.सू.-१/१/४

[१४९]न्या.सू.-१/१/३

[१५०]न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-८६

क्रान्ताद्यर्थे द्वितीयया' इत्यनेन प्रादिसमासे स्वीकृते तु प्रत्यक्षशब्दोऽयं पुंसि स्त्रियाञ्चापि प्रयुक्तो भवितुमर्हति। यद्यपि 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति नियमानुसारमक्षशब्दस्य लिङ्गानुसारं प्रत्यक्षमित्येव नित्यमेव क्लीबत्वं स्यात्तथापि 'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः' इति वार्त्तिकेन तस्य प्रतिसिद्धत्वात् प्रत्यक्षा बुद्धिः, प्रत्यक्षः घटः इत्यादिप्रयोग उपपन्नो भवति, न च व्यवहारापत्तिः स्यात्।

किञ्च, लक्षणमिदं प्रत्यक्षप्रमाणलक्षणमुत प्रत्यक्षप्रमालक्षणमिति संशयस्तु सूत्रान्न दूरीभवति। विषयेऽस्मिन् *भाष्ये वार्तिके तात्पर्ये* वापि किमपि स्पष्टतया नालोचितं किन्तु विषयेऽस्मिन् न्यायसूत्रवृत्तिकारेण तु किञ्चित् चर्चितम्। तन्मते सूत्रे 'ज्ञानं प्रत्यक्षम्' इति समानविभक्तिकत्वात् सामानाधिकरण्याद्वा ज्ञानमेव प्रत्यक्षं भवति। तेन व्युत्पत्या प्रत्यक्षप्रमाणलक्षणे उचितेऽप्यत्र प्रमाणलक्षणं नाभूत् इति सामान्यतः प्रतीतिर्भवति। अत्र वृत्तिकारस्तु एवं प्रतिवदति यत् व्युत्पत्त्या अत्र प्रत्यक्षप्रमाणलक्षणमुचितम्। तथा च सूत्रे ज्ञानपदसमानाधिकरणप्रत्यक्षपदस्य प्रयोगसत्त्वेऽपि तत्सूत्रं प्रत्यक्षप्रमाणपरक-मिति बोधयिष्यति यदि तत्र 'यतः' इति पदमध्याहरेत्। तेन च सम्पूर्णं सूत्रगात्रं भवति 'इन्द्रियार्थसन्निकर्षाद् यतः अव्यभिचारादिविशेषणविशिष्टं ज्ञानं भवति तत् प्रत्यक्षम्' इति। तेनैदं स्पष्टीभवति यत् 'यतः' इति पदस्याध्याहारेण प्रत्यक्षप्रमाणलक्षणं सूचितं भवति। तदुक्तं *न्यायसूत्रवृत्तौ*- "अत्र प्रतिगतमक्षं प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात् प्रत्यक्षशब्दस्य, प्रस्तुतत्वाच्च करणलक्षणस्य, प्रमितिलक्षणं यद्यप्यनुचितं तथापि यत इत्याध्याहारेण प्रत्यक्षप्रमाकरणलक्षणे वाच्ये तदेकदेशप्रमास्वरूपे ज्ञाते तत्करणत्वं सूज्ञेयमित्याशयेन वा सङ्गमनीयम्

"[१५१] इति। विषयेऽस्मिन् *न्यायमञ्जरी*कारस्य जयन्तभट्टस्यापि स्वरसो दृश्यते- "तत्र च यद्वैयधिकरण्यं चोदितं तद् 'यतः' शब्दाध्याहारेण परिहरिष्यामः। यत एवं यद्विशेषणविशिष्टं ज्ञानाख्यं फलं भवति तत् प्रत्यक्षमिति सूत्रार्थः।"[१५२] इति।

किञ्च, 'इन्द्रियार्थसन्निकर्षोत्पन्नम्...' इति प्रत्यक्षलक्षणं तु ईश्वरप्रत्यक्षे अव्याप्तित्वात् 'इन्द्रियार्थसन्निकर्षोत्पन्नम्' इति पदम् अवधारणयुक्ततया ग्रहणीयम्। किन्तु तथा सति अवधारनार्थक एवकारस्तु कुत्र योजनीय इति प्रश्नः समुदेति। तथाहि (१) इन्द्रियार्थयोः एव सन्निकर्षादुत्पन्नम् (२) इन्द्रियार्थसन्निकर्षोत्पन्नमेव (३) इन्द्रियार्थसन्निकर्षादेव उत्पन्नमिति त्रिषु अर्थेषु कस्तावत् ग्रहणीयः? वृत्तिकारमते तु तृतीय एवार्थो ग्रहणीयः- इन्द्रियार्थसन्निकर्षादेव उत्पन्नमिति। अर्थात् प्रत्यक्षज्ञानं तु इन्द्रियार्थसन्निकर्षादेव उत्पन्नं भवेदिति। अत्र एवकारेण च अन्ययोगव्यवच्छेदो बोध्यः। तेन प्रस्तुतपदस्यार्थ आयाति इन्द्रियार्थयोः सन्निकर्षव्यतिरिक्तादनुपपन्नमिति।

किञ्चात्रातिरिक्तपदं सापेक्षम्। ननु अतिरिक्तमित्युक्ते कस्मात् अतिरिक्तमित्यपि प्रश्नः समुदेति। अत्रोच्यते ज्ञानातिरिक्तमिति। तेन 'इन्द्रियार्थसन्निकर्षोत्पन्नम्' इति अवधारणयुक्तपदस्यार्थो भवति इन्द्रियार्थयोः भवति सन्निकर्षव्यतिरिक्तज्ञानात् अनुत्पन्नमिति। अत एव प्रत्यक्षज्ञानम् इन्द्रियार्थसन्निकर्षव्यतिरिक्तज्ञानात् उत्पन्नं न भवति इति। तेन कथञ्चित् वक्तुं शक्यते ज्ञानाकरणकं प्रत्यक्षमिति। ज्ञानम् अकरणं यत्रेति, ज्ञानं न करणं यत्रेति वा विग्रहे बहुव्रीहिसमासे निष्पन्नं ज्ञानाकरणकमिति पदम्। तेन च ईश्वरप्रत्यक्षस्य

[१५१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-९४

[१५२] न्या.म., (द्वितीयाह्निकः),पृ-३४३

नित्यत्वेऽपि ज्ञानं प्रति अकरणकत्वात् प्रत्यक्षलक्षणमिदमीश्वरप्रत्यक्षे नाव्याप्तिः। अत एव वृत्तिकारेणोक्तं- 'यद्वा इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणम्-इन्द्रियार्थसन्निकर्षातिरिक्तादनुत्पन्नम्, अतिरिक्तश्चात्र ज्ञानम्, तेन ज्ञानाकरणमित्यर्थः।'[१५३] इति।

किञ्चात्रावधेयं यत् 'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्' इति प्रत्यक्षलक्षणन्तु केवलं निर्विकल्पकप्रत्यक्षे एव गच्छति न तु सविकल्पकप्रत्यक्षे, तेन अव्याप्तिर्भवति। कारणं हि सविकल्पकप्रत्यक्षज्ञानमपि पूर्ववर्तिनिर्विकल्पक-प्रत्यक्षजन्यं भवति। अत एव सविकल्पकप्रत्यक्षमपि निर्विकल्पकज्ञानात्मककरण-जन्यतया ज्ञानकरणत्वात् ज्ञानाकरणासम्भवात् सविकल्पकप्रत्यक्षे 'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्' इति प्रत्यक्षलक्षणमव्याप्तं भवति। अस्मिन् विषये तु न्यायसूत्रटीकाकाराः किमपि नालोचितवन्तः। किन्तु न्यायकुसुमाञ्जलिग्रन्थे उदयनार्यमते 'इन्द्रियार्थसन्निकर्षोत्पन्नम्' इति लक्षणन्तु लौकिकप्रत्यक्षस्यापि तु 'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्' इति लक्षणमीश्वरप्रत्यक्षस्येति। यतो हि 'इन्द्रियार्थसन्निकर्षोत्पन्नत्वस्य च लौकिकमात्रविषयत्वात्' इति।

---

[१५३]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१०१

### ❖ अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च[१५४]

प्रस्तुतसूत्रेऽस्मिन् सूत्रकारः महर्षिः गौतमः अनुमानप्रमाणस्य लक्षणं विभागञ्च प्रदर्शितवान्। 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'[१५५] इति सूत्रे प्रत्यक्षप्रमाणानन्तरम् अनुमानप्रमाणस्योद्दिष्टत्वात् 'यत्क्रमेण उद्देशो विहितः तत्क्रमेणैव लक्षणं कर्तव्यमि'ति नियमात् प्रत्यक्षप्रमाणानन्तरम् अनुमानप्रमाणस्य लक्षणं कृतं महर्षिणा गौतमेन। अत एव न्यायसूत्रवृत्तौ- "अनुमानं लक्षयति विभजते च"[१५६] इति।

कस्यचिद् विषयस्य निरूपणानन्तरं कस्यचिद् विषयस्य निरूपणे तन्निरूपणविषयसंगतिः कार्यः, न चेत् तन्निरूपणम् असंगतं स्यात्। अत एव महर्षिणा गौतमेन तत्संगतिसूचनार्थमेव प्रस्तुतसूत्रस्यादौ 'अथ'-शब्दस्य प्रयोगः कृतः। तदनुसारमेव *तत्त्वचिन्तामणि*कारेण गङ्गेशोपाध्यायेनापि प्रत्यक्षखण्ड-रचनानन्तरम् अनुमानखण्डस्य रचनाप्रारम्भे 'अथ'शब्दप्रयोगेण संगतिः संसाधिता। विषयेऽरस्मिन् *तत्त्वचिन्तामणि*ग्रन्थस्य विविधटीकाकारैः तस्य विशदव्याख्या प्रदत्ता। *अनुमितिदीधितेः* टीकायाम् आचार्यजगदीशगदाधर-भट्टाचार्ययोः संगतिव्याख्यायां तद्विषये बहुसूक्ष्मविचारः तथा ज्ञातव्यतत्त्वमुपलभ्यते। उपमानखण्डस्य रचनानन्तरं शब्दखण्डस्य रचनाप्रारम्भे गङ्गेशोपाध्यायः उक्तवान्- 'अथ शब्दो निरूप्यते' इति। तत्र मथुरानाथतर्क-वागीशेन तदव्यय-अथशब्दस्य उत्तरं क्रियाविशेषणे द्वितीयाविभक्तेः प्रयोगः

---

[१५४] न्या.सू.- १/१/५

[१५५] न्या.सू.- १/१/३

[१५६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३३

इत्युक्त्वा तदर्थः अभेदसम्बन्धेन निरूपणक्रियायाः विशेषणम् इत्युक्तः। तद्राद्धान्तानुसारम् अत्र महर्षिगौतमस्य प्रस्तुतसूत्रेऽपि 'अथ प्रत्यक्षनिरूपणानन्तरम् अनुमानं निरूप्यते' इति व्याख्या बोध्या। योगसूत्रग्रन्थेऽपि 'अथ योगानुशासनम्' इत्यस्य व्याख्यायां योगसूत्रभाष्ये विशदव्याख्या प्राप्यते।

भाष्यकारेण तु अथशब्दस्य व्याख्यायां स्वरसः न प्रदर्शितः, परं *न्यायसूत्रवृत्ति*कारस्य आचार्यविश्वनाथन्यायपञ्चाननस्य 'अथ'शब्दव्याख्याने तस्य स्वाभिमतमुपलभ्यते। तथाहि तेन *न्यायसूत्रवृत्तौ* संक्षेपेण उक्तम्- "आनन्तर्यवाचकोऽथशब्दो हेतुहेतुमद्भावसङ्गतिसूचनाय।"[१५७] इति। अत्र तात्पर्यं हि – अत्र अथशब्दस्यार्थो भवति 'अनन्तरम्' इति। अनन्तरं प्रभृतिशब्दः अवधिसापेक्षो भवति। अतः प्रश्नः स्यात् कस्यानन्तरम् ? एतदुत्तरे उच्यते यतो हि पूर्वमेव प्रत्यक्षस्य निरूपणं कृतम् अत एव प्रत्यक्षनिरूपणानन्तरम् अनुमाननिरूपणं स्यात्। यतो हि कस्यचित् विषयनिरूपणानन्तरं विषयान्तरनिरूपणे विषयसङ्गतिः कार्या। अन्यथा तु तन्निरूपणम् असङ्गतं स्यात्। अत एव महर्षिणा गौतमेन प्रस्तुतसूत्रे 'अथ'शब्दप्रयोगेण तत्सङ्गतिरेव संसूचिता। *अनुमितिदीधिति*टीकायाम् आचार्यजगदीशतर्कालङ्कारेण षट्प्रकारा सङ्गतिः उक्ता- १.प्रसङ्गः, २.उपोद्घातः, ३.हेतुता, ४.अवसरः, ५.निर्वाहकत्वम्, ६.एककार्यत्वञ्च इति। तदुक्तं जगदीशतर्कालङ्कारेण *अनुमितिदीधिति*टीकायां - " सङ्गतिः षड्विधा। तदुक्तमभियुक्तैः –

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।

---

[१५७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३३

निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते।।"[१५८] इति।

एतेषु 'हेतुता' इति पदेन हेतुहेतुमद्भावसङ्गतिरेव बोध्या। हेतुः नाम कारणम्, हेतुमत् (हेतुः अस्ति इत्यर्थे मतुप्प्रत्ययनिष्पन्नः 'हेतुमत्' इति शब्दः) नाम कार्यम्। यत्कार्ये यत्परम्परया आवश्यकं भवति, तदपि तत्कार्यं प्रति कारणमिति वक्तुमलम्। अतः प्रत्यक्षप्रमाणस्य निरूपणम् अनुमानप्रमाणनिरूपणस्य हेतुरिति वक्तुं शक्यते। तेन च, प्रत्यक्षप्रमाणनिरूपणानन्तरमेव तत्कार्यस्य अनुमानप्रमाणस्य निरूपणं सङ्गतं भवति। यतो हि तत्प्रमाणद्वयस्य निरूपणयोः हेतुहेतुमद्भावो विद्यते। किन्तु अनुमानप्रमाणनिरूपणानन्तरं प्रत्यक्षप्रमाणनिरूपणं सङ्गतं न भवति। अतो विश्वनाथन्यायपञ्चाननेन तत्सङ्गतिसूचनार्थमेव *न्यायसूत्रवृत्तौ* निगदितम्- "आनन्तर्यवाचकोऽथशब्दो हेतुहेतुमद्भावसङ्गतिसूचनाय।"[१५९] इति।

प्रत्यक्षस्य ज्ञानं विना अनुमानस्य ज्ञानं न भवितुमर्हति। यतो हि तज्ज्ञानद्वयस्यापि कार्यकारणभावो विद्यते। अत एव *अनुमानचिन्तामणि*ग्रन्थस्य *दीधितिटीकायां* सङ्गतिविचारे रघुनाथशिरोमणिना निगदितं- "सम्भवति चेह निरूपणयोरपि कार्यकारणभावः। 'अथ तत्पूर्वकमित्यादिसूत्रे' प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणात्, तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शात्।"[१६०] इति। अत्र प्रकृतस्थले चक्षुरादिद्वारा व्याप्तिज्ञानरूपानुमानस्य उत्पत्तित्वात् अनुमानप्रमाणे प्रत्यक्षप्रमाणस्य कार्यत्वरूपम् उपजीवकत्वं विद्यते। एवं अनुमितावपि

---

[१५८] अनु.चि.,दीधितिटीका

[१५९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३३

[१६०] अनु.चि.,दीधितिटीका

परामर्शरूपप्रत्यक्षप्रमितिजन्यत्वविद्यमानात् प्रत्यक्षप्रमानिरूपणा-नन्तरम् अनुमितिनिरूपणम् अभवत् इति बोद्धव्यम्। केवलं चक्षुषा चाक्षुषप्रत्यक्षं न भवति, प्रदीपस्य आलोकमपि तत्र सहकारिकारणं भवति। अत एव 'दीपमानं मदीयचक्षुः साधनं भवितुमर्हति दीपश्चक्षुरुत्तममिति वेदेन बोधितत्वात्'- इत्यनुमानेन ज्ञापितं भवति यत् दीपः चाक्षुषप्रत्यक्षे चक्षुषः सहकारी भवति। अत एवानुमानेन दीपस्य चक्षुःसहकारित्वं विज्ञाय कश्चित् पुरुषः दीपदाने प्रवृत्तो भवति, येन तच्चाक्षुषप्रत्यक्षं तस्योत्पन्नो भवेत्। तेनात्र प्रत्यक्षस्य उत्पत्तौ पूर्वोल्लिखितायाः अनुमितेः उपजीव्यता अस्ति। अत्र स्थले प्रत्यक्षमेव तदनुमानस्य उपजीवकत्वात् प्रत्यक्षस्यैव कथम् अनुमानानन्तरं निरूपणं नाभवत् ? यद्युच्यते उपजीवकत्वं नाम कार्यत्वमेव बोध्यते किन्तु प्रयोज्यता न बोध्यते। अत एव चक्षुरादिः साक्षात् अनुमानस्य अजन्यत्वात् प्रयोज्यतासत्त्वेऽपि कार्यताया अविद्यमानत्वात् अनुमाननिरूपणानन्तरं प्रत्यक्षनिरूपणं नाभवत्– इत्यपि न युक्तियुक्तम्। यतो हि तदा शक्तिज्ञानात्मकोपमितेः अनन्तरं शाब्दनिरूपणस्या-नुपपत्तिः स्यात्। कारणं हि शक्तिज्ञानात्मकोपमितिः पदार्थस्मरणे एव उपयोगिनी भवति, तद्धि साक्षात् शाब्दबोधस्य जननी न भवति। अत एव तत्रापि उपमितिकार्यत्वं शाब्दबोधे अविद्यमानत्वात् शाब्दनिरूपणम् असङ्गतं स्यात्। वस्तुतः प्रत्यक्षप्रमाणावच्छेदे अनुमानस्योपजीवकत्वं नास्ति। कारणं हि मनः श्रोत्रञ्च अजन्येन्द्रियम्। तथा च, सर्वम् अनुमानं मनोजन्यम्। अत एव सर्वस्यानुमानस्य प्रत्यक्षं प्रति उपजीवकत्वं वा कार्यत्वं वा प्रयोज्यत्वं वा विद्यते। किन्तु सकलप्रत्यक्षे अनुमानस्य उपजीवकत्वं न वर्तते। अत एव प्रत्यक्षनिरूपणानन्तरम् अनुमाननिरूपणं कर्तव्यम्। अत्रोत्तरं पूर्वपक्षिणः एवं

प्रत्यवतिष्ठन्ते यत् ईश्वरीयव्याप्तिज्ञानम् अनुमितेः स्वरूपयोग्यरूपे अनुमापकं भवति। तत्र अर्थात् ईश्वरीयव्याप्तिज्ञाने प्रत्यक्षस्य उपजीवकत्वं न तिष्ठति। सकलानुमानप्रमाणे प्रत्यक्षप्रमाणस्य उजीवकत्वं न तिष्ठति। अर्थात् अनुमानप्रमाणत्वावच्छेदे प्रत्यक्षप्रमाणस्य उपजीवकत्वं नास्ति। अत एव पूर्वं यदुक्तं सकलप्रकारानुमानप्रमाणे प्रत्यक्षप्रमाणस्य उपजीवकत्वविद्यमानात् प्रत्यक्षप्रमाणनिरूपणानन्तरम् अनुमानप्रमाणनिरूपणं कर्तव्यम् इति तन्न हि सम्यक्। अतोऽत्र दृष्टं यत् ईश्वरीयस्वरूपयोग्यव्याप्तिज्ञाने अर्थात् अनुमानप्रमाणे प्रत्यक्षप्रमाणस्य उपजीवकत्वं नास्ति। तेन च, अनुमानप्रमाणनिरूपणानन्तरं कथं न प्रत्यक्षप्रमाणं निरूपितम् अभवत् ?

एतदुत्तरे उच्यते– यद् यत् सङ्गतं भवति तत्तद्विषयः अनन्तरं निरूपणीयो भवतीति एवं कोऽपि नियमो नास्ति। अतोऽनुमानप्रमाणनिरूपणानन्तरमेव प्रत्यक्षनिरूपणं न हि आवश्यकम्। किन्तु एष नियमः – यत् यत् विषयः अनन्तरं निरूप्यो भवति, तत्तद्विषयः सङ्गतो भवतीति व्याप्त्यनुसारम् असङ्गतस्य प्रयोगः न समीचीनः। आचार्यमथुरानाथतर्कवागीशेन उक्तं यत् प्रत्यक्षप्रमाणस्य तथा अनुमानप्रमाणस्य उभययोः उभयं प्रति उपजीवकत्वम् अविशेषतया विद्यमानत्वात् 'यद् यद् उपजीवकं तत्तत् निरूपणस्य अनन्तरं निरूप्यम्'- इति नियमाभावात् तथा स्वतन्त्रेच्छान्याये अनुमानप्रमाणानन्तरं प्रत्यक्षप्रमाणं न निरूपितमभवत् , किन्तु प्रत्यक्षप्रमाणानन्तरम् अनुमानप्रमाणं निरूप्यम्। अतः प्रत्यक्षनिरूपणानन्तरम् अनुमानप्रमाणनिरूपणम् अभवत्। अत एव मथुरानाथतर्कवागीशमहोदयेन *तत्त्वचिन्तामणेः रहस्यटीकायां* भाषितं -

"प्रत्यक्षानुमानयोः परस्परमुपजीवकत्वाविशेषेऽपि यद्यदुपजीवकं तत्तन्निरूपणानन्तरनिरूप्यमिति नियमाभावादेवानुमाननिरूपणानन्तरं प्रत्यक्षनिरूपणप्रसङ्गविरहात् प्रत्यक्षानन्तरमेवानुमानं निरूपितं, न त्वनुमानान्तरं प्रत्यक्षमित्यत्र स्वतन्त्रेच्छस्येति न्यायेन (स्वतन्त्रेच्छस्य पर्यनुयोगानर्हत्वमिति न्यायेन) इच्छाया एव बीजत्वादिति दिक्।"[१६१] इति।

प्रस्तुतसूत्रे 'अनुमानम्' इति पदेन लक्ष्यनिर्देशः कृतः तथा 'तत्पूर्वकम्' इति पदेन लक्षणं संसूचितं सूत्रकारेण। अत्रानुमानप्रमाणस्य लक्षणमेव महर्षिणा गौतमेन वक्तव्यम्। अतः 'अनुमीयतेऽनेन' अर्थात् यद्द्वारा अनुमितिर्जायते इत्येवं व्युत्पत्त्यनुसारं सूत्रेऽस्मिन् अनुमानशब्दः करणवाच्ये ल्युट्प्रत्ययनिष्पन्नः इति विज्ञेयम्। उद्द्योतकरेणापि उक्तं - "कः पुनरनुमानार्थः ? अनुमीयतेऽनेनेति करणार्थः।"[१६२] इति। किन्तु भावार्थे ल्युट्प्रत्ययसिद्धेन अनुमानशब्देन अनुमितिरूपज्ञानम् अवबोध्यते। यथार्थानुमितिरूपज्ञानमपि अनुमानप्रमाणं भवति, तस्य फलं तु हानादिबुद्धयः। अत उद्द्योतकरेण भणितं - "यदा भावस्तदा हानादिबुद्धयः फलम्।"[१६३] इति। हानादिबुद्धिविषये विशदव्याख्या तु तृतीयसूत्रव्याख्यायां कृता। प्रस्तुतसूत्रेऽस्मिन् 'तत्पूर्वकम्' इति पदेन प्रत्यक्षपूर्वकमिति अवगम्यते। किन्तु प्रत्यक्षजन्यसंस्कारः अनुमानप्रमाणं न भवति। अतः पूर्वसूत्रात् 'ज्ञानम्' इति पदस्यानुवृत्तिर्हि महर्षिगौतमस्याभिप्रेतः इति ज्ञायते

---

[१६१] रहस्यटीका, तत्त्व.चि.

[१६२] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४०

[१६३] तदेव, पृ-१४२

एव। तथा सति 'तत्पूर्वकं ज्ञानमनुमानम्' इति वाक्येन बोध्यते यत् तत्पूर्वकज्ञानविशेष एव अनुमानम्।

इदानीं 'तत्पूर्वकम्' इति पदेन महर्षिगौतमेन किं विवक्षितमिति विषये चर्चा करणीया तथा विषयेऽस्मिन् भाष्यकारस्य वृत्तिकारस्य तथा अन्यटीकाकाराणां किमभिमतमिति विषये विचारः करणीयः। तथाहि महर्षेः 'तत्पूर्वकम्' इति पदमस्पष्टम्। अतो भाष्यकारैस्तथा टीकाकारैरस्य पदस्य व्याख्या करणीया। यतो हि लक्षणम् अव्याप्त्यतिव्याप्त्यसम्भवदोषरहितं स्यात् । अतः 'तत्पूर्वक-'पदं व्याख्यायता भाष्यकारेणगादि - 'तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं चाभिसम्बध्यते। लिङ्गलिङ्गिनोः सम्बद्धयोः दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते। स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽनुमीयते।'[१६४] इति ।

अत्रायमाशयः- तत्पदेन प्रत्यक्षस्य लिङ्गलिङ्गिनोः सम्बन्धस्य प्रत्यक्षं तथा लिङ्गस्य प्रत्यक्षं गृह्यते। अत्र लिङ्गलिङ्गिनोः सम्बन्धस्य प्रत्यक्षमाद्यं भवति, लिङ्गदर्शनं तु द्वितीयं प्रत्यक्षम्। तत्र लिङ्गलिङ्गिनोः हेतुसाध्ययोर्वा मिथः सम्बन्धितरूपज्ञानात् तत्सम्बन्धितहेतोः स्मरणं भवति, ततश्च पुनः हेतुदर्शनाद् अप्रत्यक्षसाध्यस्यानुमानं जायते। अत्र तात्पर्यं तु आदौ हेतुसाध्ययोरविनाभावरूपसम्बन्धस्य प्रत्यक्षं तथा हेतोः प्रत्यक्षं भवति , तदनन्तरं अविनाभावस्य स्मृतिर्भवति। स्मृतेरनन्तरं पुनः लिङ्गदर्शनं भवति। स्मृत्या तथा हेतुप्रत्यक्षेण अनुमानं जायते। तदनन्तरं चाप्रत्यक्षस्य साध्यस्यानुमितिर्जायते। एवं तत्पूर्वकपदस्य भाष्यसम्मतव्याख्या हि 'ते पूर्वे यस्य' अर्थात् ते द्वे प्रत्यक्षे – १.

---

[१६४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४२-१४६

लिङ्गलिङ्गिनोः पूर्वकथितप्रत्यक्षम् , २. लिङ्गप्रत्यक्षञ्चेति। तत्र 'तत्पूर्वं यस्य' इति विग्रहवाक्यस्वीकारे तु अनुमानादुत्पन्ने अनुमाने व्याप्तिः तथा प्रत्यक्षादुत्पन्नं स्मरणं, संशयः इत्यादिज्ञानेऽतिव्याप्तिर्भवति। अतः 'ते पूर्वे यस्य' इत्येव विग्रहः समुचितो भाति। किञ्च, एतस्मादेवानुमितेर्ज्ञानं तथा अनुमितिकरणस्य भेदः स्पष्टो भवति।

'तत्पूर्वकम्' इति लक्षणेऽनुमानं हि उद्देश्यं तथा तत्पूर्वकं हि विधेयम् । अत्र लक्षणमिदम् अभेदसम्बन्धेन लक्ष्यलक्षणभावं व्यक्तीकुरुते। अर्थात् तत्पूर्वकाऽभिन्नं हि अनुमानमिति। तत्र 'तत्पूर्वकम्' इत्यस्य व्याख्यात्रयं भवितुमर्हति ।

**प्रथमव्याख्या-** 'तानि प्रत्यक्षाणि व्याप्तिदर्शनादीनि पूर्वाणि यस्य तत्तथा' इति । एतद्व्याख्यानुसारं महानसादौ वह्निधूमयोर्व्याप्तिदर्शनं प्रथमं प्रत्यक्षं भवति, तदनन्तरं पक्षे लिङ्गमात्रदर्शनं द्वितीयं प्रत्यक्षं भवति, ततश्च व्याप्तिसमन्वितलिङ्गदर्शनं तृतीयं प्रत्यक्षं भवति। एवं त्रितयप्रत्यक्षरूपानुमान-पूर्ववर्तित्वाद् अनुमानं 'तत्पूर्वकम्' भवति।[१६५]

**द्वितीयव्याख्या-** पूर्वपदं करणवाचकरूपेण स्वीकृत्य भवति। तद्धि एवं - 'तद्व्याप्यदर्शनं व्याप्तिस्मृतिपरामर्शाभ्यां करणं यत्र तदनुमानमनुमितिः' इति।[१६६]

**तृतीयव्याख्या-** तत्पदं तदीयपरकत्वेन स्वीकृत्य भवति। तद्धि- 'व्याप्तिदर्शनजन्यस्मरणं तत्पूर्वकरणं यस्य तत्तथा।' इति।[१६७]

---

[१६५]चन्द्रटीका,भाष्य, पृ०-७४, चौ०प्र०

[१६६]तत्रैव

अत्र परामर्शो हि व्यापारः स्वीक्रियते। यो हि परामर्शं करणं स्वीकुरुते तन्न समीचीनं भवति। कारणं हि करणत्वं कारकत्वस्य व्याप्यधर्मो भवति तथा कारकत्वव्यापारो हि कारणत्वं भवति। अतो व्यापारं विना कारणत्वं न भवितुमर्हति – इत्येतत्सर्वं विचार्यैव वात्स्यायनेन तत्पूर्वकपदस्य पूर्वोक्तत्रितय-व्याख्या व्याख्यापिता।

*न्यायवार्त्तिक*कारेणाचार्योद्द्योतकरेण 'तत्' इति पदस्य अर्थत्रयमादाय 'तानि ते तत्पूर्वं यस्य तदिदं तत्पूर्वकम्' इत्येवंरूपेण व्याख्या कृता यद्द्वारा समानजातीयप्रत्यक्षात्तथासमानजातीयवृक्षादिप्रत्यक्षाद् अनुमानस्य व्यावर्तकं भवति। 'तानि पूर्वं यस्य ' इति विग्रहस्वीकारे तु 'तानि' इत्यत्र बहुवचनग्रहणात् सर्वाणि प्रमाणान्यपि गृह्यन्ते। तेन च सर्वप्रमाणपूर्वकत्वं हि अनुमानस्य लक्षणं स्यात्। तदुक्तं *न्यायवार्त्तिके*–

"यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति।"[१६८] इति।

एतेनानुमानपूर्वकानुमाने शब्दपूर्वकानुमाने वा अव्याप्तिर्न भवति। किन्तु कस्मादपि प्रमाणादुत्पन्नमनुमानम् अन्ततो गत्वा परम्परया प्रत्यक्षपूर्वकत्वात् 'प्रत्यक्षपूर्वकम् ' इति 'तत्पूर्वकम्' इति वा व्याख्या समीचीना इव भाति।

यदा तत्पूर्वकपदस्य 'ते द्वे पूर्वं यस्य ' इति विग्रहः स्वीक्रियते तदा अनुमानात् पूर्वं द्वे प्रकारे प्रत्यक्षे तिष्ठतः। द्वयोः प्रत्यक्षयोरेकं हि हेतुसाध्ययोः ज्ञानं

[१६७]तत्रैव

[१६८]न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३३

तदनन्तरं हेतुसाध्यसम्बन्धदर्शनस्य संस्काराभिव्यक्तिः, ततश्च सम्बन्धस्मृतिः स्मृतेरनन्तरं पुनः हेतुदर्शनं भवति। अतो यदन्तिमप्रत्यक्षं , यच्च सम्बन्धप्रत्यक्षात् तथा प्रथमहेतुदर्शनाज्जायते तदेव लिङ्गपरामर्श इत्युच्यते। तदेवानुमानं विज्ञेयम्। तदुक्तं वार्त्तिककारेण - 'यदाऽपि विवेकात् ते द्वे पूर्वे यस्येति, ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति। ते च द्वे प्रत्यक्षे। लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षम् , लिङ्गदर्शनं च द्वितीयम्।'[१६९] इति।

अत्र निष्कृष्टार्थो हि – आदौ अस्माकं पाकशालादौ वह्निधूमयोर-विनाभावरूपसम्बन्धस्य दर्शनं भवति। ततश्च कुत्रापि (पर्वतादिपक्षे) केवलधूमस्य दर्शनं भवति, तदा तेन सहैवास्माकं पाकशालादिजातवह्निधूमसम्बन्धस्य संस्कारः उद्बुद्धः सन् सम्बन्धस्य स्मरणं भवति। तदनन्तरं वह्निसम्बन्धिधूमस्य प्रत्यक्षं भवति, ततश्च वह्निनिश्चयो जायते। अर्थात् अनुमितेः वह्निरूपप्रमायाः करणमनुमानमित्यर्थे पर्यवसीयते। तदुक्तं *न्यायवार्त्तिके* - 'कः पुनरनुमानार्थः। अनुमीयतेऽनेनेति करणार्थः।'[१७०] इति।

तेन एतन्मतानुसारं प्रमाणस्य तथा फलस्य विषयो भिन्नो भिन्नो भवति। प्रमाणस्य विषयः हेतुस्तथा फलस्य विषयः साध्यं भवति। यतो हि यद्विषयककरणं भवति तद्विषयकक्रिया न भवति।

किन्तु आचार्यविश्वनाथेन अनुमानप्रमाणमिदं व्याख्यायता निगदितं- "तत्पूर्वकं– प्रत्यक्षपूर्वकम्, प्रत्यक्षं प्रत्यक्षविशेषो व्याप्त्यादिविषयकः, तेन

---

[१६९] तदेव, पृ-१३४

[१७०] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४०

व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लभ्यते। अनुमानम् – अनुमितिः। यत इत्यध्याहारेण च करणलक्षणम्। अथवा करणलक्षणमेवेदम्, तत्रानुमानमिति करणल्युटा अनुमितिकरणमिति समाख्याबलादेव लब्धम्। तच्च व्याप्तिज्ञानं प्रत्यक्षपूर्वकं सहचारप्रत्यक्षपूर्वकम्।"[१७१] इति।

तथाहि 'तत्पूर्वकम्' इति लक्षणे तत्पदेन कस्य परामर्शः? इति प्रश्नस्तु स्वाभाविक एव अन्यथा तु लक्षणमेव बोद्धुं न शक्यते। तथाहि 'यत्तदोः नित्यसम्बन्धः' इति नियमात् यच्छब्देन यत्पदार्थः उल्लिखितो भवति तत्पदेनापि तस्य परामर्शः स्यात्। किन्तु सूत्रे तु यत्पदमपि नास्ति। अत एवात्र तत्पदेन कः परामृश्यो भवेत् ? अत्रोत्तरे वक्तुं शक्यते – सर्वनामशब्दः वस्तुतः विशेष्यस्य उद्देशात् परमेव तत्प्रभृतिपदानामुल्लेखो भवति। यतो हि पूर्वसूत्रे एव प्रत्यक्षम् इति विशेष्यस्योल्लेखः कृतः, अतस्तत्पदेन प्रत्यक्षम् एव परामृष्टम्। एतद्व्यतिरिक्तमपि अथशब्देन हेतुहेतुमद्भावः संसूचितः इति पूर्वमेवाभिहितम्। तथा च, प्रस्तुतसूत्रेऽस्मिन् हेतुमदनुमानस्योल्लेखात् हेतुः प्रत्यक्षम् एव तत्पदेन ग्रहणीयम् इति विस्पष्टं प्रकाशितम्। अत एव तत्पूर्वकपदस्यार्थो हि प्रत्यक्षपूर्वकम् इति।

'प्रत्यक्षं पूर्वं यत्र' इति विग्रहे अन्यपदार्थप्रधानबहुव्रीहिसमासे समासान्तकप्प्रत्ययेन निष्पन्नं प्रत्यक्षपूर्वकम् इति पदम् अन्यपदार्थम् अनुमानं बोधयति। यदि प्रत्यक्षपूर्वकत्वमेवानुमानस्य लक्षणं स्यात् तदा 'घटमहं जानामि' इत्याद्यनुव्यवसायस्य पूर्वे घटप्रत्यक्षत्वात् तथा उपमानादिज्ञानस्य पूर्वे

---

[१७१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३३-१४५

प्रत्यक्षत्वात् 'प्रत्यक्षपूर्वकम्' इति लक्षणमतिव्याप्तं स्यात्। अत एव तेषामनुमानत्वनिरासे उक्तं यत् प्रत्यक्षपूर्वकपदे प्रत्यक्षपदस्य प्रत्यक्षविशेषे तात्पर्यम्। अतो यत्किमपि प्रत्यक्षं पूर्वे तिष्ठति चेत् अनुमानं न भवति, प्रत्यक्षविशेषपूर्वकत्वमेव अनुमानत्वम् इति बोद्धव्यम्। इदानीं प्रश्नः भवति कः एष विशेषः ? अस्य प्रश्नस्योत्तरे विश्वनाथेन उक्तं - 'व्याप्त्यादिविषयकः'[१७२] इति। अर्थात् व्याप्तिप्रभृतिविषयकप्रत्यक्षमेव प्रत्यक्षविशेषपदवाच्यं भवति। एतद् व्याप्तिप्रभृतिविषयकप्रत्यक्षमेव अनुमानस्य पूर्वं तिष्ठति। अत्रादिपदेन पक्षधर्मताज्ञानं परामृष्टम्। अत एव विश्वनाथेन भणितं यत् 'व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शप्रत्यक्षं वा अनुमानस्य पूर्वं तिष्ठति।' इति। तेन व्याप्तविशिष्टपक्षधर्माताज्ञानात् अनुमानं जायते। अत एव वृत्तिकारेण निगदितं - "व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लभ्यते।"[१७३] इति। अपि च, गङ्गेशोपाध्यायेन *तत्त्वचिन्तामणौ* भणितं- "तत्र व्याप्तिविशिष्टपक्षधर्मता-ज्ञानजन्यं ज्ञानमनुमितिः।" इति। उक्तञ्चान्नंभट्टेन *तर्कसंग्रहग्रन्थे* - "परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः।"[१७४] इति। उक्तञ्च केशवमिश्रेण तर्कभाषायां- "लिङ्गपरामर्शोऽ-नुमानम्। येन हि अनुमीयते तदनुमानम्। लिङ्गपरामर्शेन चानुमीयतेऽतो लिङ्गपरामर्शोऽनुमानम्। तच्च धूमादिज्ञानमनुमितिं प्रति करणत्वात्। अग्न्यादिज्ञानम् अनुमितिः। तत्करणं धूमादिज्ञानम्।

---

[१७२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३७

[१७३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३७

[१७४] तर्क.(सम्पा.गोविन्दाचार्यः),पृ-१७४-१७५

किं पुनर्लिङ्गं कश्च तस्य परामर्शः? उच्यते व्याप्तिबलेनार्थगमकं लिङ्गम्। यथा धूमोऽग्नेर्लिङ्गम्। तथाहि यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। तस्यां गृहीतायामेव व्याप्तौ धूमोऽग्निं गमयति। अतो व्याप्तिबलेनाग्न्य-नुमापकत्वाद् धूमोऽग्नेर्लिङ्गम्।

तस्य तृतीयं ज्ञानं लिङ्गपरामर्शः। तथाहि प्रथमं तावन्महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति। तेन भूयोदर्शनेन धूमाग्न्योः स्वाभाविकं सम्बन्धमवधारयति, यत्र धूमस्तत्राग्निरिति।''[१७५] इति।

अत्रेदं लक्षणीयं यत् व्याप्तिविशिष्टपक्षधर्मताज्ञानात् जायते अनुमितिरूपज्ञानम्। अत एवानुमानपदस्यार्थः प्रकृतस्थले अनुमितिरिति। 'अनुमीयते' इति भाववाच्ये अनुपूर्वकात् माधातोः ल्युट्प्रत्ययनिष्पन्नम् अनुमानपदम् अनुमितेः वाचकं भवति। 'करणाधिकरणयोश्च'[१७६] इति सूत्रेण करणवाच्ये तथा अधिकरणवाच्ये एव ल्युट्प्रत्ययविधानात् भाववाच्ये ल्युट्प्रत्ययविधानम् असङ्गतं स्यात्। अत एव कथं भाववाच्ये ल्युट्प्रत्ययविधानपूर्वकम् अनुमानपदम् अनुमितेः वाचकं भवेत् ? अत्रोत्तरे वक्तुं शक्यते यद् यद्यपि ल्युट्प्रत्ययः करणवाच्ये तथा अधिकरणवाच्ये यथा प्रयुक्तो भवति तथैव 'ल्युट् च'[१७७] इति सूत्रेण भाववाच्येऽपि प्रयोगः भवति। अत एव व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं यज्ज्ञानं तदनुमितित्वात् अनुमानस्यार्थोऽपि

---

[१७५] तर्कभाषा (१खण्डः),पृ-१४१-१४२

[१७६] पा.सू. -३/३/११७

[१७७] पा.सू.-३/३/११५

अनुमितिः इत्येव प्रदर्शयता न्यायाचार्येण विश्वनाथेन न्यगादि- "अनुमानम् अनुमितिः। "[१७८] इति।

किञ्चात्र विज्ञेयं यद् यथा उद्देशो भवति तथैव लक्षणमपि विधेयमिति। अत एव " प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[१७९] इति सूत्रे प्रत्यक्षानन्तरम् अनुमानप्रमाणस्य उद्देशत्वात् अनुमानप्रमाणस्यैव लक्षणकरणमुचितं स्यात्। अत एवाचार्यविश्वनाथेन सूत्रमिदम् अनुमानप्रमाणस्य लक्षणसूचकरूपेण निर्देशयितुमुक्तं यत् 'यतः' इति पदस्याध्याहारः कर्तव्यः इति। अपि च, प्रत्यक्षलक्षणसूत्रात् (न्या.सू.-१/१/४) 'ज्ञानम्' इति अनुवृत्तं स्यात्। तेन च, लक्षणं स्यात् - 'यतः तत्पूर्वकं ज्ञानं भवति तद् अनुमानम् ' इति। अर्थात् यस्मात् येन वा प्रत्यक्षपूर्वकज्ञानं भवति तदनुमानप्रमाणमुच्यते।

किन्तु अनेन पथा गौरवदोषः स्यात्। अत एव प्रमाणवादिना आचार्यविश्वनाथेन लघूपायोऽपि उपवर्णितः। तेनोक्तं यत् अथवा सूत्रमिदम् अनुमानप्रमाणस्यैव लक्षणम्। 'अनुमानम्' इति पदस्य व्युत्पत्तेः एव प्रतीयते। अनुमानपदमिदम् 'अनुमीयतेऽनेन' इत्येवं विग्रहे करणवाच्ये अनुपूर्वकात् माधातोः ल्युट्प्रत्यये निष्पन्नत्वे अनुमानपदेन अनुमितेः करणम् अनुमानप्रमाणं लभ्यते। अस्मिन् स्थले तु 'यतः' इत्यादिपदस्याध्याहारं विनापि एतदुपलभ्यते, अतोऽनेन पथा लाघवोऽपि स्यात्।

इदानीमेकः प्रश्नः जायते किमिदमनुमानप्रमाणम् ? प्राचीननये विशिष्टस्य कारणताग्रहे विशेषणस्यापि कारणताग्रहापत्तित्वात्

---

[१७८] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१३७

[१७९] न्या.सू.,१/१/३

विनिगमनाभावात् लिङ्गपरामर्शस्तथा परामृश्यमानलिङ्गम् उभयमेव अनुमितेः कारणं भवति इति कथने उचितं स्यात्। किन्तु अत्र व्यापाराभावयुक्तत्वात् परामर्शः अनुमितेः करणं भवितुं नार्हति। अत एव लिङ्गमेव अनुमानप्रमाणं स्यात्। किन्तु उदयनाचार्यस्य मतमिदं *भाषापरिच्छेदग्रन्थे* आचार्यविश्वनाथेन मतोल्लेखपूर्वकतया खण्डितम्। तत्र तेन भाषितम् –

"अनुमायां ज्ञायमानं लिङ्गं करणं न हि ।

अनागतादिलिङ्गेन न स्यादनुमितिस्तदा।।"[१८०] इति।

गङ्गेशोपाध्यायेनापि *तत्त्वचिन्तामणेः* अनुमानखण्डे भणितं यत् परामृश्यमानलिङ्गं न करणं किन्तु लिङ्गपरामर्शः एव। तदुक्तं तेन - 'तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते।' इति।

किञ्च, पुराकाले नैके लिङ्गलिङ्गिनोः सम्बन्धस्मृतिम् अर्थात् अनुमापकहेतुपदार्थे अनुमेयधर्मस्य व्याप्तिस्मरणम् अनुमितेः करणम् इति वदन्ति। किन्तु नैके तु अनुमितिचरमकारणं लिङ्गपरामर्शमेव अनुमितेः करणम् इति वदन्ति। *न्यायवार्त्तिकटीकायाम्* उद्द्योतकरेण उक्तमतभेदस्य उल्लेखपूर्वकतया स्वमतमुपस्थापितं- "वयन्तु पश्यामः- सर्वमनुमानम्, अनुमितेस्तन्नान्तरीयकत्वात्। प्रधानोपसर्जनताविवक्षायां लिङ्गपरामर्श इति न्याय्यम्। कः पुनरत्र न्यायः ? आनन्तर्यप्रतिपत्तिः। यस्माल्लिङ्गपरामर्शादनन्तरं शेषार्थप्रतिपत्तिरिति,

---

[१८०] भा.परि.,कारिकासंख्या-६७

तस्माल्लिङ्गपरामर्शो न्याय्य इति। स्मृतिर्न प्रधानम्। किं कारणम् ? स्मृत्यनन्तरमप्रतिपत्तेः।... एवञ्च उपनयस्यार्थवत्ता"[१८१] इत्यादि।

अत्रायमाशयः- प्रथमलिङ्गदर्शनात् चरमलिङ्गपरामर्शपर्यन्तं सर्वमेव अनुमितिकारणत्वात् अनुमानप्रमाणम्। किन्तु तन्मध्ये चरमकारणं लिङ्गपरामर्शः एव मुख्यम् अनुमानप्रमाणम्। यतो हि तदव्यवहितपरमेव अनुमितिर्जायते। अनुमानस्य हेतौ अनुमेयपदार्थस्य व्याप्तिस्मरणानन्तरं तदव्यवहितपरमेव अनुमितिर्न जायते। कारणम् – तद् लिङ्गपरामर्शमपेक्षते। परन्तु उक्तलिङ्गपरामर्शः अनुमितिकरणत्वात् प्रतिज्ञादिपञ्चावयवेषु चतुर्थः अवयवः उपनयवाक्यमपि सार्थकं भवति। कारणम् तद्वारा उक्तलिङ्गपरामर्शरूपज्ञानं जायते। अत उद्द्योतकरेण उक्तं यद् यदुपस्थितौ कार्यं फलं वा अवश्यमेव जायते, यदन्यकारणं न अपेक्षते, तदेव तत्कार्यस्य मुख्यं करणं भवति। नव्यनैयायिकास्तु तत् 'फलायोगव्यवच्छिन्नं कारणम्' इति वदन्ति। *तत्त्वचिन्तामणि*ग्रन्थस्य शब्दखण्डस्य प्रारम्भे पूर्वपक्षं व्याख्यायता गङ्गेशोपाध्यायेन भाषितं - 'करणविशेषः प्रमाणम्, करणञ्च तत्, यस्मिन् सति क्रिया भवत्येव।' इति। तत्र टीकाकारेण मथुरानाथतर्कवागीशमहोदयेन तत् व्याख्यापितं - 'करणत्वञ्च फलायोगव्यवच्छिन्नकारणत्वं फलोपाधायकत्वमिति यावत्। ' इति। किन्तु तत्तु न गङ्गेशोपाध्यायस्य स्वकीयमतम्। मथुरानाथस्तु तत्र बौद्धमतानुसारं पूर्वलक्षणं व्याख्यायन् करणलक्षणस्य उक्तरूपव्याख्यां प्रदत्तवान्। वस्तुतः उद्द्योतकरमतेऽपि फलायोगव्यवच्छिन्नकारणं चरमककारणं वा एव मुख्यकरणम्। अत एव तन्मते लिङ्गपरामर्श एवानुमितेः मुख्यकरणं भवति। किन्तु *तर्कसंग्रह*कारेण अन्नंभट्टेन

[१८१] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४३

भणितं - "स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।"[१८२] इति। केशवमिश्रेणापि भणितं *तर्कभाषायां* - "लिङ्गपरामर्शोऽनुमानम्।"[१८३] इति।

किञ्चात्रावधेयं यत् 'तत्करणमनुमानम्, तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते' इति गङ्गेशवचनात् प्रतीयते यत् सोऽपि प्रथमतः उद्द्योतकरमतानुसारमेव लिङ्गपरामर्शम् अनुमितेः करणमिति उक्तवानिति। किन्तु परवर्तिनि काले गङ्गेशोपाध्यायेन *परामर्शग्रन्थे* बहुधा विचार्य स्वकीयमतम् उपवर्णितं यत् पूर्वोक्तलिङ्गपरामर्शः अनुमितेः करणं भवितुं नार्हति। यतो हि तदेव अनुमितेः चरमकारणम्, अर्थात् तत् परं कमपि अनुमितिजनकव्यापारं न अपेक्षते, तद्धि निर्व्यापाररूपम्। किन्तु यस्य कस्मिन्नपि व्यापारोपस्थितौ तस्य फलमवश्यमेव जायते, तद्व्यापारो हि फलायोगव्यवच्छिन्नव्यापारः। तादृशव्यापारवत् कारणं हि करणं भवति। अत एव *अनुमितिदीधितेः* टीकायां सङ्गतिविचारे आचार्यगदाधरभट्टाचार्येण भणितं - "फलायोगव्यवच्छिन्नव्यापारवत् कारणत्वं करणत्वम्, न तु कारणत्वमात्रम्।" इति। अतोऽनुमेयधर्मस्य व्याप्तिविशिष्टत्वरूपेण यल्लिङ्गस्मरणम् अर्थात् अनुमापकहेतौ उक्तरूपेण यत् व्याप्तिस्मरणम्, तदेव अनुमितेः करणम्, तथा च तज्जन्यः उक्तरूपलिङ्गपरामर्शः एव तत्कारणस्य व्यापारः। तद्व्यापारोत्पन्नौ तु अवश्यमेव अनुमितिरूपं फलं जायते। अत एव तदेव फलायोगव्यवच्छिन्नव्यापारः। तद्व्यापारविशिष्टव्याप्तिज्ञानमेव अनुमितेः करणम्। किन्तु गङ्गेशोपाध्यायात् पूर्वं महानैयायिकेन उदयनाचार्येण पूर्वोक्तरूपलिङ्गपरामर्शविषये लिङ्गमेवानुमितेः

---

[१८२] तर्क.(सम्पा.गोविन्दाचार्यः),पृ-१९०

[१८३] तर्कभाषा(१खण्डः),पृ-१४१

करणमिति कथयता तत्समर्थितम्। अतस्तेन प्रशस्तपादस्य उद्धृतश्लोकस्य 'तल्लिङ्गमनुमापकम्' इति वाक्यस्य व्याख्या कृता- "अनुमितिरूपप्रमाकरणम् , एतेन परामृश्यमानं लिङ्गमनुमानम्।" इति। किन्तु आचार्यगङ्गेशोपाध्यायेन उदयनाचार्यस्य उक्तमते नैके दोषाः प्रदर्शिताः, तथापि *वैशेषिकदर्शनस्य* नवमाध्यायस्य द्वितीयाह्निकस्य प्रथमसूत्रस्य उपस्कारटीकायां शङ्करमिश्रेण तत्खण्डयता उदयनाचार्यस्यैव मतं समर्थितम्। तत्र तेनोक्तम् - 'एतेन लिङ्गमेवानुमितिकरणं न तु तस्य व्यापारः, तस्य निर्व्यापारत्वेनाकरणत्वात्, लिङ्गस्य तु स एव व्यापारः।' इति। किन्तु तस्य बहुपूर्वं *तार्किकरक्षा*ग्रन्थे वरदराजेन निगदितं - 'लिङ्गपरामर्शोऽनुमानमित्याचार्याः।' इति। तत्र टीकाकारेण मल्लिनाथेनापि लिखितं यत् प्रकारान्तरे उदयनाचार्योऽपि लिङ्गपरामर्शः अनुमानप्रमाणम् इति उक्तवान् इति। कारणम् – लिङ्गपरामर्शं विना तन्मतेऽपि अनुमितिर्न जायते। ततश्च *अनुमितिदीधितिटीकायाः* अन्तिमे जगदीशतर्कालङ्कारेणापि आचार्यमतानुसारं स्थलविशेषे दोषं प्रदर्शयता तदुत्तरे निगदितम् - "आचार्यमतेऽपि तद्धेतुकानुमितौ परामर्शस्यैव करणत्वात्।" इति। अतः उदयनाचार्यमतस्य उक्तरूपव्याख्यापि अभवत् इति बोद्धुं शक्यते। किन्तु उदयनाचार्यस्य स्वकीयवचनात् ज्ञायते यत् तन्मते लिङ्गपरामर्शस्य विषयीभूतलिङ्गं हेतुपदार्थो वा एव अनुमितेः करणम्। शङ्करमिश्रेण उक्तमतस्य समर्थनं कृतं परं रघुनाथशिरोमणिना तु उक्तमतखण्डने विशेषयुक्तिः प्रदर्शितः। किन्तु परवर्तिकाले गङ्गेशोपाध्यायस्य परामर्शग्रन्थस्य दीधितिटीकायां रघुनाथशिरोमणिना तु भणितं यत् सर्वत्र अनुमितिकर्तुः मनः एव अनुमितेः करणम्। मनसः करणत्वेऽपि मनोजन्यं तदनुमितिरूपज्ञानं मानसप्रत्यक्षात्

विजातीयज्ञानं भवितुमर्हति। कारणम्, तद्धि व्याप्तिज्ञानं तथा लिङ्गपरामर्शरूपविशेषकारणजन्यज्ञानम्। रघुनाथशिरोमणिना तत् समर्थितं तथापि नैयायिकसम्प्रदाये तस्य मतं न प्रतिष्ठितम्। नव्यनैयायिकसम्प्रदाये गङ्गेशस्यैव मतं प्रतिष्ठितम्। तदनुसारमेव *भाषापरिच्छेदग्रन्थे* विश्वनाथेन उक्तं–

"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।।"[१८४] इति।

किञ्च, नव्यमते व्यापारयुक्तकारणस्यैव करणत्वात् व्याप्तिस्मृतिः परामर्शरूपव्यापारयुक्ततया अनुमितिजनकत्वात् व्याप्तिस्मृतिः एव अनुमितेः करणम् अनुमानप्रमाणं वा। अत एव विश्वनाथन्यायपञ्चाननेन *न्यायसूत्रवृत्तौ* निगदितं - "तच्च व्याप्तिज्ञानम्"[१८५] इति।

अनुमितेः लक्षणप्रसङ्गे 'तत्पूर्वकम्' इति पदस्यार्थः कृतः व्याप्त्यादिविषयकप्रत्यक्षपूर्वकम् इति। किन्तु एतद् यदा अनुमानप्रमाणस्य लक्षणतया व्याख्या कृता तदा तत्पूर्वकपदस्य कोऽर्थः भवति ? अत्रोत्तरे उच्यते – व्याप्तिज्ञानं साध्यसाधनयोः भूयः सहचारप्रत्यक्षपूर्वकं भवति। अत एवाचार्यविश्वनाथेन *न्यायसूत्रवृत्तौ* तत्पूर्वकपदस्यार्थः कृतः - "तच्च व्याप्तिज्ञानं प्रत्यक्षपूर्वकं - सहचारप्रत्यक्षपूर्वकम्।"[१८६] इति।

---

[१८४] भा.परि.,कारिकासंख्या-६६

[१८५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४५

[१८६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४५

**अनुमानविभागः-** प्रस्तुतसूत्रेण महामुनिना गौतमेनानुमानस्य लक्षणं तथा विभागश्च विहितः। 'पूर्ववत् शेषवत् सामान्यतो दृष्टञ्च' इति वाक्येन यद्यपि अनुमानस्य त्रैविध्यत्वं प्रतीयते तथापि अनुमानं त्रिविधमेव न च तदतिरिक्तं न वा तन्न्यूनम् इत्येव प्रतिपादयितुं सूत्रकारेण सूत्रे 'त्रिविधम्' इति पदं सन्निवेशितम्। अत एव वृत्तिकारेण आचार्यविश्वनाथेन भणितं - ''विभजते – त्रिविधमिति।''[१८७] इति।

अनुमानविभागविषये तु भाष्यकारस्य तथा वृत्तिकारस्य भिन्नव्याख्या उपलभ्यते। भाष्यनये अनुमानरूपन्यायः महान्, तस्य अवान्तरवाक्यभेदा अपि बहवः, तथा स च महाविषयः अर्थात् अतीतकालस्य वर्तमानकालस्य भविष्यत्कालस्य च विषये अनुमानप्रमाणं प्रवृत्तं भवति। अतो यद्यपि स्वल्पाक्षरत्वमेव सूत्रस्य लक्षणं तथापि उक्तरूपम् अनुमानम् एकेन अतिलघुसूत्रेण उपदेशत्वे वाक्यसंक्षेपो भवति। महामुनिगौतमस्य एतस्मात् अत्यन्तवाक्यसंक्षेपं प्रति अनादरवाशादेव 'त्रिविधम्' इति पदं गृहीतम्।

*न्यायवार्त्तिकतात्पर्यटीकायां* वाचस्पतिमिश्रेण भाष्यसन्दर्भस्याशयः भिन्नतया व्याख्यातः। तन्नये भाष्यवचनस्याशयो हि यत् 'त्रिविधम्' इति विभागवचनादेव पूर्ववत्, शेषवत्, सामान्यतो दृष्टम् इत्याद्यनुमानस्य त्रैविध्यस्य सिद्धत्वात् पुनः कथं पूर्ववत् इत्यादिपदं गृहीतम् ? किन्तु पूर्वम् एवं भाष्यग्रन्थः व्याख्यातः यत् सूत्रे पूर्ववत् शेषवत् तथा सामान्यतो दृष्टमिति अनुमानप्रकारत्रयोल्लेखाद् एव अनुमानप्रमाणस्य त्रैविध्यं सूचितं भवति, तदा सूत्रे

---

[१८७] तत्रैव

'त्रिविधम्' इति पदग्रहणस्य सार्थकता कुत्र ? किन्तु वाचस्पतिमिश्रस्य व्याख्यानतः प्रतीयते यत् 'त्रिविधम्' इति विभागवचनाद् अनुमानस्य त्रैविध्यस्य सूचनात् 'पूर्ववत्' इत्यादिपदोल्लेखेन अनुमानप्रमाणस्य त्रैविध्यप्रतिपादनस्य किं प्रयोजनम् ? अर्थात् अत्र स्थले पूर्ववत् इत्यादिपदग्रहणस्य सार्थकता का ? इत्येव प्रश्नः। अत एव प्रश्नस्यास्य समाधानाय *तात्पर्यटीकायां* वर्णितम् - " अत भाष्यं विभागवचनादेव त्रिविधमिति सिद्ध इति, तस्यार्थस्त्रिविधमिति विभागवचनादेव त्रिविधे पूर्ववदादौ सिद्धे किमर्थं पूर्ववदाद्युपादानं सूत्रेणेति। तत्र साधारणं त्रिविधवचनं त्रिविधस्य पूर्ववदादेर्वचनमुक्तिः।"[१८८] इति। वस्तुतः 'त्रिविधम्' इति पदेन अनुमानप्रमाणस्य त्रैविध्यस्य ज्ञातत्वेऽपि तत्त्रिविधम् अनुमानं किं किं तन्न ज्ञायते। अत एव तज्ज्ञानार्थमेव सूत्रे 'पूर्ववत्' इत्यादिपदम् उल्लिखितम्।

आचार्यजयन्तभट्टस्तु *न्यायमञ्जरीग्रन्थे* 'त्रिविधम्' इति पदग्रहणस्य सार्थकताविषये विविधदार्शनिकानां मतानि व्याख्याय भाष्यमतमेव समर्थितवान्। केचन वदन्ति 'तत्पूर्वकम्' 'प्रत्यक्षपूर्वकम्' वा केवलम् अनुमानप्रमाणस्य लक्षणं भवति चेत् तदा तल्लक्षणम् उपमानादिप्रमाणेष्वपि अतिव्याप्तं भवति। यतो हि उपमानमपि प्रत्यक्षपूर्वकं भवति। किन्तु 'त्रिविधम्' इति पदं गृह्यते चेत् तदा उपमानादिप्रमाणेष्वतिव्याप्तं न भवति। यतो हि उपमानादिप्रमाणं त्रिविधं न भवति। अत एव एतन्मतानुसारं 'त्रिविधम्' इति पदं सूत्रे लक्षणघटकरूपेण व्यवहृतम्। मतान्तरे तु लिङ्गं पुनः कार्यादिभेदवशात् त्रिविधं भवति। अथवा पक्षधर्मादित्रिरूपविशिष्टं लिङ्गं भवति। लिङ्गस्यैव त्रैविध्यत्वात् तदाश्रितमनुमानमपि गौणतया त्रिविधं स्यात्। अत एव

---

[१८८] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१५७

'प्रत्यक्षपूर्वकं' तथा 'त्रिविधलिङ्गविषयकज्ञानं' भवति अनुमानम् इत्येवम् अनुमानस्य लक्षणं भवति चेत् उपमानादिषु अतिव्याप्तिर्न भवति। अत एव जयन्तभट्टेन निगदितम् - " अन्ये पुनः उपमानाद्यतिव्याप्तिव्युदासाय त्रिविधग्रहणं व्याख्यातवन्तः। तत्पूर्वकमनुमानमित्युच्यमाने सति उपमानादौ प्रसङ्ग इति त्रिविधग्रहणं लिङ्गं वक्ष्यमाणकार्यादिभेदाद्वा त्रिविधम्, पक्षधर्मादिरूपत्रययोगाद्वा त्रिरूपं त्रिविधमुच्यते लिङ्गे च त्रिविधे सति तदालम्बनज्ञानमुपचारात् त्रिविधमभिधीयते। तेन प्रत्यक्षपूर्वकं त्रिविधलिङ्गालम्बनज्ञानमनुमानमित्युक्ते सति नातिव्याप्तिः।"[१८९] इति।

किन्तु परिशेषे तु भाष्यमतमेव गृहीतम्। अत एवोक्तं –

" त्रिविधग्रहणं तस्य विभागप्रतिपादकम्।

भेदः पूर्ववदित्यादिग्रन्थेन कथितास्त्रयः।।"[१९०] इति।

पूर्ववत् शेषवत् सामान्यतो दृष्टञ्च इति त्रिविधानुमानानां स्वरूपविषये तथा उदाहरणविषये भाष्यवृत्त्योः वैलक्षण्यमाचक्षते। अतस्तेषां स्वरूपवैलक्षण्यमुदाहरणवैलक्षण्यञ्चाधस्ताद् वर्ण्यते।

• **पूर्ववद् अनुमानम्** – भाष्यकारनये तथा वृत्तिकारनये पूर्वशब्दस्यार्थो हि कारणम्। 'पूर्वं विद्यते यत्र' अर्थात् यदनुमाने पूर्वं कारणविशेषः हेतुरूपतया विद्यमानः भवति, तत्पूर्ववद् अनुमानम्। कारणात् कार्यस्यानुमानं हि पूर्ववद् अनुमानम्। कारणमेव कार्यात् पूर्वं तिष्ठति इति तस्य पूर्वपदेनाभिधानं

[१८९] न्या.म., द्वितीयाह्निकम्, पृ-१८७

[१९०] न्या.म., द्वितीयाह्निकम्, पृ-१८७

सङ्गतं भवति। तेन कारणलिङ्गकानुमानमिति पूर्ववदनुमानस्यार्थः। पूर्ववदनुमानस्य स्वरूपविषये भाष्यकारेण उक्तं - "पूर्ववदिति यत्र कारणेन कार्यमनुमीयते।"[१९१] इति। पूर्ववदनुमानसस्य स्वरूपविषये वृत्तिकारेण निगदितं - "पूर्वं कारणम्, तद्वत्-तल्लिङ्गकम्,..."[१९२] इति। एतेन प्रतीयते भाष्यकारेण साक्षादुक्तं यत् पूर्ववदनुमाने कारणात् कार्यमनुमीयते इति। किन्तु वृत्तिकारेण साक्षात् तन्नोक्तं किन्तु अर्थपर्यालचनया तदेव अधिगम्यते इति भेदः। वृत्तिकारनये पूर्ववदनुमानं हि कारणलिङ्गकं भवति। पूर्ववदनुमानस्योदाहरणम् उक्तं भाष्यकारेण - "मेघोन्नत्या भविष्यति वृष्टिरिति।"[१९३] इति। अर्थात् मेघस्य उन्नतिरूपविशेषकारणदर्शनेन तत्कार्यस्य भाविवृष्टेरनुमितिर्जायते। आचार्यविश्वनाथेन तु पूर्ववदनुमानस्यैवमुदाहरणं प्रदत्तं - "मेघोन्नतिविशेषेण वृष्ट्यनुमानम्।"[१९४] इति। मेघस्य उन्नतिरूपविशेषकारणदर्शनेन कार्यस्य वृष्टेरनुमानम् इति। अत्रानुमानस्याकारः एवं स्यात् 'एते मेघा वृष्टिमन्तः उन्नतिविशेषात्' इति। न केवलं मेघोन्नत्या वृष्ट्यनुमानं भवति अपि तु विशेषप्रकारोन्नत्या भवति। ननु कः स विशेषः? इति चेदुच्यते मेघस्य गम्भीरकर्जनकारित्वं, बहुवलाकावत्त्वम् इत्यादिः। अत एव *न्यायवार्त्तिके* अनुमानस्याकारत्वमेवमुच्यते - "वृष्टिमन्त एते मेघाः गम्भीरध्वनिवत्त्वे सति बहुलबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतिमत्त्वात्

[१९१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४६
[१९२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४५
[१९३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४६
[१९४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४५

वृष्टिवन्मेघवदिति।"[१९५] इति। अतो दृश्यते यत् पूर्ववदनुमानस्योदाहरणविषये अर्थगतदृष्ट्या तु भाष्यवत्त्योः समानत्वम् आचक्षते।

• **शेषवदनुमानम्-** अत्रापि भाष्यकारनये तथा वृत्तिकारनये शेषशब्दस्यार्थो हि कार्यम् इति। अत्रेदं ज्ञेयं यत् कार्यकारणयोः कारणं पूर्ववृत्ति कार्यञ्च परवृत्ति शेषवृत्ति वा इत्यतः एव कारणार्थे पूर्वशब्दप्रयोगः तथा कार्यार्थे शेषशब्दप्रयोगः कृतः। 'शेषो विद्यते यत्र' अर्थात् यदनुमानप्रमाणे कार्यविशेषः हेतुरूपतया विद्यमानः तिष्ठति इति कार्यहेतुकानुमानं शेषवद् अनुमानं वा। शेषवदनुमानं नाम कार्यं दृष्ट्वा कारणस्यानुमानम्। अत्र शेषवदनुमाने कार्यविशेषः तस्य व्यापकः कारणविशेषस्यानुमापको भवति। कार्यमेव कारणस्य शेषे वर्तमानं तिष्ठति इति कृत्वा तस्य शेषपदेनाभिधानं सङ्गतं भवति। तेन कार्यलिङ्गकानुमानमिति शेषवदनुमानस्यार्थः। अत एव शेषवदनुमानस्य स्वरूपविषये भाष्यकारेण निगदितं - "'शेषवत्' तत् – यत्र कार्येण कारणमनुमीयते,...।"[१९६] इति। उक्तञ्च विश्वनाथेन शेषवदनुमानस्य स्वरूपविषये- "शेषः कार्यम्, तल्लिङ्गकं शेषवत्,..।"[१९७] इति।

अत्रापि दृश्यते शेषवदनुमानस्य स्वरूपविषये भाष्यकारवृत्तिकारयोः मतयोः अर्थदृष्ट्या समाना एवाभ्युक्तिः।

शेषवदनुमानस्योदाहरणं प्रदत्तं भाष्यकारेणैव- "...पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्टा स्रोतसोऽनुमीयते भूता वृष्टिरिति।"[१९८] इति।

---

[१९५] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४७-१४८

[१९६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४८

[१९७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४५-१४६

[१९८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४८

अर्थात् नद्याः पूर्णतारूपस्य तथा स्रोतसः प्रखरताविशेषरूपकार्यस्य दर्शनेन तस्य कारणम् अतिवृष्टिरिति अनुमीयते। एतेन कार्यात् कारणम् अनुमीयते। शेषवदनुमानस्योदाहरणं तु वृत्तिकारेण एवं प्रदत्तं - "नदीवृद्ध्या वृष्ट्यनुमानम्।"[१९९] इति। अत्र नद्याः पूर्णतायास्तथा प्रखरताविशेषकार्यस्य दर्शनेन अतीतवृष्टेरनुमानम्। अत्र तु वृद्धिरेव हेतुरूपेणोल्लिखिता। अत्र वृद्धिः कीदृशी ? अर्थात् कीदृशी वृद्धिः वृष्टेः अनुमापका स्यात् ? अत्रोच्यते – स्रोतसः शीघ्रत्वं पत्रफलमूलादेः स्रोतसा नीयमानत्वं, पूर्णत्वम् इत्यादि वृद्धिशब्देन बोद्धव्यम्। अतो *न्यायवार्त्तिकटीकायाम्* अनुमानमिदमेवं प्रदर्शितम् - "उपरि वृष्टिमद्देशसम्बन्धिनी नदी स्रोतःशीघ्रत्वे सति पर्णफलकाष्ठादिवहनवत्त्वे सति पूर्णत्वात् पूर्णवृष्टिमन्नदीवदिति।"[२००] इति।

वृत्तिकारस्य तथा भाष्यकारस्य उदाहरणे पर्यालोच्य एतद्वक्तुं शक्यते यत् अर्थदृष्ट्या समानमेवोदाहरणं प्रदर्शितम् उभयाभ्याम्, केवलम् उदाहरणगात्रदृष्ट्या तत्र पार्थक्यमाचक्षते। किञ्च, तत्र भाष्यकृतोदाहरणे विशदतया व्याख्यानं प्राप्यते किन्तु वृत्तिकारकृतोदाहरणे तु तादृशव्याख्या नास्ति, तत्र उदाहरणस्य गात्रपर्यालोचनया व्याख्याद्वारा वा सर्वं बोद्धव्यम्।

• **सामान्यतो दृष्टमुनमानम्-** यद् लिङ्गं हेतुर्वा अनुमेयपदार्थस्य कारणं न, कार्यमपि न , तादृशलिङ्गेनानुमितिर्जायते चेत् तदनुमानप्रमाणं हि सामान्यतो दृष्टम्। अर्थात् कार्यकारणभिन्नहेतुना यदनुमानं भवति तत्सामान्यतो दृष्टम् अनुमानमुच्यते। सामान्यतो दृष्टमिति एवंविधानुमानस्य एवमेव व्याख्या

---

[१९९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४६

[२००] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४८

वृत्तिकारेण प्रदत्ता। तदुक्तं तेन *न्यायसूत्रवृत्तौ* - ''सामान्यतो दृष्टं कार्यकारणभिन्न-लिङ्गकम्।''[२०१] इति। सामान्यतो दृष्टानुमानस्योदाहरणमेवं प्रदत्तं वृत्तिकारेण- ''यथा पृथिवीत्वेन द्रव्यत्वानुमानम्।''[२०२] इति। अत्रायमाशयः – अत्र द्रव्यत्वं साध्यं तथा पृथिवीत्वं साधनम्। द्रव्यत्वपृथिवीत्वयोः साध्यसाधनयोर्वा कार्यकारणभावो न विद्यते। पृथिवीत्वं न द्रव्यत्वस्य कार्यं , न वा कारणम्। अत एवात्र कार्यकारणव्यतिरिक्तहेतुना द्रव्यत्वस्यानुमानत्वात् , एतद् अनुमानं सामान्यतो दृष्टमनुमानमुच्यते।

प्राचीनन्यायाचार्येण उद्द्योतकरेणापि उक्तरूपव्याख्या प्रदत्ता, ततश्च तदनुमानस्योदाहरणमुक्तं - ''यथा बलाकया सलिलानुमानम्।''[२०३] इति। तथाहि दूरात् बलाकां दृष्ट्वा तदाधारस्य जलस्य अनुमानं जायते। किन्तु सा बलाका तज्जलस्य न हि कार्यं न चापि कारणं भवति। अत एतत् सामान्यतो दृष्टानुमानस्योदाहरणम्।

किन्तु भाष्यकारेण वात्स्यायनेन तु विषयेऽस्मिन् एवंविधव्याख्या न प्रदत्ता। भाष्यनये तु यत्र स्थले अनुमेयपदार्थः लौकिकप्रत्यक्षस्यायोग्यः, अतः कस्मिन्नपि पदार्थे तस्य व्याप्तिसम्बन्धस्य प्रत्यक्षं न सम्भवति, तत्र स्थले कस्मिन्नपि पदार्थे अन्यस्य कस्यापि पदार्थस्य सामान्यतः व्याप्तिसम्बन्धस्य प्रत्यक्षेण तदप्रत्यक्षपदार्थस्य अनुमितिर्जायते। तत्र तत्स्थलीयानुमानप्रमाणस्य नाम हि सामान्यतो दृष्टम्। यथा- सूर्यस्य गतिक्रिया लौकिकप्रत्यक्षायोग्या भवति। अतः कस्मिन्नपि पदार्थे तस्य व्याप्तिसम्बन्धस्य लोकिकप्रत्यक्षं न सम्भवति। किन्तु

[२०१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४६

[२०२] तत्रैव

[२०३] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४९

एकस्मिन् स्थले दृष्टद्रव्यस्य अन्यत्र दर्शनं तु तद्द्रव्यस्य गतिक्रियाप्रयुक्तेनैव सम्भवति इति तु बहुद्रव्ये प्रत्यक्षं भवति। अतः उक्तरूपसामान्यतः व्याप्तिप्रत्यक्षेण 'सूर्यो गतिमान्' – इत्येवं सूर्ये अप्रत्यक्षगतिक्रियायाः अनुमितिर्जायते। यतो हि प्रातः एकस्मिन् स्थले दृष्टस्य सूर्यस्यापि मध्याह्नादिकाले स्थानान्तरदर्शनं भवति। अत एव तादृशदर्शनविषयत्वहेतुना सूर्ये गतिक्रियायाः अनुमितिर्भवति। एवंविधानुमानं हि सामान्यतो दृष्टम्। अत एव भाष्यकारेण निगदितं *न्यायभाष्ये* - "सामान्यतो दृष्टं – व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति, तथा चाऽऽदित्यस्य, तस्मादस्त्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति।"[२०४] इति।

*योगदर्शनभाष्ये* उक्तरूपानुमानस्य उदाहरणं प्रदर्शयता व्यासदेवेनोक्तं - "देशान्तरप्राप्तर्गतिमच्चन्द्रतारकम्।"[२०५] इति।

किन्तु वार्त्तिककारेण उद्द्योतकरेण सूर्यस्य गतिक्रियां स्वीकृत्यापि भाष्यकारस्य पूर्वोक्तोदाहरणं खण्डितम्। न्यायमञ्जरीग्रन्थे जयन्तभट्टेनापि विशेषतया विचार्य सामान्यतो दृष्टम् अनुमानं हि शेषवदनुमानम् इत्युक्तम्।[२०६] अर्थात् उक्तानुमानं शेषवदनुमानरूपेण जयन्तभट्टेन समर्थितम्। तथाहि आदौ 'देशान्तरप्राप्तिमान् आदित्यः' इत्येवं सूर्यस्य देशान्तरप्राप्तिः अनुमानप्रमाणसिद्धो भवति चेत् तदनुमितिदेशान्तरप्राप्तिरूपहेतुना एव सूर्यस्य गतिक्रिया अनुमानसिद्धा भवति। कारणम्, सूर्यस्य यद् देशान्तरप्राप्तिः तद्धि सूर्यस्य गतिक्रियाजन्यः, गतिक्रिया हि तस्य कारणम्। तथा सति एतत्स्थले

---

[२०४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४८-१४९

[२०५] योगभाष्यम्-१/७

[२०६] न्या.म.,पृ-१३१

तदनुमानप्रमाणं भाष्यकारस्य पूर्वोक्तशेषवदनुमानमेव। तस्य च 'सामान्यतो दृष्टम्' इति पृथक्तया कथनं नोचितं स्यात्।

किञ्चात्र विज्ञेयं यत् वार्त्तिककारेण उद्द्योतकरेण अनेकविधया सूत्रकारोक्तत्रिविधानुमानस्य व्याख्या कृता। 'सामान्यतो दृष्टम्' इत्यत्र नञ्शब्दस्यान्तर्भावं कृत्वा 'सामान्यतोऽदृष्टम्' इत्येवं नामग्रहणं कृत्वापि स्वकीयमतेन सूत्रार्थव्याख्या प्रदत्ता। किञ्च, *तात्पर्यटीका*कारेण वाचस्पतिमिश्रेण एवंविधत्रिविधानुमानस्य नामोल्लेखः कृतः – १.पूर्ववत् शेषवत्, २.सामान्यतोऽदृष्टम्, ३.शेषवत् सामान्यतोऽदृष्टम् चेति।

'अथवा' इति शब्दप्रयोगद्वारा सूत्रकारकृतं पूर्ववत्, शेषवत् तथा सामान्यतो दृष्टम् इति त्रिविधमनुमानं भाष्यकारेण तथा वृत्तिकारेणापि उदाहरणयोगेन भिन्नतया व्याख्यातम्। तथाहि भाष्यकारनये पूर्ववत् इति अनुमानं हि यत् पदार्थद्वयं पूर्वं नाम व्याप्तिप्रत्यक्षकाले यद्रूपेण प्रत्यक्षं जातं, तन्मध्ये अन्यत्र तत्पूर्वदृष्टव्याप्यपदार्थस्य तुल्यसजातीयपदार्थदर्शनजन्यस्य पूर्वदृष्टव्यापकपदार्थस्य तुल्यसजातीयपदार्थस्यानुमितिर्जायते चेत् तत्स्थलीयम् अनुमानप्रमाणम् नाम पूर्ववत् इति। अस्यां व्याख्यायां 'पूर्ववत्' इति शब्दः क्रियातुल्यतार्थे वतिप्रत्ययसिद्धः, तदर्थो हि 'पूर्वतुल्यः' इति। भाष्यकारेणास्योदाहरणे उक्तं - "धूमेनाग्निरिति।"[२०७] इति। पूर्वं पाकशालादि-स्थाने धूमः वह्निश्च यद्रूपेण प्रत्यक्षभूतः, परं पर्वतादिस्थाने तत्तुल्यस्य पूर्वदृष्टस्य वा धूमस्य सजातीयधूमदर्शनेन पूर्वदृष्टवह्नेः तुल्यस्य सजातीयस्य वा अप्रत्यक्षस्य वह्नेः अनुमितिर्जायते। तदनुमितेः चरमकारणं यत् वह्निव्याप्यधूमदर्शनक्रिया,

---

[२०७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१५५

तदपि पाकशालादिस्थाने प्रथमधूमदर्शनक्रियायाः तुल्यत्वात् उक्तरूपम् अनुमानप्रमाणं 'पूर्ववत्' इति नाम्ना कथितम्। तदुक्तं भाष्यकारेण वात्स्यायनेन - "अथवा पूर्ववदिति, यत्र यथापूर्वं प्रत्यक्षभूतयोरन्यतरदर्शनेनान्यतरस्याप्रत्यक्ष-स्यानुमानं, यथा धूमेनाग्निरिति।"[२०८] इति।

वृत्तिकारेण तु अनुमानमिदं केवलान्वयीनाम्ना उपवर्णितम्। तदुक्तं वृत्तिकारेण *न्यायसूत्रवृत्तौ* - " अथवा पूर्वम् अन्वयः, तद्वत् केवलान्वयीत्यर्थः, यथा अभिधेयं प्रमेयत्वादित्यादि।"[२०९] इति। अत्र पूर्वपदास्यार्थः अन्वयः, 'पूर्वमस्यास्ति' इत्यर्थे पूर्वशब्दात् मतुप्प्रत्यये पूर्ववच्छब्दो निष्पद्यते। अत्रैकविषयो लक्षणीयो यत् अन्वयः नाम केवलान्वय एव अन्यथा सामान्यतो दृष्टानुमानस्य अन्वयव्यतिरेकी इत्यर्थस्य वैयर्थ्यापत्तिः स्यात्।

अत्रैकः प्रश्नः स्यात् अन्वयपदेन कथं हेतुं बोधयति ? अत्रोत्तरे उच्यते – अन्वयः अर्थात् केवलान्वयव्याप्तिः अस्य हेतोः अस्तीत्यर्थे अन्वयपदेन सह अस्त्यर्थे "अर्श आदिभ्योऽच्"[२१०] इति सूत्रेण अच्प्रत्यये " यस्येति च "[२११] इति सूत्रेण च पूर्वशब्दस्य अन्त्य–अकारस्य लोपे अन्वयः इति शब्दो निष्पन्नः। अत एव यद् अन्वयशब्दाद् उत्तरम् अच्प्रत्ययः प्रयुक्तः, तस्यार्थः आसीद् अन्वयव्याप्तिः। तथा च, अच्प्रत्ययान्त-अन्वयपदस्यार्थः केवलान्वयव्याप्तिविशिष्टहेतुः। अत एतादृशहेतु-विशिष्टानुमानं हि केवलान्वयि अनुमानम्।

---

[२०८] तदेव, पृ-१५२-१५५

[२०९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४७

[२१०] पा.सू.-५/२/१२७

[२११] पा.सू.-६/४/१४८

अधुना प्रश्नः केवलान्वयव्याप्तिविशिष्टहेतोः स्वरूपं किम् ? अत्रोच्यते- 'अन्वयसहचारज्ञानमात्रजन्यज्ञानविषयव्याप्तिमदित्यर्थः' अर्थात् व्याप्यत्वं व्याप्तिविशिष्टत्वं वा एव लिङ्गस्य सामान्यलक्षणम्। यल्लिङ्गं हेतुर्वा केवलम् अन्वयव्याप्तिविशिष्टं तत् केवलान्वयी हेतुः इत्युच्यते। अन्वयव्याप्तिर्हि साध्यसाधनयोः व्याप्तिः। अत एव साध्यसाधनयोः साहचर्यज्ञानमात्रं यद् व्याप्तिज्ञानं जायते, तद्व्याप्तिज्ञानस्य विषयः यः व्याप्तिः तद्व्याप्तिमान् हेतुर्हि केवलान्वयी हेतुः। तद्विशिष्टम् अनुमानं केवलान्वयि अनुमानम्। अत्रोदाहरणं यथा- 'अभिधेयं प्रमेयत्वात्' इति। अत्रानुमाने साध्यस्य अभिधेयत्वस्य साधनस्य च प्रमेयत्वस्य घटादेः सपक्षे साहचर्यस्य ज्ञानमात्रं तिष्ठति। अत्रान्यवव्याप्तेः आकारः स्यात् – यत्र यत्र प्रमेयत्वं तत्र तत्राभिधेयत्वमिति।

किन्तु 'यत्र यत्र अभिधेयत्वाभावः तत्र तत्र प्रमेयत्वाभावः' इति व्यतिरेकव्याप्तिः अत्र न सम्भवति। यतो हि अत्र अभिधेयत्वाभावस्याधिकरणमेव नास्ति, सर्वस्यैव प्रमेयत्वात् अभिधेयत्वाच्च।

भाष्यकारेण वात्स्यायनेन शेषवदनुमानस्य भिन्नरूपतया व्याख्यां कुर्वता उक्तं - "शेषवन्नाम परिशेषः, स च प्रसक्तप्रतिषेधेऽन्यत्राऽप्रसङ्गा-च्छिष्यमाणे सम्प्रत्ययः, यथा सदनित्यमेवादिना द्रव्यगुणकर्मणामविशेषेण सामान्यविशेषसमवायेभ्यो विभक्तस्य शब्दस्य, तस्मिन् द्रव्यगुणकर्मसंशये, न द्रव्यम्, एकद्रव्यत्वात्, न कर्म, शब्दान्तरहेतुत्वात्, यस्तु शिष्यते सोऽयमिति शब्दस्य गुणत्वप्रतिपत्तिः। "[२१२] इति। अत्रायमाशयः – अत्र शेषवन्नाम परिशेषः।

[२१२] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१५५-१५६

'शिष्यते अवशिष्यते' इति व्युत्पत्त्यनुसारं शेषशब्देन बोध्यते यद् यत्पदार्थः अवशिष्टः तिष्ठति अर्थात् यत्केनापि प्रमाणेन न खण्डितं भवति। 'शेषोऽस्ति यस्य प्रतिपाद्यतया' अर्थात् शेषपदार्थः यदनुमानप्रमाणेन प्रतिपाद्यः, इत्येवं व्युत्पत्त्यनुसारम् उक्तशेषवच्छब्देन बोध्यते, तच्छेषपदार्थस्य साधकम् अनुमानप्रमाणम्। अतः उक्तशेषवदनुमानस्य नामान्तरं हि परिशेषानुमानम् इति। अतो भाष्यकारेण भणितं - 'स च प्रसक्तप्रतिषेधे' इत्यादि। ततश्च 'यथा सदनित्यम्' इत्यतः 'शब्दस्य' इत्यन्तसन्दर्भेण शब्दस्य गुणत्वसाधकम् अनुमानप्रमाणं तस्य उदाहरणरूपेण संसूच्य 'तस्मिन् द्रव्यगुणकर्मसंशये' इत्यादिसन्दर्भेण तदनुमानस्य विषये दिग्दर्शनं कृतम्।

किन्तु नव्यनैयायिकेन आचार्यविश्वनाथेन 'शेषवत्' इति अनुमानं 'केवलव्यतिरेकी' इति नाम्ना वर्णितम्। तत्र शेषः नाम व्यतिरेकः, तद्वत् केवलव्यतिरेकीत्यर्थः। केवलव्यतिरेकीति शब्दस्य व्युत्पत्तिगतव्याकरणव्याख्या तु केवलान्वयीति शब्दवत् भाव्यम्। विश्वनाथेन *न्यायसूत्रवृत्तौ* एतदनुमानविषये भणितं - "शेषः – व्यतिरेकः तद्वत् केवलव्यतिरेकीत्यर्थः, यथा – पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि।"[२१३] इति। अत्रायमाशयः – हेतुसाध्याभावयोः व्याप्तिः व्यतिरेकव्याप्तिः। अर्थात् साध्याभावस्य तथा हेत्वाभावस्य व्याप्तिर्हि व्यतिरेकव्याप्तिः। केवलव्यतिरेकिलिङ्गस्य लक्षणं तावत् - 'अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं लक्षणम्' इति। अर्थात् यो हेतुः अन्वयव्याप्तिविशिष्टो न परं व्यतिरेकव्याप्तिविशिष्टो भवति तद्धि केवलव्यतिरेकि अनुमानम्। अत्रोदाहरणं हि 'पृथिवीतरेभ्यो भिन्ना गन्धवत्त्वात्' इति। 'पृथिवी इतरभिन्ना गन्धवत्त्वात्'

[२१३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१४७

इति परिष्कृतार्थः। अत्रानुमाने साध्यम् इतरभेदः, हेतुश्च गन्धवत्त्वम्। हेत्वाभावः गन्धवत्त्वाभावः, साध्याभावः इतरभेदाभावः। यत्र यत्र इतरभेदाभावस्तत्र तत्र गन्धवत्त्वाभावः इति तदनुमानस्याकारः। किन्तु अत्रान्वयव्याप्तिः न सम्भवति। यद्युच्यते ' यत्र यत्र गन्धवत्त्वं तत्र तत्र इतरभेदः' इत्यन्वयव्याप्तिः अत्र न सम्भवति। तथा चात्र व्याप्तेः ग्रहस्थलं पृथिवी स्वयं भवति। अपि च, गन्धवत्त्वस्य पृथिवीमात्रपक्षत्वात् इतरभेदः न सम्भवति। अत एवात्र केवलव्यतिरेकव्याप्ति-सम्भवात् तादृशहेतुमदनुमानं हि केवलव्यतिरेकि अनुमानम्।

सामान्यतो दृष्टानुमानं भिन्नरूपेण व्याख्यानं कुर्वता महानैयायिकेन महर्षिवात्स्यायनेन निगदितं - "सामान्यतो दृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते, यथेच्छादिभिरात्मा, इच्छादयो गुणाः, गुणाश्च द्रव्यसंस्थानाः, तद्यदेषां स्थानम्, स आत्मेति।"[२१४] इति। तथाहि सामान्यतो दृष्टानुमानं हि पूर्ववदनुमानस्य विपरीतम्। यतो हि पूर्ववदनुमाने लिङ्गलिङ्गिनोः व्याप्यव्यापकभावसम्बन्धः लौकिकप्रत्यक्षयोग्यः। परं यत्र लिङ्गलिङ्गिनो व्याप्यव्यापकभावसम्बन्धः लौकिकप्रत्यक्षायोग्यः, तत्र तु सामान्यतो दृष्टानुमानेन प्रकृतसाध्यं सिद्धं भवति। अत्रोदाहरणं – यथा आत्मा देहादिभिन्नत्वरूपेण लौकिकप्रत्यक्षस्यायोग्यो भवति। अतः तस्मिन् उत्पन्नाः इच्छाप्रभृतिविशेषगुणाः तस्य मानसप्रत्यक्षस्य विषयत्वेऽपि तेषु गुणेषु तदात्मनः व्याप्तिसम्बन्धस्य प्रत्यक्षं भवितुं नार्हति। कारणम्, यस्मिन् इच्छादिगुणाः जायन्ते, तद्देहादिभिन्नः आत्मा इत्येवं व्याप्तिं निश्चेतुं प्रत्यक्षसिद्धोदाहरणं नास्ति। परं यो यो गुणपदार्थः स स द्रव्याश्रितः, यथा

---

[२१४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१५६-१५७

रूपादिगुणाः इत्येवं सामान्यतो गुणपदार्थे गुणत्वे वा द्रव्याश्रितत्वस्य व्याप्तिसम्बन्धस्य प्रत्यक्षं भवति। कारणम्, बहिरिन्द्रियग्राह्यरूपादिगुणाः द्रव्याश्रिता इति तु प्रत्यक्षसिद्धम्। अतः पूर्वोक्तरूपेण सामान्यतो व्याप्तिसम्बन्धस्य प्रत्यक्षेण इच्छादिमनोग्राह्यगुणाः केचित् द्रव्याश्रिताः, अर्थात् कश्चित् द्रव्यपदार्थः तेषामाश्रयः आधारो वा सिद्धं भवति। तेन च, आत्मा नामातिरिक्तः द्रव्यपदार्थः एवेति सिद्धं भवति।

किन्तु आचार्यविश्वनाथेन सामान्यतो दृष्टानुमानस्य भिन्नं नाम प्रदत्तं तथा तस्य भिन्नव्याख्या प्रदत्ता। तन्मते सामान्यतो दृष्टानुमानस्यापरनाम अन्वयव्यतिरेकि इति। तथाहि अन्वयव्यतिरेकयोः उभययोः व्याप्तिमता हेतुना साध्यस्य साधनं भवति चेत् तदनुमानम् अन्वयव्यतिरेकि इति। अन्वयव्यतिरेकलिङ्गस्य स्वरूपं तावत्- 'साध्यसाधनसहचारज्ञानजन्यज्ञान-विषयत्वसाध्याथभावसाधनाभावसहचारज्ञानजन्यज्ञानविषयत्वोभयविशिष्टव्या-स्याश्रयत्वम् अन्वयव्यतिरेकिलक्षणम्' इति। अत्रायमाशयः – साध्यसाधनस्य सहचारज्ञानजन्यज्ञानं हि अन्वयव्याप्तिज्ञानम्। तज्ज्ञानविषयत्वम् अन्वयव्याप्तिनिष्ठम्। तथा च, साध्याभावसाधनाभावयोः सहचारज्ञानजन्यज्ञानं व्यतिरेकव्याप्तिज्ञानम्। तज्ज्ञाननिरूपितविषयत्वं व्यतिरेकव्याप्तिनिष्ठम्। तादृशोभयविषयत्वविशिष्टव्याप्तिः अर्थात् अन्वयव्याप्तिः व्यतिरेकव्याप्तिः इति उभयप्रकारव्याप्तेः आश्रयः यल्लिङ्गं तद् अन्वयव्यतिरेकि लिङ्गम्। तादृशहेतुमदनुमानम् अन्वयव्यतिरेकि अनुमानम्। अन्वयव्यतिरेकि इति शब्दस्य व्युत्पत्तिगतव्याकरणव्याख्या तु केवलान्वयि तथा केवलव्यतिरेकि इति शब्दवद् भाव्यम्। तदुदाहरणं यथा - 'वह्निमान् धूमात्' इति। अत्रानुमाने 'यत्र यत्र

धूमस्तत्र तत्र वह्निः यथा चत्वरम्' इत्येवमन्वयव्याप्तिः तथा 'यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभावः यथा जलह्रदः' इत्येवं व्यतिरेकव्याप्तिः प्राप्यते। अत एव तादृशोभयप्रकारव्याप्तिविशिष्टः हेतुः एष धूमः। एवंप्रकारेण हेतुना धूमेन साध्यस्य वह्नेः अनुमानत्वात् एतदनुमानं हि अन्वयव्यतिरेकि अनुमानमित्युच्यते।

किन्तु उद्द्योतकरेण तथा वाचस्पतिमिश्रेण तु भणितं यत् उक्तस्थले सामान्यतो दृष्टानुमानेन आत्मा सिद्धो न भवति। यतो हि आत्मा तदनुमितेः विषयः एव न भवति। किन्तु यो यो गुणपदार्थः, स स परतन्त्रः अर्थात् पराश्रितः इत्येवं सामान्यतः गुणपदार्थमात्रे पराश्रितत्वस्य व्याप्तिनिश्चयत्वात् सामान्यतो दृष्टानुमानेन इच्छादिगुणविशेषे पराश्रितत्वमेव सिद्धं भवति। ततश्च तदिच्छादिगुणाः कस्यापि पृथिव्यादिद्रव्यस्याश्रिताः न भवन्ति इति सिद्धत्वे सति शेषवदनुमानेन तत्र इच्छादिगुणेषु आत्माश्रितत्वस्य सिद्धं भवति। अतस्ततश्च शेषवदनुमानेनैव आत्मा सिद्धो भवति। अर्थात् आदौ इच्छादिगुणानां परतन्त्रत्वस्य पराश्रितत्वस्य वा साधकानुमानं हि सामान्यतो दृष्टम्, ततश्च तदिच्छादिगुणानाम् आत्माश्रितत्वसाधकानुमानं हि शेषवदनुमानमिति उररीकार्यम्।

किन्तु भाष्यकारनये तु प्रसक्तपदार्थमध्ये पूर्वमन्यप्रमाणेनापरपदार्थस्य बाधनिश्चये अभावनिश्चये वा यद् अवशिष्टं तिष्ठति अर्थात् यस्य खण्डनं न सम्भवति, तच्छेषपदार्थस्य साधकानुमानं कुत्रचित्स्थले अन्वयव्यतिरेकि-अनुमानत्वेऽपि तत् शेषवदनुमानम् इति नाम्ना कथितम्। अतो भाष्यकारेण आदौ शब्दस्य गुणत्वसाधकानुमानं शेषवदनुमानस्य उदाहरणे कथितम्। किन्तु तेन

इच्छादिगुणानाम् आधारस्य आत्मनः साधकानुमानं शेषवदनुमानं न कथितम्। कारणम् – भाष्यकारनये तदनुमाने पूर्वं प्रसक्तपदार्थस्य प्रतिषेधः न सिध्यते अर्थात् तन्न हि इतरपदार्थस्य बाधनिश्चयपूर्वकम्। किन्तु आदौ सामान्यतः व्याप्तिनिश्चयत्वात् एव इच्छादिगुणानां कश्चिदाधारः सिध्यते चेत् भाष्यनये तदनुमानेनैव आत्मा सिद्धो भवति। कारणम् इच्छादिगुणानाम् आधारः तद्द्रव्यं यन्न हि देहादिद्रव्यम् इति तु परं सिद्धं भवेत्। परन्तु महर्षिणा वात्स्यायनेन तृतीयाध्यायस्यादौ आत्मपरीक्षायाम् आत्मा देहादिद्रव्यभिन्नपदार्थः इति अनुमानप्रमाणेन प्रतिपादितम्। किन्तु आत्मा पूर्वं सिद्धो न भवति चेत् तस्मिन् तदनुमानप्रमाणं भवितुं नार्हति इति बोद्धव्यम्। ततश्च तृतीयाध्यायस्य द्वितीयाह्निके महर्षिणा वात्स्यायनेन अनुमानप्रमाणेन ज्ञानं भूतेन्द्रियमनसां गुणः न इति प्रतिपाद्य परिशेषानुमानेन प्रमाणितं यत् ज्ञानं हि आत्मनः एव गुणः। अत एव भाष्यकारेण तत्र भणितं - "भूतेन्द्रियमनसां प्रतिषेधे द्रव्यान्तरं स प्रसज्यते, शिष्यते चात्मा, तस्य गुणो ज्ञानमिति ज्ञायते।"[२१५] इति। किन्त आत्मा पूर्वं न सिध्यते चेद् एतद् वक्तुं न शक्यते। अतः पूर्वोक्तेन सामान्यतो दृष्टानुमानेन एव आदौ आत्मा सिद्धो भवति इति महर्षिवात्स्यायनस्य सम्मतमिति बोध्यते। तेन च यद् वाचस्पतिमिश्रेण व्यतिरेकि-अनुमानं शेषवदनुमानमित्युक्त्वा तदनुमानमेव आत्मसाधकानुमानम् उक्तं तन्न भाष्यकारसम्मतमिति विज्ञेयम्।

किञ्चात्र ज्ञेयं यत् आचार्यशङ्करमिश्रेण वैशेषिकमते पूर्वोक्तं त्रिविधमनुमानमिति उक्त्वाऽपि कणादसूत्रेण तु पूर्वोक्तरूपं शेषवदनुमानं नावगम्यते। वस्तुतो वैशेषिकसम्प्रदायमते अनुमानं न त्रिविधम् अपि तु द्विविधम्

[२१५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ- न्या.सू.-३/२/३९

इति। अत एव प्राचीनवैशेषिकाचार्यप्रशस्तपादेन अनुमानमिदं व्याख्यायता निगदितं - 'तत्तु द्विविधम्, दृष्टं सामान्यतो दृष्टञ्च।' इति। महर्षिगौतमोक्तं पूर्ववदनुमानमेव तेन दृष्टम् इति नाम्नाभिहितम्। तर्कसंग्रहकारेणान्नंभट्टमतेऽपि अनुमानं द्विविधं – स्वार्थं परार्थञ्चेति। तदुक्तं तेन तर्कसंग्रहग्रन्थे - "अनुमानं द्विविधम् – स्वार्थं परार्थञ्च।"[२१६] इति। भासर्वज्ञेनापि न्यायसारग्रन्थे दृष्टं सामान्यतो दृष्टञ्च इति अनुमानं द्विविधमुक्तम्। तेन अतीन्द्रियपदार्थानाम् अनुमापकलिङ्गत्वेन सामान्यतो दृष्टानुमानं निर्देशितं तथा इन्द्रियस्यानुमापकलिङ्गमुदाहरणत्वेन प्रदर्शितम्। मानमेयदयग्रन्थे नारायणभट्टेनापि पूर्वोक्तनामद्वयेन अनुमानं द्विविधं प्रोक्तम्। तथाहि तन्नये पूर्वदृष्टः परदृष्टश्च तद्धेतुपदार्थाद् अभिन्नश्चेत् तथा अनुमेयपदार्थोऽपि पूर्वदृष्टपदार्थात् अभिन्नो भवति चेत् तत्स्थलीयानुमानं हि दृष्टमिति। तदुक्तं तेन मानमेयदयग्रन्थे - 'कृत्तिकोदयमालक्ष्य रोहिण्यनुमितिर्यथा।' इति। तथा च, यत्र पूर्वदृष्टपदार्थस्य सजातीयभिन्नपदार्थस्य दर्शनं कृत्वा पूर्वदृष्टपदार्थस्य सजातीयभिन्नपदार्थस्यानुमितिर्जायते चेत् तदनुमानं हि सामान्यतो दृष्टम् इति। यथा वह्न्यानुमादिकम्। तदुक्तं तेन मानमेयदयग्रन्थे - 'तद्धि सामान्यतो दृष्टं यथा वह्न्यानुमादिकम्।' इति। एतन्मते अतीन्द्रियपदार्थस्यानुमितिर्न भवति। 'अर्थापत्तिः' इति पृथक् अनुमानेनैव अनेकाः अतीन्द्रियपदार्थाः सिद्धाः भवन्ति। किन्तु नैके सम्प्रदायाः एतन्न स्वीकुर्वन्ति। सांख्यकारिकायाम् ईश्वरकृष्णेन तु स्पष्टं निगदितं- "सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्।"[२१७] इति।

[२१६] तर्क.(सम्पा.-गोविन्दाचार्यः),पृ-१८२

[२१७] सां.का.-६

मीमांसकाः वैदान्तिकाश्च व्यतिरेकव्याप्तिं न स्वीकुर्वन्ति। ते तु अर्थापत्तिनामकं पृथक् अनुमानं स्वीकुर्वन्ति। तेषां नये सर्वत्रैव अन्वयदृष्टान्तेन अन्वयव्याप्तिज्ञानजन्यानुमितिर्जायते। अतः सकलानुमानमेव अन्वयि। व्यतिरेकि तथा अन्वयव्यतिरेकि इति एवम्प्रकारानुमानं नास्ति इति तेषामभिमतम्।

सामान्यतो दृष्टानुमानस्य स्वीकारविषये तु *न्यायसूत्रवृत्तौ* तादृशव्याख्या नोपलभ्यते इति कृत्वात्रापि न चर्चितम्।

किञ्च, सूत्रे त्रिविधपदस्य किं तात्पर्यम् आवहति इति विषयेऽपि वृत्तिकारेण किमपि न चर्चितं न वा व्याख्यापितं परं भाष्यकारेण वात्स्यायनेन तु विषयेऽस्मिन् व्याख्या प्रदत्ता। तथाहि सूत्रे विभागवचनात् अर्थात् अनुमानप्रमाणस्य प्रकारत्रयबोधकात् 'पूर्ववत् शेषवत् सामान्यतो दृष्टञ्च' इति वाक्यादेव अनुमानप्रमाणस्य त्रैविध्यत्वे ज्ञाते सूत्रकारेण कथं त्रिविधमिति पदमुपात्तम् ? किञ्च स्वल्पाक्षरत्वं हि सूत्रस्य लक्षणमित्यतोऽपि अतिरिक्तं त्रिविधपदं कथमुपात्तं सूत्रकारेण सूत्रेऽस्मिन् ? अत्रोच्यते भाष्यकारेण यत् सूत्रस्य अत्यधिकवाक्यसंक्षेपेऽनादरत्वात् तथा च अनुमानमिति विषयमहत्त्वाच्चापि त्रिविधमति पदमुपात्तम्। किञ्च स्वल्पाक्षरत्वे सति असन्दिग्धत्वमपि सूत्रलक्षणत्वे पूर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति त्रिविधमानुमानं हि अनुमानस्यैव प्रकारत्रयमिति विषये यथा शिष्यसंशयो न जायते तदर्थमपि सूत्रे त्रिविधपदमुपात्तं सूत्रकारेण इति ध्येयम्। तदुक्तं भाष्यकारेण - ''विभागवचनादेव त्रिविधमति सिद्धे त्रिविधवचनं महतो महाविषयस्य न्यायस्य लघीयसा

सूत्रेणोपदेशात् परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽनादरः।"[२१८] इति।

किञ्चात्र विज्ञेयं यत् बङ्गभाषायाम् 'अनुमान' इति शब्दः प्रायशः सम्भावनार्थे प्रयोगो भवति। किन्तु 'सम्भावना' इति ज्ञानं तु संशयविषयः। किन्तु अनुमानात् तु निश्चयार्थकयथार्थज्ञानं जायते। यदि कस्मिंश्चित् विषये सम्भावनात्मकज्ञानं भ्रमात्मकज्ञानं वा जायते चेत् तन्न हि अनुमानप्रमाणमिति ध्येयम्।

## ❖ प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्[२१९]

महर्षिगौतमः 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्'[२२०] इति सूत्रेण उद्देशक्रमानुसारं तृतीयं प्रमाणम् उपमानं व्याख्यातम्। केवलं 'प्रसिद्धसाधर्म्यमुपमानम्' इत्युक्ते यत्प्रकृतमुपमान न, तस्यापि ग्रहणं स्यात्। अत एव सूत्रकारेण 'साध्यसाधनम्' इत्युक्तम्। अपि च, केवलं 'साध्यसाधनमुपमानम्' इत्युक्ते तु प्रत्यक्षादेः साधनं तथा सुखादेः साधनमपि उपमानलक्षणाक्रान्तं स्यात् इति अतिव्याप्तिः। अत एव सूत्रकारेण महर्षिगौतमेन पूर्वं 'प्रसिद्धसाधर्म्यात्' इति पदमुपात्तम्।

प्रस्तुतसूत्रस्यास्य व्याख्यायां न्यायभाष्यन्यायसूत्रवृत्त्योः कुत्रापि वैलक्षण्यं कुत्रचित् च अधिकव्याख्यानं परिलक्ष्यते। तथाहि 'प्रसिद्धसाधर्म्यात्' इति

---

[२१८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१५७

[२१९] न्या.सू-१/१/६

[२२०] तत्रैव

पदस्य व्याख्यानं तु उभयत्र भिन्नतया प्रतिभाति। भाष्यकारनये अत्र तृतीयातत्पुरुषसमासः इष्टो भवति। तथाहि 'प्रसिद्धसाधर्म्यात्' इति पदस्य व्याख्यानावसरे 'प्रज्ञातेन सामान्यात्' इति भाष्यवचनात् एव ज्ञायते यत् भाष्यकारस्य तृतीयातत्पुरुषसमासे स्वरसः।

वार्त्तिककारस्तु द्विप्रकारकबहुव्रीहिसमासं प्रदर्शितवान् । तदुक्तं तेन - "प्रसिद्धसाधर्म्यादिति, प्रसिद्धं साधर्म्यं यस्य, प्रसिद्धेन वा साधर्म्यं यस्य, सोऽयं प्रसिद्धसाधर्म्यो गवयः, तस्मात्...।"[२२१] इति । तथाहि यत्पदार्थः पूर्वं प्रकृष्टरूपेण ज्ञातः, तत्पदार्थेन सह सामान्यं वा समानत्वं वा सादृश्यं वा प्रसिद्धसाधर्म्यम्। साधर्म्यं यदि प्रसिद्धं न भवति चेत् तदा साध्यं सिद्ध्यनुकूलं भवति। अत एवोक्तं 'प्रसिद्धं साधर्म्यं यस्य ' इति।

सिध्-धातुरत्र ज्ञानवाची। प्रशब्दश्च प्रकर्षवाची यथार्थवाची वा। क्तप्रत्ययस्यार्थस्तु विषयत्वम्। तेन च, प्रसिद्धपदस्यार्थः स्यात् यथार्थज्ञान-विषयीभूतः इति। एवञ्च, उपमानभूतपदार्थः यदि यथार्थज्ञानगोचरो न भवति चेत् तदा तत्साधर्म्यज्ञानात् साध्यसिद्धिर्न भवति। अत एव उद्योतकरेण द्वितीयं विग्रहवाक्यं प्रदर्शितं- " प्रसिद्धेन साधर्म्यं यस्य " इति।

किन्तु वृत्तिकारेण विश्वनाथेन 'प्रसिद्धसाधर्म्यात्' इत्यत्र षष्ठीसमासोऽङ्गीकृतः। अत एव तेनोक्तं - "प्रसिद्धस्य पूर्वप्रमितस्य गवादेः

[२२१]न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१६८

साधर्म्यात्सादृश्यात्, तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिः उपमानम् उपमितिः।"[२२२] इति।

किन्तु आचार्यजयन्तभट्टेनात्र 'प्रसिद्धसाधर्म्यात्' इति पदे कर्मधारयसमासः, तृतीयासमासः बहुव्रीहिसमासश्च इति त्रिविधः समासः स्वीकृतः। तथा च, षष्ठसमासस्वीकारे तु प्रायः कस्यापि स्वरसो न दृश्यते वृत्तिकारं विहाय। तेन चात्र एका शङ्का उदेति यत् कथं वृत्तिकारेणात्र षष्ठीसमासः स्वीकृतः? शङ्कायाः अस्याः निरसने वक्तुं शक्यते शास्त्रं हि गूढतत्त्वप्रकाशकम्। तत्समासोऽपि तत्पदे गूहितोऽस्ति । तद्धि आचार्यविश्वनाथेन प्रकाशितं स्वशास्त्रे। अन्ये केऽपि अस्य व्याख्यानं न कृतवन्तः इति कृत्वा एतद् व्याख्यानम् असङ्गतमित्यपि वक्तु नालम्। यद्वा आचार्यविश्वनाथेन समासस्य अर्थमात्रं प्रकाशितं विग्रहवाक्यं न प्रदर्शितमित्यपि वक्तुमलम् ।

किञ्च, अत्र ज्ञेयं यत् प्रसिद्धपदार्थस्य सादृश्यत्वे एव ततः साध्यसिद्धिर्न भवति। सादृश्यं प्रसिद्धपदार्थनिष्ठम्। साध्यसिद्धिस्तु ज्ञातृनिष्ठो भवति। अत एव यावत् प्रसिद्धसाधर्म्यस्य ज्ञातुः ज्ञानं न भवति तावत् तस्य ज्ञातुः साध्यस्य सिद्धिः निश्चयो वा न भवति। अतः आचार्यविश्वनाथेन आदौ साधर्म्यपदस्य सादृश्यमित्यर्थः प्रकाशितः, ततः तत्पदस्य यथार्थार्थं प्रकाशयता उक्तं - 'तज्ज्ञानात्' इति।

अत्रैको विषयो लक्षणीयो यत् 'प्रसिद्धसाधर्म्यात्' इति पदे कीदृशं सादृश्यम् अभिप्रेतम् ? यद्युच्यते आत्यन्तिकसाधर्म्यमत्राभिप्रेतं तदा गो-इत्यस्य अत्यन्तसादृश्यगोभिन्नपिण्डे असम्भवात् गवात्यन्तसादृश्यविशिष्टे गवये

---

[२२२]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृष्ठा-८५

गोत्वप्रसक्तः स्यात् परं गवयपदवाच्यत्वं कदापि प्रसक्तं न स्यात्। यदि प्रायिकसादृश्यम् अभिप्रेतं स्यात् तदा 'यथा वृषस्तथा महिषः' एतदपि उपमानप्रमाणान्तर्भूतं स्यात्। किन्तु तत्तु अनुभवविरुद्धः एव। यदि च, एकदेशिकसाधर्म्यं विवक्षितं भवति चेत् तदा 'यथा हस्ती तथा मशकः' इत्यादि अपि उपमानं स्यात्। यतो हि हस्तिमशकयोः प्राणित्वादि-एकदेशिकसाधर्म्यं विद्यते। अत एव *तात्पर्यटीका*कारेण निगदितं यत् अत्र साधर्म्यस्य आत्यन्तिकत्वं प्रायिकत्वम् एकदेशिकत्वं वा नित्यतया न विवक्षितम्। परं प्रकरणादिबलात् कदापि साधर्म्यस्य आत्यन्तिकत्वं कदापि प्रायिकत्वं कदापि वा साधर्म्यस्य एकदेशिकत्वं विवक्षितं भवति।

प्रस्तुतसूत्रमिदं उपमितेः लक्षणसूत्रम् उत उपमानप्रमाणस्य इति विषये तु भाष्यकृता सम्यक् दिग्दर्शनं न अकारि परं वृत्तिकारेण आचार्यविश्वनाथेन विषयेऽस्मिन् सम्यक् दिग्दर्शनं कृतम्। तथाहि तत्र 'साध्यसाधनम्' इत्यत्र 'साधनम्' इति पदं भाववाच्यनिष्पन्नम् इति कृत्वा तस्य 'सिद्धिः' इत्यर्थः प्रदर्शितः। तथा सति तु यथाश्रुतलक्षणमिदम् उपमितेः लक्षणसूत्रं स्यात्। किन्तु "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[२२३] इति सूत्रेण यतो हि प्रमाणानामेव उद्देशः कृतः, अतः उत्तरोत्तरसूत्रैः प्रमाणस्यैव लक्षणं कृतम् इति वक्तुं उचितं स्यात्। अत एव लक्षणमिदम् उपमानप्रमाणस्यैव लक्षणमिति प्रतिपादयितुं 'यतः' इति पदस्य अध्याहारः कर्तव्यः। तेन च, 'यतः' प्रसिद्धस्य पूर्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिः

[२२३]न्या.सू-१/१/३

भवति, 'तदुपमानं प्रमाणम्' इति सूत्रार्थः स्यात्। एवमभिप्रायेणैव आचार्यविश्वनाथेन निगदितं - "यत इत्यध्याहारेण च करणलक्षणम्।"[२२४] इति।

किञ्च, वस्तुतः अनेन पथा गौरवदोषः स्यात्। अत एव न्यायसूत्रवृत्तिकारेण आचार्यविश्वनाथेन लघूपायोऽपि प्रदर्शितः। तत्परमेव तेन लघूपायं प्रदर्शयता उक्तम् - "अथवा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम्।"[२२५] इति। अत्रायमाशयः - 'साधनम्' इति पदं करणवाच्ये ल्युट्प्रत्ययनिष्पन्नम् इति स्वीकारे साक्षाद् अत्र करणलक्षणं कृतमिति स्पष्टत एव अवगम्यते। तेन च, 'साध्यतेऽनेन' इति विग्रहे करणवाच्ये ल्युट्प्रत्ययनिष्पन्नस्य साधनपदस्यार्थो हि सिद्धिरिति न भवति परं सिद्धेः करणमिति भवति। अत एव उपायेऽस्मिन् 'यतः' इति पदस्य अध्याहारोऽपि न कर्तव्यो भवतीति लाघवः।

अत्रैको विषयो लक्षणीयो यत् भाष्यकारेण साधर्म्योपमितेः उल्लेखः कृतः किन्तु वैधर्मोपमितेः स्पष्टतया किमपि वर्णनं न कृतम्। परं न्यायसूत्रवृत्तिकारेण आचार्यविश्वनाथेन साधर्म्योपमितिवत् वैधर्म्योपमितिरपि भवतीति तत्समर्थयता *तात्पर्यटीका*कारस्य आचार्यवाचस्पतिमिश्रस्य मतम् उद्धृत्य उक्तम् - "अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः।"[२२६] इति।

तथाहि प्रसिद्धपदार्थस्य वैधर्म्यज्ञानजन्यो यो उपमितिर्भवति तद्धि वैधर्म्योपमितिरिति। यथा कश्चित् उत्तरदेशनिवासी दाक्षिणात्यनिवासिसमीपे उष्ट्रं निन्दयन् उक्तवान् करभपशुः कुश्री, तीक्ष्णकण्टकभक्षणकारी, तस्या ग्रीवा अतिदीर्घा इत्यादि। ततश्च स दाक्षिणात्यनिवासी उत्तरदेशम् आगत्य उष्ट्रं पश्यन्

[२२४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१६९
[२२५] तदेव,पृ-१६८-१७०
[२२६] तदेव,पृ-१७०

अतिदीर्घग्रीवकत्वादिवैधर्म्यस्य दर्शनं कृतवान्। ततश्च तस्य उत्तरदेशनिवासिनः पूर्वश्रुतवाक्यार्थस्मरणं जातम्। ततश्च अयं पशुविशिष्टः करभपदवाच्यः इति संज्ञासंज्ञिसम्बन्धज्ञानं करभपदशक्तिज्ञानं वा भवति। एतदेव वैधर्म्योपमितिरिति विज्ञेयम्।

अत्रैकः प्रश्नः समुदेति यत् प्रस्तुतसूत्रे केवलं साधर्म्यपदोल्लेखात् साधर्म्योपमितिः स्वीकार्यः परं वैधर्म्योपमितिरिति स्वीकार्यो वा ? विषयेऽस्मिन् आचार्यविश्वनाथेन किमपि नोक्तं तथापि अत्र तात्पर्यटीकाकारस्य मतं ग्रहणीयम्। तन्मते सूत्रस्थसाधर्म्यपदं हि धर्ममात्रस्योपलक्षणम्। अत एव महर्षिगौतमनयेऽपि साधर्म्योपमितिवत् वैधर्म्योपमितिरपि स्वीकार्यः। वस्तुतोऽत्र पूर्वाचार्याणां 'वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः' इति मतोल्लेखात् तथा च साक्षात् 'टीकाकृतः' इति उल्लेखादेव ज्ञायते वैधर्म्योपमितिः यथा टीकाकाराणां नये स्वीकार्यः तथैव विश्वनाथनये।

किञ्चात्र विज्ञेयं यद्वा 'एवमन्येऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति।'[२२७] इति भाष्यवचनादपि ज्ञायते वैधर्म्योपमितिविषये भाष्यकारस्यापि स्वरसोऽस्तीति।

किञ्चात्रावधेयं यत् उपमानस्य फलविषये अन्येषां टीकाकाराणां नये संज्ञासंज्ञिसम्बन्धज्ञानमेव प्रदर्शितं परं विश्वनाथेन संज्ञासंज्ञिव्यतिरिक्तमपि उपमानफलविषये उल्लिखितं 'मद्गपर्णीसदृशी औषधी विषं हन्ति' इत्यादिद्वारा।

---

[२२७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृष्ठा-१७२

## ❖ आप्तोपदेशः शब्दः[२२८]

दार्शनिकेषु नैयायिक-वैशेषिकाः प्रमाणवादिन इति विश्रुताः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। तेषु शब्दोऽन्तिमः प्रमाणम्। महर्षिगौतमेन शब्दलक्षणे उक्तम् - "आप्तोपदेशः शब्दः"[२२९] इति। आप्तोच्चारितत्वे सति शब्दत्वम् इति तस्यार्थः। शब्दः इति लक्ष्यपदम्। आप्तोपदेशः इति लक्षणम्। केवलं शब्द इत्युक्ते अनाप्तोच्चारिते शब्दे लक्षणस्यातिव्याप्तिः स्याद् इत्यतः आप्तेति वक्तव्यम्। न हि भ्रान्तविप्रलम्भकयोर्वाक्यं प्रमाणतां प्रतिपद्यते तयोरनाप्तत्वात्। स्वयं प्रमादग्रस्तो भ्रान्तः। स्वयमभ्रान्तोऽपि परवञ्चको विप्रलम्भकः। न चाप्तोच्चारितमिति मात्रं लक्षणम्। तथा सति ज-ब-ग-ड-द-शित्यादौ माहेश्वरसूत्रे लक्षणस्यातिव्याप्तिः स्यात्। अतः शब्दः इत्युक्तम्। आप्तस्तु यथार्थवक्ता। यथार्थवक्ता च यथाभूताबाधितार्थोपदेष्टा।

प्रस्तुतसूत्रेऽस्मिन् एका शङ्का जायते यत् 'शब्दः' इति पदं प्रमाविशेषः उत प्रमाणविशेषः ? यतो हि "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[२३०] इति सूत्रस्थप्रमाणपदं भाववाच्ये ल्युट्प्रत्ययान्ते स्वीक्रियते चेत् तस्यार्थो भवति प्रमा। तेन च तत्सूत्रार्थो भवति प्रत्यक्षम्, अनुमानम्, उपमानं शब्दश्च इति चतुर्विधं प्रमाज्ञानं विद्यते इति। विषयस्यास्य परिष्करणं भाष्यकारेण न कृतं परम् आचार्यविश्वनाथेन *न्यायसूत्रवृत्तौ* स्पष्टतः उल्लेखद्वारा अस्य परिष्करणं कृतम्। तदुक्तं तेन - "शब्द इति लक्ष्यकथनम्, तदर्थः प्रमाणशब्द इति।"[२३१] इति।

---

[२२८] न्या.सू.-१/१/७

[२२९] तत्रैव

[२३०] न्या.सू.-१/१/३

[२३१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७४

'आप्तोपदेशः' इत्यत्र षष्ठीसमासः एव स्वीकृतः उभयमतेन। किन्तु आप्तशब्दस्य व्याख्यानवेलायां किञ्चित् भिन्नता दृश्यते। तथाहि भाष्यकारेण आचार्यवात्स्यायनेन आदौ आप्तस्य लक्षणं विहितं ततश्च आप्तशब्दस्य व्युत्पत्तिरपि प्रदर्शिता। भाष्यकारनये आप्तः खलु साक्षात्कृतधर्मा भवति तथा च चिख्यापरिषया यथादृष्टस्यार्थस्य प्रयुक्तः उपदेष्टा भवति। तदुक्तं भाष्यकारेण- "आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापरिषया प्रयुक्त उपदेष्टा।"[२३२] इति। तथाहि प्राचीनकाले पदार्थमात्रमवबोधयितुं धर्मः इति शब्दः प्रयुक्तः। यः कस्यापि पदार्थस्य साक्षात्कारं कृतवान् स साक्षात्कृतधर्मा भवति। *तात्पर्यटीका*कारेण आचार्यवाचस्पतिमिश्रेनापि अस्य व्याख्यानं कृतमेवं - "सुदृढेन प्रमाणेनावधारिताः साक्षात्कृता धर्माः पदार्था हिताहितप्राप्तिपरिहारार्था येन स तथोक्तः।"[२३३] इति। अस्यायमाशयः- येन केनापि सुदृढप्रमाणेन पदार्थनिश्चयो भवति चेत्तत्साक्षात्कारतुल्यो भवति तथा च तस्मिन्नेव तात्पर्ये भाष्यकारेण 'साक्षात्कृत' इति शब्दस्य प्रयोगः कृतः। किञ्च, योऽनुमानेन शब्दप्रमाणेन वा किमपि तत्त्वं निर्णीय तत्तत्त्वप्रतिपादकं वाक्यं वदति चेत् सोऽपि आप्तो भवति।

आचार्यविश्वनाथमते आप्तः खलु प्रकृतवाक्यार्थयथार्थज्ञानवान् भवति। तस्य उपदेशश्च शब्दप्रमाणं भवति। तदुक्तं *न्यायसूत्रवृत्ति*कारेण आचार्यविश्वनाथेन- "आप्तः- प्रकृतवाक्यार्थयथार्थज्ञानवान्, तस्योपदेश इत्यर्थः। प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्दः इति फलितार्थः।"[२३४] इति। अत्र ज्ञानपदस्य तात्पर्यं तावत् अप्रमाजनकशुकादिपक्षिवाक्ये अतिव्याप्तिनिवारणाय। यतो हि

---

[२३२] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-१८९

[२३३] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च) , पृ-१७३

[२३४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७४

शुकादिपक्षीनां शब्दप्रयोगेऽपि तेषां प्रकृतवाक्यार्थविषये ज्ञानमेव नास्ति। अपि च, कस्यापि उपदेष्टुः प्रकृतवाक्यार्थविषये यथायथज्ञानाभावे तदुपदिष्टवाक्ये शब्दप्रमाणलक्षणस्य अतिव्याप्तिनिवारणाय लक्षणे 'यथार्थ' इति पदमुपात्तम्। अर्थात् आप्तव्यक्तिः अवश्यमेव प्रकृतवाक्यार्थविषये यथार्थज्ञानवान् भवेत्। किन्तु अत्रैकः प्रश्नः समुदितः स्याद् यत् – प्रकृतवाक्यार्थविषये शुकादिपक्षिणः ज्ञानाभावेऽपि कथञ्चित् तदुच्चारितवाक्याद् अपि यथार्थशाब्दबोधो जायते। तदा तत्स्थले शब्दप्रमाणलक्षणस्य अव्याप्तिर्न भवति किम् ? एतदुत्तरे वक्तुं शक्यते यत् तत्स्थले ईश्वरीयतात्पर्यज्ञानमेव कारणम्। अत एव *तत्त्वचिन्तामणि*ग्रन्थस्य रहस्यटीकायाम् आचार्यमथुरानाथतर्कवागीशेन निगदितम्- 'एवं शुकाद्युच्चारिते 'पयसा सिञ्चती'त्यादिवाक्ये अव्याप्तिः शुकादेः प्रकृतवाक्यार्थानभिज्ञतया इदं वाक्यं सुखसाधनमिति सुखसाधनताज्ञानादेव तेन वाक्यप्रयोगादिति चेन्न तेषामपि ईश्वरीयतादृशज्ञानजन्यतया लक्षणसमन्वयाद्' इति।

किञ्च, यदि कोऽपि प्रकृतवाक्यार्थविषये यथार्थज्ञानवान् तथापि आलस्यात् शब्दप्रयोगं न करोति चेत् न हि स आप्तः। अत एव लक्षणे 'प्रयुक्तः' इति पदं प्रदत्तम्। भाष्यकारकृतशब्दलक्षणव्याख्यानुसारं यदि कोऽपि साक्षात्कृतधर्मा (वृत्त्यनुसारं प्रकृतवाक्यार्थविषये यथार्थज्ञानवान्) भवति तथापि तद्विषये उपदेशं न प्रददाति उपदेष्टुं न इच्छति वा, अथवा तद्विपरीतमेव उपदिशति तर्हि सोऽपि न आप्तः। अत एव भाष्यकारेण उक्तं- "...यथादृष्टस्यार्थस्य चिख्यापयिषया...।"[२३५] इति। अर्थात् यत्पदार्थः यद्रूपेण अवधारितः तद्रूपेणैव तस्य ख्यापनेच्छा स्यात्। अपि च, ख्यापनेच्छासत्त्वेऽपि आलस्यादिवशात् तदुपदेशदाने प्रयत्नः नास्ति चेत्

[२३५] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-१८९

सोऽपि अनाप्तः। अत एव भाष्यकारेण लक्षणे 'प्रयुक्त' इति पदं प्रदत्तम्। आचार्यवाचस्पतिमिश्रेणापि उक्तपदस्य व्याख्यानं कृतम् 'उत्पादितप्रयत्नः' इति। किन्तु तादृशव्यक्तित्वेऽपि यदि इन्द्रियादिपटुताभावे उपदेशदाने असमर्थः स्यात् तर्हि न स आप्तः। अतो भाष्यकारेण 'उपदेष्टा' इति पदं लक्षणे सन्निवेशितम्। एवम् आप्तलक्षणसम्पन्नव्यक्तेः उपदेशः शब्दप्रमाणं भवतीति विज्ञेयम्।

अपि च, मौनिश्लोकादौ शाब्दबोधः कथं स्यात् तथा शब्दप्रमाणलक्षणस्य मौनिश्लोकादौ लक्षणसंगतिः कथं स्यादिति विषये भाष्यकारेण वात्स्यायनेन किमपि न पर्यालोचितं किन्तु विषयेऽस्मिन् *न्यायसूत्रवृत्ति*कारेण आचार्यविश्वनाथेन *न्यायसूत्रवृत्तौ* पर्यालोचनं कृतम्। तथाहि शाब्दबोधे यदि ज्ञायमानः शब्दः करणं भवति चेत् तदा मौनिश्लोकादिजन्यशाब्दबोधस्य करणे अव्याप्त्यापत्तिः स्यात्। यथा – मौनी व्यक्तिः शब्दं न उच्चार्य स्वाभिप्रायं वाक्येन लिखित्वा हस्तादिसञ्चालनद्वारा वा प्रकाशयति चेत् तदा शाब्दबोधो भवति। किन्तु तत्स्थले शाब्दबोधस्य पूर्वे शब्द एव नोच्चारितः। अस्य समाधानं तु – एतत्स्थले शब्दः स्वरूपसद्रूपेण अर्थप्रतीतेः कारणं न भवति किन्तु ज्ञातसद्रूपेण कारणं भवति। शाब्दबोधे हि शब्दो न अपेक्षितः परं शब्दज्ञानम् अपेक्षितं भवति। नव्यनैयायिकमते ज्ञायमानपदं न कारणं किन्तु पदज्ञानमेव करणं भवति। अत एव आचार्यविश्वनाथेन शब्दलक्षणं भिन्नरूपेण व्याख्याय निगदितम् "अथवा आप्तः – यथार्थः उपदेशः शाब्दबोधो यस्मात्।"[२३६] इति। अर्थात् यस्माद् यथार्थशाब्दबोधो जायते तच्छब्दप्रमाणम् इति विज्ञेयम्। किञ्चात्रावधेयं यत् यस्य कस्यापि

[२३६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७५

शाब्दबोधस्य कारणं शब्दप्रमाणं न भवति, किन्तु यथार्थशाब्दबोधस्य करणमेव शब्दप्रमाणम्। तेन च, अत्र ज्ञायमानशब्दाद् अपि शाब्दबोधो भवति। तत्स्थले तु शब्दज्ञानम् अवश्यमेव तिष्ठति। अपि च, यत्र (मौनिश्लोकादौ) ज्ञायमानशब्दः न तिष्ठति तत्रापि शब्दज्ञानात् एव शाब्दबोधो जायते। तेन लाघवात् शब्दज्ञानमेव शाब्दबोधस्य करणमिति कथने उचितं स्यात्। अतः अनया व्याख्यया शब्दज्ञानमेव करणं शब्दप्रमाणं वा इति पर्यवसति। *भाषापरिच्छेदे*ऽपि विश्वनाथेन उक्तं –

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।"[२३७] इति।

एवंविधव्याख्यानतः प्रतीयते यद् भाष्यकारेण आचार्यवात्स्यायनेन शब्दलक्षणमिदं प्राचीनमतानुसारं व्याख्यापितं परं *न्यायसूत्रवृत्ति*कारेण आचार्यविश्वनाथेन शब्दलक्षणमिदं प्राचीनमततः व्याख्याय नवीनमतेन तस्य परिष्करणं कृतम्।

किञ्च, भाष्यकारेण महर्षिवात्स्यायनेन शब्दलक्षणमिदम् एतस्मादधिकं न व्याख्यापितं परम् अस्य लक्षणस्य व्यापकत्वं प्रदर्शयता उक्तम्- "ऋष्यार्य्यम्लेच्छानां समानं लक्षणम्। तथा च सर्वेषां व्यवहाराः प्रवर्तन्ते इति।"[२३८] इति। अस्यायमाशयः – ऋषेः आर्यगणस्य म्लेच्छगणस्य च प्रागुक्ताप्तलक्षणमेव प्रयोज्यम्। अलौकिकविषये यः ऋषिः सोऽपि आप्तः, तथा च अनेकलौकिकविषयेऽपि ऋषिभिन्नः आर्यगणस्तथा म्लेच्छगणोऽपि आप्तो भवति।

---

[२३७] भा.परि.,कारिका-७१

[२३८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७४-१७६

किञ्च, आर्याणां म्लेच्छानां च बहुदृष्टार्थवाक्यमपि शब्दप्रमाणं भवति, अन्यथा तेषां लौकिकव्यवहारोऽपि न निष्पन्नः स्यात्। उक्तञ्च *तात्पर्यटीका*कारेण वाचस्पतिमिश्रेण - "आप्तलक्षणस्य व्यापकत्वमाह - 'ऋषी'ति। दर्शनादृषिः साक्षात्कृतत्रैकाल्यवृत्तिप्रमेयमात्रः। आराद्धातः पातकेभ्य इत्यार्यो मध्यलोकः, म्लेच्छाः प्रसिद्धाः।"[२३९] इति।

किन्तु आचार्यविश्वनाथस्तु 'आप्तोपदेशः' इति शब्दलक्षणमिदं नवीनमतेन "यथार्थः शाब्दबोधो यस्मात्" एवं रूपेण व्याख्याय तस्यार्थमपि प्रकाशयन् आह - "तथा च यथार्थ-शाब्दज्ञानकरणत्वमर्थः"[२४०] इति। तथाहि यथार्थशाब्दज्ञानस्य करणं हि शब्दप्रमाणम्। यथार्थशाब्दज्ञानस्य करणत्वञ्च शब्दत्वम्। तथा चात्र लक्ष्यो हि शब्दः। लक्ष्यतावच्छेदकञ्च शब्दत्वम्। तेन च लक्षणं लक्ष्यतावच्छेदकम् उभयमेव शब्दत्वं भवति। अतस्तयोरभेदात् लक्षणात् कोऽपि शाब्दबोधो न स्यात्। अस्य समाधानं हि अत्र लक्षणं यथार्थशाब्दज्ञानकरणत्वं शाब्दप्रमाकरणत्वं वा लक्ष्यतावच्छेदकञ्च शब्दत्वम्। तदपि शाब्दप्रमाकरणत्वमेव। अत्र प्रमालक्षणयोरेकं लक्षणे निवेशनीयम् अपरञ्च लक्ष्यतावच्छेदके। तेन च, तयोः भेदः उत्पन्नः स्यात्। अत्र प्रश्नः उदेति यत् प्रमालक्षणयोः कः कुत्र निवेशनीयः ? अस्योत्तरे आचार्यविश्वनाथेन उक्तं *न्यायसूत्रवृत्तौ*- "अत्र च विशेष्यावृत्त्यप्रकारकत्व-तद्वतितत्प्रकारकत्वादिप्रमा-लक्षणानामेकं लक्षणे परञ्च लक्ष्यतावच्छेदके निवेशनीयमतो नाऽभेदः।"[२४१] इति।

---

[२३९] न्या.वा.तात्,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-१७४

[२४०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७६

[२४१] तत्रैव

अस्यायमाशयः – अत्र 'विशेष्यावृत्त्यप्रकारकत्वं' 'तद्वतितत्प्रकारकत्वञ्च' इति प्रमालक्षणद्वयम् उल्लिखितम्। प्रथमलक्षणस्याकारो भवति - 'विशेष्यावृत्त्य-प्रकारकोऽनुभवः प्रमा' इति। अर्थात् विशेष्ये यत्प्रकारवृत्तिः नास्ति, तत्प्रकारवृत्तिः यदनुभवे भासितः न भवति, तदनुभवः प्रमा इत्युच्यते। यथा 'इदं रजतम्' इति प्रमास्थले इदन्तावच्छिन्नविशेष्यपदार्थे रङ्गत्वप्रकारः नास्ति। 'इदं रजतम्' एषोऽनुभवोऽपि रङ्गत्वप्रकारविशिष्टः न परं रजतत्वप्रकारविशिष्टः। अत एव विशेष्ये इदन्तावच्छिन्नपदार्थे अवृत्तिः यद्रङ्गत्वं तदप्रकारकानुभवत्वात् 'इदं रजतम्' - एषोऽनुभवः प्रमा इति विज्ञेयम्।

द्वितीयप्रमालक्षणस्याकारस्तावत् 'तद्वतितत्प्रकारकोऽनुभवः प्रमा' इति। अर्थात् यत्पदार्थः यत्प्रकारविशिष्टः, अनुभवोऽपि यदि तत्प्रकारविशिष्टः स्यात्तर्हि तदनुभवः प्रमा इति कथ्यते। यथा – रजतत्वविशिष्टं रजतं प्रत्यक्षीकृत्य 'इदं रजतम्' इति अनुभवः उत्पद्यते, अत्र रजतत्वमेव प्रकाररूपेण भासते। अत एव अस्मिन् स्थले 'इदं रजतम्' इत्यनुभवः प्रमा इति ध्येयम्। एवं नैकानि प्रमालक्षणानि विद्यन्ते, तत्तु आदिपदेन ग्राह्यम्। किञ्च, लक्षणे प्रविष्टप्रमापदे यदा प्रथमप्रकारप्रमालक्षणं गृहीतं स्यात् तदा लक्ष्यतावच्छेदके प्रविष्टप्रमापदे द्वितीयप्रकारप्रमालक्षणं गृहीतं भवेत्। तथा च, यदि लक्षणे प्रविष्टप्रमापदे द्वितीयप्रकारप्रमालक्षणं गृहीतं स्यात् तर्हि लक्ष्यतावच्छेदके प्रविष्टप्रमापदे प्रथमप्रकारप्रमालक्षणं ग्राह्यम्। तेन च लक्षणलक्ष्यतावच्छेदकयोः अभेदः न स्यात्। अत एव तत्क्षेत्रे लक्षणात् शाब्दबोधोऽपि सुष्ठुतया स्यादिति विशेषेणानुसन्धेयम्।

## ❖ स द्विविधो दृष्टादृष्टार्थत्वात्[२४२]

महर्षिगौतमेन शब्दप्रमाणस्य लक्षणमुक्त्वा ततः प्रस्तुतसूत्रेण तच्छब्दप्रमाणं द्विविधं दृष्टार्थोऽदृष्टार्थश्चेति प्रतिपादितम्। तथाहि लौकिकाप्तजनानां दृष्टार्थशब्दः यत् प्रमाणशब्दः शब्दप्रमाणं वा इति तु सर्वैरेव स्वीकार्यम्। यतो हि तेनैव प्रमाणेन लौकिकव्यवहारोऽपि सम्पन्नो भवति। इहलोके तु सत्यवादिविज्ञजनानां वाक्यश्रवणात् तथा तदनुसारम् असंख्यव्यवहारः प्रचलति। विवादस्थलेऽपि सत्यवादिप्रकृतसाक्षिणः वाक्यश्रवणात् बहवः सत्यनिर्णयाः जायन्ते। किंतु तथापि महर्षिणा गौतमेन कथमेतत् सूत्रं कृतम् ? अर्थात् प्रस्तुतसूत्रस्यास्य प्रयोजनं किम् ? अस्मिन् विषये तु वृत्तिकारेण विश्वनाथेन *न्यायसूत्रवृत्तौ* किमपि न व्याख्यापितं परं भाष्यकारेण तदीय*न्यायभाष्ये* तत्प्रयोजनमुल्लिखितम्। तथाहि भाष्यनये नास्तिकाः जनाः केवलं दृष्टार्थ-आप्तवाक्यमेव शब्दप्रमाणत्वेन स्वीकुर्वन्ति, तान् एव लक्ष्यीकृत्य महर्षिणा गौतमेन प्रस्तुतसूत्रेण उक्तं यत् अदृष्टार्थवेदादिशास्त्ररूपम् आप्तवाक्यमपि शब्दप्रमाणत्वेन उररीकार्यमिति। ननु तच्छास्त्रवाक्यानाम् अर्थः प्रतिपाद्यविषयो वा स्वर्गादिपदार्थः अस्माभिः अदृष्टत्वात् तत्कथं तेषां प्रामाण्यं स्वीकार्यम् ? अत्रोच्यते भाष्यकारेण - "अर्थस्यानुमानात्"[२४३] इति। अस्योत्तरस्य तात्पर्यं तु वाचस्पतिमिश्रेण व्याख्यापितम्। तथाहि तेनोक्तं यत् वेदादिशास्त्रस्य प्रतिपाद्यस्वर्गादि-अलौकिकपदार्थः इहलोके अस्माभिः अदृष्टत्वेऽपि तद् अनुमानप्रमाणसिद्धम्। कारणम् , तत्सकलपदार्थस्य प्रतिपादकं वेदादिशास्त्रम् अनुमानप्रमाणसिद्धम्। अनुमानप्रमाणेनैव तच्छास्त्रस्य प्रामाण्यं निश्चीयते। ये

---

[२४२] न्या.सू.-१/१/८

[२४३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७९

नास्तिकाः जनाः स्वमतं प्रतिष्ठापयितुम् अनुमानप्रमाणं स्वीकृतवन्तः, ते तु अनुमानप्रमाणेन वेदस्य प्रामाण्यं सिद्धं भवति चेत् तदपि स्वीकरिष्यन्ति एव। तेन च, अदृष्टार्थवेदवाक्यानां प्रतिपाद्यः स्वर्गादिपदार्थोऽपि परम्परया तदनुमानप्रमाणेन सिद्धः इति अवश्यमेव तैः नास्तिकैः स्वीकरिष्यते एव।

भाष्यकारनये दृष्टार्थशब्दप्रमाणं हि यद्वाक्यार्थः प्रतिपाद्यविषयः पदार्थो वा इहलोके दृष्टो भवति, तत्। तदुक्तं भाष्यकारेण - "यस्येह दृश्यतेऽर्थः स दृष्टार्थः।"[२४४] इति। किन्तु वृत्तिकारमते दृष्टार्थशब्दप्रमाणं हि- "शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणगम्यार्थको दृष्टार्थकः।"[२४५] इति। अस्यायमाशयः- शब्दप्रमाणं तथा तन्मूलकं यद् अनुमानप्रमाणम् एतद्द्वयप्रमाणातिरिक्तप्रमाणेन अर्थात् प्रत्यक्षादिप्रमाणेन वेद्यपदार्थस्य प्रतिपादकवाक्यं हि दृष्टार्थकशब्दप्रमाणम्। यथा - 'पुत्रकामो जनः पुत्रेष्टियागं कुर्यात्' तथा 'शरीरपुष्टिकामो जनः घृतं भक्षयेत्' इत्यादिवाक्यं पुत्रं यागं तथा शरीरपुष्टिं बोधयति। एष पदार्थस्तु प्रत्यक्षादिप्रमाणसिद्धः। अत एव तत्प्रतिपादकोक्तवाक्यं हि दृष्टार्थशब्दप्रमाणम्।

भाष्यनये अदृष्टार्थशब्दप्रमाणं हि यद्वाक्यार्थः प्रतिपाद्यविषयः पदार्थो वा इहलोके दृष्टो न भवति, अर्थात् परलोके दृष्टो भवति, तत्। तदुक्तं भाष्यकारेण- "यस्याऽमुत्र प्रतीयते सोऽदृष्टार्थः।"[२४६] इति। वृत्तिकारनये अदृष्टार्थशब्दप्रमाणं हि- "शब्दतदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः।"[२४७] इति। अर्थात् शब्दप्रमाणं तथा तन्मूलकानुमानप्रमाणेन एव सिद्धं पदार्थप्रतिपादकवाक्यं हि

[२४४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७९

[२४५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७९

[२४६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७९

[२४७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७९

अदृष्टार्थशब्दप्रमाणम्। यथा - 'स्वर्गकामोऽश्वमेधेन यजेत' इति वाक्यस्य प्रतिपाद्यः अर्थः स्वर्गः केवलमात्रशब्दप्रमाणवेद्यः तथा तन्मूलकानुमानप्रमाणेन ज्ञेयः। एतत्प्रमाणव्यतिरिक्तेन प्रमाणेन तु न ज्ञायते। अत एव तादृशशब्दप्रमाणं हि अदृष्टार्थकशब्दप्रमाणम्। किञ्चात्रावधेयं यत् कदाचित् कदाचित् स्वर्गादिपदार्थः शाब्दः अनुमेयो वा भवत्यपि ऋष्यादिभिरपि प्रत्यक्षगोचरो भवति। तदापि तादृशपदार्थस्य प्रतिपादितवाक्यस्य अदृष्टार्थकत्वमेव इष्टम्। अत एव गङ्गारामझामहोदयेन अदृष्टार्थपदस्यार्थः कृतः- 'अनुमितप्रामाण्यशब्द-गोचरोऽयम्' इति। अर्थात् यच्छब्दस्य प्रामाण्यम् अनुमाननिर्भरं तच्छब्दः अदृष्टार्थशब्दः। स्वर्गादिपदार्थस्य प्रतिपादकशब्दस्य प्रामाण्यं हि अनुमेयम्, तत् लोकप्रत्यक्षवेद्यं न। अत एव तत्तत्पदार्थस्य प्रतिपादकवाक्यम् अदृष्टार्थकशब्द-प्रमाणम्।

अपि च, भाष्यकारेण निगदितं यत् दृष्टार्थकशब्दप्रमाणं तथा अदृष्टार्थकशब्दप्रमाणं हि ऋषिलौकिकवाक्यानां विभागः इति। तदुक्तं तेन- "एवमृषिलौकिकवाक्यानां विभाग इति।"[२४८] इति। तेन च, ऋषिवाक्यभिन्नं सकलवाक्यं हि लौकिकम्। किन्तु ऋषिभिरपि बहुदृष्टार्थवाक्यम् उच्यते। यद्वाक्यार्थः प्रतिपाद्यपदार्थः वा इहलोके न दृष्टः किन्तु अनुमानादिप्रमाणेन सिद्धः, तद् अदृष्टार्थवाक्यमिति व्याख्यातम्। तेन च, इहलोके अनुमानादिप्रमाणेन ज्ञातपदार्थस्य प्रतिपादकसकललौकिकवाक्यं हि उक्तार्थे अदृष्टार्थवाक्यम्। अत्र तु भाष्यकारेण भणितं यत् यद्वाक्यस्य प्रतिपाद्यार्थः परलोके प्रतीतः भवति तद् अदृष्टार्थकः। अतो बोध्यते यद् भाष्यनये स्वर्गादिपदार्थस्य प्रतिपादकवाक्यमेव

[२४८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१७९

अदृष्टार्थ-आप्तवाक्यम् अदृष्टार्थकशब्दप्रमाणं वा। वृत्तिकारस्यापि विषयेऽस्मिन् समानैवाभ्युक्तिः।

तर्कसंग्रहकारेण अन्नंभट्टेन तु शब्दप्रमाणस्य एतादृशो विभागो न कृतः, परं तेन वाक्यस्य विभागः कृतः – वैदिकलौकिकभेदेन। तन्मते वैदिकवाक्यम् ईश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकवाक्यं तु आप्तोक्तं प्रमाणमिति। तदुक्तं तेन तर्कसंग्रहे- ''वाक्यं द्विविधम् – वैदिकं लौकिकञ्च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्।''[२४९] इति।

[२४९] तर्क.(सम्पा.गोविन्दाचार्यः),पृ-२५०

# ।।पञ्चमोऽध्यायः।।

## प्रमेयव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्'[२५०] इति न्यायदर्शनस्य नवमसूत्रे प्रमेयपदार्थाः उल्लिखिताः। स्वरूपलक्षणं तु भाष्यादिटीकाग्रन्थे वर्णितम्। लक्षणपरीक्षा तु महर्षिगौतमेन पृथक् सूत्रेणोपवर्णिता।

अत्र 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्'[२५१] इति सूत्रस्य व्याख्यानवेलायां तु-पदस्य किं तात्पर्यमिति विषये भाष्ये तु तथा न किमपि चर्चितम्। भाष्ये तु केवलं सूत्रस्य सामान्यार्थस्तथा प्रत्येकप्रमेयपदार्थस्य स्वरूपविषये उक्तम् , न हि तु-पदादीनां विशेषतात्पर्यं तत्र पर्यवसितं दृश्यते।

किन्तु विषयेऽस्मिन् वृत्तिकारेण आचार्यविश्वनाथेन विशेषवर्णनं कृतम् । तथाहि प्रमाणादिपदार्थाः प्रमितिविषयत्वेन प्रमेयाः। अतः आत्मादिपदार्थानां प्रमेयत्वं तु अविसंवादितमेव। तथापि अत्र आत्मादिपदार्थानां पुनः प्रमेयत्वरूपेणोल्लेखो विहितः। अत एव आचार्यविश्वनाथेन तु-पदं पुनरर्थे प्रयुक्तम्। तदुक्तं तेन - 'अत्र तुशब्दः पुनरर्थे। तथा चैतेषां पुनः प्रमेयत्वम्, न तु प्रमाविषयत्वेन संयोगादीनामपि।'[२५२] इति।

---

[२५०]न्या.सू-१/१/९

[२५१]तत्रैव

[२५२]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८२

प्रस्तुतसूत्रस्य वर्णनाकाले भाष्यकारेण 'आत्मा सर्वस्य द्रष्टा, सर्वस्य भोक्ता' इत्यादिरूपेण वर्णितम्। अत्र 'सर्व'पदस्य कोऽर्थः इति विषयेऽस्मिन् वृत्तिकारेण तु न तथा चर्चितम्। अपि च, वृत्तिकारेण आचार्यविश्वनाथेन प्रमेयपदार्थरूपेण आत्मनः एवं वर्णना न कृता। तथाहि प्रमेयपदार्थेषु प्रथमपदार्थस्तावत् आत्मा जीवात्मा वा। भाष्यकारस्तमात्मानमेव सर्वद्रष्टा, सर्वभोक्ता, सर्वज्ञः सर्वानुभावी चेति एवं प्रकारेण वर्णितवान्। अत्र 'सर्व'इति पदेन भाष्यकारेण सर्वाणि सुखदुःखसाधनानि सर्वाणि सुखदुःखानि चैव गृहीतानि। अत एव तात्पर्यकारेण निगदितं- " सर्वस्य सुखदुःखसाधनस्य द्रष्टा, सर्वस्य सुखदुःखस्य भोक्ता, यतः सुखदुःखसाधनं सर्वम्, सर्वञ्च सुखदुःखं जानाति, अतः सर्वज्ञः। न चाप्राप्तान्येतानि जानातीत्यत आह 'सर्वानुभावी', अनुभवः प्राप्तिः।"[२५३] इति।

अत्रायं प्रश्नः उदेति यत् प्रस्तुतसूत्रेऽस्मिन् महर्षिगौतमेन सुखस्य उल्लेखं न कृत्वा केवलं दुःखस्योल्लेखं कृतं कथम् ? तर्हि महर्षिणा सुखनामकपदार्थः प्रमेयरूपेण न स्वीकृतः? विषयेऽस्मिन् वृत्तिकारेण किमपि नालोचितं परं भाष्यकारेण दिग्दर्शनम् अकारि। भाष्यकारनये सुखं सर्वजीवानाम् अनुकूलतया अनुभवसिद्धम्। महर्षिणा प्रमेयेषु दुःखमुल्लिख्य तत्समपदार्थस्यापलापो न कृतः। किन्तु सुखं तथा सुखसाधनं जन्मादि सर्वमेव दुःखम् इत्येवं विचिन्त्य निर्वेदस्तथा वैराग्यं घटते जीवानाम्। एवञ्च सन्तप्तजीवस्यैव तत्त्वज्ञानेन मोक्षलाभो भवति। अतो मुमुक्षुः सुखमपि दुःखतया चिन्तयेत् इत्येवमुपदेशाभिप्रायेण महर्षिः प्रमेयपदार्थेषु सुखस्योल्लेखं न कृत्वा दुःखस्योल्लेखं कृतवान्।[२५४] किञ्च, ततश्च चतुर्थाध्याये दुःखपरीक्षाप्रकरणे तेन स्वयमेव विचारपूर्वकं तत्त्वमिदं

---

[२५३] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८२

[२५४] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृष्ठा-१९९

व्याख्यापितम्। भाष्यकारेणापि महर्षेः उद्देश्यं तथा सिद्धान्तञ्च सुष्ठुतया विश्लेषितम्। तदुक्तं तेन - "दुःखमिति नेदमनुकूलवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम्। किं तर्हि ? जन्मन एवेदं ससुखसाधनस्य दुःखानुषङ्गाद् दुःखेनाविप्रयोगाद्विविधबाधनायोगाद् दुःखमिति समाधिभवनमुपदिष्यते। समाहितो भावयति, भावयन् निर्विद्यते, निर्विण्णस्य वैराग्यं, विरक्तस्यापवर्ग इति। जन्ममरणप्रबन्धोच्छेदः सर्वदुःखप्रहाणमपवर्ग इति" इति।[२५५]

प्रसङ्गात् अत्रैदमुल्लेखनीयं यत् जैनदार्शनिकेन हरिभद्रसुरिणा '*षड्दर्शनसमुच्चयः*' इति ग्रन्थस्य न्यायदर्शनांशे गौतमोक्तप्रमेयपदार्थानां वर्णने सुखपदार्थस्यापि उल्लेखः कृतः- एतत्सर्वं दृष्ट्वा केनापि ऐतिहासिकेन अभिमन्यते यत् प्राचीनकाले गौतमस्य प्रमेयविभागसूत्रे 'सुख'-शब्दः एवासीत् , 'दुःख'-शब्दो नासीत्। ततश्च 'सुख'-शब्दस्य स्थाने 'दुःख'-शब्दो निविष्टोऽभूत्। किन्तु वक्तव्यमिदं न हि युक्तिनिर्भरम्। यतो हि तथा सति तर्हि चतुर्थाध्याये 'दुःखपरीक्षाप्रकरणम्' अपि कपोलकल्पितं स्यात् अपि च प्रस्तुतसूत्रे यदि सुखस्योल्लेखे सति तस्य लक्षणवचनं तथा परीक्षणमपि कर्तव्यं स्यात्। किन्तु *न्यायसूत्रे* तु तन्न दृश्यते ।[२५६]

प्रस्तुतसूत्रस्य प्रमेयशब्दस्य व्याख्यानं तु भाष्यकारेण तथा वृत्तिकारेण उभयेनैव कृतम्। परं वृत्तिकारस्य व्याख्यानात् विषयपरिष्करणमधिकं जातम्। तथाहि भाष्यकारेण प्रमेयशब्दस्य व्याख्याकाले प्रमेयशब्दस्य परिचयं प्रदाय निगदितं– एतद्भिन्नं द्रव्यं, गुणः, कर्म, सामान्यं,विशेषः, समवायः तेषाञ्च

---

[२५५]न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८२-१८३

[२५६] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृष्ठा-१९९-२००

असंख्यभेदे असंख्यप्रमेयाः सन्ति। किन्तु प्रागुक्तात्मादिद्वादशप्रमेयपदार्थविषये विविधमिथ्याज्ञानवशात् जीवात्मनः संसारो भवति। तेषामात्मानां तत्त्वज्ञानात् मुक्तिर्घटते। अतः प्रागुक्तात्मादिद्वादशप्रमेया एव विशेषतः उपदिष्टाः। अत्र भाष्यकारस्य तात्पर्यं तावत् महर्षेः प्रथमसूत्रोक्तप्रमेयशब्दः आत्मादिद्वादश-पदार्थार्थे पारिभाषिकः। अतो महर्षिणा तदात्मादिद्वादशप्रमेयपदार्थाः एव प्रस्तुतसूत्रेऽस्मिन् उल्लिखिताः। एतेषां तत्त्वज्ञानात् मोक्षलाभो भवति। अतः एते द्वादशप्रमेयपदार्थाः एव मोक्षलाभे साक्षात्कारणं भवति। अत एव महर्षिणा विशेषतः उक्तात्मादिद्वादशपदार्थाः प्रमेयपदार्थरूपेणोपवर्णिताः। तदुक्तं वात्स्यायनेन- "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमायाः प्रमेयम्, तद्भेदेन चाऽपरिसंख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात् संसारः इत्यत एतदुपदिष्टः विशेषेणेति।"[२५७] इति।

किन्तु यत्प्रमाणसिद्धं तत्प्रमेयमित्यर्थे तु सर्वे पदार्थाः एव प्रमेयाः। महर्षिगौतमेनापि तदर्थे तत्सम्मतसमस्तपदार्थाः प्रमेयाः इत्युक्तम्। वार्त्तिककारेण उद्द्योतकरेणापि वक्तव्यमिदं समर्थयता द्वितीयाध्यायस्य प्रथमाह्निकस्य "प्रमेयता च तुलाप्रामाण्यवत् "[२५८] इति सूत्रमुल्लिख्य निगदितं यत् महर्षिगौतमः उक्तसूत्रे तुलादण्डमपि प्रमेयरूपेण परिगणितवान् तद्दृष्टान्ते च प्रमाणपदार्थस्यापि प्रमेयत्वं समर्थितमिति। अत्र तात्पर्यं तु प्रस्तुतप्रमेयविशेष-व्यचिरिक्ताः अनेके प्रमेयपदार्थाः सन्ति ये हि महर्षिगौतमेनापि सम्मताः। भाष्यकारेण तदेव प्रकाशयितुं महर्षिकणादोक्ताः द्रव्यगुणकर्मसामान्यविशेष-समवायाः इति षट् पदार्थाः उल्लिखिताः। किञ्च, भाष्यकारस्य मतानुसारमेव

---

[२५७]न्या.भा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८३

[२५८]न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४३३

सिद्धान्तमुक्तावल्याम् आचार्यविश्वनाथेन निगदितं- "एते च पदार्था वैशेषिकप्रसिद्धा नैयायिकानामप्यविरुद्धाः प्रतिपादितश्चैवमेव भाष्ये "[२५९] इति ।

किन्तु वृत्तिकारेण प्रमेयशब्दस्य व्याख्यानं कृत्वापि तेन स्पष्टं निगदितं यत् अत्र के के पदार्थाः प्रमेयाः के के चाप्रमेयाः। तद्धि अस्माभिः 'तु'-शब्दस्य आलोचनावेलायां दृष्टं यत् तत्प्रस्तुतसूत्रे प्रमेयपदस्यार्थो न हि प्रमितिविषयः। अत एवात्मादिपदार्थानामेव प्रमेयत्वम्। संयोगादीनां प्रमितिविषयत्वरूपेण प्रमेयत्वं सदपि प्रस्तुतसूत्रे उल्लिखितं प्रमेयपदवाच्यत्वं नास्ति। अतो वृत्तिकारेण उच्यते- "एतेषां पुनः प्रमेयत्वम्, न तु प्रमाविषयत्वेन संयोगादीनामपि।"[२६०] इति।

वस्तुतः प्रमेयपदं हि वादादिशब्दवत् पारिभाषिकः। यथा 'वादः' इति शब्दस्य नानार्थसत्त्वेऽपि विजिगीषाशून्यं वादिप्रतिवादिनोः तत्त्वनिर्णयरूपो-द्देश्येन प्रवृत्ता कथा इत्यर्थे पारिभाषिकः। तथैव तदर्थे प्रमेयशब्दोऽपि पारिभाषिकः। अत एव वृत्तिकारेण निगदितं - "प्रमेयशब्दो हि वादादिशब्दवत् परिभाषाविशेषेण द्वादशसु प्रवर्तते।"[२६१] इति।

अत्र 'वादादिशब्दवत्' इति स्थले आदिपदेन कथादिपदं ग्रहितुं शक्यते। तथा च, प्रमाविषयत्वरूपेण द्रव्यगुणकर्मसामान्यविशेषसमवायाभावादयः पदार्थाः बोध्याः।

---

[२५९]भा.परि.,न्या.सि.मु.,पृष्ठा-२१

[२६०]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८२

[२६१]तत्रैव

अत्रायं प्रश्नः समुदेति यत् प्रमितिविषयत्वरूपपदस्यार्थः सर्वैः ज्ञातः तर्हि तत्र प्रस्तुतसूत्रे पारिभाषिकप्रमेयपदस्यार्थः किम् ? प्रश्नस्यास्य समाधानरूपेण महामनीषिणा वृत्तिकारेण विश्वनाथेन यौगिकार्थः रूढार्थश्च प्रदर्शितौ।

किन्तु तथापि एका शङ्का तिष्ठत्येव यत् प्रथमन्यायसूत्रे षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसलाभो भवति इति निगदितम्। तर्हि न केवलं प्रमाणादिपदार्थानां प्रमितिविषयत्वरूपेण, मोक्षहेतुधीविषयत्वरूपेणापि तेषां प्रमेयत्वसिद्धत्वात् तेऽपि प्रमेयपदार्थाः स्युः ? अत्रैदमुत्तरम् – आत्मादिद्वादशपदार्थानां तत्त्वज्ञानमेव मोक्षलाभस्य साक्षात्कारणम्। प्रमाणादिपञ्चदशपदार्थानां तत्त्वज्ञानं तत्प्रमेयतत्त्वज्ञानस्य सम्पादकत्वात्तथा रक्षकत्वात् तन्मोक्षलाभस्य परम्परया कारणं प्रयोजकं वा। अत एव 'मोक्षहेतुधीविषयत्वम्' अत्र हेतुपदस्य 'साक्षाद् हेतुः' इत्यर्थ एव ग्राह्यः।

वृत्तिकारविश्वनाथेन प्रमेयपदस्य अर्थं प्रदर्शयता निगदितं - "रुढ्या च तावदन्यान्यत्वमर्थः"[२६२] इति। अत एव आत्मादि-अन्योन्यत्वं हि प्रमेयत्वम्। प्रमेयपदमपि आत्मादौ एव रूढः।

महर्षिगौतमेन प्रस्तुतसूत्रे प्रमेयविभागपूर्वकं तस्य लक्षणमपि कृतमिति प्रकाशयितुमेव आचार्यविश्वनाथः प्राह- 'लक्षणमपि तदेव'[२६३] इति। अर्थात् 'आत्माद्यन्यान्यत्वं प्रमेयत्वम्' इति प्रमेयपदार्थस्य लक्षणम्। तथा च, तेन यत् व्युत्पत्तिगतः अर्थः प्रदत्तः तदपि लक्षणं स्यात्। अत एव प्रमेयपदार्थस्य लक्षणं

[२६२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८३

[२६३] तत्रैव

स्यात् - 'संसारहेतुमिथ्याज्ञानविषयत्वं प्रमेयत्वम्' 'मोक्षहेतुधीविषयत्वं प्रमेयत्वम्' वेति।

प्रस्तुतसूत्रे '...अपवर्गास्तु प्रमेयम्' इति स्थले अन्वयसाधनं किम् ? 'प्रमेयम्' इत्यत्र एकवचनस्य तात्पर्यं किम् ? इत्यादिप्रश्नस्य समाधानं तु भाष्ये न प्रदत्तं परं वृत्तिकारेण विषयेऽस्मिन् सुष्ठुतया चर्चितम्। तथाहि 'अपवर्गाः प्रमेयम्' इति स्थले अपवर्गशब्दोत्तरं बहुवचनं तथा प्रमेयशब्दोत्तरमेकवचनं सदपि नानन्वयः 'वेदाः प्रमाणम्' इतिवत्। अन्यथा आत्मसूत्रे (१/१/१०) असामञ्जस्यं स्यात्। किञ्च, तत्र सूत्रे 'आत्मा प्रमेयम्', 'शरीरं प्रमेयम्', 'इन्द्रियं प्रमेयम्' इत्यन्वयः इष्टः। तात्पर्यं तु आत्मादिप्रत्येकपदार्थस्य प्रमेयत्वमस्तीति प्रतिपादनाय इति।

प्रस्तुतसूत्रे 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखा-पवर्गाः' इति समस्तपदस्य विग्रहवाक्यं किं स्यात् ? विग्रहवाक्यस्थितपदेषु किं वचनं प्रयोक्तव्यम् ? प्रमेयपदार्थानां प्रथमादिक्रमे किं कारणम् इत्यादिविषये भाष्यकारेण न पर्यालोचितं परं विषयेऽस्मिन् वृत्तिकारेण सुस्पष्टं व्याख्यानं प्रदत्तम्। तथाहि प्रस्तुतसूत्रस्य समस्तपदं द्वन्द्वसमासनिष्पन्नम्। यद्युच्यते अत्र कथं द्वन्द्वसमासः ? अत्रेदमुत्तरं यत् द्वन्द्वसमासे प्रत्येकं पदं प्रधानं भवति। अत उच्यते - 'सर्वपदार्थप्रधानो द्वन्द्वः' इति। मोक्षलाभे तु एतेषां द्वादशप्रमेयपदार्थानां तत्त्वज्ञानम् अपेक्षितं भवति। अन्येषां पदार्थानां मेयत्वे ज्ञायत्वे वापि एते द्वादशपदार्थाः प्रकृष्टाः मेयाः प्रमेयाः वा। अत्रायं प्रश्नः समुदेति यत् कथम् एते पदार्थाः प्रमेयाः ? अत्रोच्यते एतेषु द्वादशपदार्थेषु प्रकर्षसत्त्वात् एते प्रमेयपदवाच्याः। एष प्रकर्षो हि संसारहेतुभूतमिथ्याज्ञानविषयत्वं

मोक्षहेतुभूततत्त्वज्ञाननिरूपितविषयत्वं वा। तेन च एतत्स्पष्टं भवति यत् एतेषु द्वादशपदार्थेषु प्रत्येकपदार्थस्य मिथ्याज्ञानं संसारकारणं तथा प्रत्येकपदार्थस्य तत्त्वज्ञानं मोक्षप्रयोजकम्। अत एव मोक्षं प्रति प्रत्येकपदार्थस्य प्राधान्यं विद्यते। आशयमिमं प्रकाशयितुमेव समस्तपदेऽस्मिन् द्वन्द्वसमासः स्वीकृतः। तदुक्तं वृत्तिकारेण - "अत्रापि आत्मा च शरीरं च इन्द्रियाणि चार्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलञ्च दुःखञ्च अपवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति। "[२६४] इति।

परन्तु आत्मसहितं शरीरम् आत्मशरीरम्, आत्मशरीरसहितानि इन्द्रियाणि आत्मशरीरेन्द्रियाणि, आत्मशरीरेन्द्रियसहिताः अर्थाः आत्मशरीरे-न्द्रियार्थाः, आत्मशरीरेन्द्रियार्थसहिताः बुद्धयः आत्मशरीरेन्द्रियार्थबुद्धयः, आत्मशरीरेन्द्रियार्थबुद्धिसहितानि मनांसि आत्मशरीरेन्द्रियार्थबुद्धिमनांसि, आत्मशरीरेन्द्रियार्थबुद्धिमनःसहिताः प्रवृत्तयः आत्मशरीरेन्द्रियार्थबुद्धिमनः-प्रवृत्तयः, आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिसहिताः दोषाः आत्मशरीरेन्द्रियार्थ-बुद्धिमनःप्रवृत्तिदोषाः, आत्मशरीरेन्द्रियार्थबुद्धिमनः-प्रवृत्तिदोषसहिताः प्रेत्यभावाः आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावाः, आत्मशरीरेन्द्रिया-र्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावसहितानि फलानि आत्मशरीरे-न्द्रियार्थबुद्धिमनः-प्रवृत्तिदोषप्रेत्यभावफलानि, आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्ति-दोषप्रेत्यभाव-फलसहितानि दुःखानि आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोष-प्रेत्यभावफल-दुःखानि, आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःख-सहिताः

[२६४] ना.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८४

अपवर्गाः आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रत्यभावफलदुःखा-पवर्गाः इत्येवं रूपेण उत्तरपदलोपिकर्मधारयसमासेऽपि 'आत्मशरीरेन्द्रियार्थ-बुद्धिमनःप्रवृत्ति-दोषप्रेत्यभावफलदुःखापवर्गाः' इति पदं निष्पन्नं भवितुमर्हति। किन्तु कर्मधारयसमासस्य तत्पुरुषसमासान्तर्गतत्वात् तत्पुरुषसमासे च उत्तरपदस्य प्राधान्यात् क्रमेण केवलम् अन्तिमस्य अपवर्गपदार्थस्य प्राधान्यं स्यात् आत्मादीनाम् एकादशपदार्थानाम् अप्राधान्यं स्यात्। तथा सति पूर्वकथितं तात्पर्यं (मोक्षलाभे प्रत्येकपदार्थस्य प्राधान्यम् इति) प्रकाशितं न स्यात्। अत एवात्र द्वन्द्वसमास एव स्वीकार्यः।

ननु प्रस्तुतद्वन्द्वसमासनिष्पन्नस्य समस्तपदस्य विग्रहवाक्ये (आत्मा च शरीरं च इन्द्रियाणि चार्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलञ्च दुःखञ्च अपवर्गश्चेत्यत्र ) भिन्नभिन्नवचनस्य किं तात्पर्यम् ? अर्थात् 'आत्मा च शरीरं च ' इत्यादौ एकवचनं किन्तु 'इन्द्रियाणि चार्थाश्च' इत्यादौ बहुवचनं कथम्? प्रश्नस्यास्य निरसने वृत्तिकारेण निगदितं "यथावचनम्" इति। अर्थात् वचनम् अनतिक्रम्य यथावचनम्। वचनमित्युक्ते महर्षिगौतमवचनं महर्षिगौतमसूत्रं वा। अत एव वचनं तथा आत्मादिसूत्राणि अनतिक्रम्य विग्रहवाक्यं विनिर्मितमिति ज्ञेयम्। अत्रायमाशयः- आत्मादिलक्षणसूत्रे यद् वचनं प्रयुक्तं तद्वचनमेवात्रानुसृतम्। यथा "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्"[२६५] इति सूत्रे 'आत्मनः' इत्यत्र एकवचनत्वे विग्रहवाक्येऽ एकवचनं प्रदत्तम्। एवं "चेष्टेन्द्रियार्थाश्रयः शरीरम्"[२६६] इति सूत्रे 'शरीरम्' इत्यत्र

[२६५]न्या.सू.-१/१/१०

[२६६]न्या.सू.-१/१/११

एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः''[२६७] इति सूत्रे 'इन्द्रियाणि' इत्यत्र बहुवचनत्वे विग्रहवाक्येऽपि बहुवचनम्, ''गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः''[२६८] इति सूत्रे 'अर्थाः' इत्यत्र बहुवचनत्वे विग्रहवाक्येऽपि बहुवचनम्, ''बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्''[२६९] इति सूत्रे 'बुद्धिः' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्''[२७०] इति सूत्रे 'मनसः' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''प्रवृत्तिर्वाग्शरीरारम्भः''[२७१] इति सूत्रे 'प्रवृत्तिः' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''प्रवर्त्तनालक्षणा दोषाः''[२७२] इति सूत्रे 'दोषाः' इत्यत्र बहुवचनत्वे विग्रहवाक्येऽपि बहुवचनम्, ''पुनरुत्पत्तिः प्रेत्यभावः''[२७३] इति सूत्रे 'प्रेत्यभावः' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''प्रवृत्तिदोषजनितोऽर्थः फलम्''[२७४] इति सूत्रे 'फलम्' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''बाधनालक्षणं दुःखम्''[२७५] इति सूत्रे ''दुःखम्'' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम्, ''तदत्यन्तविमोक्षोऽपवर्गः''[२७६] इति सूत्रे

---

[२६७]न्या.सू.-१/१/१२

[२६८]न्या,सू-१/१/१४

[२६९]न्या,सू-१/१/१५

[२७०]न्या,सू-१/१/१६

[२७१]न्या,सू-१/१/१७

[२७२]न्या,सू-१/१/१८

[२७३]न्या,सू-१/१/१९

[२७४]न्या,सू-१/१/२०

[२७५]न्या,सू-१/१/२१

[२७६]न्या,सू-१/१/२२

'अपवर्गः' इत्यत्र एकवचनत्वे विग्रहवाक्येऽपि एकवचनम् । तदुक्तं वृत्तिकारेण - "...यथावचनं विग्रहं वर्णयन्ति"[२७७] इति ।

अत्रापि एकः संशयः समुदेति त्र आत्मादिद्वादशप्रमेयपदार्थानाम् उद्देशक्रमे कथम् आत्मादिप्रमेयानां प्रथमोद्देशः कृतः सूत्रकारेण ? संशयस्यास्य निरसने वृत्तिकारेण निगदितम्- "अत्र प्राधान्यात् कारणरूपप्रमेयषट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितम् । तत्र पूर्वपूर्वस्य प्राधान्यात् प्रथममुद्देश इति वदन्ति।"[२७८] इति। अत्रायमाशयः – द्वादशप्रमेयपदार्थेषु आदौ आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनश्च इति प्रमेयषट्कं प्रधानम्। ततश्च प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गश्च इति प्रमेयषट्कम् अप्रधानम्। अत्रापि शङ्का समुदिता स्यात् यत् अत्र प्रधानाप्रधानयोः किं मानम् ? अत्रोच्यते वृत्तिकारेण - "कारणरूपप्रमेयषट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितम् ।"[२७९] इति । अत्रेदं तात्पर्यं यत् प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः इति षट् प्रमेयाः कार्यस्वरूपाः। यतो हि जीवात्मनः एव धर्माधर्मात्मकः प्रवृत्तिः, रागादयः दोषाः, पुनर्देहधारणरूपः प्रेत्यभावः सुखदुःखयोः संवेदनरूपं फलम्, दुःखं तथा दुःखस्य आत्यन्तिकाभावरूपापवर्गो भवति। तत्र च शरीरं, बुद्धिः, मनः अपि कारणं भवति। यथा प्रवृत्तिं प्रति शरीरादेः कारणतां प्रकाशयितुमाह भाष्यकारः "प्रवृत्तिर्वाग्शरीराम्भः"[२८०] इति न्यायसूत्रस्य भाष्ये - "सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः"[२८१] इति। एवं सूत्रकारेण दोषादिप्रमेयं

[२७७]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८४

[२७८]तत्रैव

[२७९]तत्रैव

[२८०]न्या,सू-१/१/१७

[२८१]न्या.भा. ,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१८

प्रति आत्मादिप्रमेयानां कारणतासत्त्वात् प्रवृत्त्यादीनां कार्यस्वरूपत्त्वात् च कारणभूतात्मादिप्रमेयानामादौ उल्लेखः कृतः ततश्च कार्यभूतप्रवृत्त्यादीनाम्। तथा च, कारणस्य पूर्वभावित्वात् कार्यस्य च परभावित्वात् अपि कारणरूपात्मादिप्रमेयानामादौ उल्लेखस्तथा कार्यरूपप्रवृत्त्यादिप्रमेयानां परम् उल्लेखः कृतः सूत्रकारेण ।

किञ्च, तथापि एकः संशयः स्यात् , आत्मशरीरेन्द्रियार्थबुद्धिमनांसि एवं क्रमेण कथमुल्लेखः कथं वा प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः एवं क्रमेण ? अत्र संशयस्य निरसने वृत्तिकारेण प्रोक्तं - "तत्र पूर्वपूर्वस्य प्राधान्यात्"[२८२] इति। तथाहि आत्मा शरीरात् प्रधानः, शरीरम् इन्द्रियात् प्रधानम्, इन्द्रियम् अर्थात् प्रधानम्, अर्थः बुद्धितः, बुद्धिः मनसः प्रधाना। एवं प्रवृत्त्यादावपि ज्ञेयम् । एवञ्च पूर्वपूर्वप्रमेयम् उत्तरोत्तरप्रमेयात् प्रधानं भवति। अत एव तेषां प्रमेयानामेवं प्रकारेण उल्लेखः।

किञ्चात्र ज्ञेयं यत् 'इति वदन्ति' इति प्रयोगद्वारा वृत्तिकारेण भिन्ननैयायिकानां मतमुल्लिखितम् इति ज्ञेयम्। 'वदन्ति' इति प्रयोगेनैव मतेऽस्मिन् वृत्तिकारस्य अस्वरसः संसूचितः।

[२८२]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८४

## ❖ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्[२८३]

पूर्वसूत्रे तु द्वादशप्रमेयपदार्थानामुल्लेखः कृतः। प्रस्तुतसूत्रे तु आत्मनो लक्षणं कृतम्। न्यायशास्त्रस्य हि त्रिविधा प्रवृत्तिः – उद्देशः लक्षणं परीक्षा चेति। येन क्रमेण उद्देशो भवति तेनैव क्रमेण लक्षणं परीक्षा च करणीया भवति। अतः पूर्वसूत्रे यतः आत्मन एव आदौ उद्देशो विहितः, तेन प्रस्तुतसूत्रे आत्मन एव आदौ लक्षणं कृतम्। अत एव सूत्रकारेण महर्षिणा गौतमेन आत्मनः लक्षणं कुर्वता भणितम् - 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्'[२८४] इति।

भाष्यकारादिप्राचीननैयायिकमते सूत्रस्थलिङ्गपदस्यार्थो हि हेतुः अनुमापको वा। यतो हि इच्छादिगुणैः आत्मनः अस्तित्वं प्रतिपादितं भवति। वैशेषिकसूत्रेऽपि एतेषामात्मनः अस्तित्वसाधकरूपेण उल्लेखं विद्यते। अत उक्तं वैशेषिकसूत्रे - ''प्राणापाननिमेषोन्मेषजीवनमनो गतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नश्चात्मनो लिङ्गानि''[२८५] इति। एतदनुसारं प्रशस्तपादभाष्येऽपि निगदितं - ''सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते'' इति। वस्तुतस्तु लिङ्गशब्दस्य व्युत्पत्त्या तदेवार्थः प्रतीयते। अत एव सांख्यतत्त्वकौमुद्यामुक्तं - '...लिङ्ग्यते ज्ञायते अप्रत्यक्षोऽर्थः येन तत् लिङ्गम्।' इति। यद्यपि इच्छा द्वेषः प्रभृतिगुणाः आत्मानुमाने हेतवः न भवन्ति, किन्तु तैः गुणैः आत्मनः अस्तित्वम् अनुमानप्रमाणसिद्धत्वात् ते हि आत्मनः अनुमापकाः। अतोऽनुमापकार्थे एव महर्षिणा प्रस्तुतसूत्रे लिङ्गशब्दस्य प्रयोगः कृतः। अतः

---

[२८३] न्या,सू-१/१/१०

[२८४] तत्रैव

[२८५] वै.सू.-३/२/४

पूर्वमनुमानसूत्रभाष्ये[२८६] सामान्यतो दृष्टानुमानस्य व्याख्यानकाले भाष्यकारेण निगदितं - ‘‘यथेच्छादिभिरात्मा’’[२८७] इति। केन प्रकारेण इच्छादयो गुणाः आत्मनः लिङ्गं भवन्तीति विषये भाष्यकारेण तत्र विस्तरतया वर्णितम्। भाष्यकारनये तु सामान्यतो दृष्टानुमानेनैव यत् इच्छादिगुणानाम् आधारत्वेन आत्मा सिध्यति इति पूर्वमेव तत्र वर्णनं कृतम्।

भाष्यकारेण यथाक्रमं सूत्रोक्तम् इच्छा, द्वेषः, प्रयत्नं, सुखं, दुःखं, ज्ञानञ्च चिरस्थायिनित्यपदार्थस्य आत्मनः लिङ्गत्वेन वर्णयितुमादौ उक्तं यत् यज्जातीयपदार्थस्य सन्निकर्षजन्यस्य अर्थात् चक्षुःसन्निकर्षजन्यस्य यज्जातीयपदार्थस्य दर्शनं कृत्वा कश्चित् आत्मा आदौ सुखस्य उपलब्धिं करोति, ततश्च तज्जातीयपदार्थस्य दर्शनं क्रियते चेत् तदात्मन एव तद्ग्रहयितुमिच्छा जायते। तद् यद्ग्रहणनिमित्तेच्छा, तया इच्छया सिध्यते यत् तत्प्रथमद्रष्टा तथा ततःपरम् इच्छायाः कर्ता आत्मा एक एव। कारणम्, परं तत्र अनेकार्थदर्शिनः एकस्य आत्मनः एव तद्दर्शनस्य प्रतिसन्धानं जायते। अत्र ‘प्रतिसन्धान’-शब्देन प्रत्यभिज्ञारूपमानसप्रत्यक्षमेव बोधितं भाष्यकारेण इति ज्ञायते एव। अर्थात् यदहं पूर्वम् एतज्जातीयपदार्थस्य दर्शनं कृत्वा सुखस्योपलब्धिं कृतवान् तदहमेव इदानीमिह दर्शनं कृत्वा तद्ग्रहितुमिच्छामि- इत्येवंरूपमानसप्रत्यक्षरूप-प्रतिसन्धानत्वात् तद्द्वारा तदिच्छा पूर्वापरकालस्थायिनः आत्मनो लिङ्गम् अनुमापको वा भवति। अत एवोक्तं भाष्यकारेण- ‘‘यज्जातीयस्यार्थस्य सन्निकर्षात्

[२८६] न्या,सू-१/१/५

[२८७] न्या.भा., न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१५६

सुखमात्मोपलब्धवान्, तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति, सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद्भवति लिङ्गमात्मनः।"[२८८] इति।

भाष्यकारस्याभिप्रायमिमं व्यक्तयितुं वार्त्तिककारेण उद्द्योतकरेण तत्र भणितं- "तत्रेच्छादीनां प्रतिसन्धानमात्मास्तित्वप्रतिपादकम्।"[२८९] इति। वाचस्पतिमिश्रेणापि भाष्यकारस्य मतं व्याख्यायता निगदितं यत् तदात्मा तदा तस्य तद्दृष्टपदार्थस्य सुखजनकत्वस्य अनुमानं कृत्वा तद्ग्रहणार्थम् इच्छति। अतः तस्य तदिच्छा पूर्वोत्पन्नानां व्याप्तिज्ञानं तथा तद्व्याप्तेः स्मरणम्, पक्षधर्मताज्ञानम् अनुमानम् ( लिङ्गपरामर्शः) इच्छा च इत्यादीनाम् एककर्तृकत्वं सूचयति। यतो हि तत्सकलस्य विभिन्नकर्तृकत्वं भवति चेत् उक्तरूपप्रतिसन्धानं न भवितुमर्हति। तदुक्तं वाचस्पतिमिश्रेण *तात्पर्यटीकायां* - " यज्जातीयस्येति व्याप्तिस्मृतिकथनम्, तज्जातीयं पश्यन्निति पक्षधर्मोपनयः। तस्मादयं सुखहेतुरित्यनुमायादातुमिच्छति, सेयमिच्छेदृशी व्याप्तिग्रहणतत्स्मरणपक्षधर्मताग्रहणानुमानेच्छादीनामेककर्तृकत्वं सूचयति, भेदे प्रतिसन्धानाभावेन तदनुपपत्तेः,..."[२९०] इति। अतो विषयेऽस्मिन् भाष्यकारेणापि निगदितं - "नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति।"[२९१] इति।

किन्तु महामनीषिणा विश्वनाथाचार्येण लिङ्गपदस्य तद्रूपार्थः न स्वीकृतः। तन्मते लिङ्गपदस्य अनुमापकः हेतुर्वा इति अर्थः गृह्यते चेत् तदा द्वौ दोषौ भवतः। प्रथमदोषं प्रदर्शयन्नाह वृत्तिकारः - "अत्र चात्मनः

---

[२८८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८५

[२८९] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८५

[२९०] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८५

[२९१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८५

प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतम्। न च शरीरातिरिक्तात्मव्युत्पादनार्थे तदिति वाच्यम्, अग्रिमपरीक्षावैयर्थ्यापत्तेः,...''[२९२] इति। अत्रायमाशयः – आत्मनः प्रत्यक्षमेव यदा सम्भवति तदा तस्यास्तित्वसाधनाय हेतुप्रदर्शनमनुचितं स्यात्। यतो हि नियमोऽस्ति - 'ऋजुमार्गेण सिद्धान्तं को हि वक्रेण साधयेत्।' इति। अन्यत्र सांख्यतत्त्वकौमुद्याम् उक्तम् –

" अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।

इष्टस्यार्थस्य संसिद्धौ को यत्नमाचरेत्।।''[२९३] इति।

अत्रैकः प्रश्नः स्यात् यत् आत्मनः प्रत्यक्षं भवति तत् किंविधम् ? लौकिकमुत अलौकिकम् ? अत्रोच्यते आत्मा हि बहिरिन्द्रियेण अग्राह्योऽपि मानसप्रत्यक्षस्य विषयः। अतो *भाषापरिच्छेदे* निगदितम् - " अहंकारस्याश्रयोऽहं मनोमात्रस्य गौचरः।''[२९४] इति। *न्यायकन्दलीकारे*ण श्रीधरभट्टेनापि भणितं- ''यद्यप्यात्माहं ममेति स्वकर्मोपार्जितकायकरणसम्बन्धोपाधिकृतकर्तृता स्वामित्वरूपसम्भिन्नो मनसा संवेद्यते तथाप्यत्राप्रत्यक्षत्ववाचयुक्तिर्बाह्येन्द्रिया-भिप्रायेण।'' इति।

किन्तु 'तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते' इति वात्स्यायनभाष्ये आत्मनः मानसप्रत्यक्षविषयत्वं तावत् निराकृतम्। 'तत्रात्मा मनश्चाप्रत्यक्षे' इति वैशेषिकसूत्रस्य उपस्कारटीकायां शङ्करमिश्रेण आत्मनः मानसप्रत्यक्षयोग्यत्वं तिरस्कृत्य सर्वविधलौकिकप्रत्यक्षविषयत्वं खण्डितम्। किन्तु तथापि आत्मनः

---

[२९२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८५-१८६

[२९३] सांख्यतत्त्वकौमुदी,पृ-१५

[२९४] भा.परि.,कारिका-५०

लौकिकप्रत्यक्षवेद्यता न स्यात् तथापि योगीनाम् आत्ममनःसंयोगविशेषेण आत्मनः अलौकिकप्रत्यक्षं भवति। विषयेऽस्मिन् वैशेषिकसूत्रमपि विद्यते, तद्धि- "आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम् ।"[२९५] इति।

किन्तु यदि तथापि उच्यते यत् लिङ्गपदं हेत्वर्थे प्रयुक्तम्, तदा तु आत्मनः अस्तित्वमात्रस्य साधकरूपेण न, अन्यथापूर्वस्य आपत्तिः स्यात्। किन्तु आत्मा शरीरादेः अतिरिक्तः तत्साधनाय इच्छाप्रभृतीनां लिङ्गत्वं हेतुत्वं वा कथितमित्यपि वक्तुं नालम्। यतो हि महर्षिणा गौतमेन न्यायसूत्रस्य तृतीयाध्याये शरीरादेः आत्मनः भिन्नत्वं संसाधितम्। यदि तद्विषयः एव प्रस्तुतसूत्रस्य प्रतिपाद्यः स्यात् तर्हि तृतीध्याये या आत्मनः शरीरादिव्यतिरिक्तत्वस्य परीक्षा अस्ति, सा परीक्षा व्यर्था स्यात्। अत एतदिप वक्तुं न शक्यते।

द्वितीयदोषस्तु – उद्देशः लक्षणं परीक्षा चेति शास्त्रस्य त्रिविधा प्रवृत्तिः। इदानीं यदि पूर्वसूत्रे द्वादशानाम् आत्मादिपदार्थानाम् उद्देशात् परं प्रस्तुतसूत्रे आत्मनः लक्षणं यदि कीर्तितं न स्यात्, यदि आत्मनः अस्तित्वस्य परीक्षा भवति चेत् तदा उद्देशात् परं लक्षणस्याकीर्तितत्वे परीक्षासूचितत्वात् न्यायशास्त्रस्य रीतेः लङ्घितत्वात् शास्त्रस्य न्यूनतापत्तिः स्यादिति।

अत एव एतद्दोषनिवारणाय महामनीषिणा विश्वनाथाचार्येण लिङ्गपदस्यार्थः कृतः लक्षणमिति। अत एव तेनोक्तं *न्यायसूत्रवृत्तौ*- "लिङ्गपदस्य लक्षणार्थत्वात् "[२९६] इति। एतदपि कथयितुं न शक्यते यत् लिङ्गपदं हि प्रसिद्धं हेत्वर्थे अनुमापकरूपार्थे वा, तत्परित्यज्य अप्रसिद्धलक्षणरूपार्थे ग्रहणं न हि उचितं

[२९५] वै.सू.,९/१/११

[२९६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८६

स्यादिति। यतो हि लिङ्गपदस्य लक्षणरूपार्थोऽपि शास्त्रप्रसिद्धः। न केवलमेतत्, लिङ्गपदस्य लक्षणार्थः स्वीक्रियते चेत् पूर्वोक्तदोषाभ्यामपि मुक्तिः स्यादिति। एवं वृत्तिकारेण सूत्रस्थलिङ्गपदस्य विशदतया व्याख्या कृता। परं भाष्यकारेण तु लिङ्गपदस्य तादृशव्याख्या न कृता, अतोऽत्रापि न वर्ण्यते। किन्तु सूत्रस्यास्य वृत्तिकारेण इतोऽपि अधिकव्याख्याने स्वरसः प्रदर्शितः। अतो वृत्तिकारस्याभिमतं विशेषतया वर्ण्यते अधस्तात्।

तथाहि इदानीमेकः प्रश्नः समुदेति यत् 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि' इति पदमपि सर्वपदार्थप्रधानद्वन्द्वसमासनिष्पन्नम्। इदानीम् इच्छावत्त्वम्, द्वेषवत्त्वम् इत्यादि प्रत्येकस्यात्मनः एकैकलक्षणमुत तेषां समुदायः आत्मलक्षणम् ? प्रथमतः पूर्वपक्षिणा यदि उच्यते यत् इच्छावत्त्वम् , द्वेषवत्त्वम् इत्यादीनां मिलिततया समुदाये आत्मनः एकमेव लक्षणम् इति , तदा तेषां युक्तिः एवं स्यात् यत् 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि' इति पदे बहुवचनं प्रयुक्तं किन्तु 'लिङ्गम्' इत्यत्र एकवचनं प्रयुक्तम्। अतः 'त्रयः समुदिताः हेतुः' इति काव्यप्रकाशकारकथितरीत्यनुसारं सूत्रकारस्यापि अभिप्रायः स्यात् यत् इच्छादीनां समुदायः एव आत्मनः लक्षणमिति। समूहस्य एकत्वनिबन्धनैकवचनार्थः एकत्वस्यापि समूहे अन्वयो भवति। किन्तु मतमिदम् अयुक्तम्। यतो इच्छाप्रयत्नज्ञानानि जीवात्मनः तथा परमात्मनः इति आत्ममात्रस्य लक्षणत्वेऽपि सुखम्, दुःखम्, द्वेषः इत्यादि तु आत्ममात्रस्य लक्षणं न भवति। अतः इच्छादिमिलिततया आत्ममात्रस्य लक्षणम् इत्युच्यते तदा यद्यपि इच्छा प्रत्यत्नं ज्ञानम् इति एते गुणाः आत्ममात्रे सङ्गताः भवन्ति, परं सुखदुःखद्वेषाः इति गुणास्तु सङ्गताः न भवन्ति। अत एव इच्छादिमिलिततया आत्ममात्रस्य

लक्षणमिति कथनं तु अयुक्तं स्यात्। तदपेक्षया इच्छादीनामेकैकत्वस्य आत्ममात्रस्य लक्षणत्वे कथने उचितं स्यात्।

किन्तु तथापि पूर्वपक्षिणा कथयितुं शक्यते यत् इच्छादीनामेकैकत्वं न हि आत्मनः लक्षणं भवितुमर्हति इति। यतो हि तेन च वैयर्थ्यापत्तिः स्यात्। तथाहि इच्छादिगुणाः हि आत्मनः विशेषगुणाः। अतः तेषां विशेषगुणत्वात् ते गुणाः केवलमात्मनि एव समवेताः, अन्यत्र च न तिष्ठन्ति। अतः इच्छादिषु यत्किमपि एकः गुणः आत्मनः लक्षणं भवितुं नार्हति। तथा च, यदि केवलम् इच्छा वा, केवलं ज्ञानं वा, केवलं प्रयत्नो वा आत्मनः लक्षणं भवितुम् अर्हति तर्हि कथमेते विशेषगुणाः लक्षणघटकत्वेन उल्लिखिताः ? अत्र तु कापि विनिगमना नास्ति। तथा चाधिकगुणप्रवेशात् व्यर्थतादोषः दुर्निवारः स्यात्। अत एव वृत्तिकारेण भणितं - "...वैयर्थ्यादिति वाच्यम्।"[२९७] इति।

वस्तुतः एतेन प्रतीयते यत् इच्छादीनामेकैकत्वं न हि आत्मनो लक्षणं भवितुमर्हति। यतो हि तत्पक्षे व्यर्थतादोषः आपतेत्। अत एव इच्छादिमिलितया आत्मनो लक्षणं स्यात् इति पूर्वपक्षी। इत्येतन्मतमपि विश्वनाथेन सयुक्तितया खण्डितम्। तदुक्तं तेन न्यायसूत्रवृत्तौ - "न च लिङ्गमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते, तच्चाऽयुक्तम्, वैयर्थ्यादिति वाच्यम्।"[२९८] इति। अत्र युक्तिः कीदृशी ? अत्रोच्यते यद् आत्मनः उद्देशात्परं शिष्यजिज्ञासा स्यात् आत्मनो लक्षणं किम् ? एतज्जिज्ञासानिवारणाय महर्षिणा गौतमेन इच्छादीनाम् अभिधानं कृतम्। किन्तु इच्छादीनां मिलिततया अत्र आत्मनो लक्षणमिति एतत्पक्षे कापि

---

[२९७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८६-१८८

[२९८] तत्रैव

विनिगमना नास्ति, नापि अस्ति कोऽपि प्रत्यायकः। अत एव विश्वनाथेन निगदितं-"किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानात् मिलितं लक्षणमिति प्रत्यायकाभावात्।"[२९९] इति।

अत्रापि एकः प्रश्नः स्यात् - 'लिङ्गम्' इति पदे एकवचनप्रयोगेणैव तत्र मिलितलक्षणं प्रति विनिगमना भवेदिति। यथा महर्षिणा गौतमेन 'जात्याकृतिव्यक्तयः पदार्थः' इति पदार्थपदोत्तरप्रयुक्तैकवचनेन यथा जातिः, आकृतिः, व्यक्तिः इति त्रितयस्य समुदाये एका एव शक्तिः, न तु भिन्ना भिन्ना – इत्येवं तात्पर्यं बोधितम् , तथैव इच्छादिगुणवाचकपदोत्तरबहुवचनप्रयोगत्वेऽपि 'लिङ्गम्' इत्यत्र एकवचनप्रयोगेण इच्छादीनां समुदायः एव आत्मनो लक्षणम्– इत्येव तात्पर्यं महर्षिणा गौतमेन सूचितम्। अत एव मिलितस्य लक्षणत्वे प्रत्यायको नास्ति इति कथं वक्तुं शक्यते ?

एतदुत्तरे वक्तुं शक्यते यत् 'जात्याकृतिव्यक्तयः पदार्थः' इत्यत्र जात्यादित्रितयस्य समुदाये एकैव शक्तिस्वीकारे प्रयोजनीयता विद्यते। तद्धि जातिः, आकृतिः व्यक्तिश्च एते परस्परं मिथः परित्यज्य पृथक् पृथक् रूपेण न भासिताः भवन्ति। यथा- 'गामानय' इत्युक्ते गोव्यक्तिः, गोत्वजातिः तथा तदवयवसंस्थात्मका आकृतिः इति त्रितयस्य बोधो जायते। गोशब्दात् केवलं गोत्वव्यक्तेः बोधो भवति, जातेः आकृतेश्च बोधो न भवति इति वक्तुं न शक्यते, अनुभवविरुद्धत्वात्। अतो *भाषापरिच्छेद*ग्रन्थस्य दिनकरीटीकायां निगदितम् - 'अत्र च परस्परपरित्यागेन परस्परस्य बोधाभावात् त्रिषु एकैव शक्तिः।' इति।

[२९९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८८

तथा च, उक्तत्रिषु एकशक्तिस्वीकारे कोऽपि बाधोऽपि उपस्थितो न भवति। किन्तु इच्छादीनां मिलिततया आत्मलक्षणकथने कापि पूर्वोक्तप्रयोजनीयता नास्ति। यदि 'लिङ्गम्' इत्यत्र एकवचनस्य प्रयोगः एव तत्प्रति प्रत्यायकः इत्युच्यते तदा एकवचनस्य प्रयोगत्वे मिलितस्य बोधो भवति इति वक्तुं नालम्। तत्र व्यभिचारस्थलमपि अनेकं विद्यते। यथा- 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति महाभाष्यकारस्य वचने प्रयोजनपदोत्तर-एकवचनस्य प्रयोगादपि रक्षा, ऊहः, आगमः, लघुः, असन्देहः इति पञ्चविधस्य मिलिततया व्याकरणाध्ययनार्थं साधुशब्दज्ञानाय प्रयोजनम् इति तात्पर्यस्य विषयभूतं न। किन्तु तत्स्थले वेदरक्षादि एकैकं तस्य प्रयोजनमित्येव सूचितं भवति। एवम् इच्छादीनाम् एकैकमेव आत्मनो लक्षणम्। किन्तु ते मिलिततया न आत्मनो लक्षणम्। इदानीं वक्तुं शक्यते यत् 'लिङ्गम्' इत्यत्र एकवचनस्य प्रयोगादेव मिलितस्य लक्षणत्वं सूचितं भवतीति। तथा च, अनेकलिङ्गपदस्य तत्स्थले एकशेषत्वात् 'नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्'[३००] इति सूत्रेणात्र एकवचनम् अभवद् इत्यपि वक्तुमलम्।

किञ्च यद्यपि स्वीक्रियते यत् 'लिङ्गम्' इत्यत्र एकवचनप्रयोगात् इच्छादीनां मिलिततया एव लक्षणत्वं सूचितं भवति यथा 'जात्याकृतिव्यक्तयः पदार्थः ' इत्येतत्स्थले जात्यादित्रितये एकैव शक्तिः सूचिता अभवदिति। किन्तु तथा सति पदार्थसूत्रे तदर्थं स्वीकृत्यापि कापि प्रतिबन्धकता न दृष्टा। किन्तु आत्मलक्षणसूत्रे बाधकप्रमाणम् उपस्थितं भवति। तद्धि – पूर्वमेवोक्तं यत् इच्छादीनां मिलिततया यदि आत्ममात्रस्य लक्षणं भवति, तदा तत् परमात्मनि

[३००] पा.सू.-१/२/६९

असङ्गतं स्यात्, इच्छादिः परमात्मनि तिष्ठत्यपि सुखादीनां तत्र अविद्यमानत्वात् इच्छादीनां मिलितत्त्वं न तिष्ठति इति। तेन अव्याप्तिदोषः स्यात्। अत एव इच्छादीनाम् एकैकत्वं हि आत्मनो लक्षणम् इति।

अत एव इच्छा द्वेषः प्रभृतिः मिलिततया न आत्मनो लक्षणम्। अत एव एवं राद्धान्तो स्यात् यत् 'ज्ञानवत्त्वम्, इच्छावत्त्वम्, ,प्रत्यत्नवत्त्वम्' इति आत्ममात्रस्य लक्षणं स्यात्, अपि च, 'सुखवत्त्वम्, दुःखवत्त्वम्, द्वेषवत्त्वम्' इति केवलं जीवात्मनो लक्षणमिति। अत एव विश्वनाथेन *न्यायसूत्रवृत्तौ* निगदितं- " तथा च, प्रत्येकमेव लक्षणम्। अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वम्, सुखदुःखद्वेषाणां संसारिणो लक्षणत्वमिति।"[३०१] इति।

अत्र एवकारस्यार्थो हि अन्ययोगव्यवच्छेदः। एवकारो यदा विशेष्येण अन्वेति तदा तस्यार्थः भवति अन्ययोगव्यवच्छेदः। अन्ययोगव्यवच्छेदो नाम अन्यपदार्थस्य यद् योगः सम्बन्धः , तस्य व्यवच्छेदः निषेधो वा। यथा 'पार्थ एव धनुर्धरः' इत्यत्र वाक्ये एवकारः 'पार्थ'- इति विशेष्येण अन्वेति। अत एवात्र एवकारस्यार्थः अन्यस्य (पदार्थस्य) सम्बन्धस्य निषेधः इति। तेन उक्तवाक्यार्थः स्यात् - 'पार्थ एव धनुर्धरः, न तु अन्यः' इति। अर्थात् पार्थ एव धनुर्धरत्वस्य योगोऽस्ति, पार्थभिन्नस्य अन्यस्य कस्यापि पुरुषस्य धनुर्धरत्वस्य सम्बन्धो नास्ति। एवमेवात्र 'प्रत्येकमेव लक्षणम् ' इति वाक्ये इच्छावत्त्वमिति प्रत्येकमेव लक्षणम्, किन्तु इच्छाद्वेषादीनां मिलिततया आत्मलक्षणत्वस्य योगो नास्ति। अर्थात् अत्र निषेधः।

[३०१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८८

किञ्चात्र विज्ञेयं यत् आत्मा द्विविधः- जीवात्मा परमात्मा चेति। जीवात्मनः चतुर्दश गुणाः – संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, ज्ञानम्, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारश्च इति। परमात्मनश्च अष्टौ गुणाः – संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, ज्ञानम्, इच्छा, प्रयत्नश्च इति। तेनात्र दृश्यते यत् ज्ञानम्, इच्छा, प्रयत्नश्च इति गुणत्रयं जीवात्मनि परमात्मनि च उभयत्र तिष्ठति। अतः ज्ञानवत्त्वम्, इच्छावत्त्वम्, प्रयत्नवत्त्वञ्च इति त्रितयम् आत्ममात्रस्य लक्षणम्। किन्तु सुखम्, दुःखम्, द्वेषश्च इति गुणत्रयं केवलं जीवात्मनि एव तिष्ठति, ईश्वरे परमात्मनि वा न तिष्ठति। अतः सुखदुःखद्वेषादिमत्त्वं हि जीवात्मनो लक्षणम्। अनेनाभिप्रायेण वृत्तिकारेण निगदितं - "अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वम्, सुखदुःखद्वेषाणां संसारिणो लक्षणत्वमिति।"[३०२] इति।

अत्रावधेयं यत् 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि' इति पदं सर्वपदार्थप्रधानद्वन्द्वसमासनिष्पन्नम् इति पूर्वमेव वर्णितम्। अत्र इच्छादिप्रत्येकस्य आत्मलक्षणत्वात् सर्वपदार्थप्राधान्यत्वमपि सूचितं भवति। किञ्चात्र विग्रहवाक्ये प्रत्येकपदस्य किं वचनं स्याद् – एकवचनं द्विवचनमुत बहुवचनमिति विषये तु चर्चा करणीया। तथाहि 'इच्छा च द्वेषश्च प्रयत्नश्च ...' इत्यादिक्रमेण जात्यभिप्राये एकवचननिर्देशेन उक्तपदं निष्पन्नं भवितुमर्हति। तथा च, जीवात्मनिष्ठेच्छा परमात्मनिष्ठेच्छा इति दृष्ट्या तु 'इच्छे च द्वेषौ च प्रयत्नौ च...' इति द्विवचनान्ततयापि उक्तपदं निष्पन्नं स्यात्। अपि च, जीवात्मनः बहुत्वात्

---

[३०२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१८८

तन्निबन्धनेच्छादीनामपि बहुत्वात् ‘इच्छाश्च द्वेषाश्च प्रयत्नाश्च ’ इति बहुवचनान्ततयापि उक्तपदं निष्पन्नं स्यात्। तेन च, दृश्यते यत् विग्रहवाक्ये यस्य कस्यापि वचनस्य प्रयोगः भवितुमर्हति।

अत्रैकविषयो लक्षणीयो यत् मूलसूत्रे ‘इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि’ इति पदमस्ति किन्तु विश्वनाथेन *न्यायसूत्रवृत्तौ* तु आत्मसामान्यस्य लक्षणं व्यक्तयितुमुक्तं - ‘ अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणम्’ इति। अतो वृत्तौ विश्वनाथेन गुणानां क्रमः परिवर्तितः कथम् ? अत्रोच्यते ‘ ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेत्। कृतिजन्या भवेच्चेष्टा ततश्च फलमाप्नुयात्।’ इति प्रसिद्धवाक्यात् ज्ञानाद् इच्छा जायते, इच्छातः कृतिः प्रयत्नो वा जायते। अत एव ज्ञानम्, इच्छा प्रयत्नश्च इति एतेषु गुणपदार्थेषु उत्तरोत्तरपदार्थं प्रति पूर्वपूर्वपदार्थस्य कारणत्वात्, कारणत्वस्य च पूर्वभावित्वात् कार्यत्वस्य च परभावित्वात् पूर्वम् कारणगुणाः उल्लिखिताः।

किन्तु तर्हि वृत्तिकारेण ‘सुखदुःखद्वेषाणाम्’ इत्यत्र एवंक्रमेण कथं सुखादीनामुल्लेखः कृतः ? यतो हि सूत्रे द्वेषपदं सुखदुःखाभ्यां पूर्वमुल्लिखितम्। अतो वृत्तिकारेण कथं तत्क्रमेण उल्लिखितः ?

अत्रोच्यते द्वेषात् निवृत्तिः जायते, निवृत्तिश्च सुखदुःखयो प्रयोजको भवति। अत एव सुखं दुःखं प्रयोज्यं कार्यं वा, द्वेषश्च प्रयोजकः कारणं वा। किन्तु तथापि कारणरूपद्वेषस्य परोल्लेखात् पूर्वोक्तकार्यकारणनियमभङ्गः स्यात्। अत्रोच्यते प्रयोज्यस्य कार्यपदस्य (सुखदुःखयोः) उल्लेखोऽभवत् ततश्च तत्प्रयोजकीभूतस्य कारणभूतस्य वा द्वेषपदार्थस्य उल्लेखः कृतः। अतो न एतेषु कार्यकारणभावः अनुपपन्नः। यतो हि महर्षिणा गौतमेन तत् द्वितीयसूत्रे दर्शितम्।

तथाहि 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः'[३०३] इति न्यायसूत्रे महर्षिणा आदौ कार्यभूतदुःखादिपदार्थानाम् उल्लेखः कृतः, तथा च तदव्यवहितपरं तत्कारणभूतपदार्थानामुल्लेखः कृतः। दुःखस्य कारणं जन्म, जन्मनः कारणं प्रवृत्तिः, प्रवृत्तेः कारणं दोषः, दोषस्य कारणं मिथ्याज्ञानम्। अत एव स्पष्टं दृश्यते यत् द्वेषः परम्परया दुःखस्य प्रयोजको भवति। मोक्षशास्त्रे सुखमपि दुःखरूपेण भावनीयम्, अतो द्वेषः सुखस्यापि प्रयोजको भवति। तेनाचार्यविश्वनाथेन *न्यायसूत्रवृत्तौ* आदौ प्रयोज्यस्वरूपयोः सुखदुःखयोः उल्लेखः कृतः, ततश्च प्रयोजकीभूतस्य द्वेषस्योल्लेखो विहितः।

किन्तु अत्रापि यदि प्रश्नः स्यात् यत् सुखदुःखयोः आदौ सुखस्य कथमुल्लेखः ? तदुत्तरे उच्यते सकलजीवमात्रस्य स्वतः एव सुखं प्रति अभिलाषो विद्यते। अत एव सुखस्यैव इच्छाविषयत्वं प्राथमिकतया उपस्थिततत्वात् आदौ सुखस्य उल्लेखो विहितो वृत्तिकारेण।

पुनः यदि उच्यते 'ज्ञानेच्छाप्रयत्नानाम्' इत्यत्र कारणमुखेन गुणानामभिधानं कृतं तथा 'सुखदुःखद्वेषाणाम्' इत्यत्र कार्यमुखेन गुणानामभिधानं कृतं वृत्तिकारेण, एतेन गुणानामभिधाने एकवारं कारणमुखेनाभिधानमं पुनः एकवारं कार्यमुखेनाभिधानम् इति गौरवदौषः दुर्निवारः स्यादिति चेद् अत्रोच्यते अत्र वक्ता कार्यमुखेन अभिधानं कुर्यात् उत कारणमुखेन इति विषये वक्तुः विवक्षा एव प्रधानम्। तेन 'कारणमुखेन निर्देशः कार्यः' इति नियमो न हि नित्यः। तेन नियमस्यास्य नित्यत्वाभावात् वक्ता स्वविवक्षातः निर्देशं कुर्यादिति।

---

[३०३] न्या.सू.-१/१/२

## ❖ चेष्टेन्द्रियार्थाश्रयः शरीरम्[३०४]

द्वादशप्रमेयपदार्थेषु आत्मनो लक्षणं कीर्तितं पूर्वसूत्रे। अतः प्रस्तुतसूत्रेण आत्मनः परं क्रमानुसारं द्वितीयप्रमेयपदार्थस्य शरीरस्य लक्षणं कीर्तितम्। अतो विश्वनाथेन *न्यायसूत्रवृत्तौ* निगदितं - "क्रमप्राप्तं शरीरं लक्षयति "[३०५] इति। किन्तु न्यायाचार्येण महर्षिणा वात्स्यायनेन प्रस्तुतसूत्रस्यास्य व्याख्यानप्रारम्भे आदौ निगदितं - "तस्य भोगाधिष्ठानम्"[३०६] इति। वाक्येनानेन महर्षिणा वात्स्यायनेन अभिहितं यत् शरीरमेवात्मनः सुखदुःखयोः भोगस्थानम्। अर्थात् शरीरावच्छेदेनैव जीवात्मनः सुखदुःखयोः भोगो जायते। अतः शरीरं विना तद् भवितुं नार्हतीति सिद्धान्तं प्रकाशयता सूत्रकारेण आत्मनः परं शरीरस्यैव लक्षणं करणीयमिति विधृतम्। सूत्रकारेण महर्षिणा गौतमेन प्रस्तुतसूत्रेण शरीरस्य लक्षणत्रयम् उल्लिखितम्। तद्धि १.चेष्टाश्रयत्वम्, २.इन्द्रियाश्रयत्वम्, ३.अर्थाश्रयत्वञ्च इति।

शरीरस्य लक्षणत्रयमाश्रित्य भाष्यकारेण वात्स्यायनेन तथा *न्यायसूत्रवृत्ति*कारेण विश्वनाथेन स्वस्ववचोविन्यासवैचित्र्येण व्याख्यानं प्रदत्तम्। किन्तु तयोः व्याख्यानस्य वचोविन्यासवैचित्र्ये वैलक्षण्यमपि स्फुटीभवति। भाष्यकारेण तु शरीरं- कथं चेष्टाश्रयः ? कथं कथमिन्द्रियाश्रयः ? कथं वार्थाश्रयः? भवतीति प्रश्नत्रयमुत्थाय प्रस्तुतसूत्रस्यास्य व्याख्यानं विहितम्। तत्प्रसङ्गेन तत्र भाष्यकारस्य व्याख्याने चेष्टेन्द्रियार्थानां वर्णना प्राप्यते। किन्तु *न्यायसूत्रवृत्ति*कारेण आचार्यविश्वनाथेन तु प्रस्तुतसूत्रस्यास्य विशदव्याख्या प्रदत्ता। विविधप्रश्नान् उत्थाय तस्य समाधानमपि प्रदत्तम्। तदवसरे च

---

[३०४] न्या.सू.-१/१/११

[३०५] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९४

[३०६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९३

प्रस्तुतसूत्रस्य सूक्ष्मतया व्याख्यानं कृतम्। तद्धि भाष्यकारवृत्तिकारयोः प्रस्तुतसूत्रव्याख्याने यद् वैलक्षण्यं प्रस्फुटितं तदेवात्राधस्तात् यथामति वर्ण्यते।

तथाहि चेष्टाश्रयः इन्द्रियाश्रयः अर्थाश्रयश्च शरीरं भवति। किन्तु अत्र का नाम चेष्टा ? अत्रोच्यते चेष्टापदस्य सामान्यार्थः क्रिया सत्त्वेऽपि अत्र चेष्टापदेन क्रियाविशेषो बोध्यते। यदि उच्यते चेष्टेति सामान्यवाचिशब्दः विशेषार्थं कथं बोधयतीति चेद् अत्रोच्यते सामर्थ्यवशात्। एकः शब्दः सामान्यार्थवाचकत्वेऽपि सामर्थ्यवशाद् विशेषार्थं बोधयति। अत्र सामर्थ्यं कीदृशम् ? अत्रोच्यते सामर्थ्यं नाम प्रकरणप्रभृतिः। यथा - ' ब्राह्मणान् भोजय ' इति वाक्ये ब्राह्मणशब्दः ब्राह्मणकुलस्थप्रत्येकब्राह्मणवाचकत्वेऽपि अशेषब्राह्मणानां भोजने असमर्थ्यत्वे तत्सन्निहितप्रकरणापन्नब्राह्मणविशेषाणां भोजने तत्रैव तात्पर्यम्। एवं चेष्टाशब्दः क्रियामात्रस्य वाचकत्वेऽपि अत्र क्रियाविशेषं बोधयति। तद्विशेषक्रिया का ? अत्रोच्यते भाष्यकारेण- "ईप्सितं जिहासितं वार्थमधिकृत्य ईप्सा-जिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा, सा यत्र वर्तते तच्छरीरम्।"[३०७] इति। अर्थात् अभीष्टवस्तुनः प्राप्तेः तथा अहितवस्तुनः निवृत्तेः इच्छायां प्रयत्नशीलपुरुषस्य तत्प्राप्तेः तन्निवृत्तेरुपायस्य यदनुष्ठानात्मकसमीहा सा चेष्टा। अत एव प्रयत्नशीलपुरुषस्य तादृशविशिष्टक्रिया एव चेष्टा, न तु या कापि क्रिया। यदि अत्र या कापि क्रिया चेष्टा स्यात्तदा घटादिरपि शरीरं भवेत्।

किन्तु वृत्तिकारेण चेष्टायाः भिन्नं लक्षणं प्रदत्तम्। तदुक्तं वृत्तिकारेण- "चेष्टात्वं च प्रयत्नजन्यतावच्छेदको जातिविशेषः।"[३०८] इति। अत्रायमाशयः-

---

[३०७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९३-१९४

[३०८] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९४

चेष्टात्वं हि जातिविशेषः किन्तु तद्धि प्रयत्नजन्यतायाः अवच्छेदकम्। पूर्वं भाष्यनये दृष्टं यत् इष्टप्राप्तेः तथा अनिष्टनिवृत्तेः इच्छायां पुरुषस्य प्रयत्नात् उत्पन्नं यत् तदुपायस्य अनुष्ठानात्मकक्रिया हि चेष्टा इति। अत एव चेष्टा हि प्रयत्नपूर्वका प्रयत्नजन्या वा। प्रयत्नजन्यताख्यधर्मो हि चेष्टानिष्ठः। एवं अनेकाः चेष्टाः विद्यन्ते। प्रत्येकचेष्टायाः 'इयं चेष्टा, इयं चेष्टा' इत्येवमनुगतप्रतीतिर्भवति। अत एव तदनुगतप्रतीतेः कारणीभूतानुगतधर्मवत्त्वं चेष्टात्वं वा हि एकविशेषजातिपदार्थः। अत एव प्रयत्नजन्या या चेष्टात्मिका क्रिया, तन्निष्ठजन्यता हि एकधर्मविशेषः। चेष्टायाः चेष्टात्वं, क्रियात्वं, प्रमेत्वं प्रभृतिधर्माः विद्यन्ते। किन्तु एतत्प्रयत्नजन्यतायाः अवच्छेदकधर्मः केवलं चेष्टाजातिरेव भवति। यतो हि अवच्छेदकत्वं नाम अन्यूनम् अनतिरिक्तत्वम्। चेष्टात्वधर्मत्वमपि निखिलचेष्टानिष्ठम्, न च तद्भिन्नक्रियादिनिष्ठम्। अत एव चेष्टात्वं हि प्रयत्नजन्यतावच्छेदकजातिविशेषः इति। एवं वृत्तिकारेण चेष्टाशब्दस्य व्याख्या कृता। किन्तु वृत्तिकारेण न केवलम् अत्रैव मौनम्, तेन हि 'चेष्टाश्रयः शरीरम्' इति शरीरलक्षणमपि व्याख्यापितं तथा लक्षणस्यास्य अव्याप्त्यादिदोषविचारोऽपि कृतः। तथाहि कदाचित् अविचलितशरीरेऽपि हस्तादिचेष्टा दृश्यते। अतः 'चेष्टाश्रयः शरीरम्' इत्युक्ते शरीरस्य हस्ताद्यवयवेऽपि लक्षणमिदमतिव्याप्तं स्यात्। अत एव लक्षणे 'अन्त्यावयवित्वे सति ' इति विशेषणं देयम्। अत एव वृत्तिकारेण विश्वनाथेन भाषितं- "न च शरीरावयवेऽतिव्याप्तिः, अन्त्यावयवित्वेन विशेषणात्।"[३०९] इति।

[३०९] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९४-१९५

इदानीं प्रश्नः स्यात् निष्क्रियशरीरे उदासीनवस्तुनः प्राप्तये प्रवृत्तिः न भवति तथा परिहारार्थं निवृत्तिरपि न भवतीति कृत्वा निष्क्रियशरीरे लक्षणमिदम् अव्याप्तं स्यादिति चेद् उच्यते - 'तादृशे मानाभावात्' इति। तदुक्तं वृत्तिकारेण विश्वनाथेन - "न च निष्क्रियशरीरेऽव्याप्तिः तादेशे मानाभावात्।"[३१०] इति। अत्रायमाशयः- उदासीनवस्तु प्रति प्रवृत्तिनिवृत्तिरूपचेष्टा नास्ति, किन्तु तस्मिन् काले जीवनधारणेच्छया प्राणानाशादिचेष्टा (क्रिया) तत्र वर्तते एव। अर्थात् अन्यक्रिया तु विद्यते एव। अतो निष्क्रियशरीरं नास्ति एव। तथा च, वृक्षादिशरीरमपि न निष्क्रियम्। तस्य स्थावरत्वेऽपि तत्र अन्तःक्रिया प्रचलति एव। वृक्षादिशरीरमपि चेष्टाश्रयः भवति। जैनदार्शनिकाः वृक्षस्य त्वगेवेन्द्रियमिति वदन्ति। उक्तञ्च मनुना – "अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः "[३११] इति। इदमेवाभिप्रेत्य विश्वनाथेनोक्तं निष्क्रियशरीरं नास्ति इति।

यदि कश्चित् मन्यते यत् निष्क्रियशरीरं नास्तीति न युक्तं तथा वृक्षादिशरीरं निष्क्रियमिति तदा तत्राव्याप्तिः स्यादेव। अस्याः आशङ्कायाः समाधानार्थमेव विश्वनाथेन पुनः उक्तं यत् "अत एव वाऽऽह इन्द्रियार्थाश्रयः शरीरम्।"[३१२] इति। अर्थात् इन्द्रियाश्रयत्वं तथा अर्थाश्रयत्वमपि शरीरं भवति। यदि तत्र इन्द्रियाश्रयत्वस्य अर्थाश्रयत्वस्य वा विद्यमानत्वात् न अव्याप्तिः। किञ्च, 'इन्द्रियार्थाश्रयः शरीरम् ' इत्यत्र येन केनापि सम्बन्धेन अयं व्यवहारः उपपन्नो भवति वा ? उत अत्र विशेषसम्बन्धो वर्तते ? अत्र *तात्पर्यटीका*कारमते विशेषसम्बन्धो वर्तते, न चेत् यदि येन केनापि सम्बन्धेन भवति चेत्

---

[३१०] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९५

[३११] मनु.-१/४९

[३१२] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९५

संयोगसम्बन्धेन इन्द्रियाणामाश्रयः घटादिरपि भवति, तेन घटादेरपि शरीरत्वप्रसङ्गः स्यात्। तदुक्तं *तात्पर्यटीका*कारेण वाचस्पतिमिश्रेण- "संयोगितया त्विन्द्रियाश्रयत्वे घटादीनामपि शरीरत्वप्रसङ्गः, तेषामपीन्द्रियसंयोगित्वादिति भावः।" इति।[३१३] अत एव विशेषसम्बन्धेनैव इन्द्रियाणामाश्रयः भवति शरीरम्। स च अवच्छेदकताख्यस्वरूपसम्बन्धविशेषः। यथा 'अयं चक्षुष्मान् देवदत्तः' इत्येवं प्रतीतिरेव चक्षुरादीन्द्रियदेवदत्तादिशरीरयोः आश्रयत्वसम्बन्धे प्रमाणम्। अत एवोक्तमाचार्यविश्वनाथेन *न्यायसूत्रवृत्तौ*- "इन्द्रियाश्रयत्वञ्च अवच्छेदकताख्य-स्वरूपसम्बन्धविशेषेण, चक्षुष्मान् देवदत्तोऽयमित्यादिप्रतीतेः।"[३१४] इति।

किन्तु भाष्यकारेण 'इन्द्रियाश्रयः शरीरम्' इति लक्षणस्य व्याख्यानावसरे निगदितं - "कथमिन्द्रियाश्रयः ? यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु प्रवर्तन्ते स एषामाश्रयस्तच्छरीरम्।"[३१५] इति। अर्थात् इन्द्रियाश्रयः नाम न हि इन्द्रियसंयुक्ताधिकरणं, न वा येन केनापि सम्बन्धेन इन्द्रियस्याधिकरणम्। किन्तु शरीरस्य सत्ताप्रयुक्तम्। तत्र इन्द्रियस्य सत्तायास्तथा शरीरस्य विनाशो भवति चेत् इन्द्रियस्यापि विनाशो भवति। अतः शरीरम् इन्द्रियाश्रयो भवति। एवमेकेन वाक्येन भाष्यकृता 'इन्द्रियाश्रयः शरीरम् ' इति लक्षणं व्याख्यापितम्।

'अर्थाश्रयः शरीरम्' इति शरीरलक्षणस्य व्याख्यायां भाष्यकारेणोक्तं- "कथमर्थाश्रयः? यस्मिन्नायतने इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः

[३१३] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९५

[३१४] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९५

[३१५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९४-१९५

प्रतिसंवेदनं प्रवर्तते, स एषामाश्रयस्तच्छरीरमिति।"[३१६] इति। अर्थात् घटादिद्रव्यमपि गन्धाद्यर्थाश्रयत्वात् 'अर्थाश्रयत्वं शरीरत्वम्' इति लक्षणे अतिव्याप्तिरिति चेदत्रोच्यते यदधिष्ठाने इन्द्रियार्थसन्निकर्षहेतुकोत्पन्नयोः सुखदुःखयोरनुभवो जायते स पदार्थः एतत्सुखदुःखरूपार्थसमूहस्य आश्रयो भवति, तदेव शरीरम् इति। किञ्च, अत्रार्थशब्देन चतुर्थप्रमेयपदार्थः गन्धादिः इन्द्रियार्थः न बोध्यते। परं गन्धाद्यर्थप्रयुक्तजीवदेहस्यात्मनि यत् सुखं दुःखञ्च जायते, तत्र प्रस्तुतार्थशब्दस्य लाक्षणिकप्रयोगः इति ज्ञेयम्। यथा 'अन्नं वै प्राणिनः प्राणाः' इति श्रुतिवाक्ये अन्नसाध्यार्थे अन्नशब्दस्य प्रयोगोऽभवत्। शरीरं विना केवलमात्मनि सुखं दुःखञ्च न जायते, तथा च शरीरावच्छेदे एव आत्मनि सुखदुःखयोः मानसप्रत्यक्षरूपानुभवो जायते। अतः शरीरमेव सुखदुःखानुभवस्य अवच्छेदकम्। तेनावच्छेदकतासम्बन्धेन सुखदुःखरूपार्थाश्रयत्वं शरीरस्य लक्षणमिति स्वीकार्यम्। एवं भाष्यकारेण वात्स्यायनेन 'अर्थाश्रयः शरीरम्' इति शरीरस्य तृतीयलक्षणं व्याख्यापितम्। वृत्तिकारेणापि समानमेव वर्णनं कृतम् 'अर्थाश्रयः शरीरम्' इति शरीरस्य तृतीयलक्षणस्य। तथा च, वृत्तिकारेण भाष्यकारस्यापि मतमुद्धृतं *न्यायसूत्रवृत्तौ* । एतेन प्रतीयते यत् अर्थाश्रयशरीरविषये भाष्यकारस्य मतमेव विश्वनाथस्य मतम्। तदुक्तं वृत्तिकारेण विश्वनाथेन - "अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरः, तदाश्रयत्वस्य घटादावतिव्याप्तेः, किन्तु सुखदुःखान्यतरपरः। अत एव भाष्यम्, 'यस्मिन्नायतने सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते स एषामाश्रयस्तच्छरीरम्' इति।"[३१७] इति।

---

[३१६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९५-१९६

[३१७] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९५-१९६

किञ्च, विश्वनाथेन अर्थाश्रयत्वविषये भिन्नतया लक्षणमपि कृतम्। विश्वनाथाचार्येण अर्थशब्दस्यार्थः कृतः 'सुखदुःखान्यतरः' इति। अतः तदनुसारं लक्षणं स्यात् - 'सुखदुःखान्यतराश्रयत्वं शरीरत्वम्' इति। अर्थात् सुखदुःखयोरन्यतरस्य आश्रयो भवति शरीरम्। किन्तु लक्षणमिदं न हि प्रकृततात्पर्यभूतलक्षणम्। अत एव ततश्च विश्वनाथेन स्पष्टतया निगदितं- "वस्तुतस्तु अन्यतराश्रयत्वमपि न लक्षणम्,..."[३१८] इति।

अतः प्रश्नः स्यात् प्रकृतलक्षणं किम् ? अत्रोच्यते वृत्तिकारेण - "...किन्तु सुखाश्रयत्वं दुःखाश्रयत्वं चेति लक्षणद्वये तात्पर्यम्।"[३१९] इति। यद्यपि सुखदुःखयोः आश्रयः जीवात्माऽपि भवति, तद्धि 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्'[३२०] इति पूर्वसूत्रे दृष्टम्। तथापि अत्र आश्रयत्वं समवायसम्बन्धेन बोद्धव्यम्। अत एव सुखसमवायी दुःखसमवायी च जीवात्मा भवति। शरीरस्य सुखदुःखयोः आश्रयत्वेऽपि समवेतत्वं नास्ति। अत एव सुखाश्रयत्वं दुःखाश्रयत्वञ्च इति लक्षणद्वयं जीवात्मनि न अतिव्याप्तं भवति। किञ्चात्र तदाश्रयत्वमवच्छेदकसम्बन्धेन बोद्धव्यम्। किञ्च, हस्तादिकर्तने शोणिधारा निःसरति इति तत्रात्मनः हस्तादावच्छेदे दुःखानुभवो भवति। तेन तु अवच्छेदकताख्यसम्बन्धेन दुःखाश्रयत्वस्य हस्तादौ वृत्तित्वात् तादृशशरीरलक्षणम् अतिव्याप्तं स्यात्। अतस्तद्वारणाय लक्षणे 'अन्त्यावयवित्वे सति' इति सत्यन्तविशेषदलं निवेशनीयम्। तेन सम्पूर्णं लक्षणं स्यात् - 'अन्त्यावयवित्वे सति अवच्छेदकतासम्बन्धेन सुखदुःखाश्रयत्वं शरीरत्वम्' इति। अत्र हस्तादिः

---

[३१८] तदेव,पृ-१९६

[३१९] तत्रैव

[३२०] न्या.सू.,१/१/१०

अवच्छेदकतासम्बन्धेन दुःखाश्रयत्वेऽपि न हि अन्त्यावयवी इति नातिव्याप्तिः। अस्मिन्नेवाभिप्राये विश्वनाथेनोक्तं- "हस्तादेरलक्ष्यत्वे त्वन्त्यावयवित्वेन विशेषणीयम्।"[३२१] इति। एवं वृत्तिकारेण लक्षणस्यास्य स्वर्गीयशरीरे, नरकीयशरीरे, वृक्षादिशरीरे तथा नरसिंहशरीरे अतिव्याप्तिः निवारितः। तदुक्तं तेन - "स्वर्गिशरीरे, नारकिशरीरे, वृक्षादौ च सुखदुःखस्वीकारान्नातिव्याप्तिः। न च तच्छून्यखण्डशरीरेऽव्याप्तिः, सुखाद्याश्रयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। तादृशजातिश्च मनुष्यत्वचैत्रत्वादिः। कल्पभेदेन नरसिंहशरीराणां भेदान्नरसिंहत्वजातिमादाय नरसिंहशरीरे लक्षणसमन्वय इति।"[३२२] इति।

किन्तु पुनः एकः प्रश्नः समुदेति यत् चेष्टा, इन्द्रियम्, अर्थः इति त्रितयं यत्र मिलिततया तिष्ठति तच्छरीरमुच्यते ? उत त्रितयेषु एकः ततोऽधिको वा यत्र तिष्ठति तच्छरीरमुच्यते ? विषयेऽस्मिन् तु भाष्यकारेण वात्स्यायनेन किमपि न वर्णितम्। किन्तु विश्वनाथाचार्येण तु विषयेऽस्मिन् वर्णना कृता। तथाहि तन्मते – न प्रथमपक्षः समीचीनः, अर्थात् चेष्टादित्रितयवत्त्वं न शरीरस्य लक्षणम्, वैयर्थ्यात्। तथाहि अव्याप्ति-अतिव्याप्ति-असम्भवाः इति दोषत्रयरहितं तथा असाधारणधर्मः लक्षणं भवति। एतेषु दोषत्रयेषु यस्य कस्यापि एकस्य विद्यमानात् लक्षणस्य लक्षणत्वं न तिष्ठति। तदा लक्षणं व्यर्थं भवति। 'चेष्टेन्द्रियार्थाश्रयः शरीरम्' इति शरीरलक्षणेऽपि यद्युच्यते चेष्टेन्द्रियार्थाः इति त्रितयं यत्र मिलिततया तिष्ठति तच्छरीरं तदा लक्षणस्यास्य लक्षणत्वं न तिष्ठति। तत्र लक्षणेऽव्याप्तिदोषो भवति। तथाहि किञ्चित् शरीरं चेष्टादित्रितयस्याश्रयः भवति

---

[३२१] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९६

[३२२] तदेव,पृ-१९६-१९७

इति सत्यं किन्तु किञ्चित् शरीरे यथा नरसिंहशरीरे चेष्टा इन्द्रियञ्च तिष्ठति किन्तु सुखदुःखरूपार्थः न तिष्ठति इति। चेष्टादित्रितयस्य मिलिततया तच्छरीरे अविद्यमानत्वात् चेष्टादिमिलिताश्रयत्वरूपशरीरलक्षणं न सङ्गतं भवति। तेनाव्याप्तिदोषो भवति। अत एव लक्षणस्य लक्षणत्वं न तिष्ठति। एतत्तात्पर्ये वृत्तिकारेण निगदितम् - "अत्र चेष्टादिमिलिताश्रयत्वं न लक्षणम्, वैयर्थ्यात्..."[३२३] इति।

अपि च, 'चेष्टा च इन्द्रियाणि च अर्थौ च' इति विग्रहे द्वन्द्वसमासे चेष्टेन्द्रियार्थाः इति पदं निष्पन्नम्। तथा तेषाम् आश्रयः चेष्टेन्द्रियार्थाश्रयः इति षष्ठीसमासेन चेष्टेन्द्रियार्थाश्रयः इति पदं निष्पद्यते। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमात् आश्रयपदं प्रत्येकमन्वयात् चेष्टाश्रयत्वम्, इन्द्रियाश्रयत्वम्, अर्थाश्रयत्वम् इति त्रितयमेव शरीरस्य लक्षणे पर्यवसितम्। अत एव वृत्तिकारेण भणितम्- "अपि त्वाश्रयपदस्य प्रत्येकमन्वयात् चेष्टाश्रयत्वादिलक्षणत्रये तात्पर्यम्।"[३२४] इति।

एवं प्रस्तुतसूत्रस्यास्य व्याख्यानवेलायां भाष्यकारवृत्तिकारयोः कुत्रचित् सादृश्यं कुत्रचिच्च वैलक्षण्यमपि दृश्यते।

किञ्च, प्रस्तुतसूत्रस्य व्याख्यायां वृत्तिकारेण स्पष्टतया वर्णना कृता किन्तु भाष्यकारस्य प्रस्तुतसूत्रस्य व्याख्यायां स्पष्टता न दृश्यते इति विज्ञेयम्।

---

[३२३] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९४

[३२४] तदेव,पृ-१९४

## ❖ घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः[३२५]

द्वितीयप्रमेयपदार्थस्य शरीरस्य वर्णनानन्तरं तृतीयप्रमेयपदार्थस्य इन्द्रियस्य वर्णनं कृतं प्रस्तुतसूत्रेण महर्षिणा गौतमेन। वस्तुतः प्रमेयसूत्रे[३२६] इन्द्रियपदेन 'इन्द्रियम्' इति प्रमेयमात्रस्योद्देशः कृतः। उद्देशानन्तरं शास्त्रीयरीत्यनुसारं लक्षणं विधेयम्, अतः प्रस्तुतसूत्रेण इन्द्रियस्य लक्षणं विहितम्। प्रस्तुतसूत्रे च घ्राणम्, रसनं, चक्षुः, त्वक् श्रोत्रञ्च इत्यादिविशेषेन्द्रियस्य नामसंकीर्तनं तथा लक्षणं विहितम्। अतः प्रस्तुतसूत्रेण इन्द्रियस्य विभागोऽपि दर्शितः सूत्रकारेण। अत एव वृत्तिकारेण विश्वनाथेन वृत्तावादौ निगदितम्- "इन्द्रियं विभजते लक्षयति च"[३२७] इति। भाष्यकारेण तु सूत्रस्यास्य प्रारम्भे अवतातरणांशे ' भोगसाधनानि ' इति वाक्येन इन्द्रियस्य सामान्यलक्षणं सूचितम्। किञ्च, भाष्यकारेण सूत्रोक्तघ्राणादिशब्दानां व्युत्पत्तिं व्याख्यायता घ्राणादीन्द्रियाणां विशेषलक्षणं तथा विभागोऽपि प्रदर्शितः इति भाष्यव्याख्यातो बोद्धव्यम्। यथा – १.जिघ्रति अनेन इति घ्राणं, गन्धं गृह्णाति इत्यतः घ्राणं गन्धग्राहकम् इन्द्रियम्, २.रसयति अनेन इति रसनं, रसं गृह्णाति इत्यतः रसनं रसग्राहकेन्द्रियम्, ३.चष्टे अनेन इति चक्षुः, रूपं पश्यति इत्यतः चक्षुः रूपग्राहकमिन्द्रियम्, ४.त्वक्स्थानमिन्द्रियं त्वक्, तदुपचारः स्थानादित्यतः स्पर्शग्राहकं त्वगिन्द्रियम्, ५.शृणोति अनेन इति श्रोत्रं, शब्दं गृह्णाति इत्यतः शब्दग्राहकमिन्द्रियं श्रोत्रम् इत्येवं पञ्चेन्द्रियाणां विशेषलक्षणमपि भाष्यवचनात् सूचितं भवति। तदुक्तं भाष्यकारेण वात्स्यायनेन - "जिघ्रत्यनेनेति घ्राणं गन्धं

[३२५] न्या.सू.,१/१/१२

[३२६] न्या.सू.,१/१/१०

[३२७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९८

गृह्णातीति। रसयत्यनेनेति रसनं, रसं गृह्णातीति। चष्टेऽनेनेति चक्षुः, रूपं पश्यतीति। त्वक्स्थानमिन्द्रियं त्वक्, तदुपचारः स्थानादिति। शृणोत्यनेनेति श्रोत्रं, शब्दं गृह्णातीति। एवं समाख्यानिर्वचनसामर्थ्याद् बोध्यं स्वविषयग्रहण-लक्षणानीन्द्रियाणीति।"[३२८] इति।

ननु मनः इति षडिन्द्रियस्य विद्यमानत्वात् कथं केवलं पञ्चेन्द्रियाणां विशेषलक्षणम् ? अत्रोच्यते मनः इति षडिन्द्रियस्य प्रस्तुतसूत्रे अनुल्लेखात् भाष्यकारेण पूर्वं चतुर्थसूत्रभाष्ये तद्वर्णितम्। प्रस्तुतसूत्रभाष्ये तु भाष्यकारेण मनसः विषये किमपि नालोचितम्। किन्तु प्रस्तुतसूत्रस्य व्याख्यानावसरे मनोविषये तु वृत्तिकारेण स्वमतं प्रकाशितम्। तदुक्तं तेन- "यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव, तथापि घ्राणेत्यादेरुपलक्षणपरत्वान्न दोषः।"[३२९] इति। अत्रायमाशयः- घ्राणादीन्द्रियाणि पृथिव्यादिभूतेभ्यो जायन्ते। किन्तु मनोऽपि इन्द्रियम्, तद्धि न निष्प्रामाणिकम्, तस्य इन्द्रियत्वञ्च अभ्युपगमसिद्धान्तबलादेव सिद्धम्। यत्पदार्थविषये शास्त्रे किमपि साक्षात् नोपनिबद्धं किन्तु शास्त्रे अभ्युपगतम्, तद्धि अभ्युपगमसिद्धान्तः। यथा उद्द्योतकरेणापि साक्षात् मनसः इन्द्रियत्वविषये उक्तं - "योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽयमभ्युपगतसिद्धान्त इति। यथा नैयायिकानां मन इन्द्रियमिति।"[३३०] इति। अत एव मनसः इन्द्रियत्वं यदि नैयायिकमते स्वीकृतं तर्हि इन्द्रियविभाजनसूत्रे कथं तन्नोल्लिखितम् ? एतदुत्तरे उच्यते घ्राणादिपदमत्र सूत्रे उपलक्षणे प्रयुक्तम्। उपलक्षणत्वञ्च स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम्। अत एव

[३२८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९७-१९८

[३२९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९८

[३३०] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२६६

सूत्रस्थितघ्राणादिपदं स्वप्रतिपादकत्वे सति मन इति पदार्थस्यापि प्रतिपादकं भवति। अतो मनः इन्द्रियमिति बोधितत्वात् न असङ्गतिरिति ज्ञेयम्।

किञ्चात्रावधेयं यद् यद्यपि भाष्यकारेण प्रस्तुतेऽस्मिन् सूत्रे मनसः इन्द्रियत्वविषये किमपि नालोचितं तथापि चतुर्थन्यायसूत्रस्य भाष्ये तदालोचितम्। तत्र तेन मनसः इन्द्रियत्वविषये निगदितम् - "इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात्, भौतिकानीन्द्रियाणि नियतविषयाणि, सगुणानां चैषामिन्द्रियभाव इति, मनस्त्वभौतिकं सर्वविषयं च, नाऽस्य सगुणस्येन्द्रियभाव इति। सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधि चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्यामः (१/१/१६) इति। मनसश्चेन्द्रियभावान्न वाच्यं लक्षणान्तरमिति।"[३३१] इति। एतेन प्रतीयते यत् मनसः षडिन्द्रियत्वं भाष्यकारस्यापि सम्मतम् इति।

इदानीं प्रश्नः स्यात् यत् घ्राणादीन्द्रियाणि उपलक्षणत्वेन गृहीत्वा यदि मनसः इन्द्रियत्वं प्रतिपाद्यते तदा 'भूतेभ्यः' इति प्रस्तुतसूत्रे पदस्यास्य प्रयोगे असङ्गतिः स्यात् किम् ? अत्रोच्यते 'भूतेभ्यः' इत्यत्र पञ्चमीविभक्तेरर्थः जन्यत्वम्। तेन च सम्पूर्णसूत्रार्थः स्यात् पृथिव्यादिभूतजन्यानि हि घ्राणादीन्द्रियाणि इति। अत्र घ्राणादीनां भूतजन्यत्वेऽपि मनसो भूतजन्यत्वं नास्ति। न्यायनये मनसः नित्यत्वस्वीकारात्। अत एव प्रस्तुतसूत्रे मनसः इन्द्रियत्वं स्वीकृत्य तस्य सूत्रे प्रयोगः क्रियते चेत् तदा 'भूतेभ्यः' इति पदप्रयोगः उचितः न स्यात्। अतस्तदसङ्गतिनिवारणाय विश्वनाथेन कथितं - "वस्तुतस्तु 'इन्द्रियाणि'-इत्यस्य

---

[३३१] तदेव, पृ-१२३-१२९

बहिरिन्द्रियाणीत्यर्थः। तेन 'भूतेभ्यः' इत्यस्य नासङ्गतिः।''[३३२] इति। अत्रायमाशयः- 'इन्द्रियाणि' इत्यत्र इन्द्रियपदेन केवलं बहिरिन्द्रियाणि बोध्यानि। तेन मनसः ग्रहणं न स्यात्। यतो हि मनः अन्तरिन्द्रियम्। तथा च, घ्राणादीन्द्रियाणामुपलक्षणत्वेन गृहीत्वा मनसोऽपि ग्रहणात्, मनसश्च नित्यत्वात् 'भूतेभ्यः' इति पदप्रयोगस्य विरुद्धत्वात् असङ्गतिः स्यात्, किन्तु इन्द्रियपदस्य बहिरिन्द्रियग्रहणे न तत्रासङ्गतिः।

ततश्च वृत्तिकारेण इन्द्रियस्य लक्षणं प्रदाय तस्य लक्षणस्य दोषविचारः कृतः। तथाहि तन्मते इन्द्रियस्य लक्षणं हि 'घ्राणाद्यन्योन्यत्वम् इन्द्रियत्वम्' इति। अर्थात् घ्राणप्रभृत्यन्योन्यत्वं हि इन्द्रियत्वम्। यथा घ्राणपदार्थः घ्राणं, रसनं, चक्षुः, त्वक्, श्रोत्रमिति एतेषाम् अन्यतमः। अतोऽन्यतमत्वं घ्राणे वृत्तित्वात् इन्द्रियलक्षणं घ्राणे सङ्गतं भवति। एवमन्यत्रापि बोध्यम्। तदुक्तं वृत्तिकारेण - ''अत्र चैतानि इन्द्रियाणीति वदता घ्राणद्यन्योन्यत्वं लक्षणमिति सूचितम्।''[३३३] इति।

ततश्च वृत्तिकारेण प्रत्यक्षजनकतावच्छेदकतया इन्द्रियत्वं प्रतिपादितम्। किन्तु इन्द्रियत्वं न जातिः, साङ्कर्यात्। उक्तं हि *भाषापरिच्छेदस्य मुक्तवल्याम्* - 'इन्द्रियत्वं न जातिः, पृथिवीत्वादिना साङ्कर्यादिति।' इति। अतस्तस्य उपाधित्वमुक्तं वृत्तिकारेण। किन्तु 'प्रत्यक्षजनकतावच्छेदकत्वम् इन्द्रियत्वम् ' इति लक्षणस्यात्मनि अतिव्याप्तित्वात् न हि एतत् निर्दुष्टं लक्षणम्। अस्मादेव कारणात् मन्ये वृत्तिकारस्य स्वरसो नास्ति। अतस्तेन 'इति अन्ये' इति उक्तम्। तदुक्तं वृत्तिकारेण- ''प्रत्यक्षजनकतावच्छेदकतया इन्द्रियत्वमखण्डोपाधिरूपमि-

[३३२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९८-१९९

[३३३] तदेव,पृ-१९९

त्यन्ये।''[३३४] इति। तर्हि इन्द्रियस्य प्रकृतलक्षणं किम् ? इति विषये तु *न्यायसूत्रवृत्तौ* किमपि न उक्त्वापि विश्वनाथेन *सिद्धान्तमुक्तावल्यां* स्पष्टीकृतम्। किन्तु तन्मतं हि *तत्त्वचिन्तामणि*कारस्य मतम्। तत्त्वचिन्तामणौ इन्द्रियस्य लक्षणविषये निगदितमस्ति- ''शब्देतरोद्भूतविशेषगुणाश्रयत्वे सति ज्ञानहेतुमनःसंयोगाश्रयत्वम्।'' इति। अर्थात् यत्पदार्थः शब्दभिन्नोद्भूतविशेषगुणानामाश्रयो भवति तथा ज्ञानं प्रति हेतुभूतमनःसंयोगस्याश्रयो भवति स पदार्थः इन्द्रियमिति बोद्धव्यम्।

नैयायिकमते पृथिवी हि घ्राणस्य उपादानम्, रसनस्य उपादानम् अप्, तेजो हि चक्षुरिन्द्रियस्योपादानम्, त्वगिन्द्रियस्योपादानं मरुत्, तथा श्रोत्रेन्द्रियस्योपादानम् आकाशम्। किन्तु सांख्यमते सत्त्वरजःतमसां साम्यावस्था हि प्रकृतिरुच्यते। किन्तु विक्षोभे सति अर्थात् सत्त्वम्, रजः, तमः इति गुणत्रयस्य साम्यावस्थायाः विनष्टे सति क्रमशः सृष्टिप्रक्रिया प्रारभते। प्रकृतितः महत्, महतः अहङ्कारतत्त्वम्, अहङ्कारतत्त्वात् पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि तथा पञ्च तन्मात्राणि जायन्ते। तदुक्तं *सांख्यतत्त्वकौमुद्यां* - ''तथाहि महत्तत्त्वमहङ्कारस्य प्रकृतिः, विकृतिश्च मूलप्रकृतेः। एवं अहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणां च प्रकृतिः, विकृतिश्च महतः।''[३३५] इति।

अत एतेन दृश्यते यत् अहङ्कार एव इन्द्रियस्य प्रकृतिः। किन्तु प्रस्तुतसूत्रे 'भूतेभ्यः' इति पदग्रहणात् सांख्यमतमिदं निराकृतम्। यतो हि तत्तद्भूतात्मकं हि तत्तदिन्द्रियम्, न तु अहङ्कारात्मकम्। किञ्च, सांख्यमते

---

[३३४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२००

[३३५] सांख्यतत्त्वकौमुदी,पृ-३७

उपादानकारणं तथा तत्कार्यम् अभिन्नं भवति। अतोऽहङ्कारात् घ्राणादीन्द्रियाणामुत्पत्तिर्भवति। अतः सकलानि इन्द्रियाणि अहङ्कारात्मकानि। तेन सकलेन्द्रियस्य सकलविषयग्रहणसामर्थ्यं भवति। किन्तु लोके तु घ्राणेन्द्रियस्य केवलं गन्धग्रहणसामर्थ्यमस्ति, रूपादिग्रहणसामर्थ्यं नास्ति। एवं घ्राणादीन्द्रियस्य यद्विषयनियमोऽस्ति तद्धि सर्वसम्मतः। अत एव भाष्यकारेण वात्स्यायनेन निगदितं - " सति च विषयनियमे स्वविषयग्रहणलक्षणं भवतीति।"[३३६] इति। विषयेऽस्मिन् वृत्तिकारस्य समानमेव मतमाचक्षते। सांख्यमतमिदं वृत्तिकारेणापि समानयुक्त्या खण्डितम्। तदुक्तं वृत्तिकारेण विश्वनाथेन- "तेनेन्द्रियाणामहङ्कारप्रकृतिकत्वं नेति मन्तव्यम्।"[३३७] इति। एवं सांख्यमतखण्डने भाष्यकारवृत्तिकारयोः सादृश्यं परिलक्ष्यते।

## ❖ पृथिव्यापस्तेजो वायुराकाशमिति भूतानि[३३८]

इन्द्रियाणि भूतेभ्यः जायन्ते इति सिद्धान्तः पूर्वसूत्रे आलोचितः। अतः इन्द्रियाणां कारणानि प्रकृतयो वा भूतानि। कानि तानि भूतानि इति जिज्ञासायां तथा उद्देभानन्तरं भूतविशेषजिज्ञासायां महर्षिणा गौतमेन प्रस्तुतसूत्रं कृतम्। तेन तत्सूत्रात् ज्ञायते पृथिवी, जलम्, तेजः, वायुः, आकाशम् इति पञ्च भूतानि।

ननु 'पृथिव्यापस्तेजोवाय्वाकाशानि भूतानि' इति समासेनैव भूतविशेषाणाम् उल्लेखसम्भवात् कथं पृथक् उपदेशः ? संशयस्यास्य निरसने

[३३६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-१९९

[३३७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०१

[३३८] न्या.सू.-१/१/१३

भाष्यकारेण तु किमपि न व्याख्यातम्। किन्तु वृत्तिकारेण विश्वनाथेन तु व्याख्यातम् - "आरम्भे परस्परानपेक्षत्वसूचनायाऽसमासकरणम्।"[339] इति। अत्रायमाशयः – अद्वैतवेदान्तिनः स्थूलपदार्थस्य उत्पत्तौ क्षितिः, अप्, तेजः, मरुत्, व्योम् इति पञ्चभूतपदार्थानां परस्परसापेक्षत्वं स्वीकुर्वन्ति।[340] किन्तु नैयायिकमते तु सजातीयक्षितिपरमाणुद्वयात् एकः क्षितिद्व्यणुकः उत्पद्यते, सजातीयक्षितिद्व्यणुकत्रयात् एकः पार्थिवत्र्यणुको जायते। एवं भूतानि परस्परनिरपेक्षतया एव स्थूलपदार्थस्य उत्पादकानि भवन्ति। एतत्परस्परनिरपेक्ष-त्वसूचनार्थमेव सूत्रे समासः न कृतः।

किन्तु महर्षिणा वात्स्यायनेन तु भिन्नाभिप्रायः प्रकाशितः। तन्नये परवर्तिसूत्रे तत्तद्भूतजन्यविशेषविशेषकार्याणि उपस्थापयिष्यति, तदनायास-बोधनाय एव एतद्विशेषविशेषभूतानां पृथक्तया उपदेशम् अकरोत्। तदुक्तं भाष्यकारेण वात्स्यायनेन- "संज्ञाशब्दैः पृथगुपदेशो भूतानां विभक्तानां सुवचं कार्यं भविष्यतीति।"[341] इति।

किन्तु भूतत्वं नाम किम् इति विषये तु भाष्यकारेण किमपि न चर्चितम्। परं वृत्तिकारेण भूतत्वविषये उक्तं- "भूतत्वं तु बहिरिन्द्रियग्रहणयोग्य-विशेषगुणवत्त्वम्।"[342] इति। अर्थात् घ्राणादीनि यत् पञ्च बहिरिन्द्रियाणि, तेषामिन्द्रियाणां ग्रहणयोग्यगन्धादिगुणाः, तत्तद्गुणविशिष्टद्रव्यमेव भूतपदार्थः। एवमन्यभूतपदार्थेऽपि लक्षणसङ्गतिः।

---

[339] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०२

[340] पञ्चीकरणप्रक्रिया द्रष्टव्या

[341] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०१

[342] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०२

प्रस्तुतसूत्रस्यास्य तथा तद्भाष्यस्य *न्यायवार्त्तिके* अनुल्लेखात् केचन मन्यन्ते यत् भाष्यकारेण स्वयं 'कानि पुनरिन्द्रियकारणानि' इति प्रश्नमुत्थाय ततश्च तस्योत्तरं प्रदत्तम्। अतः सर्वमेव भाष्यवचनमिति। किन्तु आचार्येण वाचस्पतिमिश्रेण स्वकृतौ *'न्यायसूचीनिबन्धः'* इति ग्रन्थे एतत्सूत्रमध्ये परिगणितम्। 'संज्ञाशब्दैः पृथगुपदेशः...' इत्यादिभाष्यवचनेन तत्प्रयोजनं कथितं भाष्यकारेण इत्यतः ज्ञायते यत् भाष्यकारमतेऽपि एतत्सूत्रमिति। आचार्यविश्वनाथेनापि एतत्सूत्ररूपेण गृहीतम्।

## ❖ गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः[३४३]

प्रमेयविभागसूत्रे 'अर्थः' इति प्रमेयस्य चतुर्थस्थाने इन्द्रियस्य परमेव उद्देशत्वात् 'येन क्रमेणोद्देशो विहितः तेनैव क्रमेण लक्षणं कर्तव्यम्' इति नियमात् इन्द्रियलक्षणानन्तरमेव महर्षिगौतमेन प्रस्तुतसूत्रेऽस्मिन् अर्थस्य लक्षणं कृतम्। किञ्चार्थस्य विभागोऽपि कृतः प्रस्तुतसूत्रेऽस्मिन्। इदमेव तात्पर्यं व्यक्तयितुं विश्वनाथाचार्येणोक्तं - "क्रमप्राप्तमर्थं विभजते लक्षयति च "[३४४] इति।

प्रस्तुतसूत्रस्यास्य सामान्यार्थो हि गन्धः, रसः, रूपं, स्पर्शः, शब्दश्चेति यथाक्रमं पृथिव्याः, आपः, तेजसः, मरुतः, आकाशस्य च गुणाः, एते हि अर्थाः इति। एवं भाष्यकारेण प्रस्तुतसूत्रस्य सरलव्याख्यानं प्रदर्शितम्। तेन हि न प्रश्नमुत्थाय विविधशङ्कायाः निरसनं कृतम्। किन्तु वृत्तिकारेण तु

---

[३४३] न्या.सू.-१/१/१४

[३४४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०२

विविधप्रश्नमुत्थाप्य तस्य प्रश्नस्योत्तरमपि प्रदत्तम्। येन च सूत्रार्थः सुष्ठुतया परिष्कृतोऽभूत्। किञ्च, तेन सूत्रस्यास्याधिकव्याख्यानमपि दर्शितम्। यथा वैशेषिकदर्शने अर्थशब्देन द्रव्यं, गुणः, कर्मेति पदार्थत्रयं बोधितम्। तत्समानतन्त्रे न्यायदर्शनेऽपि तस्य सम्मतिर्दृश्यते। तेन च, यदि अर्थशब्देन द्रव्यम्, गुणः, कर्म च इति पदार्थत्रयं बोध्यते चेत् तदा कथं गन्धः, रसः, रूपम्, स्पर्शः, शब्दश्चेति एते अर्थाः इत्युच्यन्ते ? शङ्कायाः अस्याः समाधानार्थं सूत्रकारेण सूत्रे एव निगदितं 'तदर्थाः' इति। अर्थात् सूत्रे केवलमर्थपदं नास्ति किन्तु 'तदर्थाः' इति पदमस्ति। अत्र तच्छब्देन पूर्वलक्षितम् इन्द्रियमेव गृह्यते। अत एव तदर्थाः नाम तेषाम् इन्द्रियाणाम् अर्थाः विषयाः इति। एकैकेन्द्रियस्य एकैकविषयः गृह्यते। यथा – चक्षुरिन्द्रियस्य ग्राह्यविषयः रूपम्, रसनेन्द्रियस्य ग्राह्यविषयः रसः, घ्राणेन्द्रियस्य ग्राह्यविषयः गन्धः, त्वगिन्द्रियस्य ग्राह्यविषयः स्पर्शः, श्रोत्रेन्द्रियस्य च ग्राह्यविषयः शब्दः। एवम् एकैकेन्द्रियस्य ग्राह्यः तदेकैकविषयः एव तत्तदिन्द्रियस्य अर्थः इत्युच्यते। यदि सामान्यतया केवलम् अर्थः इत्युच्यते तदा अर्थपदेन द्रव्यगुणकर्माणि अपि गृहीतुं शक्यते। किन्तु वस्तुस्थितिस्तु भिन्ना। अत्र एकैकेन्द्रियस्य ग्राह्यः अर्थः एव तदर्थपदेन वाच्यो भवति। अत एवात्रार्थपदेन गन्धादिरेव गृह्यते न तु द्रव्यादिः। तेन च तदाशङ्कापि निवारिता भवति। अत एव आचार्यविश्वनाथेन निगदितं- "वैशेषिकाणां द्रव्यगुणकर्मस्वर्थशब्दाभिधेय-त्वमतः पञ्चानां गन्धादीनामेव कथं तत्त्वमित्याशङ्कानिरासाय तदर्था इत्युक्तम्। तेषामिन्द्रियाणामर्थाः – विषयाः, उद्दिष्टा अपि त एवेत्याशयः।"[३४५] इति।

[३४५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०२-२०३

भाष्यकारेण तु न्यायभाष्ये अर्थस्य लक्षणं किमपि नोक्तम्। किन्तु *न्यायसूत्रवृत्ति*कारेण अर्थस्य लक्षणविषये चर्चा विहिता। तेन हि 'तदर्थाः' इत्यत्र तत्पदेन बहिरिन्द्रियपञ्चकं परामृश्य तथा गन्धादिविशेषगुणान् अर्थपदस्य लक्ष्यीकृत्य अर्थलक्षणमेवं विहितम् - ''एकैकबहिरिन्द्रियमात्रग्राह्यविशेषगुणत्वम् अर्थत्वम्''[३४६] इति। अर्थात् एकैकः बहिरिन्द्रियमात्रेण ग्राह्यः विशेषगुणः अर्थः इत्युच्यते। पूर्वमेवोक्तं यत् गन्धः केवलं घ्राणमिति बहिरिन्द्रियमात्रेणैव गृह्यते। अत एव गन्धः इति विशेषगुणो हि घ्राणेन्द्रियस्यार्थः। एवं रसादावपि बोद्धव्यम्।

इदानीमेकः प्रश्नः जायते 'पृथिव्यादिगुणाः' इत्यत्र कः समासः? 'पृथिव्यादयश्चैते गुणाश्चेति' इति कर्मधारयसमासे यथा पदमिदम् उत्पन्नं भवति तथैव 'पृथिव्यादीनां गुणाः' इति षष्ठीसमासेऽपि तत्पदं निष्पन्नं स्यात्। अतः उभयसमासेनैव तत्पदस्य निष्पन्नत्वात् संशयो जायते यत् कः पक्षः युक्तियुक्तः ? अतोऽत्र प्रश्नः भवति कोऽत्र समासः ? इति। मीमांसकादिदार्शनिकनये गुणगुणिनोः भेदाभेदात्मकाभेदसम्बन्धस्वीकृतत्वात् अत्र तत्पक्षे कर्मधारयसमासः सम्मतोऽपि नैयायिकनये गुणगुणिनोः तादात्म्यसम्बन्धो नास्ति इति कृत्वा अत्र षष्ठीसमासो विधेयः कर्तव्यो वा। यतो हि षष्ठीसमासो भेदस्थले प्रयुक्तो भवति। 'रामस्य गृहम्' इत्यत्र प्रयुक्तषष्ठीसमासेन सम्बन्धिद्वयस्य भेदः सूचितः। यतो हि 'रामः गृहञ्च' इति भिन्नः भिन्नः पदार्थः। अत एवात्र षष्ठीसमासेन गुणगुणिनोः अभेदवादीनां मतं खण्डितम्। एवञ्चेत् पुनः शङ्का स्यात् मतमिदं प्रामाणिकं वा ? अत्रोच्यते

---

[३४६] तदेव,पृ-२०५

भाष्यादि एवात्र प्रमाणम्। अत एव महामुनिना विश्वनाथेन भणितं- "'पृथिव्यादीनां गुणाः' इति षष्ठीसमासो भाष्यसम्मतः।"[३४७] इति।

प्रस्तुतसूत्रस्य व्याख्याने वृत्तिकारेण विश्वनाथेन 'पृथिव्यादिगुणाः' इति पदस्य समासनिर्णयावसरे भाष्यकारस्य मतमुल्लिख्य षष्ठीसमासे स्वस्य (वृत्तिकारस्य) स्वरसः प्रदर्शितः किन्तु *न्यायसूत्रवार्त्तिक*कारेण विभिन्नसमासस्य सम्भावनां प्रदर्श्य अन्तिमे द्वन्द्वसमासः एव उररीकृतः। 'पृथिव्यादीनि च गुणाश्च' इति विग्रहे द्वन्द्वसमासे, 'पृतिव्यादयो गुणाः येषाम्' इति विग्रहे बहुव्रीहिसमासे, 'पृथिव्यादीनां गुणाः' इति विग्रहे षष्ठीसमासे पदस्यास्य निष्पत्तिर्भवति। एतेषु षष्ठीसमासो न स्यात्। यतो हि षष्ठीसमासे उत्तरपदार्थप्रधानत्वात् गुणरूपोत्तरपदार्थप्रधानत्वात् तदर्थपदेन प्रतिपाद्येन्द्रियार्थेन सह तस्यान्वयत्वात् पूर्वपदार्थपृथिव्यादिना सह अनन्वयात् गन्धादिगुणाः एव इन्द्रियार्थरूपेण पर्यवसिताः स्युः। किन्तु पृथिव्यादिपदार्थः न हि इन्द्रियार्थः, तेषाम् अनिन्द्रियार्थप्रसक्तत्वात्। तथा च, षष्ठीसमासे गुणा एव यदा इन्द्रियार्थाः भवन्ति तदा पृथिव्यादिपदार्थः गुणस्य विशेषणत्वात् विशेषणेन सह इन्द्रियार्थस्य अनन्वयत्वात् उक्तविशेषणमपि व्यर्थं स्यात्। यद्युच्यते केवलं 'गुणाः' इत्युच्यमाने तु यस्य कस्यापि गुणस्य बोधः स्यात्। तथा सति विशेषणमपि व्यर्थं न स्यात् इति चेत् तदपि न सङ्गतम्। यतो हि मूलसूत्रे उल्लिखितेन 'गन्धरसरूपस्पर्शशब्दाः' इति पदेनैव गन्धादिगुणाः इन्द्रियार्थाः इति सूचितत्वात् यः कोऽपि गुणः इन्द्रियार्थः स्यात्। किन्तु तद्धि सूत्रविरुद्धम्। अत एव पृथिव्यादि इति विशेषणस्य व्यवर्त्याभावात् उक्तविशेषणमपि व्यर्थं स्यात्।

---

[३४७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०७

बहुव्रीहिसमासोऽपि न युक्तः। यतो हि तत्स्वीकारे गुणी एव अप्रसिद्धः स्यात्। तथाहि 'पृथिव्यादयः गुणाः येषां ते पृथिव्यादिगुणाः' इति बहुव्रीहिसमासे एतादृशः कोऽपि गुणी न प्राप्यते यस्य गुणाः पृथिव्यादयो भवन्ति। पृथिव्यादयो हि द्रव्यरूपेणैव प्रसिद्धाः, तेषां गुणत्वं हि दुर्लभम्। किञ्च, 'गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणाः...' इति सूत्रे 'पृथिव्यादिगुणाः' इति पदे बहुव्रीहिसमासः स्वीक्रियते चेत् 'गन्ध...' इत्यादिपदानां सामानाधिकरणवशात् तत्सूत्रस्यार्थः स्यात् गन्धः, रसः, रूपम्, स्पर्शः, शब्दः इति एतेषां गुणाः हि पृथिव्यादयः इति। किन्तु वस्तुस्थितिस्तु भिन्न एव, तद्विपरीतमेव प्रसिद्धं जगति। पृथिव्यादीनां द्रव्याणां गुणाः गन्धादयः इति। अत एवात्र बहुव्रीहिसमासो न युक्तः।

एवं एतद्विविधसमासस्य प्रतिसिद्धत्वात् तृतीयप्रकारः द्वन्द्वसमासोऽत्र स्वीकार्यः *वार्त्तिक*कारमते। *वार्त्तिक*कारेण द्वन्द्वसमासस्वीकारविषयेऽपि पूर्वपक्षतया प्रश्नमुत्थाय उत्तरपक्षतया तस्योत्तरं प्रदत्तम्। अन्तिमे तेन द्वन्द्वसमासस्वीकारे एव स्वरसः प्रदर्शितः। तदुक्तं वार्त्तिककारेण- " पृथिव्यादिगुणा इत्येतस्मिन् पदेऽनेकः समासः सम्भवति। कथमिति ? पृथिव्यादीनां गुणा इति षष्ठीसमासः, पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः, पृथिव्यादयो गुणा येषामिति बहुव्रीहिः, एवमनेकसमासोपपत्तेः संशयः किमत्र तत्त्वमिति ? द्वन्द्वसमासः इति तत्त्वम्।"[३४८] इति।

---

[३४८] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२०२-२०३ (विस्तरव्याख्या तु न्या.वा., न्या.द.,पृ-२०३-२०४ द्रष्टव्यम्)

## ❖ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्[३४९]

द्वादशप्रमेयाणां दशमसूत्रे उद्देशानन्तरं शास्त्रीयरीत्यनुसारम् एकैकप्रमेयपदार्थस्य लक्षणं क्रियते। अधुना प्रस्तुतसूत्रेऽस्मिन् क्रमप्राप्तबुद्धिरूप-पञ्चमप्रमेयपदार्थस्य लक्षणं क्रियते। अत एव महर्षिणा विश्वनाथाचार्येण सूत्रस्यास्य व्याख्यानादौ निगदितं - 'बुद्धिं लक्षयितुमाह'[३५०] इत्यादि।

महर्षिगौतमनये जन्यज्ञानं हि जीवात्मनः विशेषगुणः। कारणं तद्धि जीवात्मनि एव जायते। तदर्थं ज्ञानमेव बुद्धिनामकः पञ्चमप्रमेयपदार्थः। पूर्वोक्तं जीवात्मा, तच्छरीरम्, इन्द्रियम्, गन्धाद्यर्थः बुद्धेः कारणम्। अतः तत्प्रमेयचतुष्टयनिरूपणपूर्वकं महर्षिणा गौतमेन प्रस्तुतसूत्रेण भणितं यत् बुद्धिः, उपलब्धिः, ज्ञानञ्च इति त्रयमेव एकार्थकपर्यायशब्दः इति।

किन्तु सांख्यनये बुद्धिः, उपलब्धिः ज्ञानञ्च इति त्रयं भिन्नः पदार्थः। तेषां नये प्रकृतेः विकारविशेषो हि महत्तत्त्वम्। एतन्महत्तत्त्वं हि बुद्धितत्त्वम्। सांख्यनये बुद्धितत्त्वस्य परिणामं हि ज्ञानम्। अत एव बुद्धिः ज्ञानञ्च मिथो भिन्नपदार्थः। यथा दधिः हि दुग्धस्य परिणामविशेषः। अतो दधिः दुग्धञ्च न हि अभिन्नम्। एवं बुद्धितत्त्वस्य परिणामविशेषः हि ज्ञानम्। अत एव बुद्धितत्त्वं ज्ञानञ्च अभिन्नं न – इत्येवं सांख्यमतं प्रस्तुतसूत्रेण महर्षिणा गौतमेन खण्डितम्। सांख्यमतखण्डनमेव न केवलं प्रस्तुतसूत्रस्य विषयः अपि तु सूत्रेणानेन बुद्धिलक्षणमपि उपवर्णितम्। तद्धि भाष्यकारेण तथा वृत्तिकारेण स्वकृतव्याख्यायां *भाष्ये वृत्तौ* वा चर्चितम्।

---

[३४९] न्या.सू.-१/१/१५

[३५०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१३

उभयव्याख्यायामर्थदृष्ट्या तु समानमेव प्रचक्षते। किन्तु वृत्तिव्याख्यायां किञ्चित् अधिकव्याख्यानं दृश्यते।

तथाहि यद्यपि पूर्वोक्तबुद्धिनामकप्रमेयपदार्थस्य लक्षणोद्देश्येनैव प्रस्तुतसूत्रमिदं महर्षिणा गौतमेन कृतं तथापि तद्द्वारा युक्तिसामर्थ्यात् सांख्यमतमपि प्रकारान्तरेण खण्डितम्। अत एव भाष्यकारेणादौ सांख्यमतस्य उल्लेखं कृतं ततश्च तद् युक्तिविरुद्धम् इत्युक्त्वा सूत्रस्यास्य अवतारणा कृता। किञ्च उक्तसांख्यमतस्य प्रत्याख्यानं तथा निराकरणमेव प्रस्तुतसूत्रस्य प्रकृतं प्रयोजनं न इत्येव व्यक्तयितुं भाष्यकारेण पूर्वोक्तभाष्यसन्दर्भे 'प्रत्याचक्षणक इव' इति स्थले इवशब्दस्य प्रयोगः कृतः। तदुक्तं भाष्यकारेण- "अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः चेतनस्याकर्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचक्षाणक इवेदमाह।"[३५१] इति।

किन्तु वृत्तिकारेण विश्वनाथेन बुद्धितत्त्वज्ञानयोः भेदं प्रतिपादयितुं 'बुद्धितत्त्वस्य परिणामविशेषो ज्ञानम्' इत्यत्र षष्ठीविभक्तेः प्रयोगः कृतः। यतो हि षष्ठीविभक्तिः भेदस्थले प्रयुक्तो भवति। यथा 'दशरथस्य पुत्रः' इत्यत्र षष्ठीविभक्तिः दशरथतत्पुत्रयोः यद्यपि जन्यजनकत्वसम्बन्धसूचनार्थं प्रयुक्ता तथापि तत्षष्ठीविभक्तिः भेदस्थले एव प्रयुक्ता। अत एव 'बुद्धितत्त्वस्य परिणामविशेषो ज्ञानम्' इति मतेऽपि उक्तपदे प्रयुक्तषष्ठीविभक्तिः बुद्धितत्त्वज्ञानयोः भेदमेव सूचयति। अत उक्तं वृत्तिकारेण- "न तु सांख्यानामिव बुद्धितत्त्वस्य महत्तत्त्वापर-पर्यायस्य परिणामविशेषो ज्ञानम्।"[३५२] इति।

---

[३५१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१३

[३५२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१३-२१४

किञ्च, वृत्तिकारेण भाषितं यत् महर्षिणा गौतमेन सांख्यमतस्य खण्डनार्थं सूत्रे 'अनर्थान्तरम्' इति पदं गृहीतम्। अन्यः अर्थः अर्थान्तरम्, न अर्थान्तरम् अनर्थान्तरम्। अर्थात् अर्थान्तरः भिन्नार्थः वा न। अर्थात् अभिन्नार्थप्रकाशार्थं 'अनर्थान्तरम्' इति पदस्य प्रयोगः कृतः महर्षिणा गौतमेन। अर्थात् न्यायवैशेषिकमते यत्पदार्थः बुद्धिनाम्ना व्यपदिष्टः, तदेव पदार्थः उपलब्धिपदेन ज्ञानपदेन वा कथितो भवति। अत एवोक्तं महामनीषिणा विश्वनाथेन - "अनर्थान्तरम् – समानार्थकम्, न तु सांख्यानामिव..."[३५३] इत्यादि।

किन्तु एतेन तु केवलं सांख्यमतं खण्डितम्। किन्तु बुद्धेर्लक्षणं तु नोक्तं भवति एतेन। बुद्धेः साक्षात् लक्षणं तु भाष्यकारेण न प्रदत्तं तद्भाष्यव्याख्यायाम्। किन्तु विश्वनाथेन तु बुद्धेर्लक्षणं वृत्तौ निगदितमेव। तदुक्तं तेन *न्यायसूत्रवृत्तौ*- "तथा च बुद्ध्यादिपदवाच्यत्वम्"[३५४] इत्यादि। अत्रादिपदेन 'उपलब्धिः' इत्यादिः ग्राह्यः। अत एव बुद्धिः, उपलब्धिः इति पदस्य वाच्यं हि बुद्धिः ज्ञानं वा। तादृशवाच्यत्वं बुद्धिनिष्ठम् असाधारणधर्मः। अत एव बुद्धिः इत्यादिपदवाच्यत्वमेव बुद्धेर्लक्षणम्। वाचस्पतिमिश्रेणापि उक्तं यत् उक्तरूपेण प्रसिद्धपर्यायशब्देनापि पदार्थलक्षणं वक्तुमलम् इति। वस्तुतः ज्ञानमेव बुद्धिः उपलब्धिर्वा। ज्ञानम्, उपलब्धिः, बुद्धिर्न हि भिन्नपदार्थः।

किन्तु उक्तबुद्धेर्लक्षणे अस्वरसवशात् द्वितीयं बुद्धिलक्षणं प्रदत्तं वृत्तिकारेण विश्वनाथेन- "अनुभवसिद्धज्ञानत्वजातिरेव वा लक्षणमिति

---

[३५३] तदेव,पृ-२१३

[३५४] तदेव,पृ-२१४

भावः।''[३५५] इति। अर्थात् 'ज्ञानत्वम् बुद्धिलक्षणम्' इत्येव तात्पर्यम्। यत्पदार्थः ज्ञानत्वजातिविशिष्टः स पदार्थः बुद्धिरिति ज्ञेयम्। 'अनुभवसिद्धः' इति पदं तस्य प्रमाणरूपेण प्रदर्शितम्। यदि शङ्का जायते यत् ज्ञानत्वजातिः बुद्धेर्लक्षणं तदा ज्ञानत्वजातिरेव न सिद्धा इति। अत एव उक्तलक्षणं न हि यथार्थमिति चेदत्रोच्यते- 'अनुभवसिद्धः' इति। ज्ञानत्वजातिर्हि अनुभवसिद्धा। ज्ञानस्य प्रत्यक्षं तु अनुव्यवसायवेद्यं भवति। अत एव ज्ञानत्वमेव बुद्धेर्लक्षणम्। अनुभवसिद्धपदं हि ज्ञानत्वजातेः अस्तित्वे प्रमाणम्। आचार्यफणिभूषणतर्कवागीशमहोदयेनापि निगदितं स्वकृतबङ्गीय*न्यायदर्शन*ग्रन्थे - '' জ্ঞান সর্বজীবের প্রসিদ্ধ পদার্থ। সুতরাং যাহাকে জ্ঞান বলে অর্থাৎ যাহা অনুভবসিদ্ধ জ্ঞানত্বরূপ জাতিবিশিষ্ট, তাহা বুদ্ধি, ইহা বলিলে বুদ্ধির লক্ষণ বলা হয়।''[३५६] इति।

## ❖ युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्[३५७]

प्रस्तुतसूत्रे क्रमप्राप्तस्य षष्ठप्रमेयपदार्थस्य मनसो लक्षणं क्रियते। अत एव विश्वनाथेन प्रस्तुतसूत्रस्य वृत्तावादौ उक्तं - ''मनः लक्षयति ''[३५८] इति।

युगपत् नाम एकक्षणे नानेन्द्रियजन्यनानाविषयप्रत्यक्षं न भवति। एतदेव मनसः साधकं लिङ्गं वा इति सूत्रस्य सामान्यार्थः। किन्तु अत्रापि एकः प्रश्नः समायाति यत् युगपज्ज्ञानस्योत्पत्तिर्न भवतीति वाक्यमेव भ्रान्तम्। यतो हि

---

[३५५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१४

[३५६] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-२२०

[३५७] न्या.सू.-१/१/१६

[३५८] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१६

दृश्यते यत् युगपत् नानाविजातीयज्ञानस्योत्पत्तिर्भवति इति। यथा चैत्रस्य तथा मैत्रस्य एकक्षणे 'रक्तं चन्दनम्' तथा 'चन्दनं सुरभि' इति चाक्षुषप्रत्यक्षं तथा घ्राणजप्रत्यक्षं भवत्येव। प्रश्नस्यास्य समाधानं तु भाष्यकारेण वात्स्यायनेन भाष्ये न कृतं परं वृत्तिकारेण विश्वनाथेन स्वकृत*न्यायसूत्रवृत्तौ* कृतमेव। तथाहि तेन निगदितं यत् अत्र विजातीयज्ञानस्य यत् अनुत्पत्तेर्वचनमुक्तं तद्धि एकस्मिन्नेव आत्मनि विजातीयज्ञानस्यानुत्पत्तिरिति अभिप्रेतार्थः इति। अतस्तदापत्तिः यतः चैत्रात्मानं तथा मैत्रात्मानमाश्रयीकृत्य कृता, अतो न व्यभिचारः। अत एवोक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ* - "युगपत् एककाले, एकात्मनीति पूरणीयम्।"[३५९] इति।

गन्धादिबाह्यार्थस्य प्रत्यक्षं तत्तद्बहिरिन्द्रियेणैव भवति। यतो हि प्रत्यक्षज्ञानस्य करणं भवतीन्द्रियम्। किन्तु सर्वदा बाह्यप्रत्यक्षं भवतीति न वस्तुस्थितिः। अस्माकं मानसप्रत्यक्षमपि जायते। अस्माकं पूर्वानुभूतघटादिविषयस्य स्मरणं भवति। किन्तु एतत्स्मृत्यात्मकज्ञानस्य कारणं बहिरिन्द्रियं तथा तत्सन्निकर्षः इति एतयोः कोऽपि न भवति। यतो हि चक्षुरादिबहिरिन्द्रियाणामुपस्थितौ अपि तत्स्थले घटादिबाह्यपदार्थस्यानुपस्थितौ घटादिपदार्थानां स्मरणं भवति। अत एव घटादिपदार्थः, चक्षुरादीन्द्रियं तत्सन्निकर्षश्च एतेषु कश्चिदपि उक्तस्मृत्यात्मकज्ञानस्य कारणं न भवति। अतो भिन्नं किमपि कारणं वर्तते, तद्धि अन्तरिन्द्रियं मनः एव। यतो हि लौकिकप्रत्यक्षम् इन्द्रियव्यतिरेकेन उत्पन्नं न भवति। एतत्स्मृत्यात्मकप्रत्यक्षं यतः उत्पन्नं भवति तथा च तस्य साधनं न बहिरिन्द्रियम्, अतः अन्तरिन्द्रियं साधनं स्वीकृतं भवेदेव।

[३५९] तदेव,पृ-२१६

तद्धि मनः एव। अत एव भाष्यकारेण वात्स्यायनेन भणितम्- "अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्तीति।"[360] इति। अर्थात् घ्राणादिनिमित्तं न भवति एतादृशं स्मृतिप्रभृतिज्ञानम् अन्येन केनापि निमित्तेन उत्पन्नयोग्यः। तद्धि मनः एव। गन्धादिप्रत्यक्षं यथा तत्करणं घ्राणमाश्रित्य घ्राणजनाम्ना व्यपदिष्टो भवति तथैव सुखदुःखादिप्रत्यक्षमपि मानसप्रत्यक्षनाम्ना व्यपदिष्टो भवति। एतेन बुध्यते यत् तत्तद्विषयप्रत्यक्षे मन एव साधनम्। एवं स्मृत्यात्मकप्रत्यक्षे मनसः करणं साधनत्वं वा भाष्यकारेण एव वर्णितम्। विश्वनाथेन तु विषयेऽस्मिन् किमपि नालोचितम्।

सूत्रकारेण मनसो लिङ्गत्वेन केवलं युगपज्ज्ञानानुत्पत्तिरिति लिङ्गस्यैव उल्लेखं कृतम्। किन्तु एतल्लिङ्गं विहायापि भिन्नं लिङ्गं वर्तते। तस्योल्लेखं सूत्रादौ भाष्यकारेण कृतम्। सूत्रस्यास्य भिन्नं लिङ्गं तु वृत्तिकारेण न प्रदर्शितम्। तथाहि भाष्यनये स्मृतिः, अनुमानम्, आगमः (शाब्दबोधः), संशयः, प्रतिभा (इन्द्रियादिनिरपेक्षज्ञानविशेषः), स्वप्नज्ञानम्, उहः, सुखादिप्रत्यक्षम्, इच्छा इत्यादि हि मनसो लिङ्गम् अनुमापकं वा। तदुक्तं भाष्यकारेण- "स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि।"[361] इति।

सूत्रस्थलिङ्गपदं तथा मनसः भिन्नं लक्षणमपि प्रदत्तं वृत्तिकारेण। किन्तु भाष्यकारेण लिङ्गपदं न व्याख्यातं तथा मनसः भिन्नं लक्षणमपि न प्रदत्तम्। तथाहि वृत्तिकारनये लिङ्गपदस्य अनुमापकार्थः न किन्तु लक्षणम् इत्यर्थः।

[360] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१५

[361] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१५

अतस्तेनोक्तं - "लिङ्गं लक्षणमित्यर्थः।"[३६२] इति। तल्लक्षणं किमिति जिज्ञासायां वृत्तिकारेण निगदितं - "ज्ञानकरणाणुत्वं मनसो लिङ्गम् – लक्षणमित्यर्थः।"[३६३] इति। अर्थात् 'ज्ञानकरणत्वे सति अणुत्वं मनस्त्वम्' इति लक्षणार्थः। किन्तु अत्र ज्ञानपदम् अविशिष्टत्वात् घ्राणजमित्यादिविशिष्टज्ञानं गृहीतं न स्यात्, तथा च ज्ञानपदस्यास्य निखिलज्ञाने तात्पर्यम्। अतः 'निखिलज्ञानकरणत्वे सति अणुत्वम्' इति लक्षणम्। अर्थात् यत्पदार्थः अणुपरिमाणविशिष्टः तथा निखिलज्ञानस्य करणं भवति, तन्मनः इति विज्ञेयम्। किन्तु यदि सूक्ष्मेक्षिकया विचार्यते चेत् ज्ञायते यत् मनः सुखादिसाक्षात्कारस्य करणत्वेऽपि अनुमितिप्रभृतिज्ञानस्य करणं न भवति। अत एव ज्ञानसामान्यस्य करणं नोक्त्वा निखिलज्ञानस्य जनक इति कथने उचितं स्यात्। अत एव विश्वनाथेनोक्तं- "तदेव चाणु निखिलज्ञानजनकं सुखादिसाक्षा-त्कारासाधारणकारणम्"[३६४] इति। एतेन मनसो लक्षणं सूचितं भवति।

किञ्च विश्वनाथेन अन्येषां पण्डितानां नयेऽपि मनसः लक्षणं वर्णितं *न्यायसूत्रवृत्तौ*। किन्तु भाष्यकारेण तु अन्येषां किमपि मतं नोल्लिखितम्। तथाहि विश्वनाथनये अन्येषां कृते मनसः लक्षणं हि "निःस्पर्शाणुत्वादिकं लक्षणं सुकरम्"[३६५] इति। अर्थात् निःस्पर्शत्वे सति अणुत्वं मनस्त्वम् इति मनसो लक्षणम्।

मनसः परिमाणविषये तु वृत्तिवचनात् साक्षात् लभ्यते यत् मनः अणुपरिमाणविशिष्टम्। प्रस्तुतसूत्रस्य भाष्ये तु मनसः अणुपरिमाणविषये कापि

---

[३६२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१७

[३६३] तत्रैव

[३६४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१७-२१८

[३६५] तदेव,पृ-२१८

आलोचना पदोल्लेखं वा नोपलभ्यते। पूर्वमेव व्याख्यापितं यत् विश्वनाथनये मनः अणुपरिमाणविशिष्टं यच्च विश्वनाथकृतमनोलक्षणे उल्लिखितं तथा विश्वनाथस्य यत् अन्येषां पण्डितानां मते मनोलक्षणम्, तत्रापि मनसः अणुपरिमाणतया उल्लिखितम्। अत्रेदमवधेयं यत् मनो यदि विभुपरिमाणविशिष्टं स्यात् अथवा सर्वशरीरव्यापि स्यात् तदा सकलेन्द्रियैः सह तस्य मनसः संयोगत्वात् युगपन्नानाप्रत्यक्षापत्तिः स्यात्। अतो मनसः अणुपरिमाणमेव स्वीकार्यम्। किञ्च, 'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्'[३६६] इति गीतावचनात् प्रतीयते यत् मनो यदि विभुपरिमाणविशिष्टं स्यात् तदा वायुरिव तस्य चञ्चलत्वं न सम्भवति। 'न गत्यभावात्'[३६७] इति महर्षिगौतमसूत्रादपि प्रतीयते यत् विभुपदार्थस्य गत्यभावात् गतिशीलमनः विभुरिति वक्तुं न शक्यते। अत एव मनसोऽणुत्वमेव स्वीकार्यम्।

## ❖ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः[३६८]

प्रस्तुतसूत्रे मनः इति प्रमेयस्यानन्तरं क्रमप्राप्तस्य प्रवृत्तिरूपप्रमेयस्य लणक्षं विभागश्च क्रियते। अत एव प्रस्तुतसूत्रस्य व्याख्यानादौ विश्वनाथेन निगदितं - ''प्रवृत्तिं लक्षयति विभजते च,...''[३६९] इति।

---

[३६६] गीता-६/३४

[३६७] न्या.सू.,३/२/८

[३६८] न्या.सू.-१/१/१७

[३६९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१९

पूर्वं नवमसूत्रे प्रमेयोद्देशसूत्रे प्रवृत्तेः उद्देशः कृतः। शास्त्रीयरीत्यनुसारमधुना तस्य लक्षणं कर्तव्यम्। किञ्च, सूत्रेऽस्मिन् विशेषविशेषप्रवृत्तेः उल्लेखं कृतम्। किन्तु प्रवृत्तेः सामान्यलक्षणं विना तद्विशेषलक्षणज्ञानं दुष्करं भवति। अतः किं तावत् प्रवृत्तेः सामान्यलक्षणमिति शिष्यजिज्ञासायाम् उत्तरं तु भाष्यकारेण वात्स्यायनेन न्यायभाष्ये किमपि नागादि किन्तु विश्वनाथेनागादि- "अत्र च प्रवृत्तित्वं रागजन्यतावच्छेदको जातिविशेषः।"[३७०] इति। अत्रायमाशयः- रागो नाम विषयं प्रति आसक्तिः इच्छा वा बुध्यते। उपादेयवस्तु प्रति एव आसक्तिः तादृशेच्छा वा जायते। यथा गमनकाले स्वर्णादिवस्तुदर्शनात् 'इदं मदिष्टसाधनम्' इत्येवम् इष्टसाधनताज्ञानं भवति तथा च उपादेयबुद्धिरपि उत्पन्ना भवति। एतदुपादेयबुद्धेः प्रेप्सा रागो वा जायते। एतस्मात् रागात् तद्वस्तुनः ग्रहणानुकूलयत्नः कृतिः वा तज्जीवात्मनि जायते। अत एव एतत्कृतिरेव प्रवृत्तिरिति कथ्यते, यद्धि रागजन्या। अतो रागजन्यप्रवृत्तित्वात् रागजन्यता प्रवृत्तिनिष्ठधर्मः भवति। एवं प्रवृत्तिनिष्ठधर्मेषु रागजन्यतावच्छेदक-धर्मस्य लघुत्वात् तत्प्रवृत्तिरेव भवति। अत एव प्रवृत्तित्वमिति जातिविशेषः रागजन्यतावच्छेदकरूपेण सिद्धो भवति। अतः प्रवृत्तेः सामान्यलक्षणं हि - 'रागजन्यतावच्छेदकं प्रवृत्तित्वम्' इति।

किन्तु लक्षणमिदम् ईश्वरप्रवृत्तौ अव्याप्तं भवति। यतो हि ईश्वरस्य प्रवृत्तिर्हि नित्या, अतस्तत्प्रवृत्तिः रागजन्या भवितुं नार्हति। अतो रागजन्यत्वम् ईश्वरप्रवृत्तौ अविद्यमानत्वात् लक्षणमिदम् ईश्वरप्रवृत्तौ अव्याप्तं भवति। अत एव 'यत्नत्वं प्रवृत्तित्वम्' इति वक्तव्यम्। ईश्वरस्य कृतौ रागजन्यतायाः अभावेऽपि

---

[३७०] तदेव,पृ-२१९

यत्नत्वस्य समवेतत्वात् ईश्वरकृतिरपि प्रवृत्तेः लक्षणिदं सङ्गतं भवति। अत एव महामनीषिणा विश्वानाथेनोक्तम्- "ईश्वरकृतेरपि लक्ष्यत्वे यत्नत्वमेव तथा,..."[३७१] इति।

प्रस्तुतसूत्रे बुद्धिशब्देन मन एव बुध्यते इति तु भाष्यकारेण साक्षादुक्तम्। तदुक्तं तेन- "मनोऽत्र बुद्धिरित्यभिप्रेतम्"[३७२] इति। *न्यायसूत्रवृत्तौ* विश्वनाथेन भाष्यकारस्य मतमिदमुल्लिखितम्। तेन ज्ञायते यत् बुद्धिशब्दस्यार्थनिर्णये वृत्तिकारस्यापि भाष्यकारवत् समानमेवाभिप्रायः। किन्तु विश्वनाथेन बुद्धिशब्दस्य कस्मिन्नर्थे प्रयोगः कृतः इति स्पष्टतया न उल्लिखितं न वा किमपि वर्णितम्। किन्तु भाष्यकारेण तु स्पष्टमेवोक्तं यत् बुद्धिशब्दोऽत्र न ज्ञानार्थे प्रयुक्तः। किन्तु यद्द्वारा बुध्यते गम्यते वा इति व्युत्पत्त्यनुसारम् उक्तबुद्धिशब्देन मननमेव महर्षेरभिप्रेतम्। तदुक्तं भाष्यकारेण- "...बुध्यतेऽनेनेति बुद्धिः।"[३७३] इति।

किन्तु भाष्यकारेण प्रवृत्तेः विभागविषये तथा विभक्तानां स्वरूपविषये किमपि नोल्लिखितं न वालोचितम्। किन्तु आचार्यविश्वनाथेन प्रस्तुतसूत्रस्य *न्यायसूत्रवृत्तौ* प्रवृत्तेः विभागः तथा विभक्तप्रवृत्तेः स्वरूपविषयेऽपि वर्णना प्रदत्ता। तथाहि 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमानुसारं द्वन्द्वसमासानन्तरं श्रूयमाणस्य पदार्थस्य द्वन्द्वसमासान्तर्गतप्रत्येकावयवेन सह अन्वयो भवति। यथा- 'घटपटौ अनित्यौ' इत्यत्र 'घटपटौ' इति द्वन्द्वसमासानन्तरं श्रूयमाणस्य 'अनित्यौ' इति पदार्थस्य द्वन्द्वघटकेन घटः पटश्च इति प्रत्येकावयवेन सहान्वयः स्यात्। अतः 'घटः अनित्यः' 'पटश्चानित्यः' इति बोधः स्यात्। एवं

---

[३७१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१९

[३७२] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१८

[३७३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१८

प्रस्तुतसूत्रे 'वाग्बुद्धिशरीरारम्भः' इति द्वन्द्वसमासानन्तरमेव 'आरम्भः' इति पदस्य श्रूयमाणत्वात् तत्पदार्थस्य वाग्, बुद्धिः, शरीरञ्च इति प्रत्येकपदार्थेन सहान्वयः स्यात्। तेन च, प्रवृत्तिः त्रिविधा- वागारम्भः, बुद्ध्यारम्भः, शरीरारम्भश्चेति इति बोधः स्यात्।

उक्तप्रवृत्तित्रयस्य स्वरूपविषयेऽपि विश्वनाथेन आलोचना कृता। तथाहि तत्र वागारम्भप्रवृत्तिस्वरूपविषये विश्वनाथेनोक्तं- "वचनानुकूलो यत्नो वागारम्भः"[३७४] इति। अर्थात् वचनस्य (वाक्यस्य) अनुकूलः यद् यत्नः तद्वागारम्भः इत्युच्यते। अर्थात् प्रयत्नः प्रवृत्तिरित्युच्यते। यथा- सत्यं वदेत्, हितमुपदेशं कुर्यात्, प्रियवाक्यस्य कथनम्, स्वाध्यायश्च इति वाचिकप्रवृत्तिः। एषा वाचिकप्रवृत्तिर्यदा पुण्यजनको भवति तदा पुण्यस्वरूपः स्यात्। यदा विपरीतं भवति- असत्यभाषणम्, कटूक्तिः, परदोषप्रकथनम्, असम्बद्धप्रलापश्च इत्येवं तदा तद्वाचिकप्रवृत्तिः पापस्वरूपो भवति।

शरीरप्रवृत्तेः स्वरूपविषये विश्वनाथेन निगदितं - "वचनाननुकूलः शरीरगोचरो यत्नश्चेष्टानुकूलयत्नो वा शरीरारम्भः"[३७५] इति। अर्थात् यत्र यत्ने वचनानुकूलता न तिष्ठति अर्थात् वाक्यस्यानुकूलो न भवति किन्तु शरीरविषयको भवति अथवा चेष्टायाः अनुकूलः यत्नः शरीरारम्भः इत्युच्यते। यदि केवलं 'शरीरगोचरो यत्नः चेष्टानुकूलो यत्नो वा' इति लक्षणं क्रियते तदा हस्तादिवत् वाचोऽपि शरीरत्वात् तत्र लक्षणेऽतिव्याप्तिः स्यात्। अतो लक्षणे 'वचनाननुकूलः' इति पदमुपात्तम्। एतच्छरीरप्रवृत्तिरपि द्विविधा पुण्यपापभेदात्। तत्र

---

[३७४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१९

[३७५] तत्रैव

पुण्यभूतशारीरिकप्रवृत्तिर्हि– परित्राणम्, परिचरणम्, दानञ्च। तथा पापस्वरूप-शरीरप्रवृत्तिर्हि त्रिविधा – हिंसा, चौर्यम्, निषिद्धमैथुनञ्च।

'बुद्ध्यारम्भः' इत्यत्र बुद्धिशब्देन मनः एव स्वीकार्यम् इति तु भाष्यकारस्य तथा वृत्तिकारस्याभिप्रायः इति पूर्वमेव वर्णितम्। मानसिकप्रवृत्तिस्वरूपविषये बुद्ध्यारम्भस्वरूपविषये वा विश्वनाथेन निगदितम्- "एतद्द्वयभिन्नो यत्नो बुद्ध्यारम्भः"[३७६] इति। अर्थात् वाचिकशारीरिकप्रवृत्तिभिन्नः यत्नः बुद्ध्यारम्भः मानसिकप्रवृत्तिर्वा। यथा- दया, निस्पृहता, श्रद्धा च इति एताः पुण्यजनकत्वात् पुण्यभूतमानसिकप्रवृत्तयः। तथा च, परद्रोहः, परद्रव्यस्य प्राप्तिकामना, नास्तिक्यञ्च इति एताः पापजनकत्वात् पापभूतमानसिकप्रवृत्तयः।

एवं दशविधपुण्यप्रवृत्तिः तथा दशविधपापप्रवृत्तिः इति ज्ञेयम्। एवं प्रस्तुतसूत्रस्य व्याख्यायां वृत्तिकारेण विशदतया प्रवृत्तिविभागविषये तथा प्रवृत्तिस्वरूपविषये व्याख्या कृता। किन्तु भाष्यकारेण तु केवलं शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः इत्युक्तम्। प्रत्येकप्रवृत्तेः स्वरूपवर्णने तु न स्वरसः प्रदर्शितः। तेन हि द्वितीयन्यायसूत्रे वर्णितम् इति कृत्वा अत्र न तथा किमपि वर्णनं कृतम्। तदुक्तं भाष्यकारेण- "सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः। तदेतत् कृतभाष्यं द्वितीयसूत्र इति।"[३७७] इति।

*न्यायवार्त्तिकतात्पर्यटीका*कारमते प्रवृत्तिः प्रथमतः द्विधा विभक्ता- १.ज्ञातुहेतुः, २.क्रियाहेतुश्च इति। यत्प्रवृत्तिः ज्ञानोत्पादनद्वारा पुण्यपापयोः हेतुः भवति तद् वाक्प्रवृत्तिः ज्ञानहेतुप्रवृत्तिर्वा इत्युच्यते। तथा च, क्रियाहेतुप्रवृत्तिर्हि

[३७६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१९
[३७७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१८

द्विविधा- शरीरनिमित्तप्रवृत्तिः मनोनिमित्तप्रवृत्तिश्चेति। तदुक्तं *तात्पर्यटीका*कारेण- "आरम्भः प्रवृत्तिः, सा द्विधा ज्ञानहेतुः क्रियाहेतुश्च। तत्र या ज्ञानोत्पादनद्वारेण पुण्यपापहेतुः सा वाक्प्रवृत्तिः,... क्रियाहेतुर्द्वयी कायनिमित्ता मनोनिमित्ता चेति।"[३७८] इति।

किञ्च, इत्येवं प्रस्तुतसूत्रस्य व्याख्याने न क्षान्तः वृत्तिकारः। तेन हि प्रवृत्तेः सामान्यलक्षणविषये तथा विशेषलक्षणविषये प्राचां मतमपि उल्लिख्य चर्चितम्। तदुक्तं वृत्तिकारेण *न्यायसूत्रवृत्तौ*- "प्राञ्चस्तु सामान्यविशेषलक्षणेष्वदृष्टजनककत्वं निवेशयन्ति।"[३७९] इति। अत्रायमाशयः- एषा प्रवृत्तिर्हि पुण्यपापयोः जनको भवति। अत एव प्रवृत्तिर्हि धर्माधर्मात्मकादृष्टस्य जनकः। अत एव एतद्वैशिष्ट्यमपि प्रवृत्तेः सामान्यलक्षणे तथा विशेषलक्षणे निवेशयन्ति प्राञ्चः। अत एव तेषां नये प्रवृत्तेः सामान्यलक्षणं स्यात् - 'अदृष्टजनकतावच्छेदकत्वे सति रागजन्यतावच्छेदकत्वं प्रवृत्तित्वम्' इति। अर्थात् यत्पदार्थः अदृष्टस्य जनको भवति तथा रागजन्यो भवति, तत्पदार्थः प्रवृत्तिरित्युच्यते। किन्तु लक्षणेऽस्मिन् वृत्तिकारस्य विश्वनाथस्य अस्वरसत्वात् तेन 'प्राञ्चस्तु' इत्युक्त्वा मतमिदमुल्लिखितम्।

इदानीमेकः प्रश्नः स्यात् यत् प्रवृत्तेः क्षणिकत्वात् तस्य जन्मादिं प्रति कारणता न युक्ता स्यात्। तेन च, द्वितीयन्यायसूत्रं व्याहतं स्यात्। यतो हि द्वितीयन्यायसूत्रेण 'कारणाभावे कार्याभावः' इति नियममाश्रयीकृत्य उक्तं यत् प्रवृत्त्यभावे जन्मापायो भवति। एतेन सूचितं भवति यत् प्रवृत्तिर्हि जन्मनः

---

[३७८] न्या.वा.तात्., न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१९

[३७९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२१९

कारणम् इति। किन्तु प्रवृत्तेः क्षणिकत्वात् जन्मनः अव्यवहितपूर्ववर्तित्वाभावे प्रवृत्तिः जन्म प्रति कारणं भवितुं नार्हति इति शङ्कायाः उत्तरविषये तु भाष्यकारेण किमपि न चर्चितं परं वृत्तिकारेण अस्याः शङ्कायाः उत्तरं प्रदत्तम्। तदुक्तं तेन - "इयं च कारणरूपा प्रवृत्तिः, कार्यरूपा तु धर्माधर्मात्मकेति।"[३८०] इति। अत्रायमाशयः- प्रस्तुतसूत्रे यत्प्रवृत्तेः वर्णनं भवति तथा द्वितीयन्यायसूत्रे यत्प्रवृत्तेः वर्णनं कृतम्, ते मिथः भिन्ने एव। द्वितीयन्यायसूत्रे यत्प्रवृत्तेः वर्णनं कृतं तद्धि प्रवृत्तेः फलं धर्मः अधर्मश्च। एतत्तु सत्यं यत् प्रयत्नरूपप्रवृत्तिः जन्मनः अव्यवहितपूर्ववर्तिनी न भवति। किन्तु धर्माधर्मात्मिका प्रवृत्तिर्हि जन्मनः अव्यवहितपूर्ववर्तिनी भवत्येव। अत एव द्वितीयन्यायसूत्रे यदुक्तं प्रवृत्तिः अर्थात् प्रवृत्तिफलं धर्माधर्मात्मकं जन्मनः कारणम्, तत्तु युक्तमेव। अतो द्वितीयन्यायसूत्रं न व्याहतं स्यात्। किञ्च, प्रस्तुतसूत्रे धर्माधर्मस्य कारणं शुभाशुभप्रयत्नः कारणभूतप्रवृत्तिर्वा बुध्यते इति तात्पर्यम्।

## ❖ प्रवर्त्तनालक्षणा दोषाः[३८१]

प्रवृत्तिलक्षणानन्तरं क्रमप्राप्तस्य दोषरूपप्रमेयपदार्थस्य लक्षणं क्रियते प्रस्तुतसूत्रेण। अत एव विश्वनाथेनोक्तं - "दोषं लक्षयति"[३८२] इति।

---

[३८०] तत्रैव

[३८१] न्या.सू.-१/१/१८

[३८२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२०

प्रवर्तकत्वमेव लक्षणं स्वरूपं येषां ते प्रवर्तनालक्षणा दोषा रागादय इति सूत्रान्वयः। तथा च, प्रवृत्तिहेतुत्वलक्षणा दोषा इत्यन्वयः, पुण्यपापकारणीभूता दोषा इत्यर्थः।

लक्षणेऽस्मिन् लक्ष्यंपदं हि 'दोषाः' इति। ननु दोषपदार्थस्योपस्थितिस्तु 'दोषः' इति एकवचनान्ततयाऽपि सम्भवे कथं 'दोषाः' इत्यत्र बहुवचनकथनम् ? इति चेत् अत्रोच्यते - 'दोषः' इति एकवचनान्ततया प्रयोगः क्रियते चेत् एकप्रकारदोषः विद्यते इत्यर्थः सूचितः स्यात्। किन्तु 'दोषाः' इति बहुवचनान्ततया प्रयोगे सति दोषस्य बहवः प्रकाराः इत्यर्थः सूचितो भवति। किन्तु अत्रावधेयं यत् आनन्त्यार्थसूचनार्थं नात्र बहुवचनस्य प्रयोगः किन्तु रागः, द्वेषः मोहश्चेति दोषस्य त्रिप्रकाराः सूचनार्थमेवात्र बहुवचनस्य प्रयोगः। तदुक्तं वृत्तिकारेण विश्वनाथेन- "दोषा इति बहुवचनं रागद्वेषमोहात्मकलक्ष्यत्रय-ज्ञापनाय।"[३८३] इति।

भाष्यकारेण यद्यपि रागद्वेषमोहाः इति त्रिविधदोषाणामुल्लेखः कृतः प्रकारान्तरेण किन्तु तेन हि नोक्तं यत् 'दोषाः' इत्यत्र बहुवचनकथनं रागद्वेषमोहाः इति त्रिप्रकाराणां दोषाणामवबोधनार्थमिति।

इदानीं दोषपदार्थस्य लक्षणं किमिति जिज्ञासा समुदिता एव। अस्यां जिज्ञासायामुच्यते यत् 'प्रवर्त्तना लक्षणं येषां ते प्रवर्त्तनालक्षणाः' इत्येवं बहुव्रीहिसमासेन प्रवर्त्तना एव दोषरूपप्रमेयस्य लक्षणरूपेण प्राप्यते। अत्र 'प्रवर्त्तना' इति पदस्य कोऽर्थः ? अत्रोच्यते 'प्रवर्त्यते अनया' इति व्युत्पत्त्या करणवाच्ये निष्पन्नस्य प्रवर्त्तनापदस्यार्थो हि प्रवृत्तिजनकत्वमिति। अत एव

[३८३] तत्रैव

'प्रवर्तनात्वं प्रवृत्तिजनकत्वं वा दोषत्वम्' इति दोषपदार्थस्य लक्षणम्। आचार्यविश्वनाथेन अयमेवार्थः द्योतितः *न्यायसूत्रवृत्तौ* तथा दोषपदार्थस्य लक्षणमेवमेव प्रदत्तम्। तदुक्तं तेन *न्यायसूत्रवृत्तौ* - "प्रवर्तना प्रवृत्तिजनकत्वम्, तदेव लक्षणं येषाम्।"[३८४] इति। किन्तु भाष्यकारेण तु प्रवर्त्तनापदस्यार्थः कृतः प्रवृत्तिहेतुत्वमिति। तदुक्तं तेन - "प्रवर्त्तना प्रवृत्तिहेतुत्वमिति"[३८५] इति। अतः वृत्तिकारनये नये प्रवृत्तेः जनकः एव दोषः भवति किन्तु भाष्यकारनये प्रवृत्तेः हेतुरेव दोषः भवति।

विश्वनाथकृतं 'प्रवृत्तिजनकत्वं दोषत्वम्' इति दोषलक्षणं तु रागः, द्वेषः, मोह इति दोषसमूहेषु सङ्गतं भवति। किन्तु केचन पण्डिताः पूर्वपक्षीरूपेण वदन्ति यत् रागः, द्वेषः, मोहः इति त्रितयेषु निमित्तनैमित्तिकभावत्वात् तेन न समानाः पदार्थाः। अर्थात् रागः द्वेषश्च इति पदार्थद्वयं दोषपदार्थरूपेण विवेच्यम्। किन्तु रागद्वेषौ प्रति मोहस्य कारणत्वात् निमित्तनैमित्तिकयोः भेदत्वात् मोहस्य न द्वेषपदार्थे अन्तर्भावः। अत एव महर्षिणा गौतमेन स्वयमेव पूर्वपक्षिरूपतया निगदितं - "निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः"[३८६] इति न्यायसूत्रम्। अस्य प्रश्नस्य उत्तरमपि महर्षिणा स्वयमेव प्रदत्तं यत् प्रवृत्तिजनकत्वरूपलक्षणमिदं रागद्वेषाविव मोहे अपि सङ्गतत्वात् दोषपदेन रागद्वेषौ इव मोहेऽपि ग्रहणीयः। अत एव महर्षिणा गौतमेन सूत्रितं - "न दोषलक्षणावरोधान्मोहस्य"[३८७] इति। अत एव प्रवृत्तिजनकत्वरूपलक्षणं प्रकाशयता महामनीषिणा विश्वनाथेनोक्तं-

---

[३८४] तत्रैव

[३८५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२०

[३८६] न्या.सू.-४/१/७

[३८७] न्या.सू.-४/१/८

"प्रवर्त्तना – प्रवृत्तिजनकत्वं, तदेव लक्षणं येषाम्"[३८८] इति। एतेन च, पूर्वं दोषरूपेण रागादित्रितयं गृहीतं तदेव उपपन्नमेव भवतीति सूचितं भवति। यतो हि उक्तत्रितयेषु एव प्रवृत्तिजनकत्वरूपदोषलक्षणं सङ्गतं भवति।

किन्तु केवलं प्रवृत्तिजनकत्वमेव दोषस्य लक्षणत्वे तल्लक्षणं रागादिलक्ष्यपदार्थे सङ्गतमपि शरीरे अदृष्टे तथा ईश्वरेच्छादिषु अतिव्याप्तं भवति। यतो हि शरीराभावे तत्तदभिलषितार्थे प्रवृत्तिरेव न भवति। एवं पूर्वार्जितादृष्टत्वात् तद्विषये प्रवृत्तिः भवति। तथा च, ईश्वरेच्छा तु साधारणनिमित्तकारणम्। अत एव दृश्यते यत् प्रवृत्तिजनकः न केवलं रादादिरेव भवति किन्तु अदृष्टम्, शरीरम् इत्यादिरपि भवति। अत एव दोषलक्षणमिदं शरीरादिषु अतिव्याप्तं भवति। एतदुत्तरे उच्यते यत् लक्षणेऽस्मिन् 'लौकिकमानसप्रत्यक्षविषयत्वे सति' इति विशेषणदलं योजनीयम्। अत एव सम्पूर्णलक्षणं स्यात् 'लौकिकमानसप्रत्यक्षविषयत्वे सति प्रवृत्तिजनकत्वं दोषत्वम्' इति। अदृष्टादिः प्रवृत्तिजनकत्वेऽपि लौकिकमानसप्रत्यक्षस्य विषयो न भवति। तेन च, नातिव्याप्तिः भवति। तदुक्तं विश्वनाथेन- "यद्यपीदं शरीरादृष्टेश्वरेच्छादावतिव्याप्तम्, तथापि लौकिकमानसप्रत्यक्षविषयत्वे सतीति विशेषणीयम्।"[३८९] इति।

किञ्च, तथापि दोषलक्षणमिदं यागादिगोचरप्रमावृत्तित्वात् यागादिगोचरप्रमायामतिव्याप्तं भवति। अतस्तद्वारणाय वृत्तिकारेण 'प्रमाण्यत्वे सति' इति विशेषणं योजनाय उक्तम्। तदुक्तं वृत्तिकारेण-

---

[३८८] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२०

[३८९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२०-२२१

"योगादिगोचरप्रमावारणाय प्रमाण्यत्वे सतीति विशेषयन्ति।"[३९०] इति। किन्तु तथापि भ्रमज्ञानेऽतिव्याप्तिर्भवति। यतो हि भ्रमज्ञानात् अस्माकं प्रवृत्तिर्भवत्येव। अत एव भ्रमज्ञानमपि अनुव्यवसायवेद्यत्वात् , लौकिकमानसप्रत्यक्षस्य विषयत्वात् प्रवृत्तिजनकत्वात्, प्रमाभिन्नत्वाच्च तत्र भ्रमज्ञाने उक्तलक्षणमिदमतिव्याप्तं भवति। अतस्तद्वारणायय 'प्रमाण्यत्वे सति' इति स्थले 'ज्ञानान्यत्वे सति' इति विशेषणं योजनीयम्। अतः भ्रमज्ञानस्य प्रवृत्तिजनकत्वेऽपि तथा लौकिकमानसप्रत्यक्षस्य विषयत्वेऽपि ज्ञानभिन्नत्वाभावे तत्र भ्रमज्ञाने अतिव्याप्तिर्न भवति। तेन च, सम्पूर्णं लक्षणं स्यात् 'ज्ञानान्यत्वे सति लौकिकमानसप्रत्यक्षविषयत्वे सति प्रवृत्तिजनकत्वं दोषत्वम्' इति।

एवं वृत्तिकारेण विश्वनाथेन दोषपदार्थस्य लक्षणं प्रदाय तस्य लक्षणस्य व्यभिचारमपि प्रदर्श्य तस्य समाधानमपि प्रदत्तम्। तेन च, दोषपदार्थविषये जिज्ञासूनां स्पष्टधारणा भवेत्। किन्तु भाष्यकारेण तु केवलं प्रवर्त्तना प्रवृत्तिहेतुत्वमिति उक्तम्। तस्य दोषपदार्थस्य निर्दुष्टलक्षणं न प्रदत्तम्, न वा लक्षणविषये कापि आलोचना कृता।

किञ्च, केचन लक्षणपदस्यास्य 'अनुमापकः' इत्यर्थं स्वीकुर्वन्ति। 'लक्ष्यते ज्ञायते अनुमीयते अनेन इति लक्षणम्' इत्येवं व्युत्पत्त्या लक्षणपदस्यार्थः भवति अनुमापकः इति। यतो हि स्वात्मनि प्रत्यक्षसिद्धत्वेऽपि तद्रागादिः अन्यस्मिन् आत्मनि प्रत्यक्षसिद्धो न भवति। तद्धि प्रवृत्तिद्वारा अनुमेयः। कस्यचन पुरुषस्य सुखजनककर्मणि प्रवृत्तिं दृष्ट्वा अनुमीयते यत् तद्विषये स पुरुषः रागवान् भवति। एवमेव दुःखजनककर्मणि निवृत्तिं दृष्ट्वा अनुमीयते यत् तद्विषये स पुरुषः

[३९०] तदेव,पृ-२२१

द्वेषयुक्तः इति। अत एव भाष्यकारेणोक्तं - "कर्मलक्षणा खलु रक्तद्विष्टमूढाः, रक्तो हि तत्कर्म कुरुते येन कर्मणा सुखं दुःखं वा लभते, तथा दिष्टस्तथा मूढ इति।"[३९१] इति। *तात्पर्यटीकाया*मपि उक्तं - "यतः कर्मणा प्रवृत्त्या प्रवर्तकरागादियुक्ताः पुरुषा लक्ष्यन्ते, अतो रागादीनां प्रवर्त्तनावत्त्वमपि लक्षितं भवति।"[३९२] इति। किन्तु महामनीषिणा विश्वनाथेन तु लक्षणपदमिदम् अनुमापकार्थे न गृहीतम्, तेन लक्षणार्थे एव लक्षणपदमिदमुररीकृतम् इति अवधेयम्।

## ❖ पुनरुत्पत्तिः प्रेत्यभावः[३९३]

उद्देशानन्तरं लक्षणं विधेयमिति न्यायशास्त्रस्य रीतिः। अत एव प्रमेयसूत्रे (नवमसूत्रे) दोषपदार्थस्यानन्तरं प्रेत्यभावपदार्थस्योद्देशत्वात् अत्रापि पूर्वसूत्रे दोषपदार्थस्य लक्षणानन्तरं क्रमप्राप्तस्य प्रेत्यभावपदार्थस्य लक्षणं क्रियते। अत एव विश्वनाथेन प्रस्तुतसूत्रस्य व्याख्यानादौ *न्यायसूत्रवृत्तौ* निगदितं- "प्रेत्यभावं लक्षयति..."[३९४] इति।

अत्र लक्ष्यपदं हि प्रेत्यभावः इति। पदमिदमन्वर्थसंज्ञकम्। अतः प्रेत्यपदस्यार्थः मृत्वा अर्थात् मरणस्यानन्तरमिति। अत्र प्रपूर्वकात् गमनार्थकात् इण्-धातोः ल्यप्प्रत्यये प्रेत्यपदं निष्पन्नं भवति। प्र-इति उपसर्गस्यार्थः प्रकर्षः इति। तथा ल्यबन्तपदस्यार्थः गमनं कृत्वा इति। सांसारिकदैनन्दिनजीवने गमनं तु

---

[३९१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२०

[३९२] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२०

[३९३] न्या.सू.-१/१/१९

[३९४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१

नित्यमेव भवति। किन्तु तद्धि न प्रकृष्टगमनम्। किन्तु इहलोकस्य निर्दिष्टभोगमुपभोग्य सूक्ष्मभूतसमूहैः उपहितात्मनः यत् परलोकगमनं भवति तदेव प्रकृष्टगमनम्। अत एव एतादृशप्रकृष्टगमनमेव मृत्युः एव। अत एव प्रेत्यपदस्यार्थः मरणानन्तरम्। किञ्च, उत्पत्त्यर्थकभूधातोः भावार्थे घञ्प्रत्यये निष्पन्नस्य भावपदस्यार्थः उत्पत्तिः वा जननं वा जन्म वा इति। तेन च, प्रेत्यभावपदस्यार्थो भवति मृत्योरनन्तरं जन्म पुनर्जन्म वा इति। अत एव लक्ष्यपदस्य व्युत्पत्तितः एव तस्यार्थः प्राप्यते इति कृत्वा पदमिदमन्वर्थसंज्ञकं भवति। अतः सम्यगेव प्रेत्यभावपदार्थस्य लक्षणं 'पुनरुत्पत्तिः' इति। अत एव 'पुनरुत्पत्तित्वं प्रेत्यभावत्वम्' इति पर्यवसितलक्षणम्। अत एव विश्वनाथेन प्रेत्यभावशब्दस्यार्थप्रकाशने निगदितं - "प्रेत्य – मृत्वा भावः – जननं प्रेत्यभावः।"[३९५] इति। भाष्यकारनये प्रेत्यभावो हि - "उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः।"[३९६] इति। अतो भाष्यकारमते प्रेत्यशब्दस्यार्थः - 'उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा' इति। अत्र सत्त्वनिकायशब्देन मनुष्यादि-एकजातीयजीवदेह एव भाष्यकारेण विवक्षितः। कोषकारमते समानधर्मी जीवसमूहः एव निकायपदवाच्यः। तदुक्तं कोषकारेण अमरसिंहेन- 'सधर्मिणां स्यान्निकायः।' इति। किञ्च, भूधातोरर्थः उत्पत्तिः। तेन भाष्यनये प्रेत्यशब्दार्थः हि मरणस्यानन्तरं भावः उत्पत्तिर्वा। अस्मिन्नेवार्थे प्रेत्यभावशब्दः परमृष्टः इति ध्येयम्। अतो भाष्यकारेणोक्तं - "प्रेत्यभावो मृत्वा पुनर्जन्म।"[३९७] इति।

---

[३९५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१

[३९६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१

[३९७] तदेव,पृ-२२२

ननु आत्मनः नित्यत्वात् कथं तस्योत्पत्तिः ? शङ्कायाः अस्याः निरसनं तु वृत्तिकारेण किमपि न कृतम्, न वा विषयेऽस्मिन् कापि आलोचना कृता। किन्तु भाष्यकारेण वात्स्यायनेन विषयेऽस्मिन् चर्चा विहिता। तथाहि भाष्यकारनये 'उत्पन्नस्य' इति पदस्य अर्थः 'सम्बद्धस्य' इति कृतः। तदुक्तं तेन - ''उत्पन्नस्य सम्बद्धस्य''[३९८] इति। तेन च, भाष्यकारेण देहेन, इन्द्रियेण, बुद्धिना, वेदनाभिः सुखदुःखादिभिर्वा सह सम्बन्धः इत्युक्त्वा तत्सम्बद्ध एव आत्मनः उत्पत्तिरित्युक्तम्। अत एव भाष्यकारेण निगदितं- ''सम्बन्धस्तु देहेन्द्रियबुद्धिवेदनाभिः।''[३९९] इति। अत एव भाष्यकारेणोक्तं- ''पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः।''[४००] इति।

सूत्रस्थितपुनरिति शब्दस्यार्थः अभ्यासः इति तु भाष्यकारेण तथा वृत्तिकारेण स्वीकृतम्। तेन उभयमतेन पुनरिति शब्दस्यार्थः अभ्यास इति। तदुक्तं भाष्यकारेण - ''पुनरित्यभ्यासाभिधानम्''[४०१] इति। उक्तञ्च वृत्तिकारेण- ''पुनरित्यनेनाभ्यासकथनात्...''[४०२] इति। तेन च, पुनरिति शब्देनाभ्यासकथनात् प्रेत्यभावोऽयं जन्ममरणात्मकसंसार-अनादि-अपवर्गान्तः इत्यर्थः सूचितो भवति। किञ्च, मतमिदम् उभयमताभ्यां अर्थात् भाष्यकारमतेन तथा वृत्तिकारमतेन समर्थितम्। तदुक्तं भाष्यकारेण - ''सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः

---

[३९८] तदेव,पृ-२२१

[३९९] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१

[४००] तदेव,पृ-२२१

[४०१] तदेव,पृ-२२१

[४०२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१

प्रेत्यभावो वेदितव्य इति।''[४०३] इति। उक्तञ्च वृत्तिकारेण- ''...प्रेत्यभावोऽयम-नादिरपवर्गान्तः।''[४०४] इति।

ननु न्यायशास्त्रे एवंविधप्रमेयरूपप्रेत्यभावपदार्थस्य उल्लेखं कथं कृतम्? यदि एवं स्यात् यत् मृत्योरनन्तरं मुक्तिर्भवति, पुनः तस्य जन्म न भवतीति चेत् अत्रोच्यते एवं सति संसारं प्रति वैराग्योत्पन्नः न स्यात्। तथा प्रेत्यभावोऽपि यथाभूतरूपेण विद्यमान एव। मत्योरनन्तरं पुनः पूर्वशरीरं परित्यज्य तदात्मनः वासनानुसारं नूतनशरीरं विधत्ते (परिधरति)। तथा च, भवचक्रादपि मुक्तिर्न जायते यावत् तदात्मनः  भोगो न जायते। अत एव जीवात्मनः पुनरागमनं तु ध्रुवमेव। एष एव प्रेत्यभावः जन्मान्तरतत्त्वं वा। एतज्ज्ञानं जायते चेत् पुरुषस्य संसारविषये नितान्तविरक्तिभावः वैराग्यो वा जायते। अतः प्रेत्यभावपदार्थस्य ज्ञानं वैराग्योदये उपयोगि भवति। अतः प्रेत्यभावपदार्थोल्लेखं न हि व्यर्थम्। तदुक्तं विश्वनाथेन - ''एतज्ज्ञानं च वैराग्य उपयुज्यते, तेन न प्रेत्येति व्यर्थम्।''[४०५] इति। संसारस्यैतच्चित्रं वैराग्यजनको भवतीति तु नाप्रमाणिकम्। तदाम्नातं मुण्डकोपनिषदि - ''परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।।''[४०६] इति। किन्तु प्रेत्यभावरूपप्रमेयपदार्थस्यानुल्लेखे तथा तत्पदार्थस्य व्यर्थताविषये भाष्यकारेण किमपि न चर्चितम्।

---

[४०३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२२

[४०४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१

[४०५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२१-२२२

[४०६] मुण्डकोपनिषद्- १/२/१२

किञ्च, वृत्तिकारेण विश्वनाथेन प्रेत्यभावपदार्थघटकयोः मृत्यूत्पत्त्योः कोऽर्थः इत्यपि वर्णितं *न्यायसूत्रवृत्तौ*। तदुक्तं तेन - "तदीयमरणञ्च तदीयजीवना-दृष्टनाशः तदीयश्चरमप्राणसंयोगध्वंसः, तदीयप्राणध्वंसो वा। तदीयोत्पत्तिस्तु तदीयविजातीयशरीराद्यप्राणसंयोग इति।"[४०७] इति। अर्थात् चैत्रादिपुरुषस्य मृत्युर्नाम चैत्यादिपुरुषजीवनानुकूलं यद् अदृष्टं तस्य नाश एव बोध्यते। अर्थात् प्रत्येकजीवस्य पूर्वपूर्वजन्मनि अभ्यस्तकर्मानुसारमिह जन्मनः आयुः निर्धारितं भवति। तदुक्तं *हितोपदेशे*-

'आयुः कर्म च वित्तं च विद्या निधनमेव च।

पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः।।'[४०८] इति।

पूर्वकर्म तु साक्षाद्भावेन उक्तेहजन्मीयायुः प्रभृतिं प्रति कारणं न भवति। किन्तु अदृष्टद्वारकेन भवति। पूर्वजन्मनि यादृक्कर्मणा यादृगदृष्टं सञ्चितं , इह जन्मनि तावदायुःकाले तददृष्टस्य (पुण्यस्य पापस्य वा) फलभोगः भवति चेत् अदृष्टस्य नाशे अवसाने वा पुनः तदायुःकालात् विच्छिन्नः सन् मृत्युवरणं करोति। अत एवोक्तं यत् तदीयमत्युर्नाम तदीयजीवनानुकूलादृष्टनाश एव बोध्यते।

अथवा तदीयमरणं नाम तदीयचरमप्राणसंयोगध्वंस एव बोध्यते। अर्थात् चैत्रीयप्राणवायोः संयोगनाशः संसारे प्रायः एव भवति किन्तु तथापि प्राणवायोः यः संयोगनाशः चरमः अन्तिमो वा, तदाश्रित्यैवोच्यते चैत्रस्य मृत्युरिति। अथवा तदीयप्राणवायोः ध्वंस एव तदीयमृत्युरित्युक्तम्। किञ्च, विश्वनाथेन उत्पत्तिपदस्यार्थविषये उक्तं यत् तदीयोत्पत्तिस्तु

---

[४०७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२२

[४०८] हितोपदेशः-१/२७

तदीयविजातीयशरीराद्यप्राणसंयोग इति। एवं विश्वनाथेन प्रेत्यभावपदार्थघटकयोः मृत्यूत्पत्त्योः वर्णना प्रदत्ता *न्यायसूत्रवृत्तौ* किन्तु भाष्यकारेण एतयोः द्वयोः पदयोः वर्णना तु न प्रदत्ता।

## ❖ प्रवृत्तिदोषजनितोऽर्थः फलम् [४०९]

उद्देशः लक्षणं परीक्षा चेति त्रिविधरीतयो हि न्यायशास्त्रस्य व्याख्यायाः। येन क्रमेण उद्देशो विहितः स्यात् तेनैव क्रमेण लक्षणमपि विहितं भवेदिति। अत एव पूर्वसूत्रे प्रेत्यभावपदार्थस्य लक्षणानन्तरं प्रस्तुतसूत्रे क्रमप्राप्तस्य फलपदार्थस्य लक्षणं क्रियते। अस्मिन्नेव तात्पर्ये विश्वनाथेनोक्तं - "फलं लक्षयति- प्रवृत्तिदोषेत्यादि।"[४१०] इति।

तथाहि प्रवृत्त्या धर्माधर्माभ्यां रागद्वेषादिदोषैश्च जनितः उत्पादितः अर्थः सुखदुःखभोग एव फलपदार्थः, शरीरादिकमपि गौणं फलमेव प्रवृत्तिजन्यत्वात्। यद्यपि फलस्य प्रवृत्तिजन्यत्वमेव तथापि रागद्वेषादिदोषैर्विना सुखादिभोगो न सम्भवतीति हेतोरेव दोषाणामपि फलहेतुत्वमुक्तम्।

प्रस्तुतसूत्रस्य व्याख्यायां तु प्रायेण सर्वत्र भाष्यवृत्त्योः सादृश्यमेव प्रतिभाति। यतो हि वृत्तिकारेण प्रस्तुतसूत्रस्य व्याख्यायां प्रायः अनेकत्र स्थाने भाष्यमतमेव उद्धृतम्, 'तथा च भाष्यम्' इति वाक्यद्वारा। येन च, प्रस्तुतसूत्रस्य

---

[४०९] न्या.सू.-१/१/२०

[४१०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२३

व्याख्यायामुभययोः मतयोः समानत्वं प्रतिभाति। तथापि स्थलविशेषे व्याख्यायां कुत्रचित् भिन्नत्वमपि दृश्यते, तद्धि यथामति वर्ण्यते।

तथाहि उभयमताभ्यां सुखदुःखयोरुपभोग एव फलम्। किन्तु फलस्यास्य किं मुख्यं फलं किं वा गौणमिति विषये तु भाष्यकारेण स्पष्टतया किमपि नोक्तं किन्तु वृत्तिकारेण तु स्पष्टतया फलस्य मुख्यगौणविभागः प्रदर्शितः। तथाहि वृत्तिकारेण स्पष्टं निगदितं यत् सुखदुःखयोरुपभोग एव मुख्यं फलमिति। तदुक्तं तेन- "अत्र च मुख्यं फलं सुखदुःखोपभोगः"[४११] इति। तन्नये शरीरादिकं हि गौणफलम्। तदुक्तं तेन *न्यायसूत्रवृत्तौ* - "गौणं फलं तु शरीरादिकं सर्वमेव।"[४१२] इति।

किन्तु अत्रेदमवधेयं यत् भाष्यकारवचनस्य तात्पर्यं यदि विश्लिष्यते चेत् भाष्यवचनादपि फलस्य मुख्यगौणविभागः प्राप्यते। तथाहि भाष्यकारेण प्रथमतः सुखदुःखयोः संवेदनं हि फलमित्युक्त्वा ततश्च देहेन्द्रियप्रभृतिसकलपदार्थः फलमिति उल्लिखितम्। तदुक्तं भाष्यकारेण - "सुखदुःखसंवेदनं फलम्।...तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम्।"[४१३] इति। एतेन प्रतीयते यत् मुख्यविषयस्य एव प्राथम्यवशात् अभ्यर्हितत्ववशाद्वा सुखदुःखयोः उपभोगः यतः प्रथमे उल्लिखितम् अतः अवश्यमेव सुखदुःखोपभोगः भाष्यकारनये मुख्यं फलम्। ततश्च देहिन्द्रियप्रभृतिपदार्थानामुल्लेखात् तेषां पदार्थानां गौणत्वं स्पष्टीभवति।

---

[४११] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२३

[४१२] तत्रैव

[४१३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२२

ननु सुखादेरुपभोगात्मकफलं - 'प्रवृत्तिजनितत्वं फलत्वम्' इति कथने एव भवति तर्हि कथं दोषपदस्य ग्रहणम् ? विषयेऽस्मिन् तु भाष्यकारेण किमपि नोक्तं किन्तु वृत्तिकारेण चर्चितम्। तथाहि तन्नये धर्माधर्मरूपप्रवृत्तिः पुनः दोषात् ज्ञायते, तेन परम्परया सुखाद्युपभोगस्य कारणं दोषोऽपि भवति। तत्तु पूर्वमेवालोचितम्। अस्मादेव कारणात् सूत्रकारेण 'प्रवृत्तिदोषजनितोऽर्थः फलम्' इत्येवं सूत्रगात्रमुपात्तम्। अत एव वृत्तिकारेण विश्वनाथेन निगदितं- " तत्र च धर्माधर्मात्मकप्रवृत्तेः प्रयोजकत्वात्तत्र दोषस्य हेतुत्वात् प्रवृत्तिदोषजनित इत्युक्तम्।"[४१४] इति। अर्थात् अत्र प्रवृत्तिर्नाम पूर्वोक्तप्रवृत्तिसाध्यः धर्मः अधर्मश्च। दोषजनितः तद्धर्मः अधर्मश्च फलमात्रस्य जनको भवति। अत एव फलमात्रमेव प्रवृत्तिदोषजनितं भवति। *तात्पर्यटीका*कारेण वाचस्पतिमिश्रेणोक्तं यत् न केवलं प्रवृत्तिं प्रति दोषः कारणम् अपि तु प्रवृत्तिजन्यं सुखं दुःखञ्चापि प्रति दोषः कारणं भवतीति प्रकाशार्थमेव सूत्रकारेण महर्षिणा गौतमेन 'प्रवृत्तिदोषजनितः' इत्युक्तम्। दोषरूपजलेन सिक्ते आत्मरूपक्षेत्रे प्रवृत्तिः अर्थात् धर्माधर्मरूपबीजं सुखदुःखरूपफलम् उत्पन्नं भवति। तदुक्तं *तात्पर्यटीका*कारेण- "अत्र च प्रवृत्तिजनित इति वक्तव्ये दोषग्रहणं न केवलं प्रवृत्तिं प्रति दोषाणां हेतुभावः, अपि तु प्रवृत्तिकार्ये सुखदुःखे अपि प्रति, इति दर्शनार्थम्। दोषसलिलावसिक्तायां खलु आत्मभूमौ धर्माधर्मबीजे सुखदुःखे जनयतः नान्यथा।"[४१५] इति।

प्रलयकालेऽपि जीवस्य (जीवात्मनः) धर्माधर्मत्वात् तज्जन्यस्य पुनः सृष्टौ देहादिफलस्य ग्रहणं त्यागश्च जायते। अतः प्रलयकाले तस्य पर्यवसानम् अर्थात् सर्वतोभावेन अवसानं न भवति, यावन्न मुक्तिर्भवति जीवस्य। एतस्मिन्नेव तात्पर्ये

---

[४१४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२३

[४१५] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२२-२२३

भाष्यकारेणोक्तं - "नास्य हानोपादानयोर्निष्ठा पर्यवसानं वाऽस्ति।"[४१६] इति। मुक्तौ तु फलस्य किं भवतीति विषये चर्चा न विहिता वृत्तिकारेण।

किन्तु प्रवृत्तिदोषजनितः अर्थः फलम् इति फलस्य प्रकृतं लक्षणं न, यतो हि सुखदुःखयोः साक्षात्कारवत् अन्ये अपरानेकपदार्थोऽपि प्रवृत्तिदोषजनितो भवति। अत एव केवलं सुखादेः साक्षात्कारः बोध्यते इत्येवमेव लक्षणं कार्यम्। तल्लक्षणं तु भाष्यकारेण न प्रदत्तं किन्तु वृत्तिकारेण विश्वनाथेन प्रदत्तम्। तदुक्तं तेन - "लक्षणं तु सुखदुःखान्यतरसाक्षात्कार इति।"[४१७] इति। अर्थात् सुखदुःखयोः अन्यतरस्य साक्षात्कार एव फलमिति विज्ञेयम्। तेन लक्षणेनानेन अन्यपदार्थोऽपि न बोध्यते।

किञ्च, वृत्तिकारेण एतदपि स्पष्टीकृतं यत् यतः सर्वमेव उत्पन्नपदार्थः फलत्वेन उररीकृतः अतः जन्यत्वमेव फलत्वम् अस्तु इति, तथा च प्रवृत्तिदोषजनित इति तु निर्वेदोपयोगाद् उक्तम् इति। तदुक्तं विश्वनाथेन- "इत्थञ्च जन्यत्वमेव फलत्वम्, प्रवृत्तिदोषजनित इति निर्वेदोपयोगादुक्तम्।"[४१८] इति।

---

[४१६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२३

[४१७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२३

[४१८] तत्रैव

## ❖ बाधनालक्षणं दुःखम्[४१९]

पूर्वसूत्रे फलरूपदशमप्रमेयपदार्थस्य लक्षणानन्तरं क्रमप्राप्तस्य दुःखरूपैकादशतमप्रमेयपदार्थस्य लक्षणं क्रियते प्रस्तुतसूत्रे महर्षिणा गौतमेन। अत उक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ* - "दुःखं लक्षयति"[४२०] इति।

भाष्यकारनये पूर्वोक्तशरीरादिफलपर्यन्तं सर्वमेव दुःखम् इत्येव महर्षिणा गौतमेन विवक्षितमिति। अत एव भाष्यकारेण प्रस्तुतसूत्रस्य व्याख्यानादौ निगदितम् - "अथैतदेव"[४२१] इति। अत्र अथशब्दस्यार्थः साकल्यं समस्तं वेति। 'अथ समस्तम् एतदेव बाधनालक्षणं दुःखम्' इति भाष्यकारस्याभिप्रेतम्।

भाष्यकारनये तथा वृत्तिकारनये बाधनाशब्दस्यार्थः पीडा इति। भाष्यकारेण तु पुनः तस्य तापः इत्यर्थः प्रकटितः। वृत्तिकारनये बाधनालक्षणमिति पदं बहुव्रीहिसमासनिष्पन्नम्। अत उक्तं तेन - "बाधना पीडा तदेव लक्षणं स्वरूपं यस्य।"[४२२] इति। अत एव वृत्तिकारनये पीडा एव प्रतिकूलवेदनीयता एव वा स्वरूपं यस्य तद् दुःखमिति। अतो दुःखस्य स्वरूपं पीडा एव, दुःखमेव, यद्धि सर्वैः अनुभवसिद्धम्। तेन हि बाधनालक्षणपदात् दुःखस्य लक्षणरूपेण दुःखमेव प्राप्यते। अत एव दुःखजातिरेव दुःखस्य लक्षणं स्यात्। दुःखत्वजातिस्तु न हि

---

[४१९] न्या.सू.-१/१/२१

[४२०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

[४२१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२४

[४२२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

निष्प्रमाणिकम्। सा जातिस्तु अस्माकं मानसानुभवसिद्धा। अत उक्तं वृत्तिकारेण - "तथा चानुभवसिद्धदुःखत्वजातिरेव लक्षणम्।"[४२३] इति।

भाष्यकारनये तु यत् सर्वजीवैः प्रतिकूलवेदनीयम्, स दुःखपदार्थः सर्वजीवैरेव सुविज्ञातः। तथा च, यत्सकलपदार्थः दुःखेन सहानुषक्तः, तदपि दुःखमिति ज्ञेयम्। तदुक्तं भाष्यकारेण - "बाधना पीडा ताप इति। तयाऽनुविद्धमनुषक्तमविनिर्भागेन वर्तमानं दुःखयोगाद् दुःखमिति।"[४२४] इति। अत्र भाष्यकारेण 'अनुविद्धम्' इति पदस्यार्थः कृतः 'अनुषक्तम्' इति, तदेव व्याख्यातम् 'अविनिर्भागेन वर्तमानम्' इति। अत्र 'अविनिर्भागः' नाम अपृथग्भावः अर्थात् नियतसम्बन्धः इति। दुःखसम्बन्धशून्यः कश्चित् देहादिः नास्तीति तात्पर्यम्। अतस्ततश्चोक्तं 'दुःखयोगाद् दुःखमि'ति अर्थात् पूर्वोक्तदेहादिफलपर्यन्तं सर्वमेव दुःखानुषक्तत्वात् दुःखमेव। सूत्रे लक्षणशब्देन अनुषङ्गरूपसम्बन्धः विवक्षितः। बाधनालक्षणं नाम दुःखस्य अनुषङ्गरूपसम्बन्धः यत्रास्ति, तत्सर्वं दुःखम्। अत्र मुख्यदुःखेन सह दुःखस्य अभेदसम्बन्धः। शरीरेण दुःखस्य निमित्तत्वसम्बन्धः। इन्द्रियादिना दुःखस्य साधनात्वसम्बन्धः। सुखेन दुःखस्य अविनाभावसम्बन्धः इत्यवधेयम्।

किञ्च, वृत्तिकारनये यद् दुःखनिमित्तं भवति तदपि दुःखवत् इति मन्यते। अतः शरीरम्, इन्द्रियम्, अर्थः – एतानि हि दुःखसाधनत्वात् तानि अपि दुःखमन्तः इति मन्तुं शक्यते। अत एव शरीरादि हि गौणदुःखम्। किञ्च, अस्माकं सांसारिकसुखमपि दुःखमिश्रितम्। कस्यचन धनिनः धनं सुखकरत्वेऽपि रक्षणोपाये

---

[४२३] तत्रैव

[४२४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२४

चिन्तनत्वात् तत्परिणामिदुःखमेव भवति। अतस्तत्सुखं दुःखमिश्रितत्वात् तद्धि न प्रकृतं सुखम्। वरं हि तत् दुःखतुल्यमिति कथने। एवमेव शरीरादिवत् सुखमपि गौणदुःखमिति ध्येयम्। अत एवोक्तं वृत्तिकारेण विश्वनाथेन - "शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् सुखे च दुःखानुषङ्गाद् दुःखव्यवहारो गौण इति।"[४२५] इति।

किञ्च, भाष्यकारनये दुःखी पुरुषः सर्वं दुःखयुक्तमिति पश्यन् दुःखस्यानिष्टत्वात् दुःखं जिहासुः जन्मनि दुःखदर्शी संसाराद् निर्विण्णः सन् विरज्यते विरक्तः सन् मुच्यते अपवर्गपदं लभते। यस्य पुरुषस्य वैराग्यं जातं स पुरुषः विरक्तो भवति। विरक्तपुरुषः एव काले मुक्तिं विन्दते। अत एवोक्तं भाष्यकारेण - "सोऽयं सर्वं दुःखेनानुविद्धमिति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते, निर्विण्णो विरज्यते, विरक्तो विमुच्यते।"[४२६] इति।

## ❖ तदत्यन्तविमोक्षोऽपवर्गः[४२७]

दुःखस्य स्वरूपमज्ञात्वा चरमप्रमेयस्यापवर्गस्य स्वरूपं बोद्धुं न शक्यते। अत एव प्रस्तुतसूत्रेण महर्षिगौतमेन दुःखस्वरूपं वर्णनानन्तरं क्रमप्राप्तस्य अपवर्गरूपचरमप्रमेयपदार्थस्य लक्षणं विहितम्।

भाष्यकारेण प्रथमतः अपवर्गस्य परिचयं प्रकाशयता उक्तं - "यत्र तु निष्ठा.."[४२८] इति। अर्थात् यल्लाभे सति पूर्वोक्तदेहादिफलस्य त्यागस्य तथा

[४२५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

[४२६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२४

[४२७] न्या.सू.-१/१/२२

[४२८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

पुनर्ग्रहणस्य समाप्तिर्भवति। किन्तु प्रलयकाले जीवस्य (जीवात्मनः) देहादिपरिग्रहो न भवति। अतः कोऽपि दुःखभोगोऽपि न भवति। अत एव भाष्यकारेण ततः परमेव पूर्ववाक्यस्य व्याख्यायता निगदितं - "यत्र तु पर्यवसानम्"[४२९] इति। प्रलयकाले जीवस्य यद्यपि दुःखस्यावसानं भवति तथापि सर्वतोभावेन अवसानं न भवति। यतो हि अनन्तरं पुनः सृष्टौ तस्य समस्तजीवस्य देहादिपरिग्रहस्तथा नानादुःखभोगो जायते। किन्तु अपवर्गलाभे सति पुनः तस्य जीवस्य जन्म न भवति। अतः तस्य कदापि दुःखभोगोऽपि न भवति। जीवस्य प्रलयकालीनसर्वदुःखशून्यावस्थायाः सीमा विद्यते। किन्तु मोक्षावस्थायाः सीमा नास्ति। मोक्षलाभे सति पुनः तस्य पुनरावृत्तिः न भवति। तथाहि श्रूतौ आम्नातं - 'न च पुनरावर्तते।' इति। भाष्यकारेण एतदेव व्यक्तयता भणितम्- "एतामवस्थामपर्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः।"[४३०] इति।

वृत्तिकारेण विश्वनाथेन पूर्वसूत्रेण केवलं सर्वजीवस्य मानसानुभवसिद्धमुख्यदुःखस्यैव व्याख्या कृता अपि च प्रस्तुतसूत्रेऽस्मिन् 'तत्'-शब्देन तन्मुख्यदुःखमेव गृहीत्वा सूत्रार्थः व्याख्यापितः। किन्तु भाष्यकारेण पूर्वसूत्रेण दुःखानुषक्तशरीरादिसकलगौणदुःखस्य व्याख्या कृता अपि चास्मिन् प्रस्तुतसूत्रे 'तत्'-शब्देन सर्वविधदुःखानां ग्रहणं कृत्वा सूत्रार्थः व्याख्यापितः - "तेन दुःखेन जन्मना अत्यन्तं विमुक्तिरपवर्गः।"[४३१] इति। किञ्च, वाचस्पतिमिश्रेणोक्तं यत् सूत्रस्थतत्पदेन केवलं मुख्यदुःखमेव बोध्यमिति भ्रमो यथा न भवेत् तदर्थं भाष्यकारेणानन्तरं निगदितं - 'जन्मना' इति। अर्थात् 'जायते' इत्येवंरूपव्युत्पत्त्या

[४२९] तत्रैव

[४३०] तत्रैव

[४३१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

उक्तजन्मन्शब्देन जीवस्य सम्बन्धविषये जायमानशरीरादिगौणदुःखं तथा मुख्यदुःखमिति सर्वविधदुःमेव 'तत्'-शब्देन बोध्यम्। तदुक्तं *तात्पर्यटीका*कारेण वाचस्पतिमिश्रेण - "'तत्' इति अनन्तरं गौणमुख्यभेदभिन्नं दुःखं परामृशतीत्याह भाष्यकारः – तेन दुःखेनेति। मुख्यमेव दुःखमिति भ्रमो मा भूदत आह- जन्मनेति। अनेन जायमाना दुःखशब्देन सर्वे शरीरादय उच्यन्त इत्युक्तं भवति।"[४३२] इति। अत एव उद्द्योतकरेणापि – षडिन्द्रियाणि (६), तद्ग्राह्यषड्विषयाः (६), तत्षट्प्रकारविषये षट्प्रकारप्रत्यक्षरूपबुद्धयः (६), शरीरम् (१), सुखम् (१), मुख्यदुःखञ्च (१) इत्येवम् एकविंशतिप्रकारदुःखानाम् आत्यन्तिकनिवृत्तिरेव अपवर्गः इत्युक्तम्। उक्तरूपापवर्गस्य नाम निर्वाणमुक्तिः। ततश्च भाष्यकारेण उक्तरूपावस्था निर्वाणमुक्तिर्वा – अभयम्, अजरम्, अमृत्यपदम्, ब्रह्म, क्षेमप्राप्तिरिति नाम्ना व्यक्तीकृतः।

किन्तु आचार्यविश्वनाथेन अपवर्गं लक्षयता उक्तं - "तस्य दुःखस्य, अत्यन्तविमोक्षः स्वसमानाधिकरणदुःखासमानकालीनो ध्वंसः।"[४३३] इति। अत्रायमाशयः- दुःखस्यात्यन्तिकविमुक्तिः अपवर्गः इत्युच्यते। अत्र सूत्रस्थतत्पदेन पूर्वसूत्रे लक्षितं दुःखमेव गृह्यते। अत्यन्तविमोक्षपदस्यार्थः आत्यन्तिकनिवृत्तिरिति। अत्र निवृत्तिपदेन चाभावः इति बोध्यते। अत एवापवर्गः नाम दुःखस्य आत्यन्तिकनिवृत्तिः इति आयाति। उक्तञ्च श्रीधरभट्टेन *न्यायकन्दल्यां*- "तस्मादहितनिवृत्तिरात्यन्तिकी मुक्तिः" इत्यादि। तेन च, दुःखस्य अत्यन्ताभावः एव मुक्तिरिति पर्यवसति। किन्तु अत्यन्ताभावस्य नित्यत्वात् तस्य

[४३२] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

[४३३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२६

नित्यत्वनिबन्धनम् असाध्यत्वात् अपुरुषार्थत्वस्यापत्तिः स्यात्। घटादिसाध्यपदार्थः एव पुरुषेण प्रार्थितविषयो भवितुमर्हति किन्तु यन्नित्यं, यदसाध्यं तत्कृते यत्नवान् न भवति पुरुषः। किन्तु जगति मोक्षार्थं नैकैः मुमुक्षुभिः पुरुषैः नानाप्रकारयोगविधिः अनुष्ठीयते, मोक्षशास्त्रस्य श्रवणञ्च क्रियते। एवं पुरुषाणां प्रयत्नेन एव मोक्षः साध्यो भवति। किन्तु इदानीं यदि मोक्षः अत्यन्ताभावपदार्थः इत्युच्यते तदा तस्य पुरुषार्थत्वस्य हानिरेव स्यात्। अत एव मोक्षो न अत्यन्ताभावपदार्थः वृत्तिकारनये। अस्मात् एव कारणात् वृत्तिकारेण 'अत्यन्तविमोक्षः' इति पदस्यार्थः कृतः 'स्वसमानाधिकरण-दुःखासमानकालीनो ध्वंसः' इति। अत्र च आत्यन्तिकत्वं नाम स्वसमानाधिकरणासमानकालीनत्वम् तथा विमोक्षः निवृत्तिर्वा इति पदस्यार्थः ध्वंसाभावः इति। तेन च, ध्वंसाभावस्य मुक्तिपदार्थत्वात् पूर्ववत् मोक्षस्य अपुरुषार्थत्वापत्तिर्न भवति। यतो हि ध्वंसाभावः उत्पाद्यो भवति। अर्थात् तद्धि साध्यो भवति। तथा च, तत्सिद्ध्यर्थः श्रवणादिविधिरपि मुमुक्षूणां सकाशे सार्थको भवति।

किं बहुना, आचार्यविश्वनाथेन भणितं यद् दुःखध्वंसरूपमुक्तिः जन्मापायात्प्रयुक्तः। तद्धि द्वितीयन्यायसूत्रे व्याख्यातं यत् मिथ्याज्ञानाद् दोषः, दोषात् धर्माधर्मात्मकप्रवृत्तिः, प्रवृत्तितः जन्म, जन्मनश्च दुःखम् उत्पद्यते इति। मिथ्याज्ञानादि उत्तरोत्तरपदार्थं प्रति कारणं भवति। अत्र नियमस्तु 'व्यापकाभावे व्याप्याभावः' इति। कार्यं प्रति कारणं हि व्यापकपदार्थः। अत एव कारणाभावे कार्यस्यापि अभावो भवति। यथा मृत्तिकायाः अपाये घटस्यापि अभावो भवति। अत एव जन्मरूपकारणापाये दुःखात्मककार्यस्यापि अभावो भवति। एतस्मिन्नेव

तात्पर्ये वृत्तिकारेण विश्वनाथेन निगदितं - "तस्य च जन्मापायादेव सम्भवः"[४३४] इति। किञ्चात्रावधेयं यत् विश्वनाथेन अनेनात्र एतदपि भणितं यत् मुख्यदुःखस्य जन्मन अपायः ध्वंसो वा यदि भवेत् तर्हि तदपायादपवर्गः सम्भवः इति। किन्तु जन्मादि तु गौणदुःखम् इत्युक्तम्। किञ्च, भाष्यकारेण निगदितं यत् - "तेन दुःखेन जन्मना अत्यन्तं विमुक्तिरपवर्गः"[४३५] इति। अत्र च, वृत्तिकारस्य वक्तव्यं यत् गौणदुःखं यत् जन्म तस्य निवृत्तिद्वारा अपवर्गः मुख्यदुःखध्वंसो वा भवतीति। अत एव वृत्तिकारमतेऽपि सूत्रस्थतत्पदेन मुख्यदुःखमेव गृहीतमित्येव विश्वनाथस्याशयः। अत एव प्रस्तुतसूत्रस्य *न्यायसूत्रवृत्ते*रन्तिमे विश्वनाथेन गदितं- "दुःखेन दुःखानुषक्तेन इत्यर्थः।"[४३६] इति।

ततश्च भाष्यकारेण मोक्षे आत्मनः नित्यसुखम् अभित्यज्यते न वा इति विषये अन्ये आचार्याणां मतमुल्लिख्य बहुधा विचारितम्। तथाहि महत्त्ववत् आत्मनः परममहत्परिमाणन्यायेन आत्मनः नित्यसुखं मोक्षकाले अभिव्यज्यते। तदभिव्यक्तनित्यसुखेन विमुक्तः आत्मा अत्यन्तसुखी भवति इति कश्चित् सम्प्रदायः स्वीकरोति। किन्तु प्रमाणाभावात् तेषां मतस्य उपपत्तिर्न भवति। महत्त्ववत् मोक्षे आत्मनः नित्यसुखस्याभिव्यक्तिर्भवतीति विषये प्रत्यक्षप्रमाणं नास्ति, अनुमानप्रमाणमपि नास्ति, न वा आगमप्रमाणमस्ति इत्येवं भाष्यकारेण भिन्नसम्प्रदायस्य मतमुल्लिखितम्। तदुक्तं भाष्यकारेण - "नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते, तेनाऽभिव्यक्तेनाऽत्यन्तं विमुक्तः सुखी भवतीति केचिन्मन्यन्ते। तेषां प्रमाणाभावादनुपपत्तिः। न प्रत्यक्षं नानुमानं नागमो वा

---

[४३४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२८

[४३५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२५

[४३६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२८

विद्यते, नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यते इति।"[४३७] इति। ततश्च भाष्यकारेण बहुधा विचार्य अन्तिमे निगदितं यत् मुमुक्षूणां नित्यसुखे रागः कामना वा तिष्ठति चेत् मोक्षलाभो भवितुं नार्हति। कारणं रागः कामना वा हि बन्धनमिति सर्वसम्मतम्। बन्धनं तिष्ठति चेत् कमपि मुक्तः इति वक्तुं न शक्यते। तात्पर्यकारमते मुमुक्षुः नित्यसुखकामनया मोक्षसाधने प्रवृत्तः भवति चेत् कामनापिशाची कदापि उपस्थितविषयसुखे तं प्रवृत्तं कारयित्वा तस्याभीष्टं मोक्षं सुदूरपराहतं करिष्यति इति। अत एव मुमुक्षुः कदापि न कामनां स्वजीवने स्थानं दास्यति इति। एवं रागवत् द्वेषोऽपि बन्धनम्। अतः सर्वविषये द्वेषोऽपि परित्यज्यः। किन्तु सुखस्य कामनां परित्यजति चेत् द्वेषो न भवति। तथा च, दुःखपरिहाराय इच्छा जायते चेदपि द्वेषो न भवति। वैराग्यवशादेव जन्मादिसकलदुःखपरिहारे इच्छा जायते। वैराग्यञ्च न द्वेषपदार्थः। वस्तुतः मुमुक्षूणां नित्यसुखभोगे कामना तिष्ठति चेत् बन्धनत्वात् तेषां मुक्तिर्न भवितुमर्हति। अत एव मुक्तपुरुषस्य नित्यसुखस्य प्रतिपादकश्रुतिवाक्ये सुखवाचकशब्दस्य मुख्यार्थं ग्रहीतुं न शक्यते। तदुक्तं भाष्यकारेण- "नित्यसुखरागस्याप्रहाणे मोक्षाधिगमाभावः, रागस्य बन्धनसमाज्ञानात्। यद्ययं मोक्षो नित्युं सुखमभिव्यज्यते इति, नित्यसुखरागेण मोक्षाय घटमानो न मोक्षमधिगच्छेन्नाधिगन्तमर्हतीति। बन्धनसमाज्ञातो हि रागः। न च बन्धने सत्यपि कश्चिन्मुक्त इत्युपपद्यत इति।"[४३८] इति। भाष्यकारस्य तात्पर्यं व्याख्यायता

[४३७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२२६

[४३८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२३२

वाचस्पतिमिश्रेणापि उक्तं- "तस्मान्नित्यानन्दप्रतिपादकश्रुतिरात्यन्तिके दुःख-वियोगे भाक्तीति युक्तमिति भावः।"[४३९] इति।

अत्रापि पूर्वपक्षी अवश्यमेव वदेत् यत् मुमुक्षूणां प्रथमे नित्यसुखे रागो जायते ततश्च उत्कटवैराग्यवशात् तद्रागः प्रहीणः परित्यक्तो वा भवति। तस्य तन्नित्यसुखे रागः अनन्तरं स्वयमेव तं परित्यजति। अतः तदा तस्य किमपि बन्धनाभावे मोक्षलाभस्य प्रतिकूलं किमपि न भवति। तदुक्तं न्यायभाष्ये- "प्रहीणनित्यसुखरागस्याप्रतिकूलत्वम्। अथास्य नित्यसुखरागः प्रहीयते तस्मिन् प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवति ?"[४४०] इति। भाष्यकारेण अन्तिमे अस्योल्लेखं कृत्वा पुनः तस्योत्तरं प्रदाय उक्तं - "यद्येवम्, मुक्तस्य नित्यं सुखं भवति, तथाऽपि न भवति, नास्योभयोः पक्षयोर्मोक्षाधिगमो विकल्प्यते इति।"[४४१] इति। भाष्यकारस्य तात्पर्यमिदं व्याख्यायता वाचस्पतिमिश्रेण भणितं- "यदि नित्यं सुखं भवति कामं भवतु, मा भूत् उभयोरपि पक्षयोर्वीतरागप्रवृत्तौ न मोक्षाधिगमो विकल्प्यते , न सन्दिग्धो भवतीत्यर्थः।"[४४२] इति। अत्रायमाशयः- उत्कटवैराग्यवशात् मुमुक्षुः सर्वविषये एव वीतरागः भवत्यपि तस्य तन्नित्यसुखभोगे किञ्चिन्मात्रमपि रागः न तिष्ठति चेत् शेषावस्थायां तस्य तन्नित्यसुखभोगः भवति, न भवति वा तस्य मोक्षलाभविषये कोऽपि सन्देहः न भवितुमर्हति। यतो हि चरमतत्त्वज्ञानेन तस्य जन्मप्रवाहस्य अत्यन्तोच्छेदवशात् सर्वदुःखानाम् आत्यन्तिकनिवृत्तित्वात् स तदा मुक्तः इति स्वीकार्यम्।

---

[४३९] न्या.वा.तात्.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),न्या.द.,पृ-२३१

[४४०] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२३२

[४४१] तत्रैव

[४४२] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२३२

यन्नित्यसुखभोगे तेन रागः बहुपूर्वं परित्यक्तः तन्नित्यसुखभोगः न भवति चेदपि तस्य मुक्तेरभावः इति वक्तुं नालम्। किन्तु सर्वविधदुःखानाम् आत्यन्तिकनिवृत्तिः न भवति चेत् 'अपवर्गः' 'चरममुक्तिः' वा न भवति। अत एव महर्षिणा गौतमेन प्रस्तुतसूत्रेण अपवर्गस्य उक्तरूपलक्षणमेव कृतमिति भाष्यकारस्याशयः। उक्तञ्च *गीतायां*- "जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते।।"[४४३] इति। किन्तु शैवाचार्यभासर्वज्ञेन '*न्यायसारः*' इति ग्रन्थस्य शेषभागे पूर्वोक्तमतं खण्डितम्। अन्तिमे उपसंहारे तेन निगदितं यत् उक्तनित्यसुखं नित्यसंवेद्यम्। एतन्नित्यसुखविशिष्टात्यन्तिकदुःखनिवृत्तिरेव पुरुषस्य जीवात्मनो वा मोक्षः। तदुक्तं भासर्वज्ञेन *न्यायसारग्रन्थे* - 'तस्मात् कृतकत्वेऽपि सुखसंवेदसम्बन्धस्य विनाशकारणाभावान्नित्यत्वं स्थितम्। तं सिद्धमेतन्नित्यसंवेद्यम्। अनेन सुखेन विशिष्टा आत्यन्तिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति।' इति। एवञ्च प्रमेयव्याख्याने न्यायभाष्यन्यायसूत्रवृत्त्योः वैलक्षण्यं परिलक्ष्यते।

---

[४४३] गीता-१४/२०

# ।।षष्ठोऽध्यायः।।

## न्यायाङ्गव्याख्याने न्यायभाष्यकार-न्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

अङ्गः नाम उपकारकः। यन्न्यायस्य अङ्गः तदेव न्यायाङ्गः। न्यायाङ्गः नाम न्यायस्य उपकारकः। अत्र न्यायः नाम विचारः। संशयः, प्रयोजनञ्च यदि तिष्ठतश्चेत् तदा विचारः प्रारभते। अतः संशयः प्रयोजनञ्च इति द्वे न्यायस्य पूर्वाङ्गौ। किन्तु यदा विचारः प्रारभते तदा विचारः स्वस्वसिद्धान्तानुगुणम् अग्रसरार्थं दृष्टान्तः, सिद्धान्तः, अवयववाक्यानि, तर्कः इति एतेषां प्रयोगो जायते। किञ्च, विचारस्यावसानं तु निर्णये भवति। अतः दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः इति एते पदार्थाः न्यायस्य उत्तराङ्गत्वेन उररीकृताः। अत एव संशयः, प्रयोजनं, दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः इति एते पदार्थाः न तिष्ठन्ति चेत् विचारः सम्पूर्णतां न याति। अतः एतेषां पदार्थानामुपकारकत्वेन एते पदार्थाः हि न्यायाङ्गत्वेन अङ्गीकृताः।

## ।।संशयः।।

### ❖ समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यव-स्थातश्च विशेषापेक्षो विमर्शः संशयः[४४४]

न्यायशास्त्रस्य रीत्यनुसारम् उद्देशानन्तरं यथाक्रमं लक्षणं परीक्षा च भवति। प्रथमन्यायसूत्रे “प्रमाणप्रमेयसंशयप्रयोजन...” इत्यादिक्रमेण

[४४४] न्या,सू-१/१/२३

प्रमेयपदार्थस्यानन्तरं संशयपदार्थस्योद्देशः विहितः। अत एव पूर्वं प्रमाणप्रमेयपदार्थयोः लक्षणस्य कीर्तितत्वात् इदानीं क्रमप्राप्तस्य संशयपदार्थस्य लक्षणं क्रियते प्रस्तुतसूत्रेण।

प्रस्तुतसूत्रे 'संशयः' इति पदेन लक्ष्यनिर्देशः कृतः। इदानीं प्रश्नः तल्लक्ष्यपदस्य नाम संशयस्य लक्षणं किम् ? प्रश्नस्यास्योत्तरं तु प्रस्तुतसूत्रमेव। अर्थात् प्रस्तुतसूत्रेण संशयस्य लक्षणं कृतं महर्षिणा गौतमेन। किन्तु प्रस्तुतसूत्रे लक्ष्यपदं व्यतिरिच्य अवशिष्टपदैः लक्षणं सूचितम्। तत्र सूत्रस्थितपदेषु 'विमर्शः' इति पदेन संशयस्य सामान्यलक्षणं तथा अवशिष्टपदैः संशयस्य विशेषलक्षणं सूचितम्। नियमस्तु 'पदार्थस्य सामान्यज्ञानं विना विशेषज्ञानमसम्भवम्' इति। अतः वृत्तिकारेण विश्वनाथेन आदौ संशयस्य सामान्यलक्षणघटकं 'विमर्शः' इति पदं व्याख्यापितम्। किन्तु भाष्यकारेण आदौ तथा पृथक्तया 'विमर्शः' इति पदं न व्याख्यापितम्। किञ्च, एतद्वक्तुं शक्यते यत् भाष्यकारेण लक्षणस्य सामान्यलक्षणतया तथा विशेषलक्षणतया इत्येवं न व्याख्या कृता।

अत्र 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'[४४५] इति सूत्रस्य व्याख्यानावसरे भाष्यकारेण विमर्शपदं न तथा विशेषतया चर्चितम्। किन्तु सूत्रस्थविमर्शपदं विशेषतात्पर्यमावहति । अत एव वृत्तिकारेण विमर्श-पदं विशेषतया व्याख्यातम्। तथाहि सूत्रस्थविमर्शपदेन संशयस्य सामान्यलक्षणमपि द्योतितं भवति। अत्र वि- इत्युपसर्गपूर्वकात् ज्ञानर्थकमृश्-धातोरुत्तरं भावार्थे घञ्प्रत्यये विमर्शपदं निष्पन्नं भवति। अत्र वि-पदस्यार्थो हि विरुद्धः। एतदर्थोऽन्यत्रापि प्रसिद्धम्। यथा 'संवादः'

[४४५]न्या,सू-१/१/२३

इत्युक्ते यथार्थज्ञानमेव बोधयति तथा 'विसंवादः' इति पदम् अयथार्थज्ञानं बोधयति। अत्रापि वि-पदं विपरीतार्थे विरुद्धार्थे वा प्रयुक्तम्। तदुक्तं विश्वनाथेन- "विमर्श इत्यत्र विशब्दो विरोधार्थः, मृशिर्ज्ञानार्थः..."[४४६] इति

तथाहि मृश्-धातोः भावार्थे घञा निष्पन्नस्य मर्श-पदस्यार्थो हि ज्ञानम्, तेन वि-इत्युपसर्गपूर्वकमर्शपदस्य विमर्श-पदस्य वा अर्थो हि विरुद्धं विपरीतं वा ज्ञानम्। 'विरुद्धं' 'विपरीतं' वा इति पदेनैव ज्ञायते यत् नानाविरुद्ध-धर्मविषयकज्ञानं हि संशयः। अन्यथा एकधर्मविषयकज्ञाने तु विरुद्धपदस्य प्रयोगो न भवति। अत एव 'नानाविरुद्धधर्मप्रकारकज्ञानं संशयः' इत्येव संशयलक्षणम्।

किञ्चात्रावधेयं यत् नानाविरुद्धविषयकज्ञाने सत्येव संशयो न भवतीति तु न। यतो हि कस्यापि पुरुषस्य 'घटोऽनित्यः', 'आत्मा नित्यः' इत्येवं नित्यत्वप्रकारके तथा अनित्यत्वप्रकारके ज्ञाने सत्येव तत्पुरुषस्य संशयो न भवति। एतज्ज्ञानद्वयं तु निश्चयात्मकमेव। अत एव वक्तव्यं यत् 'एकस्मिन् धर्मिणि नानाविरुद्धप्रकारकज्ञानमेव संशयः' इति। अत 'आत्मा नित्यः अनित्यश्च' इत्येवम् एकस्मिन्नेव आत्मनामकधर्मिणि यत् नित्यत्वानित्यत्वप्रकारकज्ञानं तत् संशयात्मकमेव। अत एव विश्वनाथेन वृत्तौ निगदितं - "...एकस्मिन् धर्मिणीति पूरणीयम्।"[४४७] इति ।

अत एव संशयस्य कोटिद्वयं प्रसिद्धम्। एको हि भावकोटिः अपरश्चाभावकोटिः। अत एव भावप्रकारकं तदभावप्रकारकं ज्ञानं हि संशयः। यथा आत्मनि (एकस्मिन् धर्मिणि) नित्यत्वप्रकारकं (भावकोटिकम्) नित्यत्वाभाव-

[४४६]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२३४
[४४७]तदेव,पृ-१३५

प्रकारकम् (अभावकोटिकम् ) इति विरुद्धधर्मविषयकज्ञानसत्त्वात् तज्ज्ञानं हि सशंयः। अत एव एकस्मिन् धर्मिणि विरुद्धतया भावाभावप्रकारकं यज्ज्ञानं तद्धि संशयः इति संशयस्य परिनिष्ठलक्षणम्। तदुक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ* - 'तेनैकस्मिन् धर्मिणि विरोधेन भावाभावप्रकारज्ञानं संशयः।'[४४८] इति ।

पदार्थस्य सामान्यलक्षणकीर्तितानन्तरमेव विशेषलक्षणं प्रदातव्यम्। किञ्च संशयस्य सामान्यस्वरूपज्ञातत्वात् जिज्ञासा भवति- संशयः कतिविधः, किं च तेषां लक्षणमिति ? अस्याः जिज्ञासायाः समुचितमुत्तरं तु भाष्यकारेण तथा वृत्तिकारेण प्रदत्तम्। किन्तु तयोः व्याख्याने किञ्चित् भिन्नता अपि दृश्यते, अपि च, वृत्तिकारेण तु संशयस्य प्रकाराः तेषाञ्च लक्षणं व्याख्यापितं किन्तु तेन उदाहरणं न प्रदर्शितम्। किन्तु भाष्यकारेण संशयस्य प्रकारास्तेषाञ्च लक्षणम् उदाहरणयोगेन व्याख्यापितमिति भेदः।

तथाहि उभयमतेऽपि संशयस्य पञ्चप्रकाराः प्रदर्शिताः। किञ्च एते प्रकाराः कारणमुखेन वर्णिताः। अत एवोक्तं विश्वनाथेन- ‘‘तत्र कारणमुखेन विशेषलक्षणानि...’’[४४९] इति। भाष्यकारेणापि कारणमुखेन संशयस्य पञ्च प्रकाराः वर्णिताः, किन्तु तेन न हि भाष्ये स्पष्टमुल्लिखितं यत् एते संशयस्य प्रकाराः कारणमुखेन उल्लिखिताः इति। किन्तु भाष्यवचनं विश्लिष्य वृत्तिकारवत् तदेव प्राप्यते इति।

महर्षिगौतमस्य सूत्रस्थितं 'समानानेकधर्मोपपत्तेः' इति पदं समासबद्धम्। आदौ द्वन्द्वसमासे 'समानानेकधर्मौ' इत्येवं पदं निष्पन्नं भवति। ततश्च

---

[४४८]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२३५

[४४९] तदेव,पृ-२३६

'तयोः उपपत्तिः, तस्मात्' इत्येवं षष्ठीतत्पुरुषसमासे 'समानानेकधर्मोपपत्तेः' इति पदं निष्पन्नं भवति। इदानीं 'द्वन्द्वान्ते श्रूयमानं पदं प्रत्येकमभिसम्बध्यते' इति नियमानुसारम् 'उपपत्तिः' इति पदं द्वन्द्वसमासस्य प्रत्येकावयवेन सह अन्वितत्वात् 'समानधर्मोपपत्तेः' इति, 'अनेकधर्मोपपत्तेः' इति पदद्वयं प्राप्यते।

**१.प्रथमप्रकारसंशयः-** तत्र प्रथमप्रकारसंशयो भवति समानधर्मोपपत्तेः। अत्र उत्पत्तिपदस्यार्थः ज्ञानम् इति। समानधर्मो नाम संशयस्य आलम्बनस्वरूपः विरुद्धः यत्कोटिद्वयं, तयोः उभययोः यत्साधारणधर्मः इति। अत एव विरुद्धकोटिद्वयस्य साधारणधर्मस्य ज्ञानात् प्रथमप्रकारसंशयस्य उत्पन्नो भवति। अत एवोक्तं वृत्तिकारेण *न्यायसूत्रवृत्तौ*- " उत्पत्तिः ज्ञानम्, तथा च समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः।"[४५०] इति। किन्तु भाष्यकारनये समानधर्मस्य उपपत्तिजन्यः अर्थात् कश्चित् साधारणधर्मविशिष्टधर्मीयज्ञानजन्यः 'विशेषापेक्षः' अर्थात् यस्य पूर्वं विशेषधर्मस्योपलब्धिर्न भवति, किन्तु स्मरणं भवति, एतादृशः विमर्शः प्रथमप्रकारसंशयः इति। तदुक्तं भाष्यकारेण- "समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति।"[४५१] इति।

अत्र 'समानधर्मोपपत्तिः' इति पदस्यान्तर्गतं 'समानधर्मः' इति पदं कर्मधारयसमासनिष्पन्नमुत बहुव्रीहिसमासनिष्पन्नम् ? भाष्यमते 'समानः धर्मः समानधर्मः' इत्येवं कर्मधारयसमासनिष्पन्नम्। अतो भाष्यकारेण 'स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन्'[४५२] इत्येवमुदाहरणवाक्यं प्रदत्तम्। एतेन परपदार्थप्रधानः कर्मधारयसमासः ज्ञातो भवति। किन्तु उद्द्योतकरेण 'समानः

---

[४५०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२३६

[४५१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२३४

[४५२] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२३४

धर्मः यस्य' इत्येवं बहुव्रीहिसमासः प्रदर्शितः। एतेन ज्ञायते यत् समानधर्मविशिष्टधर्मीयज्ञानात् प्रथमप्रकारसंशयः उत्पन्नः भवतीति अर्थोऽपि उद्द्योतकरस्याभिप्रेतः। विश्वनाथमते वृत्तिकारमते वा बहुव्रीहिसमासः एवाभिप्रेतः इति बोध्यते। यतो हि तेन प्रथमप्रकारसंशयस्य फलितलक्षणं कृतं- ''साधारणधर्मवद्धर्मिज्ञानजन्यः''[४५३] इति। यदि तन्मते कर्मधारयसमासः स्यात्तदा तेन 'साधारणधर्मज्ञानजन्यः' इति लक्षणं कृतं स्यात्। तदा पुनः धर्मिपर्यन्तानुसरणं न कर्तव्यं स्यादिति। अस्योदाहरणं तु वृत्तिकारेण किमपि न प्रदत्तम्। किन्तु भाष्यकारेणास्योदाहरणं प्रदत्तम्। भाष्यमते सायंकाले स्थाणुपुरुषयोः आरोह-परिणाहौ इति समानधर्मदर्शनात् कस्यचित् पुरुषस्य संशयो जायते यत् 'स्थाणुरयं पुरुषो वा' इति। अत्र स्थाणुर्नाम शाखापल्लवादिशून्यवृक्षः। आरोहः नाम दैर्घ्यम्, परिणाहश्च नाम विस्तृतिः बोध्यते। ईषदन्ध्यकारे सायंकाले चक्षुरिन्द्रियेण सह स्थाणोः पुरुषस्य वा पदार्थस्य सन्निकर्षवशात् तयोः समानदैर्घ्यं तथा विस्तृतिमवलोक्य तयोः विशेषधर्मस्य ज्ञानं न भूत्वा द्रष्टुः पुरुषस्य सन्देहो जायते यत् पुरतः दृश्यमानः अयं पिण्डः स्थाणुः पुरुषो वा ? इति एषः संशयः समानधर्मज्ञानात् जायते, अतोऽयं समानधर्मोपपत्तिजन्यः संशयः।

**२.द्वितीयप्रकारसंशयः-** द्वितीयप्रकारसंशयः अनेकधर्मस्य उपपत्तेः ज्ञानाद्वा जायते। अत्रायं प्रश्नः जायते यत् अनेकधर्मपदस्य कोऽर्थः? एतदुत्तरे वक्तुमलं यत् अनेकधर्मपदस्यार्थः असाधारणधर्मः। तदुक्तं वृत्तिकारेण- ''अनेकधर्मः असाधारणधर्मः, तज्ज्ञानादित्यर्थः।''[४५४] इति। ननु कथमयमर्थो लभ्यते ? अत्रोच्यते – अनेकस्मात् विशेषः विशेषको व्यावर्तकः धर्मः अनेकधर्मः। अत्र

---

[४५३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२३७

[४५४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२३६-२३७

अनेकपदेन सजातीयाः असजातीयाः अनेकपदार्थाः बोध्यन्ते। अत एव यो धर्मः स्वस्य स्वाश्रयं तत्समानजातीयेभ्यः तदसमानजातीयेभ्यश्च अनेकव्यक्तिभ्यः पृथक्करोति, स धर्मः अनेकधर्मः इत्युच्यते। अत उक्तं भाष्यकारेण- "'अनेकधर्मोपपत्तेरि'ति। समानजातीयमसमानजातीयं चाऽनेकम्। तस्यानेकस्य धर्मोपपत्तेः-- विशेषस्य उभयथा दृष्टत्वात्। समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्था विशिष्यन्ते।"[४५५] इति। किञ्च, एतादृशधर्मः तु असाधारणधर्म एव भवति। यतो हि असाधारणधर्म एव स्वाश्रयं तस्य समानजातीयेभ्यस्तथा असमानजातीयेभ्यः बहुविधपदार्थेभ्यः पृथक्करोति इति। अनेकपदार्थेभ्यः पृथक्त्वात् लक्षणया उक्तधर्मः अनेकधर्म इत्युच्यते। एतत्पक्षे 'समानजातीयमसमानजातीयं चाऽनेकम्' इति एतद्भाष्ये व्याख्यातं यत् अनेकपदार्थः तत्र 'तस्माद्विशेषः' इति वाक्येन अध्याहृतः। अत एतन्मते भाष्यवचने 'तस्माद्विशेषः' इति वाक्यमध्याहृत्य अनेकधर्मपदस्य उक्तार्थः प्राप्यते। मतमिदम् उद्द्योतकरेण *न्यायवार्त्तिके* उपस्थापितं - "कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समासपदेनाभिधीयते ? समानासमानजातीयविशेषकत्वात्, समानजातीयमसमानजातीयं चानेकम्, तस्माद्विशेषो विशेषको धर्मः अनेकस्माद्विशेषोऽनेकधर्म इति तस्य चानेकस्य धर्मो यथास्वं सोऽयमनेकधर्म इति।"[४५६] इति।

किञ्च मतमिदं सम्यक्तया स्पष्टीकृत्य *तात्पर्यटीका*यामलोचितम्- "एतदुक्तं भवति यतोऽनेकस्मात् समानासमानजातीयादेष स्वाश्रयं व्यावर्तयति, अतोऽनेकापादानकव्यावृत्तिहेतुत्वाल्लक्षणयाऽनेक इत्युच्यते। तदनेन

---

[४५५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२४०-२४४

[४५६] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४०-२४१

'समानजातीयमसमानजातीयं चानेकमिति भाष्यं 'तस्माद्विशेष' इत्यध्याहृत्य व्याख्यातम्'''[४५७] इति।

अनेकधर्मपदस्यार्थः असाधारणधर्मः इति तु *न्यायसूत्रवृत्ता*वपि उल्लिखितं विश्वनाथेन। किन्तु उक्तपदस्य उक्तार्थः कथं लभ्यते इति विषये न चर्चितं वृत्तिकारेण। मन्ये पूर्वाचार्यैः *वार्त्तिकादौ* तद्व्याख्या कृता इति कृत्वा विश्वनाथेन व्याख्या न कृता इति।

अस्यापि संशयस्य उदाहरणं वृत्तिकारेण *न्यायसूत्रवृत्तौ* न प्रादर्शि परं भाष्यकारेण प्रदर्शितम्। यथा शब्दस्य अनेकधर्मः असाधारणधर्मो वा विभागजन्यत्वम्। यतो हि विभागजन्यत्वमिति धर्मः शब्दं तत्समानजातीयगुणपदार्थेभ्यः तथा असमानजातीयद्रव्यादिपदार्थेभ्यः पृथक्करोति, अतो विभागजन्यत्वमिति धर्मः शब्दस्यासाधारणधर्मः। विभागजन्यत्वं केवलं शब्दात्मकगुणपदार्थे एव तिष्ठति। यथा- वंशद्वयस्य बलपूर्वकतया विभागात् एकस्य विलक्षणशब्दस्योत्पत्तिर्भवति। अयं शब्दश्च यतः आकाशसमवेततया उत्पद्यते अतः उक्तशब्दस्य समवायिकारणं भवति आकाशम्। किञ्च, यथा वंशद्वयस्य विभागः उत्पन्नः भवति तथैव तद्वंशद्वयस्य आकाशेन सहापि विभागः उत्पन्नः भवति। अत एव अयं विभागः स्वयम् आकाशे समवेतः सन् तदधिकरणस्यैव शब्दरूपकार्यस्य जनको भवति। अत एव तच्छब्दं प्रति उक्तविभागो हि असमवायिकारणम्। अतः शब्दे विभागजन्यत्वं तिष्ठति। विभागजन्यत्वं यथा अन्यरूपादिगुणपदार्थे न तिष्ठति इति कृत्वा शब्दः गुणपदार्थः न वेति संशयो जायते। अपि च, द्रव्यं कर्म चापि विभागजन्यं न भवतीति कृत्वापि

[४५७] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४१

शब्दः द्रव्यं कर्म वा इति संशयो जायते। यदि विभागजन्यत्वं कस्यापि द्रव्यादिपदार्थस्य धर्मः स्यात्, तदा शब्दे तद्दृष्टत्वात् शब्दः द्रव्यादिपदार्थेषु कश्चित् इति निर्णेतुं शक्यते। किन्तु वस्तुस्थितिस्तु भिन्न एव। अत एव विभागजन्यत्वधर्मज्ञानात् संशयो भवति यत् शब्दः द्रव्यं, न वा गुणः, न वा कर्म ? इति। अत एव भाष्यकारेण निगदितम् - "अस्ति च शब्दे विभागजन्यत्वं विशेषः। तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः, विशेषस्योभयथा दृष्टत्वात्। किं द्रव्यस्य सतो गुणकर्मभ्यो विशेषः, आहोस्वित् गुणस्य सत इति, अथ कर्मणः सत इति ? विशेषापेक्षा- अन्यतमस्य व्यवस्थापकं धर्मं नोपलभ इति बुद्धिरिति।"[४५८] इति।

३.**तृतीयप्रकारसंशयः-** सूत्रस्थेन 'विप्रतिपत्तिः' इति पदेन तृतीयप्रकारसंशयस्य बोधो जायते। 'विप्रतिपत्तिः' इति पदस्य व्याख्यायां भाष्यकारेण निगदितं - "व्याहतमेकार्थदर्शनं विप्रतिपत्तिः"[४५९] इति। अर्थात् एकस्मिन्नेवार्थे यत् व्याहतदर्शनम् अर्थात् विरुद्धज्ञानम् तद् विप्रतिपत्तिरित्युच्यते। अतः एकस्मिन्नेव पदार्थे विरुद्धनिश्चयात् संशयो जायते। अस्योदाहरणे भाष्यकारेणोक्तम् - "अस्त्यात्मेत्येकं दर्शनम्, नास्त्यात्मेत्यपरम्।"[४६०] इति। अर्थात् यदि कस्यचित् वादिनः निश्चयो भवति 'आत्मा अस्ति' इति तथा च कस्यचित् प्रतिवादिनः निश्चयो भवति 'आत्मा नास्ति' इति तदा तस्मात् संशयो जायते। अत्र एकस्मिन् आत्मपदार्थे अस्तित्वं नास्तित्वञ्च इति विरुद्धधर्मद्वयात् निश्चय एव विप्रतिपत्तिः। किञ्च, अयं सद्भावः असद्भावश्च अर्थात् आत्मनः अस्तित्वं नास्तित्वञ्च एकत्र न सम्भवति, अन्यतरस्य अर्थात् आत्मनः अस्तित्वं नास्तित्वञ्च

[४५८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४४-२४९

[४५९] तदेव,पृ-२४९

[४६०] तत्रैव

इत्यस्य कस्यचित् पक्षस्य साधकहेतुरपि नोपलभ्यते, तत्र स्थले अर्थात् यत्रात्मनः अस्तित्वं नास्तित्वञ्च इति एकतरस्य पक्षस्य निश्चयो न भवति, तत्र मध्यस्थपुरुषस्य तत्त्वस्य अनवधारणरूपः संशयः जायते। अत एवोक्तं भाष्यकारेण- " न च सद्भावासद्भावौ सहैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते, तत्र तत्त्वानवधारणं संशय इति।"[४६१] इति।

किञ्चात्रावधेयं यत् संशयस्य जनकः विरुद्धज्ञानस्य प्रतिपादकं वाक्यं द्वयं न भवति। किन्तु संशयजनकवाक्यम् एकमेव भवति- भावाभावकोटिकम् 'आत्मा नित्यो न वा' इति एकवाक्यमेव परवर्तिकाले नैयायिकाः विप्रतिपत्तिवाक्यरूपेण स्वीकृतवन्तः। अस्मिन्नेव तात्पर्ये वृत्तिकारेण विश्वनाथन्यायपञ्चाननेन *न्यायसूत्रवृत्तौ* भणितं- "विप्रतिपत्तिः विरुद्धकोटिद्वयो-पस्थापकः शब्दः तस्मादित्यर्थः।"[४६२] इति। अत्र 'शब्दः' इति पदोल्लेखेन वादिप्रतिवादिनोः विरुद्धज्ञानस्य संशयजनकत्वं वारितं भवति। तथा च, 'आत्मा अनित्यः' इति विरुद्धज्ञानप्रतिपादके पृथक् पृथक् वाक्यद्वये विप्रतिपत्तिपदार्थस्य लक्षणं वारितम्। यतो हि तद् वाक्यद्वयं प्रत्येकम् एकैकस्य कोटेः उपस्थापकं भवति, किन्तु युगपत् विरुद्धकोटिद्वयस्य उपस्थापकं न भवति।

एवञ्च दृश्यते यत् विप्रतिपत्तिपदस्यार्थविषये भाष्यकारवृत्तिकारयोः मतविरोधः प्रतीयते। अत्रैकं समाधानं हि - 'व्याहतमेकार्थदर्शनं विप्रतिपत्तिः' इति भाष्यकारस्य वाक्यान्तर्गतदर्शनपदस्य अर्थः ज्ञानं न कृत्वा, तत्पदं करणवाच्ये ल्युट्प्रत्यये निष्पन्नत्वेन गृहीत्वा तस्यानुपपत्तिर्न भवति। अर्थात् भाववाच्ये

[४६१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४९

[४६२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२३८

दर्शनपदस्यार्थः भवति ज्ञानम्। किन्तु 'दृश्यते ज्ञायते अनेन' इति विग्रहे करणवाच्ये दर्शनपदस्यार्थः गृह्यते चेत् तदा दर्शनपदस्यार्थः स्यात् ज्ञानजनकवाक्यमिति। अतस्तेन विरोधावकाशः स्यात् इति ध्येयम्।

**४.चतुर्थप्रकारसंशयः-** सूत्रस्थेन 'उपलब्ध्यनुपलब्ध्यव्यवस्थातः' इति पदेन पुनः संशयस्य प्रकारद्वयमुपवर्णितं भाष्यकारवृत्तिकाराभ्याम्। 'उपलब्धिश्च अनुपलब्धिश्च' इति विग्रहे द्वन्द्वसमासे 'उपलब्ध्यनुपलब्धी' इति पदं निष्पद्यते, ततश्च 'तयोः अव्यवस्था' इति विग्रहे षष्ठीतत्पुरुषसमासे 'उपलब्ध्यनुपलब्ध्यव्यवस्था' इति पदं निष्पन्नं भवति। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमानुसारम् 'अव्यवस्था' इति पदं द्वन्द्वसमासस्य घटकीभूतोभयावयवेन सहान्वयवशात् 'उपलब्ध्यव्यवस्था' तथा 'अनुपलब्ध्यव्यवस्था' इति पदद्वयमुपलभ्यते। अत एव भाष्यकारेण तथा वृत्तिकारेणापि उपलब्ध्यव्यवस्थातः तथा अनुपलब्ध्यव्यवस्थातः संशयः भवतीति वर्णितम्। उपलब्ध्यव्यवस्थातः चतुर्थप्रकारसंशयविषये भाष्यकारेणोक्तम् - "'उपलब्ध्यव्यवस्थातः' खल्वपि सच्चोदकमुपलभ्यते तडागादिषु, मरीचिषु चाऽविद्यमानमुदकमिति, अतः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते, अथासदिति संशयो भवति।"[४६३] इति।

अत्र 'उपलब्धिः' इति पदेन ज्ञानमित्यर्थः बोध्यः। किञ्च, उपलब्धिशब्देन प्रत्यक्षरूपोपलब्धिः बोध्या। 'व्यवस्था' इति शब्दस्यार्थः नियमः इति। तेन 'अव्यवस्था' इति शब्देन अनियमः इत्यर्थः बोध्यते। एवञ्च 'उपलब्ध्यव्यवस्था' इति शब्देन प्रत्यक्षरूपज्ञानस्यानियमः बोध्यः। अत एव प्रत्यक्षस्य अनियमवशात्

---

[४६३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४९

संशयः उत्पन्नः भवति। भाष्यकारेण अस्य पदस्य विस्तरव्याख्या न प्रदत्ता, न वा व्याख्यानं प्रदत्तम्। तेन हि उदाहरणं सव्याख्यानं प्रदत्तम्। तथाहि भाष्यकारेणोक्तं यत् विद्यमानपदार्थस्य प्रत्यक्षं भवति। यथा सद्रूपेण वर्तमानम् उदकम् तडागादिषु उपलभ्यते प्रत्यक्षगोचरो भवति। तथा अविद्यमानपदार्थस्यापि प्रत्यक्षं भवति। यथा- मरीचिषु सिकतामयमरुस्थलोपरिपतितेषु सूर्यकिरणेषु अविद्यमानमुदकं जलं वा, तस्यापि प्रत्यक्षं भवति। एवं ज्ञानद्वयसत्त्वात् कश्चित् पुरुषो यदा कुत्रापि जलं प्रत्यक्षते, तदा तस्य मनसि संशयो भवति -'इदं पुरोदृश्यमानं सलिलं सदुत असदि'ति। यतो हि पूर्वं तस्य ज्ञानं विद्यते यत् सत्पदार्थस्यापि दर्शनं भवति, तथा असत्पदार्थस्यापि दर्शनं भवति। अतः कश्चित् प्रतीयमाने जलादौ सत्त्वासत्त्वयोः व्यावस्थापकस्य प्रमाणस्यानुपलब्धौ सत्त्वासत्त्वयोरन्यतरस्य निश्चयासम्भवात् संशयो जायते किमिदं प्रतीयमानं वस्तु सदिति किं वाऽसदिति। तदनन्तरं सत्त्वासत्त्वयोरन्यतरस्य व्यवस्थापकप्रमाणसाहाय्यात् सत्त्वं वा असत्त्वं वा निश्चीयते, तेन संशयो निवर्तते इति ध्येयम्। वृत्तिकारेण तु अस्य संशयस्योदाहरणं न प्रदत्तम्। तेन हि 'उपलब्ध्यव्यवस्थातः' इति संशयविषये निगदितं - "उपलब्धेः ज्ञानस्य, ... याऽव्यवस्था सद्विषयत्वानिर्धारणम्, प्रामाण्यसंशय इति फलितोऽर्थः।"[४६४] इति। अर्थात् उपलब्धेः ज्ञानस्य यद् अव्यवस्था अर्थात् सद्विषयत्वस्य अनिर्धारणम्, तस्मात् संशयो जायते इति। वृत्तिकारेण उपलब्धिपदेन ज्ञानसामान्यरूपार्थः गृहीतः। अत एव भाष्यमते यथा प्रत्यक्षमूलकमुदाहरणं प्रदर्शितं तथैव वृत्तिकारमते ज्ञानमूलकमुदाहरणं सम्भवं स्यादिति।

[४६४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४०

**५.पञ्चमप्रकारसंशयः-** अनुपलब्ध्यव्यवस्थातः पञ्चमप्रकारसंशयविषये भाष्यकारेण निगदितम् - "'अनुपलब्ध्यव्यवस्थातः' खल्वपि, सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चानुत्पन्नं निरुद्धं वा, ततः क्वचिदनुलभ्यमाने संशयः, किं सन्नोपलभ्यते ? उताऽसदिति संशयो भवति।"[४६५] इति। तथाहि 'न उपलब्धिः' इति विग्रहे नञ्समासे 'अनुपलब्धिः' इति शब्दस्य निष्पन्नत्वात् नञः विरोधार्थतावशात् तत्पदस्यार्थः भवति उपलब्धिविरोधिमत्त्वं भ्रमत्वं वा। 'अव्यवस्था' इत्यनेन संशयः बोध्यते इति तु पूर्वमेव वर्णितम्। अत एव अनुपलब्धेः अव्यवस्था नाम भ्रमसंशयः बोध्यते। यथा कश्चित् सदपि नोपलभ्यते न प्रतीयते यथा अन्तःप्रविष्टं कीलकमूलकमुदकं च। असदपि नोपलभ्यते, यथा अनुत्पन्नं विनष्टं च मूलकीलकोदकादि तथा चाऽसत एवानुपलब्धिर्भवतीति नियमो नास्ति, किन्तु सतोऽप्यावृतस्यानुपलब्धिर्भवतीति एषा अनुपलब्ध्यव्यवस्था, ततश्च कश्चित् अनुपलभ्यमाने अप्रतीयमाने वा सत्त्वासत्त्वयोरन्यतरस्य व्यवस्थापकप्रमाणानुपलब्धौ सत्त्वासत्त्वयोरन्यतरस्य निश्चयाभावात् संशयो जायते यद् 'इदं कीलकमूलं न प्रतीयते, तत् सद्वा असद्वा किं सदप्यावरणादिप्रतिबन्धकान्न प्रतीयते किं वा असत्त्वादेव न प्रतीयते' इति। अर्थात् एवं ज्ञानद्वयसत्त्वात् कस्यचित् पुरुषस्य कस्यचित् पदार्थस्य प्रत्यक्षं न भवति चेत् संशयो भवति यत् विद्यमानपदार्थस्य प्रत्यक्षं न भवति ? उत अविद्यमानपदार्थस्य प्रत्यक्षं न भवति ? इत्येवं संशयः निवर्तते इति ध्येयम्।

किञ्च, भाष्यस्थितवचने 'खल्वपि' इति पदं निपातः, तस्यार्थो हि उदाहरणप्रदर्शनम्। प्राचीनकाले अस्यानेकप्रयोगाः दृश्यन्ते। यथा-

---

[४६५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२४९-२५०

'*न्यायकुसुमाञ्जलिः*' इति ग्रन्थस्य पञ्चमस्तवके उदयनाचार्येणोक्तम् - 'आयोजनात् खल्वपि' इति। तत्र प्रकाशटीकाकारेण वर्द्धमानोपाध्यायेन लिखितं- 'खल्वपीति निपातसमुदायः, उदाह्रियते इत्यर्थे वर्तते, न समुच्चयार्थः।' इति।

## ।।प्रयोजनम्।।

### ❖ यमधिकृत्य प्रवर्तते तत्प्रयोजनम्[४६६]

संशयपदार्थवत् प्रयोजनपदार्थोऽपि न्यायस्य पूर्वाङ्गः। यतो हि प्रयोजनव्यतिरिक्तेन विचारेण तत्त्वपरीक्षा न जायते इति। अत उद्द्योतकरेण निगदितं- " या खलु निष्प्रयोजना चिन्ता, सा न न्यायाङ्गमिति। परीक्षाविधेस्तु प्रधानाङ्गं प्रयोजनमेव, तन्मूलत्वात् परीक्षाविधेरिति।"[४६७] इति। भाष्यकारेणापि प्रथमसूत्रभाष्ये तत्समर्थयता 'वितण्डा सप्रयोजना' इति विचारपूर्वकतया प्रतिपादितम्। यं पदार्थम् अधिकृत्य निश्चयनोद्दिश्य पुरुषः प्रवर्तते तत् प्रयोजनम्। यथा ज्ञानमुद्दिश्य अध्ययने प्रवृत्तस्य ज्ञानं प्रयोजनम्, शमदमाद्यनुष्ठाने प्रवृत्तस्य अपवर्गः प्रयोजनं भवति। अत एवोक्तं भाष्यकारेण - "यमर्थमाप्तव्यं हातव्यं वा व्यवसाय तदाप्तिहानोपायमनुतिष्ठति, प्रयोजनं तद्वेदितव्यम्, प्रवृत्तिहेतुत्वात्।"[४६८] इति। अर्थात् यं पदार्थं प्राप्य त्याज्य वा इति निश्चित्य जीवः तत्प्राप्त्यर्थं त्याज्यार्थं वा यद् उपायमनुतिष्ठति, तत्प्रयोजनं वेदितव्यम्। वस्तुतस्तु हेयस्य हानमेव प्रयोजनं, हानकर्मत्वाद् हेयमपि प्रयोजनमित्युक्तम्।

[४६६] न्या.सू.-१/१/२४

[४६७] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५७

[४६८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५६

सूत्रस्थस्य 'अधिकृत्य' इति पदस्यानेकेऽर्थाः विद्यन्ते। तेन अनेकार्थप्राप्तित्वात् कोऽर्थः अत्र ग्राह्यः इति विषये तु भाष्यकारेण किमपि न भणितं किन्तु वृत्तिकारेणोक्तं यत् 'अधिकृत्य' इति पदस्य 'उद्दिश्य' इत्यर्थः इति। वृत्तिकारनये प्रवृत्त्यनुकूला या इच्छा, तस्याः इच्छायाः विषय एव प्रयोजनम्। अत्र च प्रवृत्तिः इच्छाजन्या भवति। अतः प्रवृत्तिं प्रति तदिच्छा हि हेतुस्वरूपा। अत एव प्रयोजनस्य पर्यवसितलक्षणे वृत्तिकारेणोक्तं यत् प्रवृत्तेः हेतुभूता या इच्छा, तद्विषयत्वमेव प्रयोजनत्वम्। तदुक्तं वृत्तिकारेण- "तथा च प्रवृत्तिहेत्विच्छाविषयत्वं तत्त्वम्।"[४६९] इति। अस्माकं प्रवृत्तिश्च सुखप्राप्तेः दुःखपरिहारस्य इच्छया भवति। अतः प्रवृत्तेः हेतुभूतेच्छा हि सुखप्रेप्सा दुःखस्य च परिजिहीर्षा। इच्छा च सविषयका भवतीति न्यायसिद्धान्तः। तत्तद्हेतुभूतेच्छायाः विषयो हि यथाक्रमं सुखप्राप्तिः दुःखपरिहारश्च। अत एव प्रवृत्तेः हेतुभूतेच्छायाः विषयत्वं सुखप्राप्तौ दुःखपरिहारे च सत्त्वात् तत्प्रयोजनमित्युच्यते। सुखत्वादौ अतिव्याप्तिवारणाय वृत्तिकारेण विषयत्वपदस्यार्थः कृतः साध्यताख्यविषयाविषयः इति। किञ्च, 'प्रवृत्तिहेतुभूतेच्छासाध्यत्वं प्रयोजनत्वम्' इति लक्षणत्वे इच्छायाः साध्यमेव प्रवृत्तेः साध्यत्वात् इच्छायाः साध्यमित्युक्ते प्रवृत्तेः साध्यस्य बोधितत्वात् 'प्रवृत्तिहेतुः' इति पदं लक्षणे निष्प्रयोजनम्। अतः वृत्तिकारमते प्रवृत्तिहेत्विति स्वरूपकथनम् इति। तदुक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ*- "विषयत्वं साध्यताख्यविषयताविशेषः, तेन सुखत्वादिवारणम्। प्रवृत्तिहेत्विति स्वरूपकथनम्।"[४७०] इति। एवं वृत्तिकारेण प्रयोजनस्य लक्षणं

[४६९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५६

[४७०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५६-२५७

प्रदाय तस्य व्याख्यानं कृतम्। किन्तु भाष्यकारेण तु पृथक्तया न लक्षणं प्रदत्तम्। तेन हि केवलं प्रयोजनस्य वर्णनं प्रदत्तम्।

किञ्च, वृत्तिकारेण प्रयोजनस्य विभागोऽपि वर्णितः। यद्धि भाष्यकारेण न वर्णितम्। तथाहि वृत्तिकारमते मुख्यगौणदिशा प्रयोजनं द्विधा प्रसिद्धम्। तथाहि 'इदं मदिष्टसाधनम्' तथा 'इदं मदनिष्टसाधनम्' इत्येवम् इष्टसाधनतादिज्ञानसत्त्वात् यथाक्रमं पुरुषस्य सुखसाधनस्य प्राप्तेः तथा दुःखसाधनस्य परिहारस्य इच्छायां प्रवृत्तिर्भवति। अतः सुखसाधनप्राप्तिः दुःखसाधनपरिहारश्च इति द्वयमेव प्रयोजनम्। किन्तु सुखप्राप्तिः दुःखपरिहारश्च स्वतः उदितत्वात् सुखप्राप्तिः दुःखपरिहारश्च मुख्यं प्रयोजनम्। किन्तु सुखसाधनस्य प्राप्तीच्छा यतः सुखप्राप्तीच्छाधीना तथा दुःखसाधनस्य परिहारेच्छा दुःखपरिहारेच्छाधीना, अतः एतद्वयं गौणप्रयोजनम्। वस्तुतः मुख्यप्रयोजनं हि सुखं दुःखाभावश्च। गौणप्रयोजनञ्च सुखसाधनं तथा दुःखाभावस्य साधनसामग्री।

इदानीं प्रश्नः स्यात् सुखादिरेव कथं मुख्यं प्रयोजनम् ? कथं वा सुखादिसाधनमेव गौणप्रयोजनं भवेत् ? अत्रोत्तरे वृत्तिकारेण विश्वनाथेन निगदितम्- "अत्र च निरुपाधीच्छाविषयत्वात् सुखदुःखाभावयोर्मुख्यं प्रयोजनत्वम्। तदुपायस्य तु तदिच्छाधीनेच्छाविषयत्वाद्गौणं प्रयोजनत्वमिति।"[४७१] इति। अर्थात् निरुपाधिका या इच्छा , तादृशेच्छायाः विषय एव मुख्यप्रयोजनम्। अत्र का च निरुपाधिकेच्छा ? अत्रोच्यते अन्येच्छायाः अनधीना या इच्छा , तस्याः विषय एव मुख्यप्रयोजनम्। यथा सुखप्राप्तीच्छा दुःखपरिहारेच्छा च। तथा च, सुखसाधनं यत् शकटादि, तत्प्राप्तेः यदिच्छा तथा

[४७१] तदेव,पृ-२५८

अहिदंशनादि-दुःखाभावस्य साधनभूतं यत् भेषजादिप्राप्तीच्छा – इति इच्छाद्वयं यथाक्रमं सुखेच्छायाः दुःखाभावस्य इच्छायाः अधीनत्वात्, तस्य च अन्येच्छायाः अनधीनभूतेच्छायाः विषयत्वाभावात् निरपेक्षेच्छाविषयत्वाभावाद्वा, तत्तत्प्रयोजनं हि गौणप्रयोजनमिति ध्येयम्।

अत्रापि एकः संशयः स्यात् निरुपाधिकेच्छायाः विषयत्वमेव कथं मुख्यप्रयोजनम् ? अन्येच्छाधीनेच्छाविषयत्वं वा कथं गौणप्रयोजनं भवेत् ? अत्रोच्यते निरुपाधिकेच्छायाः विषयत्वं हि निरपेक्षेच्छायाः विषयत्वं भवति। यतो हि नियमोऽस्ति - 'सापेक्षनिरपेक्षयोः निरपेक्षस्यैव प्राधान्यम्' इति। अतः सापेक्षनिरपेक्षयोः निरपेक्षस्यैव प्राधान्यात् निरुपाधिकेच्छायाः विषयत्वमेव मुख्यं प्रयोजनमित्युक्तमिति विज्ञेयम्।

## ।।दृष्टान्तः।।

### ❖लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः[४७२]

प्रयोजनवत् दृष्टान्तपदार्थोऽपि न्यायस्य पूर्वाङ्गः। दृष्टान्तपदार्थस्य स्वरूपं ज्ञात्वैव पञ्चावयवेषु तृतीयावयवस्य उदाहरणवाक्यस्य कथनमुचितं स्यात्, न चेत् तन्न सम्भवति। यत्पदार्थं लौकिकपुरुषः यद्रूपेण जानन्ति, परीक्षका अपि तद्रूपेण जानन्ति इति तत्पदार्थः हि दृष्टान्तः इति ज्ञेयम्। यस्मिन् पदार्थे

[४७२] न्या.सू.-१/१/२५

लौकिकानां शास्त्रीयज्ञानरहितानां परीक्षकाणां शास्त्रीयज्ञानवतां च बुद्धिसाम्यं साध्यसाधनयोः सामानाधिकरण्यविषयकबुद्धेः साम्यं भवति स दृष्टान्तो यथा महानसे वह्निधूमयोः सामानाधिकरण्यविषयिका बुद्धिर्लौकिकानां परीक्षकाणां च साम्येन वर्तते इति वह्निसाधने महानसो दृष्टान्तः।

सूत्रे 'दृष्टान्तः' इति पदेन लक्ष्यनिर्देशः कृतः। तथावशिष्टपदैः लक्षणं सूचितम्। लक्षणवाक्यार्थबोधः तदन्तर्गतप्रत्येकपदार्थबोधसापेक्षः। किञ्च, लक्षणघटकपदानां व्याख्याने तु भाष्यवृत्त्योः वैलक्षण्यं प्रतीयते। तथाहि लक्षणघटकलौकिकपदस्यार्थः कृतः भाष्यकारेण- "लोकसामान्यमनतीता लौकिकाः, नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्रप्ताः।"[४७३] इति। अर्थात् लोकसामान्यं लोकप्रणालीं किं वा लोकमतिमनतीताः अनुरुध्य वर्तमानाः एव लौकिकाः शास्त्रीयज्ञानरहिताः इति यावत्, तथा च नैसर्गिकं स्वभावसिद्धं वैनयिकं शिक्षाजन्यं च बुद्ध्यतिशयमप्राप्ता एव लौकिकाः इति। लौकिकशब्दार्थं प्रतिपादयन्नाह वृत्तिकारः- "लौकिकः अप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः, प्रतिपाद्य इति फलितार्थः।"[४७४] इति। अत्रायमाशयः- शास्त्राणां परिशीलनं शास्त्रपरिशीलनम्, तस्मात् जन्यः शास्त्रपरिशीलनजन्यः। बुद्धेः प्रकर्षः बुद्धिप्रकर्षः। शास्त्रपरिशीलनजन्यः बुद्धिप्रकर्षः शास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः। न प्राप्तः अप्राप्तः। अप्राप्तः शास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः येन सः अप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः। एवं बहुविधसमासैः उक्तपदं निष्पद्यते। अतः शास्त्रपरिशीलनं नाम शास्त्राभ्यासः शास्त्रचर्चा वा बोध्यते। शास्त्रं नाम *न्यायपरिशुद्धिटीकायाम्* उदयनाचार्येण न्यायशास्त्रमेव बोधितम्। न्यायशास्त्रस्य

[४७३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५८

[४७४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५९

परिशीलनजन्यबुद्ध्योत्कर्षं विना न्यायेन परार्थानुमानेन वा कस्यापि तत्त्वस्य परीक्षा न सम्भवति। अत एव लौकिकाः नाम ते एव पुरुषाः ये तु न्यायशास्त्रस्य परिशीलनजन्यबुद्ध्योत्कर्षमप्राप्ताः तथा स्वाभाविकतया एव कस्यापि तत्त्वस्य अप्रतिपादकाः। तेन ते प्रतिपाद्याः एव। अत एव लौकिकपदस्य पर्यवसितार्थो हि प्रतिपाद्यपुरुषः इति। अतस्तत्र वृत्तौ विश्वनाथेनोक्तं 'प्रतिपाद्य इति फलितार्थः' इति। तात्पर्यकारमते लौकिकपदस्यार्थो हि - "शास्त्रपरिशीलनलब्धजन्मा बुद्ध्यतिशयो वैनयिकः तद्रहिता लौकिकाः प्रतिपाद्या इति यावत्।"[४७५] इति। एतेन प्रतीयते यत् लौकिकपदव्याख्याने तात्पर्यकारवृत्तिकारयोः साम्यं परिलक्ष्यते किन्तु भाष्यकारेण तु किञ्चित् भिन्नतया पदमिदं व्याख्यातम्।

सूत्रस्थपरीक्षकपदं व्याख्यायता भाष्यकारेण निगदितं- "तद्विपरीताः परीक्षकाः। तर्केण प्रमाणैर्थं परीक्षितुमर्हन्तीति।"[४७६] इति। अर्थात् तद्विपरीताः लौकिकविपरीताः नैसर्गिकं वा वैनयिकं वा बुद्ध्यतिशयं प्राप्ताः हि परीक्षकाः इत्युच्यन्ते। तत्र केषाञ्चित् शिक्षां विनैव बुद्ध्यतिशयो भवतीति ते नैसर्गिकबुद्ध्यतिशययुक्ताः विज्ञेयाः, केषाञ्चित् च शिक्षया बुद्ध्यतिशयो भवतीति ते वैनयिकबुद्ध्यतिशययुक्ताः विज्ञेया, शास्त्रीयज्ञानवन्तो परीक्षका इति यावत्। किञ्च, उक्तबुद्ध्यतिशययुक्ता हि तर्केण प्रमाणैश्चार्थे परीक्षितुमर्हन्तीति परीक्षकाः इत्युच्यन्ते, न तु लौकिका एवं भवन्तीत्यर्थः। वस्तुतः उक्तरूपपरीक्षकाः पुरुषा एव उक्तरूपलौकिकपुरुषान् बोधयितुं समर्थाः भवन्ति। अतोऽत्र लौकिकशब्देन बोद्धा तथा परीक्षकशब्देन बोधयिता इति बोद्धव्यम्। परन्तु तौ उभयौ विचारसमर्थौ वादि-प्रतिवादिनौ न भवतश्चेत् विचारः न भवति। अत एव

[४७५] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५८

[४७६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५८

वाचस्पतिमिश्रेण *तात्पर्यटीकायां* भणितं- "तदनेन वादि-प्रतिवादिनौ दर्शितौ।"[४७७] इति। एतेन बुध्यते यत् यत्पदार्थे वादि-प्रतिवादिनोः बुद्धिसाम्यं भवति अर्थात् तौ उभावेव यत्पदार्थम् एकरूपेण जानतः , तत्पदार्थः दृष्टान्तः इत्युच्यते। वस्तुतस्तु वादिनः प्रतिवादिनो वा प्रतिज्ञादिपञ्चावयवरूप-न्यायवाक्यस्य प्रयोगस्थले तृतीयावयवरूपोदाहरणवाक्येन यत्पदार्थे तयोः गृहीतहेतौ साध्यधर्मस्य व्याप्तिप्रदर्शनं भवति, तत्पदार्थः एव दृष्टान्तः। अत एवोक्तम् आचार्यफणिभूषणतर्कवागीशेन भाष्यव्याख्यायां बङ्गीय-*न्यायदर्शन*ग्रन्थे- " ফলকথা, বাদী বা প্রতিবাদীর প্রতিজ্ঞাদি পঞ্চাবয়বরূপ ন্যায়বাক্যের প্রয়োগ স্থলে তৃতীয় অবয়ব উদাহরণবাক্যের দ্বারা যে পদার্থে তাঁহাদিগের গৃহীত হেতুতে সাধ্য ধর্মের ব্যাপ্তির প্রদর্শন করা হয়, সেই পদার্থই দৃষ্টান্ত।"[४७८] इति।

वृत्तिकारेण विश्वनाथेन तु परीक्षकपदस्य व्याख्यानकाले निगदितं- "परीक्षकः शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः, प्रतिपादक इति फलितार्थः।"[४७९] इति। अर्थात् विपरीततया ये पुरुषाः न्यायशास्त्रस्य परिशीलनजन्यबुद्धिप्रकर्षं प्राप्ताः, ते पुरुषा एव परीक्षकाः। अत एव ते न्यायेन तत्त्वस्य परीक्षायां प्रतिपादने च समर्थाः भवन्ति। अतस्ते तत्त्वस्य प्रतिपादकाः। अत एव वृत्तिकारेण 'प्रतिपादक इति फलितार्थः' इत्युक्तम्। एवञ्च वृत्तिकारमते लौकिकः परीक्षकश्च इति पदयोरर्थः यथाक्रमं प्रतिपाद्यः प्रतिपादकश्च पुरुषः इति। अतो विश्वनाथेन उक्तं- "तथा च प्रतिपाद्यप्रतिपादकयोरिति पर्यवसन्नम्।"[४८०] इति। तात्पर्यकारमते

---

[४७७] न्यावा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२५८

[४७८] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-२६७

[४७९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६०

[४८०] तत्रैव

परीक्षकपदस्यार्थो हि - "तद्विपरीतास्तदुभयसम्मपन्नाश्च परीक्षकाः प्रतिपादका इति यावत्।"[४८१] इति।

किञ्च, एकः संशयो भवति यत् सूत्रे 'लौकिकपरीक्षकाणाम्' इति पदे द्विवचनमेव युक्तम्, तर्हि कथमत्र बहुवचनकथनम् ? भाष्यकारेण तु एषा शङ्का न उत्थापिता, न वा अस्यां शङ्कायां कापि आलोचना कृता। किन्तु वृत्तिकारेण तु शङ्का इयमुत्थापिता, तथा च, तस्याः उत्तरमपि प्रदत्तं तात्पर्यटीकाकारस्य मतमुल्लिख्य। तथाहि अत्रोच्यते तात्पर्यटीकाकारेण वाचस्पतिमिश्रेण यत् वादः, जल्पः, वितण्डा च इति कथात्रयभेदे लौकिकः परीक्षकश्च भिन्नः भिन्नः भवति। तथा च, वादादिरपि असंख्यः। अतः लौकिकः परीक्षकश्चापि असंख्यः। अस्मिन्नेव अभिप्राये अर्थात् कथायाः बहुत्वमपेक्ष्य सूत्रस्थोक्तपदे बहुवचनस्य प्रयोगः कृतः। अनेनाभिप्रायेणैव तात्पर्यकारस्य वचनमुद्धृत्य वृत्तिकारेण विश्वनाथेन निगदितं - "बहुवचनं कथाबहुत्वमपेक्ष्य इति टीका।"[४८२] इति। किन्तु विश्वनाथेन तु अत्र भिन्नयुक्तिः प्रदर्शिता। तन्मते अत्र बहुवचनं युक्तमेव, किन्तु अत्र युक्तिर्हि भिन्ना। तन्नये 'लौकिकौ च परीक्षकौ च' इत्येवं विग्रहे इतरेतरद्वन्द्वसमासे बहुवचने 'लौकिकपरीक्षकाः' इति पदं निष्पन्नम्, ततश्च षष्ठीबहुवचने 'लौकिकपरीक्षकाणाम्' इति पदम्।

[४८१] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२५८

[४८२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६०

## ।।सिद्धान्तः।।

### ❖ तन्त्राधिकरणभ्युपगमसंस्थितिः सिद्धान्तः[४८३]

प्रथमन्यायसूत्रे यतः दृष्टान्तपदार्थानन्तरं सिद्धान्तपदार्थस्य उद्देशः विहितः, अतोऽत्र महर्षिणा गौतमेन पूर्वसूत्रे दृष्टान्तपदार्थस्य लक्षणं कृत्वा प्रस्तुतसूत्रे क्रमप्राप्तस्य सिद्धान्तपदार्थस्य लक्षणं विहितम्। अतो भाष्यकारेण वात्स्यायनेन अनेनैवाभिप्रायेणादौ 'अथः सिद्धान्तः'[४८४] इत्युक्तम्। वृत्तिकारेणापि एतत्प्रकाशयितुमुक्तं - 'क्रमप्राप्तं सिद्धान्तं लक्षयति'[४८५] इति।

सूत्रस्थेन 'सिद्धान्तः' इति पदेन लक्ष्यनिर्देशः कृतः। अतः सूत्रस्थापरपदानि लक्षणघटकानि। अर्थात् 'तन्त्राधिकरणाभ्युपगमसंस्थितिः' इति लक्षणम्, 'सिद्धान्तः' इति लक्ष्यपदं च। सिद्धान्तस्य सामान्यलक्षणं व्याख्यायता उद्द्योतकरेण निगदितं - 'तन्त्राधिकरणानामर्थानामभ्युपगम इति सूत्रार्थः। तन्त्रमधिकरणं येषामर्थानां भवति, ते तन्त्राधिकरणास्तेषामभ्युपगमसंस्थिति-रित्थम्भावव्यवस्था धर्मनियमः सिद्धान्तः।' इति। तन्त्रशब्दस्य प्रसिद्धार्थो हि शास्त्रमिति। उक्तं हि '*नानार्थध्वनिमञ्जरी*' इति कोषग्रन्थे- ' तन्त्रं शास्त्रं कुलं तन्द्रं तन्त्रं सिद्धौषधिक्रिया इति' इति। भाष्यनयेऽपि तन्त्रशब्दस्यार्थः शास्त्रमिति। अत उक्तं भाष्यकारेण- ''तन्त्रमितरेतराभिसम्बद्धस्यार्थसमूहस्योपदेशः शास्त्रम्।''[४८६] इति। अत्र ज्ञेयं यत् एकमात्रविषयस्य शास्त्रत्वं सम्मतं नास्तीति 'इतरेतराभिसम्बद्धस्य' इत्युक्तं, परस्परसम्बद्धस्य इति तदर्थः।

---

[४८३] न्या.सू.-१/१/२६

[४८४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६०

[४८५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६०

[४८६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६१

वृत्तिकारमतेऽपि तन्त्रशब्दस्यार्थः शास्त्रमिति। किञ्च, 'तन्त्रं शास्त्रम् अधिकरणं यस्य' इति विग्रहे बहुव्रीहिसमासे तन्त्राधिकरणमिति पदं निष्पन्नम्। तेनाऽत्र प्रश्नः स्यात् शास्त्रं कस्याधिकरणं भवेत् ? कथं वा भवेत् ? अत्रोच्यते शास्त्रे ये तावत् पदार्थाः प्रतिपादिताः भवन्ति, तेषामेव पदार्थानाम् अधिकरणं भवति शास्त्रम्। अर्थात् शास्त्रं तद्बोधितपदार्थाधिकरणम्। अतो द्वितीयप्रश्नस्योत्तरे उच्यते यत् जलस्याधिकरणं यथा घटः भवति, तथैव शास्त्रम् अर्थस्य अधिकरणं न सदपि ज्ञापकत्वसम्बन्धेन किन्तु शास्त्रमपि पदार्थस्य अधिकरणम् इत्युच्यते। वस्तुतः प्रतिपाद्यपदार्थः यथा आधेयरूपेण कल्पितः भवति तथैव शास्त्रमपि तत्पदार्थस्य प्रतिपादकत्वे ज्ञापकत्वे वा अधिकरणरूपेण कल्पितुं शक्यते। अस्मिन्नेव अभिप्राये वृत्तिकारेण विश्वनाथन्यायपञ्चानेन निगदितं- ''तन्त्रं शास्त्रम्, तदेव अधिकरणं ज्ञापकतया यस्य...''[४८७] इति। एवञ्च तन्त्राधिकरणपदमिदं बहुव्रीहिसमासनिष्पन्नत्वात् तस्य च पदस्य अन्यार्थप्रधानत्वात् तत्पदेन शास्त्रबोधितपदार्थाः गृह्यन्ते। तादृशपदार्थस्य यदभ्युपगमः स्वीकारः तस्य संस्थितिः सिद्धान्तः इत्युच्यते। अत एव 'तन्त्राधिकरणस्य अभ्युपगमः तन्त्राधिकरणाभ्युपगमः' इत्येवं षष्ठीसमासानन्तरं पुनः 'तस्य संस्थितिः तन्त्राधिकरणाभ्युपगमसंस्थितिः' इत्येवं षष्टीसमासे उक्तपदं निष्पन्नं भवति। अत्र संस्थितिः इति पदस्यार्थस्तावत् – सम् इत्युपसर्गस्यार्थः समीचीनम् अथवा असंशयः इति। अतः 'सं समीचीनतया असंशयतया स्थितिः संस्थितिः' इति। अर्थात् निश्चितरूपेण स्थितिः संस्थितिरिति ज्ञेयम्। अत एव तन्त्राधिकरणस्य अर्थात् शास्त्रज्ञापितपदार्थस्य यदभ्युपगमः अङ्गीकारः, तस्य निश्चिततया स्थितिः

[४८७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६०

सिद्धान्तः इत्युच्यते। एतेन शास्त्रबोधितपदार्थस्य निश्चय एव सिद्धान्त इति पर्यवसितलक्षणार्थः वृत्तिकारमते। तदुक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ*- "तथा च, शास्त्रितार्थनिश्चयः सिद्धान्तः।"[४८८] इति। यथा नैयायिकमते मोक्षः यत् दुःखस्य आत्यन्तिकाभावस्वरूपः तद्धि 'तदत्यन्तविमोक्षोऽपवर्गः' इति *न्यायसूत्रे* तत् ज्ञापितम्। एतादृशस्य मोक्षपदार्थस्य यदभ्युपगमः तस्य समीचीनरूपतया असन्दिग्धरूपतया वा यत् स्थितिः 'मोक्षः दुःखात्यन्ताभावात्मकः' इति स सिद्धान्तः इत्युच्यते।

किन्तु तन्त्रपदस्य शास्त्रमिति प्रसिद्धार्थः सर्वैः न स्वीकृतः। तथाहि वाचस्पतिमिश्रेण, जयन्तभट्टेन, तार्किकरक्षाकारेण वरदाचार्येण सर्वैः तन्त्रपदस्य प्रमाणम् इत्यर्थः स्वीकृतः। तदुक्तं वाचस्पतिमिश्रेण *तात्पर्यटीकायां* - "तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाणि अनेन इति तन्त्रं प्रमाणम्।" इति। उक्तञ्च जयन्तभट्टेन *न्यायमञ्जर्यां* - "तन्त्र्यतेऽनेन पदार्थस्थितिरिति तन्त्रं प्रमाणमुच्यते।" इति। अस्तेन सिद्धान्तस्य सामान्यलक्षणे उक्तं- "प्रमाणमूलाभ्युपगमविषयीकृतः सामान्य-विशेषवानर्थः सिद्धान्तः इति सामान्यलक्षणमुक्तं भवति।" इति। उक्तञ्च तार्किकरक्षाकारेण *सिद्धान्तलक्षणे*-

"अभ्युपेतः प्रमाणैः स्यादाभिमानिकसिद्धिभिः।

सिद्धान्तः सर्वतन्त्रादिभेदात् सोऽपि चतुर्विधः।।" इति।

---

[४८८] तत्रैव

एतेषां मतानुसारं प्रमेयसिद्धिः येन भवति तत्प्रमाणमुच्यते। तेन तन्त्रपदस्यापि प्रमाणार्थे प्रयोगः भवितुमर्हति। अस्मिन् पक्षे अर्थः स्यात् प्रमाणबोधितपदार्थस्य अभ्युपगमसंस्थितिः भवति सिद्धान्तः।

किञ्च, वृत्तिकारेण सिद्धान्तपदस्य व्याख्या न प्रदत्ता किन्तु सूत्रस्य व्याख्यारम्भे भाष्यकारेण तत्पदस्य व्याख्या प्रदत्ता। पदमिदं व्याख्यायता भाष्यकारेणोक्तं यत् इदम् इत्थम्भूतम् अर्थात् 'एतत्' 'एवम्प्रकारः' इत्येवंरूपेण स्वीक्रियमाणपदार्थः सिद्ध इत्युच्यते। तत्सिद्धस्य यत् संस्थितिः, तत्सिद्धान्तः इत्युच्यते भाष्यनये। तत्र 'संस्थितिः' नाम इत्थम्भावव्यवस्था। इत्थम्भावो नाम पदार्थस्य विशेषधर्मः। 'व्यवस्था'-शब्दस्य अर्थः नियमः। तस्यैव व्याख्यायां भाष्यकारेणोक्तं धर्मनियमः इति। अत एवोक्तं भाष्यकारेण वात्स्यायनेन- "इदमित्थम्भूतञ्चेत्यभ्यनुज्ञायमानमर्थजातं सिद्धं, सिद्धस्य संस्थितिः सिद्धान्तः, संस्थितिरित्थम्भावव्यवस्था धर्मनियमः।"[४८९] इति। अस्योदाहरणं फणिभूषणतर्कवागीशमहोदयेन प्रदत्तं – यथा शब्दनित्यत्ववादिमीमांसकानां नये शब्दः नित्यत्वरूपेणैव सिद्धः। अतो वर्णात्मकशब्दस्य नित्यत्वरूपविशेषधर्मस्य यन्नियमः अर्थात् उक्तरूपेण स्वीकृतः यन्नित्यत्वरूपधर्मः, तदेव मीमांसकसम्प्रदायमते सिद्धान्तः। तदुक्तं पण्डितफणिभूषणतर्कवागीशेन स्वकीयबङ्गीय*न्यायदर्शन*ग्रन्थे- "যেমন শব্দনিত্যতাবাদী মীমাংসকসম্প্রদায়ের মতে শব্দ নিত্যত্বরূপেই সিদ্ধ। সুতরাং বর্ণাত্মক শব্দের নিত্যত্বরূপ বিশেষ ধর্মের যে নিয়ম অর্থাৎ উক্তরূপে স্বীকৃত যে নিত্যত্বরূপ ধর্ম, তাহাই মীমাংসকসম্প্রদায়ের সিদ্ধান্ত।"[৪৯০] इति। अत्र निश्चितधर्मार्थे

[४८९] न्या.भा.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६०

[४९०] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-२७०

अन्तशब्दस्य प्रयोगत्वात् सिद्धान्तशब्देन उक्तरूपार्थः बोध्यते। एवं निश्चयार्थेऽपि अन्तशब्दस्य प्रयोगत्वात् उक्तरूपेण सिद्धपदार्थस्य अङ्गीकाररूपनिश्चयः सिद्धान्तः इत्युच्यते।

किन्तु वृत्तिकारेण भाष्यकारस्य सिद्धान्तविषये एकं मतमुल्लिख्य, तन्न सङ्गतमिति प्रतिपादितम्। तथाहि नैयायिकमते सिद्धान्तः चतुर्विधः- सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगम-सिद्धान्तश्चेति। तथा च, भाष्यानुसारं प्रस्तुतसूत्रस्यार्थस्तावत्– सर्वतन्त्रः, प्रतितन्त्रः, अधिकरणम्, अभ्युपगमश्चेति एतेषु अन्यतमो हि सिद्धान्तः इति। किन्तु वृत्तिकारनये एवं सूत्रार्थः न ग्राह्यः। यतो हि परवर्तिकाले सिद्धान्तस्य विभागसूत्रेऽपि एतदर्थः प्रतिपादितः। अत एव भाष्यानुसारं यदि तदर्थः अभिप्रेतो भवति तदा महर्षिणा पुनः अग्रिमसूत्रं नाकरिष्यत्। अत एव अग्रिमसूत्रस्य उपन्यासस्य सार्थकतानुरोधेण तादृशः सूत्रार्थः न ग्राह्यः इति वृत्तिकारः। तदुक्तं वृत्तिकारेण- "अत्र च भाष्यानुसारात् सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगम-सिद्धान्तान्यतमः सिद्धान्त इति सूत्रार्थ इति तु न युक्तम्, अग्रिमसूत्रानुत्थाना-पत्तेः।"[४९१] इति।

[४९१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६१

## ।।अवयवाः।।

### ❖ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः[४९२]

महर्षिगौतमेन पूर्वं न्यायाश्रयसिद्धान्तलक्षणप्रकरणे षट्सूत्रैः सिद्धान्तपदार्थस्य लक्षणं, विभागं, विभक्तप्रत्येकसूत्रस्य च व्याख्यां कृत्वा प्रस्तुतसूत्रेण क्रमप्राप्तावयवपदार्थस्य लक्षणं विहितम्। अतो भाष्यकारेण सूत्रादौ 'अथावयवाः'[४९३] इति उल्लिखितम्। वृत्तिकारेणापि एतत्तात्पर्ये उक्तं - ''क्रमप्राप्तानवयवान् लक्षयितुं विभजते''[४९४] इति।

वस्तुतः सूत्रं दृष्ट्वैव अवयवस्य पञ्च भेदाः इति प्रतीयते। ते च भेदाः- प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनञ्चेति। यतो हि यथाक्रममुच्चारितः प्रतिज्ञादिनामकपञ्चावयवरूपवाक्यसमष्टिः 'न्यायः' इति नाम्ना कथितः। अतः उक्तरूपेण यथाक्रमं प्रतिज्ञादिपञ्चवाक्यप्रयोगः एव 'न्यायप्रयोगः' इत्युच्यते। किञ्च, न्यायः इत्युक्ते परार्थानुमानं बोध्यते। वादि-प्रतिवादिनोः विप्रतिपत्तिवशात् विवादाध्यासितपदार्थे मध्यस्थगणस्य यत्संशयो जायते, तत्स्थले तद्वादि-प्रतिवादिनौ मध्यस्थगणस्य तत्संशयस्य दूरीकरणाय अर्थात् एकतरपक्षे निश्चयोत्पादनार्थं प्रत्येकं स्वस्वमते साधकानुमानप्रमाणस्य उपदर्शनं कुरुतः। एतदनुमानं हि परार्थम्। किञ्च, तत्परार्थानुमानं न्यायवाक्यप्रयोगव्यतिरेकेण न सम्भवति। अत एव परार्थानुमानं प्रदर्शयितुं वादि-प्रतिवादिनौ स्वस्वपक्षस्य साधकरूपेण प्रतिज्ञादिवाक्यानां प्रयोगं कुरुतः। अतः प्रतिज्ञादिवाक्यानि हि

[४९२] न्या.सू.-१/१/३२

[४९३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६९

[४९४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६९

न्यायान्तर्गतानि, न्यायस्य अवयवाः। अत एव तन्न्यायस्य निरूपणम् अवश्यकर्तव्यम्। अत उक्तं तत्त्वचिन्तामणिकारेण गङ्गेशोपाध्यायेन *अवयवग्रन्थस्य* प्रारम्भे- "तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते।" इति। अस्मिन्नेवाभिप्राये *दीधितिटीकायां* रघुनाथशिरोमणिना अवयवस्य लक्षणं प्रकाशयता उक्तम् - "अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्।" इति।

किन्तु पदार्थस्य सामान्यलक्षणमज्ञात्वा तत्पदार्थस्य विभक्तांशानां विशेषलक्षणं ज्ञातुं न शक्यते। अतः आदौ अवयवपदार्थस्य सामान्यलक्षणं वक्तव्यम्। किन्तु अवयवस्य सामान्यलक्षणं तु भाष्यकारेण वात्स्यायनेन न प्रदत्तम्। परं वृत्तिकारेण विश्वनाथेन अवयवपदार्थस्य सामान्यलक्षणं प्रदत्तं *न्यायसूत्रवृत्तौ* प्रस्तुतसूत्रस्य व्याख्यानावसरे। तथाहि वृत्तिकारेण अवयवपदार्थस्य सामान्यलक्षणविषये निगदितम्- "अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वम् अवयवत्वमिति लक्षणं सूचितम्।"[४९५] इति। अत्र 'अवयवत्वम्' इति पदेन लक्ष्यनिर्देशः कृतः। तथा च, 'प्रतिज्ञाद्यन्यतमत्वम्' इति पदेन लक्षणनिर्देशः कृतः। अर्थात् प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनञ्चेति एतेषु अन्यतमत्वं हि अवयवत्वम्। तादृशान्यतमत्वं प्रतिज्ञादिप्रत्येकपदार्थे पर्याप्तत्वात् प्रतिज्ञादिवाक्यानि तावत् अवयवाः।

तथाहि भाष्यकारेण कश्चित् नैयायिकसम्प्रदायः दशावयववादी इत्युक्तम्। तदनुसारं तार्किकरक्षाकारेण वरदराजेन उक्तं - "केचन जरन्नैयायिकास्तु जिज्ञासा-संशय-शक्यप्राप्ति-प्रयोजन-संशयव्युदासैः सह दशावयवा इत्याचक्षते।"

---

[४९५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६९

इति। किन्तु दशावयववादिनः तद्बृद्धनैयायिकसम्प्रदायस्य कोऽपि परिचयः नोपलभ्यते। किन्तु युक्तिदीपिकाकारस्य पाठानुसारं कश्चित् प्राचीनसांख्यसम्प्रदायः दशावयववादी आसीत्। अत्रापि किमपि असौविद्धं नास्ति। यतो हि सांख्यदर्शनं न्यायतन्त्रेषु अन्तर्भूक्तं कृतं कैश्चित्। यथा अर्थशास्त्रे आन्वीक्षिकीविद्यायाः स्वरूपप्रदर्शनकाले उक्तं - 'सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी' इत्यादि। एवं प्रतिज्ञादिपञ्चावयवाः जिज्ञासादिपञ्चावयवाश्च मिलिततया दशावयवाः। तत्र प्रतिज्ञादिपञ्चावयवानां वर्णनं परवर्तिसूत्रेषु वृवृतं स्यात्। अस्मिन् सूत्रे भाष्यकारेण तथा वृत्तिकारेण जिज्ञासादिपञ्चपदार्थानां वर्णनं कृतम्। तथाहि कस्मिन् एकधर्मिणि विरुद्धधर्मदर्शनवशात् तद्धर्मिणि यत्संशयो जायते, तस्मात् तत्पदार्थस्य तत्त्वविषये जिज्ञासा जायते। तत्त्वजिज्ञासानन्तरं प्रमाणादिद्वारा तत्त्वनिश्चयो भवति। तत्त्वनिश्चये सति उपादेयपदार्थे उपादानबुद्धिः, हेयपदार्थे हानबुद्धिः, उपेक्ष्यपदार्थे च उपेक्षाबुद्धिः जायते। अत एव तत्त्वजिज्ञासापरम्परायां हानादिबुद्धिर्हि प्रवर्तका भवति। अतः जिज्ञासा नाम हानादिबुद्धिप्रवर्तक एव बोध्यते। भाष्यनये अप्रतीयमाने पदार्थे अर्थात् सामान्यतः ज्ञायमाने किन्तु विशेषधर्मरूपेण अज्ञायमानपदार्थविषये प्रत्ययार्थस्य अर्थात् तत्पदार्थस्य तत्त्वावधारणरूपप्रत्ययस्य ज्ञानस्य वार्थे अर्थात् पूर्वोक्तहानादिबुद्धिरूपफलस्य प्रवर्त्तिका उत्पादिका वा जिज्ञासा। तदुक्तं भाष्यकारेण- "तत्राप्रतीयमानेऽर्थे प्रत्ययार्थस्य प्रवर्त्तिका जिज्ञासा। अप्रतीयमानमर्थं कस्माज्जिज्ञासते ? तं तत्त्वतो ज्ञातं हास्यामि वा उपादस्ये उपेक्षिष्ये वेति। ता एता हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थस्तदर्थमयं जिज्ञासते।"[४९६] इति। वृत्तिकारनये जिज्ञासा हि "तत्प्रवर्त्तिका जिज्ञासा"[४९७] इति।

---

[४९६] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६९-२७०

वृत्तिकारेण भाष्यमतमेव समर्थितमतस्तेन विषयेऽस्मिन् अधिकव्याख्यानं न प्रदत्तम्। संशयविषये तु पूर्वमेवोक्तं यत् एकस्मिन् धर्मिणि विरुद्धधर्मदर्शनवशात् तद्धर्मिणि संशयः उत्पन्नो भवति। भाष्यनये संशयो हि -" जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्मोपसंघातात् तत्त्वज्ञाने प्रत्यासन्नः, व्याहतयोर्हि धर्मयोरन्यतरत् तत्त्वं भवितुमर्हतीति।"[४९८] इति। अर्थात् जिज्ञासायाः अधिष्ठानम् अर्थात् कारणरूपेण आश्रयः संशयः। एतेन जिज्ञासायाः जनको भवति संशयः। अत एव वृत्तिकारेण संशयविषये निगदितं- "...तज्जनकः संशयः..."[४९९] इति। प्रमाणसमूहे प्रमेयबोधस्य या शक्तिः कारणं वा विद्यते, तदेव शक्यप्राप्तिः। वाचस्पतिमिश्रनये शक्यं नाम प्रमेयः, प्राप्तिर्नाम शक्तिः। अत्र कस्य शक्तिः ? उच्यते प्रमाणस्य प्रमातुश्च। तदुक्तं वाचस्पतिमिश्रेण- "शक्यं प्रमेयं तस्मिन् प्राप्तिः शक्तता प्रमाणानां प्रमातुश्च"[५००] इति। अत एव प्रमेयबोधस्यानुकूलप्रमाणनिष्ठा या शक्तिः सामर्थ्यं वा, तदेव शक्यप्राप्तिः इत्युच्यते। भाष्यमते शक्यप्राप्तिर्हि - "प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि..."[५०१] इति। वृत्तिकारनये शक्यप्राप्तिर्हि - "...शक्यप्राप्रिः प्रमाणानां ज्ञानजननसामर्थ्यम्..."[५०२] इति। प्रयोजनपदार्थविषयेऽपि पूर्वं कथितम्। तत्त्वजिज्ञासादिवशात् न्यायप्रयोगे सति तत्पदार्थस्य तत्त्वनिर्णयो भवति तथा तत्पदार्थं प्रति मध्यस्थगणस्य हानादिबुद्धिर्जायते। एषा हानादिबुद्धिरेव प्रयोजनपदस्य बोध्यार्थः। उक्तं हि भाष्यकारेण- "प्रयोजनं

[४९७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७१
[४९८] न्या.भा.,न्या.द (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०
[४९९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७१
[५००] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०
[५०१] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०
[५०२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७१

तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलं नैकदेश इति।"[५०३] इति। वृत्तिकारनये तु प्रयोजनविषये किमपि नोक्तम्। संशयव्युदासविषये वृत्तिकारेण निगदितं- "संशयव्युदासस्तर्कः"[५०४] इति। अतः संशयव्युदासः इत्यनेन तर्कः बोध्यते। तथाहि 'व्युदास्यते अनेन' इति विग्रहे करणवाच्ये विपूर्वकात् उत्पूर्वकाच्च अस्धातोः घञ्प्रत्यये निष्पन्नस्य व्युदासपदस्यार्थः निवर्तकः इति। अतः 'संशयस्य व्युदासः निवर्तकः' इति विग्रहे षष्ठीसमासे निष्पन्नस्य संशयव्युदासपदस्यार्थः संशयनिवर्तकः इति। वस्तुतः तर्केण संशयनिरासो भवतीत्यतः संशयव्युदासपदेन तर्कः बोध्यते। ततश्च वृत्तिकारेण *तात्पर्यटीकायां* जिज्ञासादिपदार्थानां वर्णनं विद्यते इत्यतः तेन एतेषां पदार्थानाम् अधिकवर्णनं न कृतम्। अतः जिज्ञासादिपदार्थानां वर्णनविषये तात्पर्यकारस्य मतमेव वृत्तिकारस्य मतमिति विज्ञेयम्। भाष्यकारेण संशयव्युदासपदार्थं वर्णयता उक्तं- "प्रतिपक्षोपवर्णनम्"[५०५] इति। वाचस्पतिमिश्रेण अस्य व्याख्यां कुर्वता निगदितं यत् प्रतिपक्षे हेत्वभावस्य वर्णनमिति। यथा शब्दो यदि नित्यस्तदा उच्चारणात् पूर्वं श्रुतः स्यात् ? इत्येवं शब्दे अनित्यत्वस्य प्रतिपक्षः नित्यत्वे हेतोः अभावस्य समर्थनं करिष्यति चेत् शब्दः नित्यः अनित्यो वेति संशयः निवृत्तः भवति। तदुक्तं वाचस्पतिमिश्रेण *तात्पर्यटीकायां*- "यदि शब्दो नित्यः स्यान्न स्यात्कृतक इति अनित्यत्वस्य नित्यत्वं प्रतिपक्षः, तस्मिन् हेत्वभाववर्णनं न चायमकृतकइति, तदुपवर्णनप्रतिषेधे सति तत्त्वज्ञानाभ्यनुज्ञानार्थम्"[५०६] इति।

---

[५०३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०

[५०४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७१

[५०५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०

[५०६] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०

एवं पूर्वोक्तजिज्ञासादिव्यतीततया पक्ष-प्रतिपक्षस्थापनरूपन्यायप्रवृत्तिः न सम्भवति। अतः उक्तजिज्ञासादिः न्यायप्रवृत्तेः अङ्गरूपेण आवश्यकत्वेऽपि अर्थसाधकवाक्याभावात् न अवयवेषु परिगण्यते। किन्तु प्रतिज्ञादिपञ्चवाक्यानि एव अर्थसाधकत्वे न्यायनामकमहावाक्यस्य अंशरूपावयवाः। अत एव भाष्यकारेणोक्तं - "प्रकरणे तु जिज्ञासादयः समर्था अवधारणीयार्थोपकारात्। तत्त्वार्थसाधकभावात्तु प्रतिज्ञादयः साधकवाक्यस्य भागा एकदेशा अवयवा इति।"[५०७] इति। एवं भाष्यकारेण अर्थसाधकाभावात् जिज्ञासादिपञ्चपदार्थानां न्यायावयवेषु नान्तर्भावः कृतः परम् अर्थसाधकभावात् प्रतिज्ञादिपञ्चपदार्थानां न्यायावयवेषु अन्तर्भावः कृतः इति ध्येयम्। तत्त्वचिन्तामणिकारस्य मतेऽपि- "संशयादयस्तु अवयवलक्षणाभावादेव नावयवाः, किन्तु न्यायाङ्गतया उपयुज्यन्ते।" इति।

किञ्चात्र वक्तव्यं प्रतिज्ञादिपञ्चावयवाः सूत्रे कथितत्वात् पञ्चातिरिक्तावयाः न सन्ति तथा तन्न्यूना अपि न इत्यर्थः सूचितो भवति। वस्तुतः सूत्रेणानेन अवयवपदार्थस्य लक्षणेन सह तस्य पदार्थस्य विभागोऽपि सूचितः इति कृत्वा दशावयववादीनां मतं निरस्तं जातम्। अत एवोक्तं वृत्तिकारेण - "अत्र प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयववादो व्युदस्त इति मन्तव्यम्।"[५०८] इति। भाष्यकारेणापि दशावयववादीनाम् अतिरिक्तपञ्चावयवानाम् उल्लेखं कृत्वा ततश्च तेषां पदार्थप्रतिपादकवाक्यत्वाभावात् अवयववाक्येषु नान्तर्भावः कृतः। अत्र भाष्यकारेण अतिरिक्तपञ्चावयवाः जिज्ञासा-संशय-शक्यप्राप्ति-प्रयोजन-संशयव्युदासाः इति उल्लिखिताः ततश्च तेषां प्रत्येकस्य वर्णनं कृत्वा ते पदार्थाः

---

[५०७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७०-२७१

[५०८] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२६९

पदार्थप्रतिपादकवाक्यानि अर्थप्रतिपादकवाक्यानि वा न भवन्तीति कृत्वा न्यायवाक्यस्य अवयवाः न भवन्तीति प्रतिपादितम्। किन्तु भाष्यकारेण दशावयववादीनां मतखण्डनविषये साक्षात् किमपि नोक्तम्।

अपरदिशा वृत्तिकारेण दशावयववादीनां मतं खण्डयता निगदितम् - "एतेषां च न न्यायावयवत्वं न्यायाघटकत्वात्"[५०९] इति। अत्रायमाशयः- न्यायघटकत्वमेव न्यायावयवत्वमिति लक्षणानुसारं प्रतिज्ञादिपञ्चवाक्यानि न्यायस्य घटकत्वात् तेषाम् अवयवपदेन संग्रहत्वेऽपि जिज्ञासादिपदार्थानां न ग्रहणं कृतम्। यतो हि ते प्रकरणोत्थापने समर्थाः किन्तु ते घटकीभूतवाक्यस्वरूपाः न। जिज्ञासादिव्यतिरेकेण न्यायप्रवृत्तिः न भवतीति सत्यम्, किन्तु एतेन ते न्यायस्योत्थापकाः। किन्तु ते स्वरूपतः उत्थापकाः भवन्ति, ज्ञातसतीतया उत्थापकाः न भवन्ति। यथा वह्निनिष्ठदहनशक्तिः स्वरूपतः एव दाह्यपदार्थस्य दहनं करोति। किन्तु एवं न यत् वह्निनिष्ठदहनशक्तेः ज्ञानं यदि न भवेत्, तदा दहनं नाकरिष्यदिति। अत एव तत्त्वसंशयवशात् जिज्ञासादीनाम् उत्पन्नत्वेऽपि स्वरूपतः एव ते न्यायस्योत्थापकाः। अतः जिज्ञासादीनां प्रकाशकः पुनः कोऽपि वाक्यप्रयोगः न भवति। किन्तु प्रतिज्ञादिः ज्ञाततया अर्थसाधने समर्थः भवति। अतः प्रतिज्ञादिप्रकाशकः वाक्यप्रयोगः आवश्यकः। अर्थसाधकत्वाभावात् जिज्ञासादयः न्यायघटकाभावात्, ते न न्यायस्यावयवाः। उक्तञ्च *तात्पर्यटीकायां* वाचस्पतिमिश्रेण- "ते च जिज्ञासादयः उत्पन्नाः प्रकरणस्योत्थापकाः स्वरूपेण, न पुनः स्वज्ञानेन, येन स्वशब्दप्रतिपाद्याः सन्तः प्रकरणेऽप्यङ्गं भवेयुः, यथा

---

[५०९] तदेव, पृ-२७२

प्रतिज्ञादयः स्वज्ञानेन स्वार्थान् प्रतिपादयन्तः। तस्मात् सर्वथैव जिज्ञासादिवाचकपदप्रयोगोऽनर्थक इति भावः।"[५१०] इति।

किञ्च, वृत्तिकारेण इतोऽपि अधिकं व्याख्यातं यत् पूर्वपक्षिणा यद्युच्यते न्यायप्रयोगार्थं यत् तत्त्वज्ञानं भवति, तदनुकूलत्वमेव अवयवत्वम् इति। तदा तेन यथा प्रतिज्ञादिपञ्चावयवानां ग्रहणं भवति तथैव जिज्ञासादयोऽपि न्यायस्य प्रयोगजन्यबोधस्य अनुकूलत्वात् तेषामपि ग्रहणं स्यात्। अत एव 'न्यायप्रयोगजन्यबोधानुकूलत्वम् अवयवत्वम्' इत्येवमेव अवयवलक्षणमुचितं स्यादिति। एतन्मतमपि न युक्तम्। तदुक्तं वृत्तिकारेण- "न वा न्यायजन्यबोधानुकूलत्वेनैवावयवत्वम् अतिप्रसङ्गात् प्रयोजनाव्याप्तेश्च।"[५११] इति। अत्रायमाशयः- प्रतिज्ञादिवत् न्यायप्रयोगजन्यबोधस्य अनुकूलः प्रयोजको वा जिज्ञासादिः भवत्यपि अर्थात् जिज्ञासादिसहितप्रतिज्ञादिपदार्थे तल्लक्षणं सङ्गतमपि प्रयोजनपदार्थे तदतिप्रसङ्गः स्यात्। यतो हि हानादिबुद्धिरूपे यत्प्रयोजनं तत्तु न न्यायजन्यबोधानुकूलम्। न्यायजन्यतत्त्वबोधे सति तद्बोधात् वरं हानादिरूपप्रयोजनं निष्पन्नं भवति। किन्तु हानादिरूपप्रयोजनं तु उक्तबोधस्य अनुकूलमिति वक्तुं न शक्यते। अत एव पूर्वपक्षिसम्मतप्रयोजनपदार्थे एव उक्तावयवलक्षणस्याव्याप्तिः स्यात्। न केवलं तत् जिज्ञासादिव्यतिरेकतया बहुपदार्थे एव साक्षात् परम्परया वा तन्निरुक्तबोधस्य प्रयोजकत्वात् तेऽपि पदार्थाः अवयवाः स्युरिति।

[५१०] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७१

[५११] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-२७ २

## ।।तर्कः।।

### ❖ अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः[५१२]

प्रथमोद्देशसूत्रे अवयवपदार्थस्यानन्तरं तर्कपदार्थस्य उद्देशो विहितः। अथ अवयवपदार्थस्य सामान्यलक्षणानन्तरं तथा विशेषलक्षणानन्तरं क्रमप्राप्तस्य तर्कपदार्थस्य लक्षणं क्रियते प्रस्तुतेऽस्मिन् सूत्रे। किञ्च, महर्षिणा पञ्चावयववाक्यरूपन्यायं निरूप्य क्रमानुसारं प्रस्तुतसूत्रेण तर्कपदार्थस्य तथा तत्परवर्तिसूत्रेण निर्णयपदार्थस्य लक्षणं कृतम्। यतो हि तर्कः निर्णयश्च न्यायस्य उत्तराङ्गम्। अनुमानप्रमाणार्थे तथा मननार्थेऽपि तर्कशब्दस्य प्रयोगो दृश्यते। उक्तञ्च अमृतनादोपनिषदि- '...तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते। ' इति। अर्थात् षडङ्गयोगस्य पञ्चमाङ्गो हि तर्क इति। प्राचीनकालादेव तर्कपदार्थस्य स्वरूपविषये बहवः विचाराः तथा विविधानि मतानि दृश्यन्ते। कस्मिंश्चित्सम्प्रदायमते तर्कः, संशयः, निर्णयश्च न हि भिन्नपदार्थः। कस्मिंश्चित्सम्प्रदायमते च अनुमानप्रमाणस्य नामान्तरमेव तर्कः। हेतुः, तर्कः, न्यायः, अन्वीक्षा च शब्दः अनुमानबोधकपर्यायशब्दः। कस्मिंश्चित्सम्प्रदायमते च युक्तिसापेक्षं यदनुमानं तस्यैव नाम तर्कः। जैनदार्शनिकगणस्य मते तर्कः (ऊहः) अनुमानात् भिन्नः परोक्षप्रमाणविशेषः। किन्तु बौद्धनैयायिकमते तर्को हि 'प्रसङ्गानुमानम्'। अपरपक्षे अनिष्टप्रसङ्गमूलकानुमानमेव 'प्रसङ्गानुमानम्'। *न्यायकन्दलीटीकायां* श्रीधरभट्टेनापि बहुविचारपूर्वकतया प्राचीनमतं प्रतिषिध्य परिशेषे वैशेषिकमते तर्कः अनुमानमेव इत्युक्तम्। ततश्च वैशेषिकमते 'तर्कः संशयविशेषः' इति तेन भिन्नसम्प्रदायस्य मतमित्युक्तम्। *सप्तपदार्थी*ग्रन्थे

---

[५१२] न्या.सू.-१/१/४०

शिवादित्यमिश्रेणापि तर्कः संशयविशेष इत्युक्तम्। किन्तु महर्षिणा गौतमेन तर्कपदार्थस्य पृथक् उल्लेखत्वात् वार्त्तिककारेण उद्द्योतकरेण बहुविचारपूर्वकतया तर्कपदार्थस्य स्वरूपविषये निगदितं - 'भवेदित्येष प्रत्यय इत्यस्य स्वरूपमिति।' इति। अत्र 'भवेत्' इति पदे सम्भावनार्थे विधिलिङ्लकारस्य प्रयोगं कृत्वा उद्द्योतकरेण इदं व्यक्तीकृतं यत् संशयनिर्णयाभ्यां भिन्नः सम्भावनारूपज्ञानविशेष एव तर्कः इति । इदं भाष्यकारस्यापि अभिमतमिति बुध्यते। किन्तु उदयनाचार्यादिनैयायिकसम्प्रदायमते अनिष्टप्रसङ्ग एव तर्क इति।

एवम् अनेकविधार्थे तर्कशब्दस्य प्रयोगो जातः। किन्तु *न्यायदर्शने* गौतमोक्तषोडशपदार्थान्तर्गतः तर्कपदार्थः न हि कश्चित् प्रमाणविशेषः, किन्तु प्रमाणस्य सहकारी ऊहरूपज्ञानविशेषः। अतो महर्षिणा गौतमेन प्रस्तुतसूत्रे निगदितम् - 'ऊहस्तर्कः' इति। तत्पूर्वम् उक्ततर्कपदार्थस्य प्रयोजनं व्यक्तयता निगदितं - 'तत्त्वज्ञानार्थम्' इति। तत्पूर्वञ्च तस्य प्रयोजकं प्रकाशयता उक्तं - 'कारणोपपत्तितः' इति। भाष्यनये उक्तकारणशब्दस्यार्थः प्रमाणम्, 'उपपत्ति'-शब्दस्यार्थः सम्भवः। अर्थात् प्रमाणस्य सम्भवप्रयुक्तः यद् ऊहः तदेव तर्कः। तस्य तर्कस्य विषयः कः इति व्यक्तयता महर्षिणा गौतमेन भणितम् - 'अविज्ञाततत्त्वेऽर्थे' इति।

उद्द्योतकरेण उक्तं यत् विज्ञाततत्त्वविषये शुश्रुषा, श्रवणं धारणादिश्च सांख्यशास्त्रे बुद्धिधर्मरूपः ऊहः इत्युक्तम्। किन्तु तदूहः एतत्सूत्रोक्तः तर्कपदार्थः न। अत एव महर्षिणा उक्तम्- 'अविज्ञाततत्त्वे' इति। यत्पदार्थः सर्वथा अज्ञातः, तस्य तत्त्वनिश्चयार्थं तर्कः न प्रवर्तते। अतः 'अविज्ञाते' इत्येवं पदं नोक्तम्। अतो महर्षिणा गौतमेन तत्त्वशब्दस्य प्रयोगं कृत्वा व्यक्तीकृतं यत् यत्पदार्थः सामान्यतः ज्ञातः,

किन्तु तस्य तत्त्वम् अविज्ञातम्, एतादृशपदार्थविषये उक्तरूपोह एव तर्कः। किन्तु 'अविज्ञातं तत्त्वं येन पुरुषेण' इत्येवं विग्रहवाक्यानुसारम् 'अविज्ञाततत्त्व'-शब्देन तादृशः ज्ञाता पुरुषोऽपि बुध्यते। किन्तु तथा सति अत्र अर्थसङ्गतिर्न भवति। अतो महर्षिणा ततश्चोक्तम् - 'अर्थे' इति। अर्थात् अनन्तरम् अर्थशब्दप्रयोगेण महर्षिणा व्यक्तीकृतं यत् 'अविज्ञाततत्त्व'-शब्देन अतत्त्वज्ञः पुरुषः विवक्षितः न। किन्तु 'अविज्ञातं तत्त्वं यस्य अर्थस्य' इत्येवं विग्रहवाक्यानुसारं तादृशः पदार्थः एव विवक्षितः। किन्तु तादृशपदार्थस्य तत्त्वज्ञानार्थम् ऊहः एव तर्कः। अत एव 'अविज्ञाततत्त्वस्यार्थस्य' इत्येवंरूपप्रयोगः कर्तव्यः। उद्द्योतकरेणापि एतत्समर्थयता निगदितं - "षष्ठीस्थल एवैषा सप्तमी"[५१३] इति। अर्थात् उक्तपदे षष्ठीविभक्त्यर्थे सप्तमीविभक्तेः प्रयोगः कृतः। अन्यत्रापि एवंविधप्रयोगो दृश्यते। यथा वैशेषिकदर्शने 'इषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतवः'[५१४] इति सूत्रे आदौ 'इषौ' इति पदे षष्ठीविभक्त्यर्थे एव सप्तमीविभक्तेः प्रयोगः कृतः। उद्द्योतकरवत् उक्तसूत्रस्य व्याख्याने *उपस्कारटीकायां* शंकरमिश्रेणापि उक्तम्- "इषाविति षष्ठ्यर्थे सप्तमी" इति।

वृत्तिकारेण प्रस्तुतसूत्रं व्याख्यायितुमादौ भणितं यत् 'तर्कः' इति पदेन लक्ष्यनिर्देशः कृतः तथा 'कारणोपपत्तितः ऊहः' इति पदसमूहेन लक्षणनिर्देशः कृतः इति। तदुक्तं वृत्तिकारेण - "तर्क इति लक्ष्यनिर्देशः, कारणोपपत्तितः ऊह इति लक्षणम्।"[५१५] इति। किञ्च, सूत्रस्थेन 'अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थम्' इति

[५१३] न्या.वा., न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२५
[५१४] वै.सू.-५/१/१६
[५१५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२१

पदसमूहेन तर्कपदार्थस्य प्रयोजनं कथितम्। उक्तञ्च वृत्तिकारेण- "अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनम्।"[५१६] इति।

'कारणोपपत्तित ऊह' इति लक्षणवाक्यस्यार्थविषये भाष्यवृत्त्योः वैलक्षण्यमाचक्षते। तथाहि भाष्यकारेण 'कारणोपपत्तितः' इति पदं व्याख्यायता निगदितं- 'सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति'[५१७] इति। एतेन ज्ञायते भाष्यनये सूत्रोक्तकारणशब्दस्यार्थः प्रमाणमिति तथा उपपत्तिरिति शब्दस्यार्थः सम्भव इति। कारणस्योपपत्तिः अर्थात् तत्पदार्थविशेषे एव प्रमाणस्य सम्भवः सत्ता वा। प्राचीनकाले हेतुबोधककारणशब्दस्य प्रमाणार्थे प्रयोगः दृश्यते। कारणम्, प्रमाणम्, हेतुश्च इति शब्दत्रयम् एकार्थबोधकम्। अतो भाष्यकारेण सूत्रोक्तकारणशब्दस्यार्थं प्रकाशयता प्रमाणशब्दानन्तरं समानार्थहेतुशब्दस्यापि प्रयोगः कृतः। अतो भाष्यकारेण तत्पूर्वोक्तानुज्ञायाः स्वरूपं व्यक्तयता भणितं - "कारणोपपत्त्या स्यादेवमेतन्नेतरदिति।"[५१८] इति।

किन्तु वृत्तिकारनये कारणपदस्यार्थः व्याप्यम् इति। किञ्च तन्नये उपपत्तिर्नाम आरोपः बुध्यते। अत एव 'कारणस्य व्याप्यस्य उपपत्तिः आरोपः' इति षष्ठीतत्पुरुषसमासेन निष्पन्नेन कारणोपपत्तिशब्देन व्याप्यस्य आरोपः बुध्यते। ऊहपदस्यापि अर्थः आरोपः। किन्तु पूर्वं व्याप्यस्यारोपत्वात् पुनः निश्चिततया एव व्याप्यस्य आरोपः न भवति। अतः तात्पर्यात् एव ऊहो नाम व्यापकस्य आरोपः बुध्यते। तथा च, पञ्चम्याः अर्थः प्रयुक्तत्वात् सम्पूर्णतर्कपदार्थस्यार्थो भवति- व्याप्यस्य आरोपप्रयुक्तः यद्व्यापकस्यारोपः तदेव

---

[५१६] तत्रैव

[५१७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२१

[५१८] तत्रैव

तर्कः इति। तदुक्तं वृत्तिकारेण- "'कारणं' व्याप्यम्, तस्योपपत्तिरारोपः, तस्माद् य ऊह आरोपः अर्थाद्व्यापकस्य।"[५१९] इति। ततश्च वृत्तिकारेण तर्कपदार्थस्य परिनिष्ठितलक्षणमपि प्रदत्तम्। तदुक्तं तेन - "तथा च, व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्यारोपाद् व्यापकस्याहार्यारोपः स तर्कः।"[५२०] इति। अर्थात् व्यापकाभावविशिष्टरूपेण निर्णीतत्त्वे तदधिकरणे व्याप्यस्य आहार्यारोपप्रयुक्तः यद् व्यापकस्याहार्यारोपः तदेव तर्कः इति विज्ञेयम्। अस्योदाहरणत्वेन वृत्तिकारेणोक्तं - "यथा निर्वह्निनत्वारोपान्निर्धूमत्वारोपः- निर्वह्निः स्यात् निर्धूमः स्यादिति।"[५२१] इति। अत्रायमाशयः धूमपदार्थः वह्निपदार्थस्य व्याप्यः तथा विपरीततया वक्तुमलं वह्निपदार्थः धूमपदार्थस्य व्यापकः। इदानीं वह्निपदार्थः व्यापकः अर्थात् अपेक्षाकृताधिकदेशवृत्तित्वात् वह्न्यभावः व्याप्यः स्यात् अर्थात् अपेक्षाकृताल्पदेशवृत्तिः स्यात्। एवमेव धूमस्य व्याप्यत्वात् धूमाभावः व्यापकः स्यात्। अत एव धूमाभावः वह्न्यभावस्य व्यापकपदार्थः। अत्र तर्कः यतो हि व्याप्यस्यारोपप्रयुक्तव्यापकस्यारोपः, अत एव वक्तुं शक्यते वह्न्यभावस्या- रोपवशात् धूमाभावस्यारोपो हि तर्कः इति।

भाष्यकारेण तु तर्कपदार्थविषये उक्तम्- "अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते जानीयेसमर्थमिति। अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति – किंस्विदित्थम् आहोस्विन्नेत्थमिति। विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्यानुजानाति, सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति कारणोपपत्त्या

---

[५१९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२१-३२२

[५२०] तदेव, पृ-३२२

[५२१] तत्रैव

स्यादेवमेतन्नेतरदिति।"[५२२] इति। अस्य तात्पर्यं हि अस्मिन्नेव पदार्थे प्रमाणस्य सम्भवो भवति, अतः एतद् एवं भवितुमर्हति, भिन्नरूपं न भवितुमर्हति इत्येवं सम्भावनात्मकं यत् ज्ञानं तदेव प्रमाणस्य उपपत्तिप्रयुक्ता तत्प्रमाणविषयीभूत-तत्त्वस्यानुज्ञा, तदेव च एतत्सूत्रोक्तोहरूपतर्कपदार्थः। न हि स संशयः, न च निर्णयपदार्थः। किन्तु तद्भिन्नोक्तरूपविशेषज्ञानम्। अत एवोक्तं फणिभूषणतर्क-वागीशेन - "তাৎপর্য্য এই যে, এই পদার্থেই প্রমাণের সম্ভব হয়, এজন্য ইহা এইরূপ হইতে পারে, অন্যরূপ হইতে পারে না, এইরূপ সম্ভাবনাত্মক যে জ্ঞান, তাহাই প্রমাণের উপপত্তিপ্রযুক্ত সেই প্রমাণবিষয়ীভূত তত্ত্বের অনুজ্ঞা এবং উহাই এই সূত্রোক্ত উহরূপ তর্কপদার্থ। উহা সংশয়ও নহে, নির্ণয়ও নহে। কিন্তু তদ্ভিন্ন উক্তরূপ বিশেষ জ্ঞান। "[५२३] इति। अस्योदाहरणत्वेन भाष्यकारेणोक्तं यत् यज्ज्ञातव्यपदार्थस्य ज्ञाता (आत्मा), तस्य तत्त्वविषये यदि जिज्ञासा स्यात् तदा कथं तज्ज्ञाता किम् उत्पत्तिधर्मकः ? अथवा अनुत्पत्तिधर्मकः? इत्येवं संशयो जायते। किन्तु परं तत्संशयकारी तस्य संशयविषयीभूततज्ज्ञातृपदार्थे यद्धर्मस्यानुज्ञायाः सम्बन्धे प्रमाणमुपपन्नं सम्भवं वा भवति, तद्धर्मस्यैवानुज्ञां करोति। यथा एष ज्ञाता अनुत्पत्तिधर्मकश्चेत् अर्थात् अनादिनित्यपदार्थश्चेत् तस्य पूर्वजन्मकृतकर्मवशात् संसारजन्यस्तथा तत्त्वज्ञानजन्यो मोक्षो भवितुमर्हति। किन्तु उत्पत्तिधर्मकश्चेत् अर्थात् देहादि-उत्पत्तिकाले अभिनवात्मन एव उत्पत्तिः भवति चेत् पूर्वं तस्य सत्तायाः अविद्यमानत्वात् स्वकृतकर्मजन्यविचित्रजन्मादिः न सम्भवति। तथा उत्पन्नभावपदार्थमात्रस्यैव विनाशित्ववशात् तदात्मनः मोक्षोऽपि भवितुं नार्हति। एवं विचार्य पूर्वोक्तसंशयकारी आत्मनः उत्पत्तिधर्मकत्वविषये प्रमाणमनुपपद्यमानमवगम्य तस्य अनुज्ञां सम्भावनां वा न करोति। किन्तु आत्मनः

[५२२] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२०-३२१

[५२३] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-३४९

अनुत्पत्तिधर्मकत्वविषये एव प्रमाणं सम्भवतीति अवगम्य तस्यैव अनुज्ञां करोति। अर्थात् आत्मा अनुत्पत्तिधर्मको भवितुमर्हति इत्येवंरूपसम्भावनात्मकज्ञानमेव उक्तस्थले 'तर्कः' इति। तदुक्तं भाष्यकारेण - "तत्र निदर्शनम् – योऽयं ज्ञाता ज्ञातव्यमर्थं जानीते तं तत्त्वतो जानीयेति जिज्ञासा । स किमुत्पत्तिधर्मकः अथानुत्पत्तिधर्मक इति विमर्शः। विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते, तमनुजानाति, यद्ययमनुत्पपत्तिधर्मकस्ततः स्वकृतस्य कर्मणः फलमनुभवति ज्ञाता। दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानाना-मुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणम्, उत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति स्यातां संसारापवर्गौ। उत्पत्तिधर्मके ज्ञातरि पुनर्न स्याताम्। उत्पन्नः खलु ज्ञाता देहेन्द्रियबुद्धिवेदनाभिः सम्बध्यत इति नास्येदं स्वकृतस्य कर्मणः फलम्। उत्पन्नश्च भूत्वा न भवतीति, तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति। तदेवमेकस्यानेकशरीरयोगः शरीरवियोगश्चात्यन्तं न स्यादिति, यत्र कारणमनुपपद्यमानं पश्यति, तन्नानुजानाति। सोऽयमेवंलक्षण ऊहस्तर्क इत्युच्यते।"[५२४] इति। एतन्मतस्य व्याख्यां कुर्वता श्रीधरभट्टेनापि उक्तम्- "अनुत्पत्तिधर्मकेणानेन भवितव्यमिति। किमस्य सम्भावनाप्रत्ययस्य प्रयोजनम् ? तत्त्वज्ञानमेव।"[५२५] इति। जयन्तभट्टेनापि उक्तं - "तेनायं सूत्रार्थः, अविज्ञाततत्त्वे सामान्यतो ज्ञाते धर्मिण्येकपक्षानुकूलकारणदर्शनात्तस्मिन् सम्भावनाप्रत्ययो

---

[५२४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२१-३२२

[५२५] न्यायकन्दली,पृ-१७३

भवितव्यतावभासस्तदितरपक्षशैथिल्यापादने तद्ग्राहकप्रमाणमनुगृह्य तत्सुखं प्रवर्त्तयन् तत्त्वज्ञानार्थमूहस्तर्क इति।"[५२६] इति।

एवं दृश्यते यत् तर्कपदार्थस्य लक्षणविषये उदाहरणविषये तयोः व्याख्यानविषये भाष्यवृत्त्योर्वैलक्षण्यं दरीदृश्यते।

उक्ततर्कपदार्थः न हि तत्त्वज्ञानम्, किन्तु तत्त्वज्ञानार्थः इत्येवं समर्थयितुमाह भाष्यकारः - 'अनवधारणात्' इति पदम्। ततश्च भाष्यकारेण एतस्य तात्पर्यं व्याख्यायता निगदितम् - "अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या, त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति।"[५२७] इति। अत्राशयस्तु उक्ततर्कपदार्थः एकतरधर्मस्यानुज्ञामेव करोति किन्तु न त्ववधारयति, न व्यवस्यति न वा निश्चिनोति इति। विषयेऽस्मिन् वृत्तिकारेण तु किमपि नोल्लिखितम्।

किञ्च, वृत्तिकारेणापि तर्कपदार्थस्य व्यर्थताविषये प्रश्नमुत्थाय पुनस्तस्य समाधानं कृतम्। तथाहि अनुमानादिनैव यदा पर्वतादिपक्षे वह्न्यादिसाध्यस्य सत्ता सिद्धा भवति तदा तर्कपदार्थेन प्रयोजनं किम् ? तेन तर्कः व्यर्थः एव स्यादिति चेदत्रोच्यते वृत्तिकारेण - "न चानुमानादितोऽर्थसिद्धेस्तर्को व्यर्थ इति वाच्यम्, अप्रयोजकत्वादिशङ्काकलङ्कितेन हेतुनार्थस्य साधयितुमशक्यत्वात्। तदेतदुक्तम्- अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति, तत्त्वनिर्णयार्थमित्यर्थः। यत्र नाप्रयोजकत्वाद्याशङ्का तत्र तर्को नापेक्ष्यत एवेति भावः।"[५२८] इति। अत्रायमाशयः वादिप्रयुक्तानुमानघटकव्याप्तौ यदा प्रतिवादी संशयं प्रकाशते तदा

---

[५२६] न्यायमञ्जरी,पृ-५८६

[५२७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२२

[५२८] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२३

उक्तसंशयः दूरीभूतो न भवति चेत् हेतुः प्रकृतसाध्यस्य प्रयोजकरूपे ज्ञातो न भवति। अत एव पक्षे साध्यवैशिष्ट्यं नावगतं स्यात्। अत एव प्रकृतार्थस्य सिद्धिः केवलमनुमानेन न भवति। यत्र हेतौ एवंविधाप्रयोजकत्वज्ञानं वर्तते, तत्र केवलमनुमानम् अर्थसिद्धेः अनुकूलं न भवति। अत्र अप्रयोजकत्वदोषो नाम उक्तहेतौ व्याप्तिसंशयनिवारकानुकूलस्य तर्कस्याविद्यमानम्। अत एव प्रयोजकत्वशङ्कानिराकरणाय वादी अनुकूलतर्कस्य प्रयोगं करोति। येन च व्याप्तिविषये या शङ्का आसीत् सा निवारिता भवति। एवञ्च प्रकृतार्थस्य सिद्धिर्भवति। अत एव तर्कः अनुमानस्य सहायकरूपेण प्रकृतार्थसिद्धिरनुकूलो भवति। अन्यथा च अप्रयोजकत्वादिशङ्काकलङ्केन आस्कन्दितहेतोः कदापि प्रकृतार्थसिद्धिर्न भवति। एतत्तात्पर्ये एव महर्षिगौतमेन प्रस्तुतसूत्रे 'अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थम्' इत्येवं तर्कपदार्थस्य प्रयोजनवाचिपदानि उल्लिखितानि। अर्थात् इदानीमपि अविज्ञातं तत्त्वं स्वरूपं वा यस्य एवंविधपदार्थस्य तत्त्वनिर्णयार्थं तर्कपदार्थस्य प्रयोजनीयता विद्यते इति ध्येयम्। भाष्यकारस्य व्याख्यानशैल्याः भिन्नत्वात् प्रसङ्गेऽस्मिन् कापि व्याख्या नोपलभ्यते *न्यायसूत्रभाष्ये*।

एवं तर्कपदार्थस्य व्याख्यायां न्यायभाष्यसूत्रवृत्त्योः वैलक्षण्यं प्रतिभाति।

किन्तु संशयनिश्चयाभ्यां भिन्नं पूर्वोक्तसम्भावनारूपज्ञानम् उदयनाचार्यादिनैयायिकैः न स्वीकृतम्। यतो हि तेषां नये सम्भावनारूपज्ञानमपि संशयविशेषः। किन्तु तर्कपदार्थस्तु न संशयात्मकज्ञानम्। अत उदयनाचार्येणापि अनिष्टापत्तिः तर्कः इत्युक्तम्। वाचस्पतिमिश्रेणापि भाष्यमतं व्याख्यायता अनिष्टापत्तिः तर्कः इति प्रतिपादितम्। अत एतेषां मतं पर्यालोच्य वक्तुमलं यत्

प्रमाणेन बाधितपदार्थ एव अनिष्टपदार्थः तथा तस्य प्रसङ्गः अर्थात् आपत्तिरूपयज्ज्ञानं तदेव तर्कपदार्थः। अतः तर्कपदार्थः 'बाधितार्थप्रसङ्गः' इत्युच्यते। अपि च, उक्तरूपतर्कपदार्थः संशयनिवर्त्तकत्वात् तस्यापरं प्राचीननाम 'संशयव्युदासः' इति।

किञ्च, वृत्तिकारविश्वनाथन्यायपञ्चाननेन तथा उदयनाचार्यादि-नैयायिकैः तर्कपदार्थस्य विभागः प्रदर्शितः। किन्तु भाष्यकारेण तर्कपदार्थस्य विभागविषये कापि न आलोचना कृता न वा किमपि उल्लिखितम्।

तथाहि आचार्यविश्वनाथनये तर्कपदार्थः पञ्चविधः। ते च विभागाः हि आत्माश्रयः, अन्योन्याश्रयः, चक्रकाश्रयः, अनवस्था, तदन्यबाधितार्थप्रसङ्गश्चेति।

**१.आत्माश्रयः-** तत्र आत्माश्रयतर्कपदार्थस्य लक्षणविषये वृत्तिकारेणोक्तं- "स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्गः आत्माश्रयः"[५२९] इति। अत्रायमाशयः- यदि कश्चित्पदार्थः स्वस्य उत्पत्तौ, स्थितौ, ज्ञप्तौ च स्वमेवापेक्षते तथा तदा तत्प्रयुक्तयदनिष्टापत्तिर्भवति स आत्माश्रय उच्यते। अयमात्माश्रयः उत्पत्तिस्थितिज्ञप्तिभेदात् त्रिविधः। अत एवोक्तं वृत्तिकारेण- "...स चोत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा।"[५३०] इति। यथा उत्पत्तिघटितोदाहरणं - "यद्ययं घटः एतद्घटजन्यः स्यात् तदा एतद्घटानधिकरणोत्तरवर्ती न स्यात्।"[५३१] इति। अर्थात् यदि अयं घटः एतद्घटजन्यो भवति, तदा एतद्घटस्य अनधिकरणक्षणोत्तरवर्ती न स्यादिति। अत्र एतद्घटस्य उत्पत्तौ एतद्घटः एवापेक्षितत्वात् तथा तमाश्रित्यानिष्टापत्तित्वात् अत्र उत्पत्तिघटितात्माश्रय-

---

[५२९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२५

[५३०] तत्रैव

[५३१] तत्रैव

नामकतर्कः अभूत्। स्थितिघटितोदाहरणं हि - "यद्ययं घट एतद्घटवृत्तिः स्याद् एतद्घटव्याप्यो न स्यात् "[५३२] इति। अर्थात् यदि अयं घटः एतद्घटवृत्तिः भवति तदा एतद्घटः एतद्घटव्याप्यो न भवतीति। अत्र एतद्घटव्याप्यत्वस्य अभावरूपयदनिष्टापत्तिः तदेतद्घटस्यैव एतद्घटे स्थितिनिबन्धनत्वात् अत्र स्थितिद्वारा आत्माश्रयतर्कः बोध्यः। ज्ञप्तिघटितोदाहरणं यथा- "यद्ययं घट एतद्घटज्ञानाभिन्नः स्याज् ज्ञानसामग्रीजन्यः स्यात्, एतद्घटभिन्नः स्यादिति वा सर्वत्रापाद्यम्।"[५३३] इति। अर्थात् एतद्घटः एतद्घटज्ञानात् अभिन्नो भवति, तर्हि ज्ञानसामग्रीजन्यः स्यात्– इत्यत्र यद् एतद्घटस्य ज्ञानसामग्रीजन्यत्वरूपानिष्टापत्तिस्तदेतद्घटज्ञानाभेदमाश्रित्य भवति। अत एवात्रापि स्वपदार्थः स्वमेवापेक्षितत्वात् तथा ज्ञानमाश्रित्य सम्भवात् ज्ञप्तिघटितात्माश्रयतर्कः अभूत्।

**२.अन्योन्याश्रयः-** एवं यदि कश्चित् पदार्थः स्वस्योत्पत्तिस्थितिज्ञप्तिद्वारा यत्पदार्थमपेक्षते, तत्पदार्थो यदि तत्प्रथमोक्तपदार्थम् (स्वम्) अपेक्षते तदा तत्प्रयुक्तयदनिष्टप्रसङ्गः तदन्योन्याश्रय उच्यते। तदुक्तं वृत्तिकारेण - "तदपेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः।"[५३४] इति। सोऽपि पूर्ववत् उत्पत्तिस्थितिज्ञप्तिभेदात् त्रेधा इति विज्ञेयम्। यथा – यदि एतद्घटः एतद्घटजन्यः (घटरूपजन्यः) स्यात्, तदा एतद्घटः स्वस्माद्भिन्नः स्यात् इति।

**३.चक्रकाश्रयः-** यदि कश्चित्पदार्थः स्वस्य उत्पत्तावादौ द्वयं ततोऽधिकं वा पदार्थमपेक्षते, पुनः स्वमेव अपेक्षते तथा तत्प्रयुक्तयदनिष्टापत्तिः भवति,,

---

[५३२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२६

[५३३] तत्रैव

[५३४] तत्रैव

तच्चक्रकाश्रयः उच्यते। अर्थात् अत्रापि कश्चित् पदार्थः स्वस्योत्पत्तावादौ यत्पदार्थमपेक्षते, तत्पदार्थः यदि अपरपदार्थमपेक्षते, तदपरपदार्थो यदि पुनः प्रथमोक्तस्वपदार्थमपेक्षते, तदा यदनिष्टापत्तिर्भवति, तच्चक्रकाश्रयः उच्यते। तदुक्तं वृत्तिकारेण- "तदपेक्षापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकम्। चतुःकक्षादावपि स्वस्य सापेक्षापेक्षापेक्षित्वसत्त्वात् नाधिक्यम्।"[५३५] इति। चक्रकाश्रयोऽपि पूर्ववत् उत्पत्तिस्थितिज्ञप्तिभेदात् त्रेधा। अस्योदाहरणं यथा- यदि अयं शुक्लघटः एतच्छुक्लघटजन्यजन्यजन्यः स्यात्, तदा स्वस्माद् भिन्नः स्यात् इति।

४.**अनवस्था-** यत्र स्थले आपत्तेः विश्रामः व्यवस्था वा नास्ति तत्र स्थले यदनिष्टापत्तिर्भवति तदनवस्था इत्युच्यते। यथा- यदि कः – इत्यस्य सत्ता खः इत्यस्योपरि, खः इत्यस्य सत्ता गः इत्यस्योपरि, गः इत्यस्य सत्ता घः इत्यस्योपरि इत्येवं परस्य अन्यपदार्थस्य सत्तायाः उपरि आश्रिता भवति, तदा मिथः पदार्थस्य कस्यापि सत्ता पूर्वपदार्थस्य सत्तां नापेक्षते, अतोऽनवस्थादोषो जायते। यदि केनापि उच्यते यत्, घटत्वं यदि घटजन्यत्वव्याप्यं भवति, घटजन्यत्वं पुनः घटजन्यजन्यत्वव्याप्यं भवति, घटजन्यजन्यत्वं पुनः घटजन्यजन्यजन्यत्वव्याप्यं भवति – इत्येवं यदि प्रचलति तदा अनवस्थादोषो जायते। अत्रापि अनिष्टापत्तिः स्यात्। तदुक्तं वृत्तिकारेण- "अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गोऽनवस्था। यथा – यदि घटत्वं घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं न स्यात्।"[५३६] इति।

---

[५३५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२६

[५३६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२७

**५.तदन्यबाधितार्थप्रसङ्गः-** पञ्चमप्रकारस्तर्को हि तदन्यबाधितार्थप्रसङ्गः इति। यथा -– तर्कसामान्यस्योदाहरणरूपेण पूर्वं यद् दृष्टान्तः उपस्थापितः, अर्थात् यदि धूमः वह्निनव्यभिचारी स्यात्, तदा वह्निजन्यः न स्यात्- उक्तप्रकारानिष्टापत्तिः प्रागुक्तात्माश्रयादिभिन्नत्वात् अन्यबाधितार्थप्रसङ्गनाम्ना अभिहिता। तदुक्तं वृत्तिकारेण- "तदन्यबाधितार्थप्रसङ्गस्तु – धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादित्यादिः।"[५३७] इति।

वस्तुतः अनिष्टापत्तिरेव तर्कस्य बीजम्। अत एव वृत्तिकारेण विश्वनाथेनान्तिमे प्रतिपादितं यत् प्रथमोपस्थितिः, उत्सर्गः, विनिगमनाविरहः, लाघवं, गौरवम् इत्यादिदोषाः यद्धि तर्कनाम्ना अभिहिताः, ते तु वस्तुतः न तर्काः। यतो हि ते न आपत्तिस्वरूपाः। किन्तु ते पदार्थाः प्रमाणसहकारित्वात् तादृशसाधर्म्यसत्त्वात् तत्तत्पदार्थेषु तर्कपदस्य व्यवहारः गौणः इति उररीकार्यम्। तदुक्तं वृत्तिकारेण- "प्रथमोपस्थितत्त्वोत्सर्गविनिगमनाविरहलाघवगौरवादिकं तु प्रसङ्गानात्मकत्वान्न तर्कः, किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात्तथा व्यवहार इति संक्षेपः।"[५३८] इति। उक्तञ्च *मानमेयोदय*ग्रन्थे - "गौरवं लाघवं चेति तर्कः सार्वत्रिकावुभौ यत्रानुकूलतर्कोऽसौ साध्यसिद्धानुग्रहात्। साध्यस्यैवानुवादेन यदनिष्टप्रञ्जनम्। तर्कः प्रतिकूलः स्यात् साध्यसिद्धिनिरोधनात्।" इति। अस्मिन् विषयेऽपि भाष्ये किमपि न प्राप्यते।

---

[५३७] तत्रैव

[५३८] तत्रैव

# ।।निर्णयः।।

## ❖ विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः[५३९]

महर्षिणा गौतमेन तर्कपदार्थस्य लक्षणानन्तरं प्रस्तुतसूत्रेण निर्णयपदार्थस्य लक्षणमुक्त्वा न्यायदर्शनस्य प्रथमाध्यायस्य प्रथमाह्निकः समाप्तीकृतः। यतो हि निर्णयपदार्थः न्यायस्य उत्तराङ्गः तर्कपूर्वकश्च। अत एव भाष्यकारेण वात्स्यायनेन प्रस्तुतसूत्रस्य व्याख्यानादौ निगदितम्- 'एतस्मिंस्तर्कविषये' इति। अर्थात् पूर्वसूत्रोक्ततर्कविषयीभूतपदार्थे मध्यस्थगणस्य प्रमाणैः तर्केण च यन्निर्णयो जायते, तदेव प्रस्तुतसूत्रोक्तनिर्णयपदार्थः। किञ्च, संशयपूर्वकं साधनोपालम्भाभ्याम् अर्थस्य अवधारणम् अर्थात् तदभावाप्रकारकं तत्प्रकारकं वा ज्ञानं निर्णयः इति सूत्रस्य सामान्यार्थः। तन्मध्यस्थगणस्य संशयपूर्वकत्वात् महर्षिणा प्रस्तुतसूत्रस्यास्यादौ निगदितं- 'विमृश्य' इति। भाष्यकारेण उक्तपदस्यार्थः कृतः 'विमर्शं कृत्वा' इति। अत्र विमर्शः नाम संशयः। ज्ञानवाचिनः मृश्धातोः निष्पन्नस्य मर्शशब्दस्यार्थः ज्ञानमिति। 'विरुद्धः मर्शः यत्र' इति विग्रहे बहुव्रीहिसमासे निष्पन्नस्य विमर्शशब्दस्यार्थः संशयः। यतो हि संशये एव विरुद्धप्रकारकसमानविशेष्यकज्ञानं तिष्ठति। मध्यस्थस्य संशये सत्येव वादिप्रतिवादिनोः विचारः प्रारभते। अत एव विमर्शपदस्यार्थः कृतः वृत्तिकारेण 'सन्दिह्य' इति। मध्यस्थगणः सन्दिह्य केन अर्थावधारणरूपनिर्णयं करोति ? अत्र महर्षिणा उक्तं- 'पक्षप्रतिपक्षाभ्याम्' इति। अत्र भाष्यकारेण तथा वृत्तिकारेणापि पक्षप्रतिपक्षशब्दयोः लाक्षणिकार्थः कृतः साधनं तथा उपालम्भः। तदुक्तं

---

[५३९] न्या.सू.-१/१/४१

भाष्यकारेण- ''स्थापना साधनं, प्रतिषेध उपालम्भः। तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रयौ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्यते।''[५४०] इति। उक्तञ्च वृत्तिकारेण- ''पक्षप्रतिपक्षाभ्यां साधनोपालम्भाभ्याम्।''[५४१] इति। अत्र साधनं नाम वादिप्रतिवादिनोः स्वपक्षस्थापनं बुध्यते। उपालम्भो नाम परपक्षसाधनस्य खण्डनम्। अत्र च परपक्षसाधनस्य खण्डनं वस्तुतः परपक्षदूषणस्याभिधानमात्रम्। अत एव उपालम्भपदस्यार्थविषये उक्तं वृत्तिकारेण- ''उपालम्भः परपक्षदूषणम्।''[५४२] इति। भाष्यकारस्यापि मते तदेवार्थः स्वीकृतः। अतो भाष्यकारेण '...प्रतिषेधः उपालम्भः' इत्युक्तम्। 'अर्थावधारणम्' इति पदस्य तात्पर्ये उच्यते अवधारणं नाम निश्चयः। अत्र निश्चयात्मकज्ञानस्य विषयः कः ? अत्रोच्यते तन्निश्चयः अर्थविषयको भवति। अर्थो नाम यद्यपि कश्चित् पदार्थः अवबुध्यते तथापि अत्र पक्षप्रतिपक्षौ विज्ञेयौ। साधनोपालम्भभ्यां यत्पक्षस्यावस्थानं भवति, तदेवात्रार्थः इति ज्ञेयम्। अथ वादिप्रतिवादिनोः एकस्मिन्नेव धर्मिणि यथाक्रमं विरुद्धधर्मद्वयस्य निश्चयः तिष्ठति। मध्यस्थगणस्य तद्धर्मिणि विरुद्धधर्मद्वयविषयकसंशयः तिष्ठति। तन्निश्चयश्च वस्तुतः धर्मी यद्धर्मविशिष्टः यत्प्रकारविशिष्टो वा तत्प्रकारकज्ञानमेव। किञ्च, धर्मी यत्प्रकारविशिष्टो न भवति, तद्धर्मिणः तदभावाप्रकारकरूपज्ञानमेव निश्चयः। यथा मीमांसकनये 'नित्यः शब्दः' तथा नैयायिकमते 'अनित्यः शब्दः' इति। अत्र साधनोपालम्भभ्यां यदि मीमांसकपक्षस्य निवृत्तिर्भवति तथा नैयायिकपक्षस्यावस्थानं जायते, तदा मध्यस्थगणस्य विचारावसाने 'अनित्यः शब्दः' इत्येवं यद् अनित्यत्वप्रकारकशब्दविशेष्यकज्ञानम् अथवा

---

[५४०] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२९

[५४१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३१

[५४२] तत्रैव

अनित्यत्वाभावाप्रकारकशब्दविशेष्यकज्ञानं भवति, तदेव निर्णयः उच्यते। तदेव च अर्थस्यावधारणम्। एवं वृत्तिकारेण विश्वनाथेन अर्थावधारणपदस्य तात्पर्यमुल्लिखितम्। तदुक्तं वृत्तिकारेण- ‘‘अर्थस्यावधारणं तदभावाप्रकारकं तत्प्रकारकं ज्ञानम्।’’[५४३] इति। अर्थावधारणपदस्य तात्पर्यं तु भाष्यकारेण न चर्चितम्। तेन हि एकं प्रश्नम् उत्थाप्य तत्समाधानं कृतम्। तथाहि भाष्यनये ‘अर्थावधारणम्’, ‘साधनोपालम्भौ’ इति उभाभ्यां न सम्भवति। यतो हि आदौ वादी तत्प्रतिज्ञातपदार्थं हेतुतः स्थापयति तथा प्रतिवादिकथितदोषमपि उद्धरति। ततश्च प्रतिवादी वादिनः स्वपक्षस्थापनहेतुं खण्डयति तथा वादिनः पूर्वोक्तप्रतिषेधकहेतुमपि उद्धरति। एवं विचारे सति अन्ततः वादिनः प्रतिवादिनो वा साधनम् उपालम्भश्च निवृत्तो भवति। तन्निवृत्तौ यस्यावस्थानं भवति तद्द्वारैव अर्थावधारणरूपनिर्णयो भवति। अतः उभययोः एकेनैव अर्थावधारणत्वात् महर्षिगौतमस्य ‘पक्षप्रतिपक्षाभ्याम्’ इति उक्तिर्हि अयुक्ता। तदुक्तं भाष्यकारेण- ‘‘नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति- एको हि प्रतिज्ञातमर्थे हेतुतः स्थापयति प्रतिषिद्धं चोद्धरति द्वितीयस्य। द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते तस्यैव प्रतिषेधहेतुश्चोद्ध्रियते स निवर्तते। तस्य निवृत्तौ योऽवतिष्ठते तेनार्थावधारणं निर्णयः।’’[५४४] इति। वाचस्पतिमिश्रेण च उक्तपूर्वपक्षभाष्यस्य विशदव्याख्यया निगदितं - ‘‘ स वादिनो वा प्रतिवादिनो वा हेतुश्चोपालम्भश्च निवर्तते, तस्मिन्निवृत्ते योऽवतिष्ठते एकः, तेनार्थनिर्णयः, न द्वाभ्याम्। तस्मादयुक्तं पक्षप्रतिपक्षाभ्यामिति।’’[५४५] इति। ततश्च भाष्यकारेण पूर्वपक्षं खण्डयता उक्तं यत् साधनोपालम्भाभ्याम् इति उभयाभ्यामेव अर्थावधारणं भवति। अत एव महर्षिणा

[५४३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३१-३३२

[५४४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३२९-३३०

[५४५] न्या.वा.तात्, न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३०

गौतमेन 'पक्षप्रतिपक्षाभ्याम्' इत्युक्तम्। अत्र युक्तिरूपेण भाष्यकारेणोक्तं यत् साधनोपालम्भयोः एकेन सम्भवः, अपरेण च असम्भवः, एवम् उभयौ मिलितौ भूत्वा मध्यस्थगणस्य संशयः निवृत्तः भवति।[५४६] तदुक्तं भाष्यकारेण- "उभाभ्यामेवार्थावधारणमित्याह। कया युक्त्या ? एकस्य सम्भवो द्वितीयस्यासम्भवः। तावेतौ सम्भवासम्भवौ विमर्शं सह निवर्त्तयतः- उभयसम्भवे उभयासम्भवे वाऽनिवृत्तो विमर्श इति।"[५४७] इति।

अन्तिमे भाष्यकारेण तथा वृत्तिकारेण प्रतिपादितं यत् वस्तुतः 'अर्थावधारणं निर्णयः' इत्येवं निर्णयसामान्यलक्षणम्। 'विमृश्य' इत्यादिपदं न हि निर्णयपदार्थस्य लक्षणघटकम्। यदि तेषां निर्णयघटकत्वमुच्यते तदा वादादिस्थले अव्याप्तिव्यभिचारः स्यात्। यतो हि प्रत्यक्षम्, शब्दः इत्यादिप्रमाणैरपि अर्थस्यावगतिर्भवति। किन्तु तत्र मध्यस्थसंशयः न भवति। अर्थात् उक्तार्थावधारणस्य संशयपूर्वकत्वाभावात् निर्णयलक्षणं तत्रापि अव्याप्तं स्यात्। किञ्च वादविचारे गुरुशिष्ययोः उपस्थितत्वेऽपि मध्यस्थजनस्य आवश्यकता नास्ति। तेन च, तत्रापि मध्यस्थसंशयः न तिष्ठति। अत एव एतत्स्थलेऽपि मध्यस्थसंशयं विनैव अर्थपक्षस्यावधारणं निरुक्तनिश्चयो वा जायते। अतः संशयपूर्वकत्वं यदि निर्णयस्य लक्षणघटकं भवति चेत् अत्रापि लक्षणाव्याप्तिः स्यात्। अतो वृत्तिकारेण निगदितं यत् 'विमृश्य' इत्यादिपदं वस्तुतः जल्पवितण्डास्थलीयनिर्णयमधिकृत्य एव प्रयुक्तम्। तदुक्तं वृत्तिकारेण - "यद्यप्येतावदेव निर्णयसामान्यलक्षणं तथापि विमृश्येत्यादिकं

[५४६] तात्पर्यं तु फणिभूषणतर्कवागीशकृतस्य न्यायदर्शनग्रन्थस्य प्रथमखण्डे ३६१ पृष्ठा द्रष्टव्या।

[५४७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३०

जल्पवितण्डास्थलीयनिर्णयमधिकृत्य।"[५४८] इति। ततश्च वृत्तिकारेण विषयेऽस्मिन् भाष्यकारस्य मतमुद्धृतम्। एतेन ज्ञायते यत् अस्मिन् विषये भाष्यवृत्त्योः साम्यं प्रतिभाति। एवं निर्णयपदार्थव्याख्याने वस्तुतः भाष्यवृत्त्योः साम्यमेव प्रतिभाति, न हि तादृशं वैलक्षण्यं परिलक्ष्यते।

[५४८] न्या.सू.वृ.,न्या.द.,पृ-३३२-३३४

# ।।सप्तमोऽध्यायः।।

## कथातदङ्गव्याख्याने न्यायभाष्यकारन्यायसूत्रवृत्तिकारयोर्मतसमीक्षणम्

प्रस्तुताध्याये 'कथा' इत्युक्ते वाद-जल्प-वितण्डाः इति पदार्थत्रयं बोद्धव्यम्। तदुक्तं भाष्ये - 'तिस्रः कथा भवन्ति वादो जल्पो वितण्डा चेति'[५४९] इति। प्रस्तुताध्याये 'तदङ्गः' इत्युक्ते अवशिष्टाः हेत्वाभास-च्छल-जाति-निग्रहस्थानानीति चत्वारः पदार्थाः बोद्धव्याः।

कथायाः व्याख्या तु न्यायदर्शनस्य प्रथमाध्यायस्य द्वितीयाह्निकतः प्रारभते। परन्तु द्वितीयाह्निकारम्भस्य कारणविषये, लक्ष्यविषये तथा प्रकरणविभागविषये भाष्ये तु तथा न चर्चितम्। परन्तु विश्वनाथेन प्रथमाध्यायस्य द्वितीयाह्निकस्य 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः'[५५०] इति प्रथमाध्यायस्य द्वितीयाह्निकस्य प्रथमसूत्रव्याख्यानावसरे तत्सर्वं विशदतया चर्चितम्। तदुक्तं तेन *न्यायसूत्रवृत्तौ* - 'प्रथमाह्निकेन सपरिकरे न्याये लक्षिते वादादिलक्षणाय द्वितीयाह्निकारम्भः। छलपरीक्षा च प्रसङ्गाद् भविष्यति। तथा च छलपरीक्षासहितवादादिलक्षणं द्वितीयाह्निकार्थः। तत्र चत्वारि प्रकरणानि। आदौ कथाप्रकरणम्, ततो हेत्वाभासप्रकरणम्, छलप्रकरणम्, दोषलक्षणप्रकरणं चेति। अत्र च कथासामान्यस्यायं विशेषो वादादिः। तथा च त्रिभिः सूत्रैरेकं प्रकरणम्,

---

[५४९] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३५

[५५०] न्या.सू-१/२/१

अन्यथैकसूत्रस्य प्रकरणत्वाभावादसङ्गतिः स्यादित्याशये नोक्तं भाष्यकृता - 'तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डा च' '[५५१] इति ।

## ।।वादः।।

### ❖ प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः[५५२]

महर्षिणा गौतमेन प्रथमाह्निकस्यान्तिमसूत्रेण न्यायस्योत्तराङ्गस्य निर्णयपदार्थस्य लक्षणमुक्त्वा क्रमानुसारं द्वितीयाह्निकस्य प्रथमसूत्रेण वादपदार्थस्य लक्षणं कृतम्। ततश्च यथाक्रमं सूत्रद्वयेन जल्पपदार्थस्य तथा वितण्डापदार्थस्य लक्षणमालिखितम्।

सूत्रेणैकेन प्रकरणं न सम्भवति इत्यतः त्रिभिः सूत्रैः कथाप्रकरणमिति बोधयुतमाह भाष्यकारः- "तिस्रः कथा भवन्ति वादो जल्पो वितण्डा चेति।"[५५३] इति।

किञ्च, वृहत्कथादीनामपि कथात्वे 'कथाः त्रिविधाः' इति वक्तुं न शक्यते। अतः वार्त्तिककारमते 'कथाः त्रिविधाः' इति नियमोऽत्र भाष्यकारस्य न विवक्षितार्थः। अत्र तु विचारवस्तुनियमः एव विवक्षितः। तदुक्तं वार्त्तिककारेण- " नायं कथानियमः। किं तर्हि ? विचारवस्तुनियमः, यद्वस्तु विचार्यते तत् त्रेधा विचार्यते। तत्र विचारः- वादो जल्पो वितण्डेति।"[५५४] इति। उक्तञ्च तात्पर्यकारेण-

---

[५५१] न्या.सू.वृ.न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३५-३४२

[५५२] न्या.सू.-१/२/१

[५५३] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३५

[५५४] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३५

"नायं कथामात्रनियमो येन बृहत्कथादीनामकथात्वं स्यात्, अपि तु यन्नानाप्रवक्तृके विचारे वसति तद्विचारवस्तु, विचार(वस्तु)विषया वाक्यसंदृब्धिः कथेति यावत्।"[555] इति। अत्रायमाशयः- कथायाः त्रैविध्यत्वे बृहत्कथादिभेदे कथायाः बहुत्वे किं त्रैविध्यत्वं सङ्गतं न वा ? अत्रोत्तरे उच्यते अत्र कथा नाम विचारवस्तु इति बुध्यते। अतः विचारविषयवस्तुरूपकथाः त्रिविधाः इति वक्तुमलम्। नात्र कापि अनुपपत्तिः।

इदानीं कथायाः स्वरूपविषये प्रश्नः स्यात् किं तर्हि कथायाः सामान्यलक्षणम् ? कथायाः स्वरूपविषये तथा सामान्यलक्षणविषये तु भाष्यकारेण किमपि न चर्चितम् किन्तु वृत्तिकारेण तु कथायाः स्वरूपप्रसङ्गे कथायाः सामान्यलक्षणमपि प्रदत्तम्। तदुक्तं तेन- "तत्र तत्त्वनिर्णयविजया-न्यतरस्वरूपयोग्यन्यायानुगतवचनसन्दर्भः कथा।"[556] इति। अर्थात् तत्त्वनिर्णयः विजयः- एतयोः अन्यतरं प्रति स्वरूपयोग्यन्यायस्य अनुगतवाक्यसन्दर्भः एव कथा इति विज्ञेयम्। ततश्च वृत्तिकारेण कथायाः अधिकारिणः के भविष्यन्तीति विषये चर्चितम्। कथायाः अधिकारिविषये वृत्तिकारेण पञ्चधा वर्णितम्। तथाहि **प्रथमतः-** अवश्यमेव वादि-प्रतिवादिनोः तत्त्वनिर्णये विजये वा इच्छा स्यात् अर्थात् तत्त्वनिर्णयविजयान्यतराभिलाषिणः स्युः। **द्वितीयतः-** यद्विषयः पदार्थो वा सर्वजनपरिगृहीतः तस्यापलापः वादी प्रतिवादी वा कोऽपि न कुर्यात् अर्थात सर्वजनसिद्धानुभवानपलापिनः स्युः। **तृतीयतः-** श्रवणादिपटवः भवेयुः अर्थात् वादी प्रतिवादी वा श्रवणादौ पटुः स्यात्। **चतुर्थतः-** अकलहकारिणः स्युः अर्थात् वादी प्रतिवादी वा कलहकारी न स्यात्। यद्यपि विचारव्यवस्था सम्पूर्णतया

---

[555] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३३५

[556] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३४३

कलहमुक्तो न भवति तथापि निर्युक्तिककलहस्य विरहः एवात्र ग्राह्यः। **पञ्चमतः-** कथायाः उपायभूतव्यापारविषये कण्टकादेः उद्धारविषये समर्थः स्यात् वादी प्रतिवादी वा। अन्यथा तु कथायाः न्यायानुगतवचनसन्दर्भत्वमेव न स्यात्। अर्थात् वादिनः प्रतिवादिनो वा कथौपयिकव्यापारसमर्थाः भवेयुरिति ध्येयम्। तदुक्तं वृत्तिकारेण- "कथाधिकारिणस्तु तत्त्वनिर्णयविजयान्यतराभिलाषिणः सर्वजन-सिद्धानुभवान-पलापिनः श्रवणादिपटवोऽकलहकारिणः कथौपयिकव्यापारसमर्था इति।"[५५७] इति।

भाष्यकारेण तु कथायाः अधिकारिणः विषये तु किमपि न चर्चितम्। किन्तु भाष्यकारेण वादपदार्थविषये अधिकचर्चा कृता। यत्र वृत्तिकारः वादलक्षणपरिष्करणे न प्रयत्नशीलः प्रतिभाति।

तथाहि भाष्यकारेण वादलक्षणसूत्रस्थितप्रत्येकपदस्य तात्पर्यं व्याख्यापितम्। अस्य प्रत्येकपदग्रहणतात्पर्यस्य व्याख्या तु आचार्यफणिभूषणतर्कवागीशमहोदयस्य बङ्गीयन्यायदर्शनग्रन्थस्य प्रथमखण्डस्य ३७०-३७६ पृष्ठाः द्रष्टव्याः।

---

[५५७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३४४

## ।।जल्पः।।

### ❖ यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः[५५८]

महर्षिणा गौतमेन वादपदार्थस्यानन्तरं जल्पपदार्थस्योद्दिष्टत्वात् प्रस्तुतसूत्रेण जल्पलक्षणं प्रदत्तम्। पूर्वोल्लिखितवैशिष्ट्येषु यथायथोपपन्नः अर्थात् प्रमाणतर्कसाधनोपालम्भेन पक्षप्रतिपक्षपरिग्रहेण छलजातिनिग्रहस्थानैश्च यत्र साधनोपालम्भः भवति, तदेव जल्पः इत्यभिधीयते।

प्रस्तुतसूत्रस्यास्य व्याख्यानवेलायां भाष्यवृत्त्योः वैलक्षण्यं दरीदृश्यते। तथाहि भाष्यकारेण सूत्रस्यास्य व्याख्यायां 'यथोक्तोपपन्नः' इति सूत्रस्थपदेन कस्य ग्रहणं भवेत् तथा एकं प्रश्नमुत्थाय तत्समाधानरूपेण उत्तरं प्रदत्तम्। किन्तु वृत्तिकारेण 'यथोक्तोपपन्नः' इति पदस्यापि व्याकरणगतव्याख्या कृता ततश्च तत्पदेन कस्य कस्य परामर्शः इत्यपि प्रतिपादितम्। प्रस्तुतपदस्य व्याख्यायां तु भाष्यवृत्त्योः वैलक्षण्यमपि दृश्यते। किञ्च, वृत्तिकारेण अतिव्याप्तिदोषः प्रदर्शितः, ततश्च जल्पनामकविचारस्य क्रमविषयेऽपि आलोचना कृता।

तथाहि भाष्यकारेण 'यथोक्तोपपन्नः' इति पदं व्याख्यातुकामेन पूर्वसूत्रात् 'प्रमाणतर्कसाधनोपालम्भः', 'सिद्धान्ताविरुद्धः', 'पञ्चावयवोपपन्नः', 'पक्षप्रतिपक्षपरिग्रहः' इति पदचतुष्टयमुद्धृतम्। तदुक्तं भाष्यकारेण- "यथोक्तोपपन्नः इति , प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः

---

[५५८] न्या.सू.-१/२/२

पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः।"[५५९] इति। अर्थात् पूर्वसूत्रे वादलक्षणे यद्यत् विशेषणमुक्तं तत्तत् जल्पलक्षणेऽपि विशेषणविशिष्टम् इत्येव प्रस्तुतसूत्रे 'यथोक्तोपपन्नः' इति पदेन बोद्धव्यमिति भाष्यकारः। किन्तु वृत्तिकारस्य तु भिन्नाशयः परिलक्ष्यते। वृत्तिकारनये 'यथोक्तोपपन्नः' इति पदं 'यथोक्तेषु उपपन्नम् यथोक्तोपपन्नम्' इति कर्मधारयसमासनिष्पन्नम्, ततश्च 'तेन उपपन्नम्' इति विग्रहे तृतीयातत्पुरुषसमासे 'यथोक्तोपपन्नम्' इति पदं लभ्यते। अत एव मध्यस्थितप्रथमस्य 'उपपन्नः' इति पदस्य लोपो भवति। एवं मध्यपदलोपिकर्मधारयसमासेन उक्तपदं निष्पन्नं भवति। अयमेव समासः उत्तरपदलोपी कर्मधारयसमासः शाकपार्थिवादिवत्समासो वा इत्युच्यते। एतेन बुध्यते वृत्तिकारमते पूर्वसूत्रे वादस्य विशेषणरूपेण यद्यत् पदं कथितम्, तेषु यद्यत्पदं योग्यं तदेव विशेषणविशिष्टो जल्पः। अत एव पूर्वसूत्रे उल्लिखितेषु वैशिष्ट्येषु जल्पस्य विशेषणरूपेण योग्यपदं हि 'प्रमाणतर्कसाधनोपालम्भः' इति, 'पक्षप्रतिपक्षपरिग्रहः' इति च। अर्थात् वादः इव जल्पेऽपि पक्षप्रतिपक्षयोः परिग्रहः विद्यते तथा जल्पे प्रमाणतर्काभ्यां साधनोपालम्भः भवति। किन्तु 'सिद्धान्ताविरुद्धः', 'पञ्चावयवोपपन्नः' चेति वैशिष्ट्यं जल्पे अविद्यमानत्वात्, तत् केवलमात्रं वादस्यैव वैशिष्ट्यत्वात् तत्तत्पदं योग्यताभावात् जल्पलक्षणसूत्रं परामृष्टं न भवति। अत एव अस्मिन्नेव आशये वृत्तिकारेण निगदितं - "तथा च, प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रहः इत्यस्य योग्यतया परामर्शः"[५६०] इति। अपि च, यदि अन्यपदानामपि अत्र परामर्शः स्यात् तदा 'सिद्धान्ताविरुद्धः' इति 'पञ्चावयवोपपन्नः' इति च पदाभ्यां यद्विशेषविशेषनिग्रहस्थानं सूचितं , तदेव

[५५९] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३५६

[५६०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३५७

केवलमात्रं जल्पेऽपि प्रयुक्तं स्यात्, अन्यनिग्रहस्थानं न। तथा च, ताभ्यां पदाभ्यां वादस्यासाधारणवैशिष्ट्यं कीर्तितत्वात् तद्वैशिष्ट्यं यदि जल्पपदार्थस्यापि स्यात् तदा तु तज्जल्पपदार्थः वादस्यैव विशेषरूपेण प्रतीतः स्यात्। अर्थात् एवं प्रतीतिः स्यात् यत् पूर्वं वादसामान्यस्य लक्षणं कीर्तितम् अधुना वादविशेषस्य लक्षणं कीर्तितम्। किन्तु वस्तुस्थितिस्तु भिन्नः एव। अस्मिन्नेव तात्पर्ये वृत्तिकारेण निगदितम्- "अन्यथा जल्पस्य वादविशेषत्वापत्तिः।"[५६१] इति।

किञ्च, जल्पलक्षणे परामृष्टयोः प्रमाणतर्कपदयोः यथाश्रुतार्थः न गृहीतः वृत्तिकारेण। वृत्तिकारनये प्रमाणं तर्कश्च तद्रूपेण ज्ञातः इति। अर्थात् प्रमाणमपि प्रमाशक्तिविशिष्टपुरुषः प्रमाणरूपेण जानाति तथा प्रमाणाभासमपि प्रमाशक्तिरहितपुरुषः प्रमाणरूपेण ज्ञातुं शक्नोति। एवं तर्कपदार्थेऽपि प्रयोज्यम्। अतः प्रमाणरूपेण तथा तर्करूपेण ज्ञातः इत्यर्थः गृह्यते चेत् प्रमाणं प्रमाणाभासश्च तथा तर्कः तर्काभासश्च इत्येवं सर्वस्य ग्रहणं भवति। अत एव जल्पपदार्थे प्रमाणं, प्रमाणाभासः, तर्कः, तर्काभासश्च इति सर्वेषामेव प्रयोगो भवति इत्यर्थः प्राप्यते। किन्तु यः प्रमाणाभासस्य तर्काभासस्य च प्रयोगं कुरुते स वादी प्रतिवादी वा पुरुषः जयेच्छावशादेव स्वेच्छया प्रयोगं कुरुते। अर्थात् स एष प्रमाणाभासः प्रमाणं न इति बाधज्ञानसत्त्वादपि इच्छावशादेव 'प्रमाणम्' इत्यभिमानतया तस्य प्रयोगं करोति। अतोऽत्र एतत्प्रमाणज्ञानं तर्कज्ञानं वा वस्तुतः आहार्यात्मकज्ञानमेव। बाधकालीनेच्छाप्रयोज्यं ज्ञानम् आहार्यज्ञानम्। अत एव वृत्तिकारेण अस्मिन्

[५६१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३५७

तात्पर्ये निगदितं- "प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्याम्, न तु ज्ञानेऽनाहार्यत्वं विवक्षितम् आरोपितप्रमाणभावेनापि जल्पस्य निर्वाहात्।"[५६२] इति।

ततश्च वृत्तिकारेण एकाशङ्का उत्थापिता यत् प्रमाणतर्काभ्यां साधनमुपालम्भश्च सम्भवतीति दृष्टं किन्तु छलादिभिस्तु उपालम्भ एव भवति साधनं तु न सम्भवति, अतः छलादिभिः सह साधनपदार्थस्य कथमन्वयः ? अत्रोच्यते अत्र साधनपदस्यार्थः परकीयानुमानं तथा उपालम्भपदस्यार्थः यत्नः। अतः सूत्रार्थस्तु एवं पर्यवसितं स्यात् – पूर्वोक्तवादलक्षणस्य घटकीभूतविशेषणेषु यदुपयुक्ता तद्विशिष्टा अर्थात् प्रमाणतर्कसाधनोपालम्भविशिष्टा तथा पक्षप्रतिपक्षपरिग्रहविशिष्टा या कथा तत्र छलजातिनिग्रहस्थानैः परकीयानुमानस्य अर्थात् वादि-प्रतिवादिनोः अनुमानस्य यत्नः प्रयोगस्य प्रयासो वा जल्प इति। अतो न कापि अनुपपत्तिरिति ध्येयम्। अत एव उक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ* - "यद्यपि छलादिभिरुपालम्भ एव न तु साधनम्, तथापि साधनस्य परकीयानुमानस्योपालम्भो यत्नेत्यर्थान्न दोषः।"[५६३] इति।

ततश्च वृत्तिकारेण अन्येषां मतमपि उपस्थापितम् अस्यामनुपपत्तौ। तथाहि केनचित् उच्यते- छलादिभिः जल्पस्य परपक्षस्य उपालम्भः खण्डनं वा साक्षात् सम्भवति। किन्तु परोक्षतया स्वपक्षस्य साधनमपि सम्भवति। यतो हि छलादिप्रयोगेण परपक्षे दोषः उद्भासितो भवति चेत् परपक्षः परास्तः भवति तथा परम्परया स्वपक्षस्यापि सिद्धिर्भवति। एवं साधनमेवात्र विवक्षितम्। अत एव कापि अनुपपत्तिरपि न भवति।

---

[५६२] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३५७

[५६३] तत्रैव

भाष्यकारेणापि एषानुपपत्तिरुत्थापिता। तदुक्तं भाष्यकारेण- "न खलु वै छलजातिनिग्रहस्थानैः साधनं कस्यचिदर्थस्य सम्भवति, प्रतिषेधार्थतैवैषां सामान्यलक्षणे विशेषलक्षणे च श्रूयते"[५६४] इत्यादि। किञ्च, ते पदार्थाः परपक्षखण्डनद्वारा एव स्वपक्षस्य साधकाः भवन्ति इत्यपि महर्षेः तात्पर्यमिति न बुध्यते। कारणं हि तथा सति प्रस्तुतसूत्रे 'साधन'-शब्दस्य प्रयोगं न कृत्वा केवलम् 'उपालम्भः' इति शब्दप्रयोगद्वाराऽपि उक्तरूपतात्पर्यं बोद्धुं शक्यते। किन्तु महर्षिणा अस्मिन् सूत्रे 'छलजातिनिग्रहस्थानसाधनोपालम्भः' इति पदे पृथक्तया 'साधनं' तथा 'उपालम्भः' इति उभयस्यैव उल्लेखत्वात् जल्पे उक्तछलादिद्वारा स्वपक्षस्य साधनमपि भवतीति कथितं भवति। किन्तु तद्धि असम्भवम्। अतो भाष्यकारेण तस्य समाधानं पृथक्तया प्रदत्तम्। तथाहि भाष्यनये छलः, जातिः, निग्रहस्थानं च स्वतन्त्रतया कस्यापि स्वपक्षस्य साधको न भवतीति सत्यम्। किन्तु प्रमाणैः यत् स्वपक्षसाधनरूपः तथा परपक्षखण्डनरूपः 'उपालम्भः' भवति, तत्र ते पदार्थाः अङ्गाः अर्थात् सहकारिणः भवन्ति। यतो हि उक्तछलादीनां प्रयोगः भवति चेत् ते परपक्षखण्डनद्वारा स्वपक्षं रक्षन्ति। महर्षिणा स्वयमेव परवर्तिकाले 'तत्त्वाध्यवसाय-संरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखा-वरणवत्'[५६५] इति सूत्रेण प्रमाणजन्यतत्त्वनिश्चयरक्षार्थं छलादियुक्तजल्प-वितण्डाऽपि कर्तव्या इत्युक्तम्। अतः एतेन ज्ञायते यत् महर्षिणा अस्मिन् सूत्रे स्वपक्षसाधने प्रमाणस्य अङ्गरूपेण तथा सहकारिरूपेणैव छलादीनां ग्रहणं कृतम्।

किन्तु वार्त्तिककारादिभिः भाष्यकारस्य उक्तसमाधानं न समर्थितम्। तेषां नये छलजातिनिग्रहस्थानैः कस्यापि पदार्थस्य साधनं खण्डनं वा न

[५६४] न्या.भा,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३५८

[५६५] न्या.सू.-४/२/५०

सम्भवति। यतो हि महर्षिगौतमोक्तछलादिपदार्थः असदुत्तरविशेषः। तद्धि सर्वम् अयुक्तोत्तरम्। अतस्तेषां पदार्थानां कस्यापि पदार्थस्य साधने खण्डने वा सामर्थ्यमेव नास्ति। किञ्च, प्रमाणैः साधने खण्डने वा भाष्यकारोक्तप्रकारे उक्तछलः जातिर्वा यत्प्रमाणस्य अङ्गः सहकारी वा भवति इत्यपि वक्तुं न शक्यते। कारणं यदुत्तरं प्रकृततया उत्तरमेव न, तत् कथमपि तेन प्रकारेण प्रमाणस्य सहकारी भवितुं नार्हति। यतो हि तद्द्वारा कस्यापि स्वपक्षरक्षा न सम्भवति। वाचस्पतिमिश्रेण अत्र दृष्टान्तयोगेन उक्तं - ‘‘न हि सहस्रेणाप्यन्धैः पाटच्चरेभ्यो गृहं रक्ष्यत इत्यर्थः।’’[५६६] इति। अर्थात् सहस्रान्धाः गृहं रक्षितुं न शक्नुवन्ति चौरात्। कारणम् अन्धत्ववशादेव तेषां गृहरक्षणे सामर्थ्यं नास्ति।

किञ्च, वृत्तिकारेण अत्र लक्षणसूत्रे अतिव्याप्तिव्यभिचारः प्रदर्शितः। तन्नये ‘उभयपक्षस्थापनावान्’ इति पदं जल्पलक्षणसूत्रे जल्पपदार्थस्य विशेषणतया संयोजनीयम्, अन्यथा वितण्डायामतिव्याप्तिः स्यात्। यतो हि प्रमाणतर्काभ्यां तथा छलादिभिः साधनोपालम्भः जल्पवत् वितण्डायामपि भवति। तथा जल्प इव वितण्डायामपि सर्वनिग्रहस्थानस्य प्रयोगो भवति। तदुक्तं वृत्तिकारेण- ‘‘उभयपक्षस्थापनावत्त्वेन च विशेषणीयमतो वितण्डायां नातिव्याप्तिः।’’ इति। वितण्डायामतिव्याप्तिविषये भाष्यकारेण किमपि नालोचितमिति एवं प्रस्तुतसूत्रव्याख्याने भाष्यवृत्त्योर्वैलक्षण्यं नयनपथं समायाति। यद्यपि वृत्तिकारेण इतोऽपि अधिकं प्रस्तुतसूत्रं व्याख्यातं तथा वैलक्षण्यं भाष्यवृत्त्योः इत्येव परिलक्ष्यते इति ध्येयम्।

---

[५६६] न्या.वा.तात्.,न्या.द. (सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३५९

# ।।वितण्डा।।

## ❖ स प्रतिपक्षस्थापनाहीनो वितण्डा [५६७]

कथाप्रकरणे वादजल्पयोः लक्षणानन्तरं क्रमप्राप्तायाः अवशिष्टवितण्डानामककथायाः लक्षणं किमिति शिष्यजिज्ञासायां महर्षिगौतमेन वितण्डालक्षणं कृतं प्रस्तुतसूत्रेण। प्रागुक्तजल्पः प्रतिपक्षस्य (द्वितीयपक्षस्य) स्थापनाशून्यः सन् वितण्डा भवतीति सूत्रस्य सामान्यार्थः। सूत्रेऽस्मिन् वैलक्षण्यद्वयं भाष्यगतमेकं वृत्तिगतमपरञ्च परिलक्ष्यते। तदेवाधस्तात् वितन्यते।

तथाहि भाष्यकारेण पूर्वपक्षतया 'स प्रतिपक्षहीनो वितण्डा' इत्येवं सूत्रं कर्तव्यम् इति प्रतिपादितम्। अत्र तात्पर्यं तु वैतण्डिकप्रतिवादी स्वपक्षस्थापनं न करोति इति उच्यते चेत् तस्य स्वपक्षरूपप्रतिपक्ष एव नास्तीति स्वीकार्यम्। यतो हि यस्य स्थापना न भवति, स पक्षो नोच्यते। अतो वितण्डायां प्रतिपक्षरूपपक्ष एव नास्तीति प्रतिपक्षहीनो जल्प एव वितण्डा इति वक्तुमलम् इति। अर्थात् प्रस्तुतसूत्रे 'स्थापना' इति शब्दः व्यर्थः इति चेदत्रोच्यते भाष्यकारेण- ''यद्वै खलु तत् परपक्षप्रतिषेधलक्षणं वाक्यम्, स वैतण्डिकस्य पक्षः, स त्वसौ साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति। तस्माद्यथान्यासमेवास्त्विति।''[५६८] इति। अत्रायमाशयः- अत्र 'वै'-शब्दः पूर्वोक्तपूर्वपक्षस्य अयुक्तताद्योतकः। 'खलु'-शब्दः हेत्वर्थः। अर्थात् उक्तपूर्वपक्षः अयुक्तः, यतः वैतण्डिकस्य परपक्षप्रतिषेधरूपसकलवाक्यमेव तद्वैतण्डिकस्य पक्षः। किञ्च, वैतण्डिकप्रतिवादिनः सकलवाक्यैः प्रतिपन्नो भवति यत् तस्यापि पक्षो विद्यते तथा तत्सकलवाक्यानां यत्प्रतिपाद्यं तदपि तस्य

---

[५६७] न्या.सू.-१/२/३

[५६८] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३६२

पक्षरूपेण सिद्धान्तरूपेण वा स्वीकार्यम्। न चेत् तत्सकलवाक्यानि निष्प्रयोजनानि स्युः तथा प्रतिपाद्यहीनं भवति चेत् तद् वाक्यमेव न भवति। अस्मिन्नेव तात्पर्ये भाष्यकारेणात्र वैतण्डिकस्य तत्सकलवाक्येऽपि 'पक्ष'-शब्दस्य गौणप्रयोगं कृत्वा तत्पक्ष इत्युक्तम्। वस्तुतः वैतण्डिकप्रतिवादिनः स्वसिद्धान्त एव तस्य स्वपक्षः तथा तद्वादिनः प्रतिपक्षः। वैतण्डिकप्रतिवादी प्रतिज्ञातया तस्य स्थापनाम् अकृत्वापि तत्स्थापनायोग्यम्। अतस्तत्पक्षः इत्युच्यते। वाचस्पतिमिश्रेणापि एतत् व्यक्तयता निगदितं- "पक्षत्वन्तु तद्योग्यतामात्रेण, न तु स्थाप्यमानतयेति।"[५६९] इति। अत एव वितण्डा प्रतिपक्षहीनः इति वक्तुं नालम्। अतो महर्षिणा यथा सूत्रं कृतं तदेव वक्तव्यं भाष्यकारस्यापि। एवं भाष्यकारेण 'स्थापना'-शब्दस्य व्यर्थता निवारिता। किन्तु वृत्तिकारेण तु 'स्थापना'-शब्दविषये कापि आलोचना न कृता। विषयेऽस्मिन् वृत्तिकारस्य मौनता दृश्यते।

किञ्च, जल्पलक्षणसूत्रस्य वृत्तेः आलोचनायां दृष्टं यत् प्रमाणतर्काभ्यां साधनोपालम्भः यत्र भवति, छलादिभिः साधनोपालम्भो यत्र भवति, पक्षप्रतिपक्षपरिग्रहो यत्र भवति तथा या कथा उभयपक्षस्थापनावती भवति तदेव जल्पः इत्यभिदीयते। इदानीम् उक्तजल्पपदार्थो यदि प्रस्तुतसूत्रे तच्छब्देन गृह्यते तदा सूत्रे तत्पदस्य विशेषणरूपेण प्रयुक्तः 'प्रतिपक्षस्थापनाहीनः' इति पदार्थेन सह न अन्वेति। यतो हि पूर्वं जल्पपदार्थः उभयस्थापनाविशिष्टः इत्युक्तम्। अत्र च स एव जल्पपदार्थः प्रतिपक्षस्थापनारहितः इति उच्यते। अतो विरोधात् प्रागुक्तजल्पपदार्थः न गृहीतो भवति। किन्तु यदि सूक्ष्मतया विचार्यते चेत् ज्ञायते यत् समग्रजल्पपदार्थस्य प्रत्येकविशेषणार्थेन सह प्रस्तुतसूत्रस्य तत्पदार्थेन सह

---

[५६९] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३६२

विरोधो नास्ति, किन्तु अंशविशेषेण एव विरोधः दृश्यते। अतो विरुद्धविशेषांशपरित्यागेन अविरुद्धजल्पपदार्थस्य एकदेशीभूतविशेषांश एवात्र गृहीतः स्यात्। अर्थात् 'विजिगीषु कथा' इति अंशस्य अस्मिन् सूत्रे ग्रहणं स्यात्। अर्थात् 'छलादिसाधनोपालम्भः' इत्यंशस्य ग्रहणं स्यात्। तदा न विरोधः। अस्मिन्नेव तात्पर्ये विश्वनाथेन निगदितं - "यद्यपि तच्छब्देन जल्पो न परामृष्टुं शक्यते, जल्पस्य स्थापनाद्वयवतः प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात्, तथापि स्थापनाद्वयवत्त्वं विहाय जल्पैकदेशः परामृश्यते।"[५७०] इति। अत एव प्रस्तुतसूत्रे प्रथमोक्त-'तद्'-शब्देन पूर्वसूत्रोक्तजल्पपदार्थस्य उभयपक्षस्थापनावत्त्वरूपविशेषणं परित्यज्य अवशिष्टांशः गृहीतः स्यात्। यतो हि यः उभयपक्षस्थापनाविशिष्टः स प्रतिपक्षस्थापनाहीनः इति वक्तुं न शक्यते।

किञ्च, अस्माभिः मन्यते यत् उक्तकारणादेव महर्षिणा गौतमेन पूर्वसूत्रे केनापि वाक्येन जल्पपदार्थः उभयपक्षस्थापनाविशिष्टः इति नोक्तम्। किन्तु उक्तिकौशलेन प्रस्तुतसूत्रे एव 'प्रतिपक्षस्थापनाहीनः' इति पदमुक्त्वा जल्पपदार्थः उभयपक्षस्थापनाविशिष्टः इति व्यक्तीकृतं तथा 'तद्'-शब्देन पूर्वसूत्रे कथितविशेषणविशिष्टजल्पपदार्थस्यैव ग्रहणं कृतम्। अतो वाचस्पतिमिश्रेणापि उक्त-'तद्'-शब्देन जल्पस्य एकदेशांशग्रहणाय नोक्तम्।

[५७०] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३६३

## ।।हेत्वाभासः।।

### ❖ सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः[५७१]

पूर्वोक्तपदार्थे वादे, जल्पे तथा वितण्डायां हेत्वाभासस्य विशेषज्ञानम् अत्यावश्यकम्। अतो महर्षिणा गौतमेन प्रथमन्यायसूत्रे वितण्डापदार्थस्य अनन्तरं हेत्वाभासपदार्थस्योद्देशः कृतः, क्रमानुसारञ्च प्रस्तुतसूत्रेणानेन हेत्वाभासपदार्थस्य विभागः प्रदर्शितः। ततश्च यथाक्रमं विभक्तस्य पञ्चविधहेत्वाभासस्य लक्षणं विहितम्। किन्तु सामान्यलक्षणम् अज्ञात्वा विशेषलक्षणस्य बोधनं दुष्करमेव। सव्यभिचारः, विरुद्धः, प्रकरणसमः, साध्यसमः, कालातीतश्चेति पञ्चप्रकाराः हेत्वाभासाः इति प्रस्तुतसूत्रार्थात् स्पष्टं प्रतीयते यत् अत्र सूत्रे विभागः कृतः। किन्तु हेत्वाभासस्य लक्षणविषये किमपि स्पष्टं न उल्लिखितम्। किन्तु विभागात् पूर्वं हेत्वाभासस्य सामान्यलक्षणं कर्तव्यम्। अन्यथा तु विशेषवचनात् पूर्वमेव सामान्यलक्षणं कर्तव्यम् इति नियमव्याघातः स्यात्। हेत्वाभासस्य सामान्यलक्षणविषये तु भाष्यकारेण कापि स्पष्टव्याख्या न प्रदत्ता। किन्तु *न्यायसूत्रवृत्ति*कारेण विश्वनाथन्यायपञ्चाननेन हेत्वाभासस्य सामान्यलक्षणं कथमवगच्छेत् इति विषये स्पष्टव्याख्या प्रदत्ता स्वकृत*न्यायसूत्रवृत्तौ*। भाष्यकारेणापि हेत्वाभासस्य स्वरूपनिर्देशः कथञ्चित् कृतः। तथाहि तेनोक्तं *न्यायसूत्रभाष्ये*- "हेतुलक्षणाभावादहेतवो हेतुसामान्यात् हेतुवदाभासमानाः।"[५७२] इति। अर्थात् हेतुलक्षणस्य साध्यव्याप्यत्वस्य अभावात् हेत्वाभासा अहेतवः,

---

[५७१] न्या.सू.-१/२/४

[५७२] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३६३

हेतुसामान्यात् हेतुसादृश्यात्, सादृश्यञ्च हेतुत्वबोधकविभक्त्यन्तपदप्रतिपाद्यत्वं यथा- 'वह्निमान् धूमात्' इत्यत्र धूमपदप्रयोगः तथैव 'धूमवान् वह्नेः' इत्यत्र वह्निपदप्रयोगात् वह्नेर्हेतुत्वं प्रतीयते। वस्तुतस्तु वह्नेर्धूमहेतुत्वं नास्ति– व्यभिचारित्वादिति पञ्चम्यन्तपदप्रतिपाद्यत्वाद् वह्निः हेतुवदाभासते इति हेत्वाभासः। हेतुसामान्याद् हेतुवदाभासमाना हेत्वाभासा हेतुलक्षणाभावात् हेतुलक्षणानाक्रान्तत्वाद् अहेतव इत्यन्वयः। सामान्यलक्षणञ्च यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्त्वं तत्त्वं हेत्वाभासत्वमिति, हेत्वाभासत्वविषयकज्ञान-स्यानुमितिविरोधित्वं च स्पष्टमेव।

हेत्वाभासस्य सामान्यलक्षणविषये वृत्तिकारेण स्पष्टतया निगदितं यत् सूत्रस्थेन 'हेत्वाभासः' इति पदेनैव हेत्वाभासस्य सामान्यलक्षणं सूचितमभवत्। 'हेत्वाभासः' इति शब्दस्य समाख्यासामर्थ्यादेव तल्लक्षणं प्रतिपत्तव्यम्। अत्र समाख्या हि एवं 'हेतुवद् आभासन्ते इति हेत्वाभासाः' इति। अर्थात् कर्तृवाच्ये निष्पन्नहेत्वाभासशब्दस्यार्थस्तावत् यत् पदार्थः हेतुरिव भासितो भवति, तदेव हेत्वाभासः। तदुक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ*- "न चात्र लक्षणं न प्रतीयत इति वाच्यम्, हेत्वाभासशब्दस्य हेतुवदाभासमानार्थकत्वेनैव तत्सूचनात्।"[५७३] इति।

तथाहि हेतुवद् भासमानपदार्थः हेत्वाभासः इति पर्यवसति। अत एव हेत्वाभासः हेतुसदृशः। हेतोः सादृश्यं हेत्वाभासे विद्यमानम्। तत्सादृश्यस्य प्रतियोगिनः हेतोः स्वरूपं न ज्ञातं भवति चेद् हेत्वाभासपदार्थोऽपि न ज्ञातो भवति। अतो हेतुवैशिष्ट्यानि उल्लिखितुं विश्वनाथेन निगदितं - "तथाहि पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नो

[५७३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३६४-३६६

हेतुर्गमकः..."[५७४] इत्यादि। अत्रायमाशयो यत् एवं पञ्चरूपविशिष्टहेतुरेव पक्षे साध्यस्य गमको भवति। एतानि पञ्चरूपाणि हि – पक्षसत्त्वम्, सपक्षसत्त्वम्, विपक्षासत्त्वम्, अबाधितत्वम्, असत्प्रतिपक्षितत्वञ्च। तथाहि हेतोः पक्षे वृत्तित्वं हि पक्षसत्त्वम्। यथा- 'पर्वतो वह्निमान् धूमात्' इति सद्हेतुस्थले धूमहेतोः पर्वतपक्षे वृत्तित्वं हि पक्षसत्त्वम्। सपक्षो नाम निश्चितसाध्यं बुध्यते। अर्थात् यदधिकरणे उक्तानुमानस्य साध्यं निश्चिततया ज्ञातम्, एतादृशाधिकरणं सपक्ष इत्युच्यते। सपक्षे यस्य हेतोः यद् वृत्तित्वं तदेव सपक्षसत्त्वम् इत्युच्यते। यथा - 'वह्निमत् महानसे हेतुधूमस्य वृत्तित्वम्' उक्तहेतोः सपक्षसत्त्वम्। तथा च, निश्चितसाध्याभाववान् विपक्षः। अर्थात् यदधिकरणे साध्याभावः निश्चितः तदधिकरणं विपक्ष इत्युच्यते। तत्र च हेतोः अवृत्तित्वमेव विपक्षासत्त्वम् इत्युच्यते। यथा- उक्तानुमाने धूमहेतुः विपक्षे जलह्रदादौ न तिष्ठति। अत एव धूमहेतोः विपक्षासत्त्ववैशिष्ट्यं वर्तते। तथा च, साध्याभावविशिष्टः पक्षः भवति चेत् तत्र साधनमेव न सम्भवति। पक्षे साध्यस्य वृत्तित्वं न भवति चेत् हेतुर्हि बाधितसाध्यकरूपेण गीतो भवति। किन्तु अत्र स्थले तन्न भवति। अतो भूमहेतुर्हि अबाधितः। किञ्च, यद्हेतुः तुल्यबलविरोधिपरामर्शस्य समकालीनपरामर्शस्य विषयो भवति तत्सत्प्रतिपक्षित इत्युच्यते। किन्तु एवं न भवति चेत् अर्थात् तादृशविरोधिपरामर्शः विद्यमानः न तिष्ठति चेत् तुल्यबलविरोधिपरामर्श-समकालीनपरामर्शविषयत्वमपि हेतोः न तिष्ठति। अत एव तादृशहेतौ असत्प्रतिपक्षितत्वं तिष्ठति। एष पूर्वोक्तपक्षसत्त्वादिवैशिष्ट्ययुक्तहेतुरेव पक्षे साध्यस्य ज्ञापको भवति। तादृशहेतुरेव यथार्थहेतुः। किन्तु हेत्वाभासो हि न

[५७४] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३६६

यथार्थहेतुः। तद्धि हेतुवद् भवति। अत एव हेतुभिन्नत्वे सति अपि हेतोः प्रागुक्तकतिपयवैशिष्ट्ययुक्तत्वात् हेतुसदृशो हि हेत्वाभासः। अत एव हेत्वाभासः हेतुवद् आभासविशिष्टो भवति। अत्र 'हेतुवत्' इति पदे हेतुशब्दानन्तरं यद्वतिप्रत्ययः अभवत्, तस्यार्थो हि भिन्नत्वम्। अत एव हेत्वाभासः हेतुभिन्नो भवति। एतत्तात्पर्यमेव प्रकाशयितुं वृत्तिकारेण निगदितं - "तद्वदाभासत इत्यत्र वत्यर्थः तद्भिन्नत्वम्।"[५७५] इति। किञ्च, कस्मिंश्चित्संस्करणे 'तद्भिन्नत्वम्' इति स्थले 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्' इति लिखितमस्ति। वस्तुतः 'तेन तुल्यं क्रिया चेद्वतिः'[५७६] इति सूत्रे हेतुपदोत्तरविहितवतिप्रत्ययः तुल्यार्थे प्रयुक्तो भवति। तुल्यं नामात्र सदृशो बुध्यते। सादृश्यं नाम 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्' इत्यर्थो बुध्यते। अर्थात् उक्तसादृश्यस्य सम्बन्धिपदार्थद्वयं मिथो भिन्नत्वे सति तयोः भूयः साधारणधर्मः विद्यते। अत्रापि तदर्थ एव प्रकाशितो भवति। हेतुः हेत्वाभासश्च मिथो भिन्न एव। किन्तु हेतोः उक्तपञ्चरूपधर्माः विद्यमानाः सन्त्यपि हेत्वाभासस्य ते सर्वे धर्माः न तिष्ठन्ति। किन्तु हेतोः पञ्चधर्मेषु एकः, द्वौ, त्रयः, चतुर्वा धर्माः तिष्ठन्ति। अत एव कतिपयसाधारणधर्माः उभयस्यैव तिष्ठन्ति। अतो 'हेतुवदाभासन्ते' इति हेत्वाभासस्य व्युत्पत्तिरपि सङ्गता भवति। अत एव वृत्तिकारेण विश्वनाथेन हेत्वाभासस्य लक्षणे भाषितं- "तथा च पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण भासमान इति फलितार्थः।"[५७७] इति। अर्थात् पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण भासमानत्वं हेत्वाभासत्वम्।

[५७५] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३६६

[५७६] न्या.सू.-५/१/१२५

[५७७] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३६७

ततश्च वृत्तिकारेण विविधप्रश्नोत्थापनपुरःसरं तथा उदाहरणसहयोगेन हेत्वाभासलक्षणं स्पष्टतया विवृतम्। अन्तिमे सिद्धान्तः स्यात् हेतोः पञ्चरूपवैशिष्ट्येषु एकैकस्याभावे एकैकः हेत्वाभासो भवति। यथा – विपक्षासत्त्वस्याभावे १.सव्यभिचारः, सपक्षसत्त्वस्याभावे २.विरुद्धः, असत्प्रतिपक्षितत्वस्याभावे ३.प्रकरणसमः, पक्षसत्त्वस्याभावे ४.साध्यसमः, अबाधितत्वस्याभावे ५.कालातीतः हेत्वाभासः भवति। एतेषु हेत्वाभासेषु सव्यभिचारः, विरुद्धः साध्यसमश्च इति त्रिविधहेत्वाभासः अनुमितेः कारणीभूतपरामर्शस्य प्रतिबन्धको भवति तथा बाधितत्वं सत्प्रतिपक्षश्च इति द्विविधहेत्वाभासः साक्षात् अनुमितेः विरोधी भवति। अत एव अनुमितिः तत्कारणञ्च (परामर्शः) एतयोरन्यतरस्य विरोधी भवति हेत्वाभासः इति न्यायसूत्रवृत्तिकारस्याचार्यविश्वनाथस्य फलितहेत्वाभासलक्षणम्। अत एव वृत्तिकारेण भाषितम् - "अनुमितितत्कारणज्ञानान्यतरविरोधित्वं पर्यवस्यति।"[५७८] इति।

हेत्वाभासविभागवर्णने तु कुत्रचित् वैलक्षण्यं न्यायभाष्यवृत्त्योः नयनयोः दिक् पथमायाति। तथाहि सव्यभिचारहेत्वाभासवर्णने भाष्यकारेण सव्यभिचारहेत्वाभासस्य कोऽपि विभागो न कृतः परं वृत्तिकारेण तु सव्यभिचारहेत्वाभासस्य विभागत्रयं दर्शितम्। तथाहि वृत्तिकारनये सव्यभिचारहेत्वाभासः साधारणः, असाधारणः अनुपसंहारी चेति भेदात् त्रिविधः। तत्र साधारणः सव्यभिचारहेत्वाभासः साध्यवदन्यवृत्तिः भवति। अर्थात् विवादाध्यासितहेतुरत्र साध्याधिकरणात् भिन्नाधिकरणे तिष्ठति। अतः

---

[५७८] तदेव, पृ-३७०

उक्तहेतुरयथार्थः, तद्धि साधारणसव्यभिचारः। यथा- शब्दो नित्यः निःस्पर्शत्वात्। अत्र नित्यत्वसाध्याधिकरणात्मादेः भिन्नाधिकरणबुद्ध्यादौ निःस्पर्शत्वहेतोः वृत्तिर्भवति। अत उक्तं वृत्तिकारेण विश्वनाथेन - "स च साधारणोऽसाधारणोऽनुपसंहारी चेति त्रिविधः। साधारणः साध्यवदन्यवृत्तिः, यथा शब्दो नित्यः निःस्पर्शत्वात्।"[५७९] इति।

असाधारणः सव्यभिचारहेत्वाभासः सपक्षविपक्षव्यावृत्तो भवति। अत्र सपक्षः साध्यवत्त्वनिश्चयः। अत्र हेतुः सपक्षे तथा विपक्षे न तिष्ठति। अस्योदाहरणं यथा– शब्दो नित्यः शब्दत्वादिति। तदुक्तं वृत्तिकारेण - "असाधारणः सपक्षविपक्षव्यावृत्तः, सपक्षः साध्यवत्त्वनिश्चयः। यथा– शब्दो नित्यः शब्दत्वादित्यादौ।"[५८०] इति। अनुपसंहारी सव्यभिचारहेत्वाभासः केवलान्वयिधर्मावच्छिन्नपक्षको भवति। अत्रान्वयो नाम तत्सत्त्वे तत्सत्तारूपनियमो बुध्यते। अत्र प्रथमतत्पदेन व्याप्यः तथा द्वितीयतत्पदेन व्यापको बुध्यते। अत एव व्याप्यसत्त्वे व्यापकसत्ता हि अन्वयनियमः। तथा च, व्याप्यधूमादिहेतुः व्यापको हि वह्न्यादिसाध्यः। अत एव 'धूमसत्त्वे वह्निसत्ता'- अत्र साध्यं हि अन्वयी धर्मः। अत्र हेतुधूमसाध्यवह्न्योः यथा अन्वयः सम्भवति तथैव व्यतिरेकनियमोऽपि सम्भवति। अतः साध्यमत्र न केवलान्वयी धर्मः। किन्तु 'सर्वं नित्यं मेयत्वाद्' इत्यादौ सर्वस्य पक्षत्वात् तथा तत्र तत्र च नित्यत्वस्य विद्यमानत्वात् तादृशस्थलो नास्ति यत्र नित्यत्वस्याभावं प्रदर्शयितुं शक्यते। अतः नित्यत्वं केवलान्वयी धर्मः। अत एव एतादृशकेवलान्वयिधर्मावच्छिन्नपक्षो हि 'सर्वम्' इति। अत एव

[५७९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३७६

[५८०] तदेव, पृ-३७६-३७७

केवलान्वयिधर्मावच्छिन्नपक्षः यस्य ( यस्य हेतोः) इति बहुव्रीहिसमासे केवलान्वयिधर्मावच्छिन्नपक्षशब्देन हेतोर्ग्रहणं भवति। एतादृशः हेतुर्हि अनुपसंहारी हेत्वाभासः। तदुक्तं वृत्तिकारेण- "अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः, यथा सर्वं नित्यं मेयत्वादित्यादि।"[५८१] इति।

साध्यसमहेत्वाभासवर्णनेऽपि वृत्तिकारेण विश्वनाथेन विभागः प्रदर्शितः किन्तु भाष्यकारेण अस्य हेत्वाभासस्य कोऽपि विभागो न कृतः। तथाहि वृत्तिकारनये साध्यसमहेत्वाभासो हि आश्रयसिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धिभेदात् त्रिविधः। आश्रयसिद्धिर्हि पक्षे पक्षतावच्छेदकाभावः। अर्थात् पक्षो यदि पक्षतावच्छेदकविशिष्टो न भवति तदा आश्रयसिद्धिहेत्वाभासो भवति। अत्रोदाहरणं यथा - 'काञ्चनमयः पर्वतः वह्निमान् धूमात्' इति। अत्र पक्षो हि काञ्चनमयपर्वतः। पक्षता च काञ्चनमयपर्वतनिष्ठा। पक्षतावच्छेदक-काञ्चनमयत्वविशेषणं पर्वते अप्रसिद्धत्वात् अत्र आश्रयासिद्धिरभूत्। स्वरूपासिद्धहेत्वाभासो हि पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः। अर्थात् पक्षे हेतुतावच्छेदकावच्छिन्नहेतोः अभाव एव स्वरूपासिद्धिः। यथा 'ह्रदो द्रव्यं धूमात्' इत्यादिस्थले हेतुः धूमः। हेतुतावच्छेदकधूमत्वतदवच्छिन्ननिखिलधूमस्यैव ह्रदात्मकपक्षे अभावत्वात् हेतुरत्र स्वरूपासिद्धः। व्याप्यत्वासिद्धहेत्वाभासो हि अव्यभिचरितसामानाधिकरण्यस्याभावः। अस्योदाहरणं तु वृत्तिकारेण न प्रदत्तम्। किन्तु विश्वनाथन्यायपञ्चाननविरचितकारिकावल्यामस्योदाहरणं प्राप्यते। तद्धि - "व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्।"[५८२] इति। अत एवोक्तं वृत्तिकारेण - "अयं चाश्रयासिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धिभेदात् त्रिविधः।

---

[५८१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३७७

[५८२] भा.परि.,का.सं.-७७

आश्रयासिद्धिश्च पक्षे पक्षतावच्छेदकाभावः, यथा काञ्चनमयः पर्वतो वह्निमानित्यादौ। स्वरूपासिद्धिश्च पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः, यथा ह्रदो द्रव्यं धूमादित्यादौ। व्याप्यत्वासिद्धिश्चाव्यभिचरितसामानाधिकरण्यस्याभावः।''[५८३] इति।

एवं हेत्वाभासवर्णने भाष्यवृत्त्योर्वैलक्षण्यं प्रचक्षते। अन्यहेत्वाभासविभागवर्णने तु व्याख्यानभिन्नता दृश्यते। न तत्र तत्र तादृशवैलक्षण्यं किमपि दरीदृश्यते।

## ।।छलम्।।

## ❖ वचनविघातोऽर्थविकल्पोपपत्त्या छलम्[५८४]

महर्षिगौमेन हेत्वाभासप्रकरणस्यानन्तरं पृथक् प्रकरणेन क्रमप्राप्तस्य छलपदार्थस्य लक्षणं कृतम्। वादिनोऽभिमतार्थस्य विरुद्धकल्पनारूपा अर्थात् अर्थान्तरकल्पनारूपा या उपपत्तिः युक्तिविशेषः वा, तया उपपत्त्या तेन युक्तिविशेषेण वा वादिनः उक्तवचनस्य यद्दूषणं तदेव छलमित्यभिधीयते।

छलपदार्थस्य लक्षणविषये उदाहरणविषये तथा प्रस्तुतसूत्रस्य व्याख्याने भाष्यकारस्य कोऽपि स्वरसो न दृश्यते। अर्थात् प्रस्तुतसूत्रमिदं भाष्यकारेण न व्याख्यातं न वा छलपदार्थविषये सामान्यलक्षणं तथा उदाहरणं प्रदत्तम्। किन्तु

[५८३] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च), पृ-३८५-३८६
[५८४] न्या.सू.-१/२/१०

न्यायसूत्रवृत्तिकारेण विश्वनाथन्यायपञ्चाननेन न केवलं सूत्रमिदं व्याख्यातमपि तु छलपदार्थस्य सामान्यलक्षणं तथा तस्योदाहरणमपि प्रदत्तम्। भाष्यकारेण तु छलपदार्थस्य सामान्यलक्षणे न शक्यमुदाहर्तुमिति कृत्वा प्रस्तुतसूत्रमिदं तेन न व्याख्यातं न वा उदाहरणं किमपि प्रदत्तम्। तेन हि विशेषलक्षणे अर्थात् छलपदार्थस्य विभागे उदाहरणं प्रदास्यते तथा विभक्तछलपदार्थस्य लक्षणमपि तेन व्याख्यास्यते इति कृत्वा प्रस्तुतसूत्रस्य व्याख्याने भाष्यकारस्य मौनमेव दृष्टम्। तदुक्तं भाष्यकारेण- "न सामान्यलक्षणे छलं शक्यमुदाहर्तुं, विभागे तूदाहरणानि।"[५८५] इति। अत एव वृत्तिकारदिशा प्रस्तुतसूत्रमिदं व्याख्यायते। तेनैव प्रस्तुतसूत्रस्य छलपदार्थस्य व्याख्याने भाष्यवृत्त्योः वैलक्षण्यं प्रतिपादितं स्यात्।

छलपदार्थस्य लक्षणं किमिति प्रश्नस्योत्तरे उच्यते – सूत्रस्थेन 'छलम्' इत्यंशेन लक्ष्यनिर्देशः कृतः, अवशिष्टैः पदैश्च लक्षणनिर्देशः कृतः। वाक्यार्थबोधं प्रति पदार्थबोधस्य कारणत्वात् प्रत्येकपदस्य अर्थनिरूपणार्थं वृत्तिकारेण निगदितम् - "अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः कल्पोऽर्थान्तरकल्पनेति यावत्, तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वाद्युक्तस्य विघातो दूषणम्, तच्छलमित्यर्थः।"[५८६] इति। 'अर्थविकल्पोपपत्त्या' इति पदम् 'अर्थस्य विकल्पः अर्थविकल्पः' इति षष्ठीसमासतया ततश्च 'अर्थविकल्प एव उपपत्तिः अर्थविकल्पोपपत्तिः' इति कर्मधारयसमासेन ततश्च तृतीयैकवचने 'अर्थविकल्पोपपत्त्या' इति पदं निष्पद्यते। अत्र 'अर्थः' नाम वाद्यभिमतस्यार्थः

---

[५८५] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३९१

[५८६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३९२

बोधितः। तथा 'विकल्पः' इति पदं 'विरुद्धः कल्पः' इति प्रादितत्पुरुषसमासेन निष्पन्नम्। अत्र कल्पपदस्यार्थः कल्पना। अत एव विरुद्धकल्पना एव विकल्पः। अथ एव वादिनोऽभिमतार्थस्य विरुद्धकल्पना नाम वाद्यभिमतार्थात् भिन्नार्थस्य कल्पना बुध्यते। अत एव तादृशकल्पनारूपा या उपपत्तिः विशेषयुक्तिर्वा, तदेव अर्थविकल्पोपपत्तिरिति। तया च यद्वादिवचनस्य दूषणाभिहितं भवति, तदेव छलमिति ध्येयम्। अतः वक्तुः तात्पर्यविषयीभूतो न भवति एतादृशार्थस्य कल्पनया दूषणाभिधानमेव छलम्। अत एव वृत्तिकारेण अस्मिन्नेव तात्पर्ये निगदितं - "वक्तृतात्पर्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितम्।"[५८७] इति। तात्पर्यकारस्यापि समनैवाभियुक्तिः - "यथा वक्तुरभिमतोऽर्थः ततो विरुद्धः अर्थः तस्य विकल्पः कल्पना, सैवोपपत्तिः तया।"[५८८] इत्यादि।

एवञ्च, वक्तृतात्पर्यस्य अविषयीभूतो योऽर्थः तस्य कल्पनया वादिनस्य यद् दूषणाभिधानं तदेव छलमिति फलति। किञ्च, वक्तृतात्पर्याविषयत्वं पुनः त्रिविधमिति प्रतिपादितं वृत्तिकारेण। तद्धि विशेष्यनिष्ठं विशेषणनिष्ठं संसर्गनिष्ठञ्चेति। किञ्च, प्रत्येकविभागस्योदाहरणमपि प्रदत्तं विश्वनाथेन न्यायसूत्रवृत्तिकारेण। तदुक्तं तेन - "तात्पर्यविषयत्वं विशेष्ये विशेषणे संसर्गे च। यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसंख्यापरत्वकल्पनयाऽसिद्ध्य-भिधानम्। सर्वं प्रमेयं धर्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्ध्यभिधानम्। वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचारा-भिधानम्।"[५८९] इति।

---

[५८७] तत्रैव

[५८८] न्या.वा.तात्.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३९१

[५८९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३९२

तथाहि विशेष्यनिष्ठोक्ततात्पर्याविषयत्वस्योदाहरणं हि 'नेपालादागतोऽयं नवकम्बलवत्त्वात्' इति। अत्र वादिनोऽभिप्रायस्तावत् नेपालः इति शीतप्रधानदेशात् अयं पुरुषः आगतः। यतो हि अयं पुरुषः नवकम्बलविशिष्टः इति। वादिनः तात्पर्यं तु नूतनार्थपरनवकम्बलविशिष्टपुरुषविशेष्ये। किन्तु प्रतिवादी 'नव कम्बलाः अस्य' इति विग्रहे नवसंख्यातात्पर्यपरकनवशब्दस्य ग्रहणं कृत्वा वदति 'एकोऽस्य कम्बलः कुतो नव कम्बलाः' इति। अत्र प्रतिवादी सामान्यनवशब्दं वादिनः अभिप्रेतनूतनार्थस्य विरुद्धं नवसंख्याविशिष्टम् अर्थं गृहीत्वा पुरुषपक्षे हेतोः असिद्ध्यभिधानं करोति। वादिवचनस्थितहेतोः एतद्दूषणाभिधानमेव छलम्।

एवमेव वक्तृतात्पर्याविषयत्वं यद् विशेषणनिष्ठं तदेव प्रदर्शयता वृत्तिकारेणोक्तं ' सर्वं प्रमेयं धर्मत्वात्' इति। अत्र वादिना पदार्थमात्रस्य यो भावः, तदेव धर्मपदेन बोधितम्। अत एव धर्मत्वं नाम धर्ममात्रनिष्ठम्। अत्र विशेषणवादिनोऽभिप्रायस्तु 'सर्वं प्रमेयं यतो हि सर्वमेव धर्मत्वविशिष्टम्' इति। किन्तु अत्र प्रतिवादिना धर्मो नाम परिभाषितः यत्पुण्यरूपः अदृष्टविशेषः, तदेव गृहीत्वा दूषणाभिधानं क्रियते यत् सर्वम् अर्थात् सर्वधर्मः अर्थात् संयोगविभागादौ धर्मत्वम् अर्थात् पुण्यत्वं न तिष्ठति। अर्थात् पुण्यरूपधर्मे यद्यपि पुण्यत्वरूपधर्मः तिष्ठति तथापि संयोगविभागाद्यन्यधर्मे पुण्यत्वरूपधर्मत्वविशेषणं न तिष्ठति। अत एव पक्षस्य एकदेशवृत्तित्वात् पुण्यत्वार्थकधर्मत्वहेतुर्हि भागासिद्धः। अतो वादिवचनं दुष्टम्। किन्तु वादितात्पर्यस्य अविषयो हि पुण्यत्वरूपविशेषणम्। अत एव वक्तृतात्पर्याविषयत्वं पुण्यत्वं विशेषणनिष्ठम्।

उक्ततात्पर्याविषयत्वं यत् संसर्गनिष्ठमपि भवतीति प्रतिपादयन्नाह वृत्तिकारः - 'वह्निमान् धूमात्- इत्यत्र धूमावयवे व्यभिचाराभिधानम्' इति। अर्थात् वादी पर्वतादिपक्षे धूमहेतुना वह्निरूपसाध्यस्यानुमानं करोति। साध्यः वह्निश्च पर्वतादिपक्षे यत्सम्बन्धे तिष्ठति तत्साध्यतावच्छेदकसम्बन्धो हि संयोगः। एवमेव धूमरूपहेतुः पक्षे पर्वतादौ यत्सम्बन्धेन विद्यमानः तद्हेतुतावच्छेदकसम्बन्धोऽपि संयोगः। 'साध्यवदन्यावृत्तित्वं हि व्याप्तिः'। अर्थात् साध्याधिकरणात् भिन्नाधिकरणे हेतोः अवृत्तित्वमेव हेतोः व्याप्तिः। तथा च, नियमो हि यत्सम्बन्धेन हेतुता तत्सम्बन्धेनैव साध्यवदन्यत्र हेतोः अवृत्तित्वं ग्राह्यम्। अर्थात् साध्याधिकरणात् भिन्नाधिकरणे हेतोः अवृत्तित्वं हेतुतावच्छेदकसम्बन्धेनैव ग्राह्यम्। अत एव 'पर्वतो वह्निमान् धूमात्' इत्यत्र हेतुतावच्छेदकसम्बन्धः संयोगः। तथा साध्याधिकरणम् अर्थात् वह्निविशिष्टं यन्महानसम् इत्यादि तद्भिन्नाधिकरणं यज्जलह्रदादि तत्र धूमरूपहेतुर्हि संयोगसम्बन्धेनैव अविद्यमानः (अवृत्तित्वं) तिष्ठति। अत एवात्र हेतुः व्याप्तिविशिष्टत्वात् अनुमानमिदं शुद्धमेव। किन्तु प्रतिवादिना उच्यते- साध्यस्याधिकरणम् अर्थात् वह्न्यभावविशिष्टधूमावयवः, तत्र हेतुः धूमस्तु समवायसम्बन्धेन तिष्ठति एव। यतो हि अवयवी तस्यावयवे समवायसम्बन्धेन वृत्तित्वविशिष्टो भवति। अत एव हेतोः साध्यवदन्यावृत्तित्वाभावात् हेतुरयं दुष्टः। अत एवात्र व्यभिचाराभिधानं भवति। किन्तु अत्र वादिनोऽभिप्रायो हि यत्, साध्यवदन्यवृत्तित्वं हेतुतावच्छेदकसम्बन्धेनैव अर्थात् उक्तस्थले संयोगसम्बन्धेनैव ग्राह्यत्वात् धूमावयवे धूमहेतुः समवायसम्बन्धे वृत्तित्वविशिष्टत्वेऽपि हेतुतावच्छेदकसंयोगसम्बन्धे अवृत्तित्वविशिष्ट एव। अतो न व्यभिचारः। एतदेव प्रागुक्तनियमसिद्धम्। अत एव वादिनः अभिप्रायः तात्पर्यस्य वा विषयो हि

हेतुतावच्छेदकसम्बन्धः संयोगः। किन्तु प्रतिवादिनः अभिप्रेतविषयः समवायः। अत एव उक्तसमवायसम्बन्धः वादिनः (वक्तुः) तात्पर्यस्य विषयो न। अत एव वक्तृतात्पर्याविषयत्वं समवायसम्बन्धनिष्ठम् अर्थात् संसर्गनिष्ठम् इति विज्ञेयम्।

## ।।जातिः।।

## ❖ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः[५९०]

छलपदार्थस्य लक्षणानन्तरं क्रमप्राप्तस्य जातिपदार्थस्य लक्षणकर्तव्यत्वात् प्रस्तुतसूत्रेण महर्षिणा तदेव प्रतिपादितम्।

भाष्यकारेण अनन्तरं 'जायमानोऽर्थो जातिरिति' इति वाक्येन उक्तजातिशब्दस्य व्युत्पत्तिर्दर्शिता। अर्थात् 'जायते' इत्येवं व्युत्पत्त्यनुसारं जन्-धातोः कर्तृवाच्ये क्तिच्-प्रत्यये उक्तजातिशब्दः सिद्धो भवति। एतेन ज्ञायते यज्जायते तदेव जातिः। किन्तु एतज्जातिशब्दस्य व्युत्पत्तिमात्रम्। वस्तुतः उक्तजातिशब्दः पारिभाषिकः। जल्पे तथा वितण्डायां समयविशेषे पराजयभयात् प्रतिवादिनः यदसदुत्तरं जायते, तदेव जातिः। तद्धि प्रतिवादिनः प्रत्यवस्थानम्। 'प्रतीपमवस्थानं प्रत्यवस्थानम्' इति व्युत्पत्त्यनुसारं वादिनः प्रतिकूलतया प्रतिवादिनः अवस्थानमेव प्रत्यवस्थानशब्दस्यार्थः। भाष्यकारेण तस्य फलितार्थः उक्तः - 'उपालम्भः प्रतिषेधः' इति। अर्थात् वादिनं पराजेतुं प्रतिवादिनः यद् उपालम्भः प्रतिषेधः तदेव प्रस्तुतसूत्रे 'प्रत्यवस्थानम्' इति शब्दस्यार्थः।

[५९०] न्या.सू.-१/२/१८

'प्रत्यवस्थानं जातिः' इति सूत्रगात्रत्वे तु छलादिसदुत्तरेषु अपि अतिव्याप्तिः स्यात्। अत एव महर्षिणा 'साधर्म्यवैधर्म्याभ्याम्' इत्युक्तम्। छलादिप्रतिषेधस्तु केवलं साधर्म्यवैधर्म्याभ्यां न भवति।

भाष्यनये प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते स जाति। किञ्च, स च प्रसङ्गः साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालम्भः प्रतिषेध इति। किन्तु वृत्तिकारनये- ''साधर्म्यवैधर्म्याभ्यामिति सावधारणो निर्देशः, तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः।''[५९१] इति। अस्य तात्पर्यं व्याख्यायता वृत्तिकारेण निगदितं - ''तेन च सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितम्। तथा च, छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितम्।''[५९२] इति।

एवं प्रतीयते यत् भाष्यकारस्य जातिव्याख्या तथा स्पष्टतया न प्रतिभाति, किन्तु वृत्तिकारेण स्पष्टतया जातिलक्षणं व्याख्यापितम्। उभयव्याख्याने तु तथा वैलक्षण्यं न दृश्यते। किञ्च, जातेः चतुर्विंशतिप्रकारत्वात् जातेः सामान्योदाहरणं न सम्भवति इति कृत्वा भाष्ये तथा वृत्तौ जातेः किमपि उदाहरणं न परिलक्ष्यते।

---

[५९१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४०२

[५९२] तदेव, पृ-४०३

# ।।निग्रहस्थानम्।।

## ❖ विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्[५९३]

प्रथमन्यायसूत्रे उद्दिष्टप्रमाणादिषोडशपदार्थेषु शेषोक्तपदार्थस्य नाम निग्रहस्थानम्। महर्षिणा गौतमेन प्रस्तुतसूत्रेणानेन निग्रहस्थाननामक-चरमपदार्थस्य लक्षणं कृतम्। पूर्वसूत्रवत् अस्मिन् सूत्रेऽपि व्याख्यानतः निग्रहस्थानपदार्थस्य सामान्यलक्षणमवगच्छेत्। विप्रतिपत्तिः विपरीतं ज्ञानं यथा अहेतौ हेतुज्ञानम्, अप्रतिपत्तिः अज्ञताविशेषः निग्रहस्थानमिति सामान्यतः सूत्रार्थः। वस्तुतः निग्रहस्थानं हि पराजयप्राप्तिरिति ध्येयम्।

प्रस्तुतसूत्रस्यास्य व्याख्याने भाष्यवृत्त्योः तादृशवैलक्षण्यं न प्रचक्षते। कुत्रचित् केवलं व्याख्यानभिन्नता दृश्यते। तथाहि भाष्यकारेण विप्रतिपत्तिशब्दं व्याख्यायता निगदितं - "विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः।"[५९४] इति। अर्थात् विपरीतज्ञानं कुत्सितज्ञानं वा विप्रतिपत्तिः। तात्पर्यकारेण वाचस्पतिमिश्रेण अस्यैवं व्याख्यानं कृतं- "सूक्ष्मविषया प्रतिपत्तिर्विपरीता। स्थूलविषया च कुत्सिता,..."[५९५] इति। अर्थात् भाष्यकारः सूक्ष्मविषये विपरीतनिश्चितरूपभ्रमं विपरीतप्रतिपत्तिं तथा स्थूलविषये तद्रूपभ्रमं कुत्सितप्रतिपत्तिम् उक्त्वा उक्तद्विविधविप्रतिपत्तिमेव प्रस्तुतसूत्रोक्तविप्रतिपत्ति-शब्देन बोधितवान्। वृत्तिकारेण तु अस्य विप्रतिपत्तिशब्दस्य व्याख्याने केवलमुक्तं-

---

[५९३] न्या.सू.-१/२/१९

[५९४] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४०३

[५९५] न्या.वा.तात्.,तत्रैव

"विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः।"[५९६] इति। अप्रतिपत्तिशब्दार्थविषये भाष्यकारेण निगदितम् - "अप्रतिपत्तिस्वारम्भविषये अनारम्भः।"[५९७] इति। वृत्तिकारेण तु 'प्रकृताज्ञानम्' इत्युक्तम्। एवमुभयमतयोः शब्दार्थं विश्लिष्य समानार्थः एव प्रतीयते।

किञ्चात्रैकः प्रश्नः उदेति यत् सूत्रकारेण महर्षिणा गौतमेन 'विप्रतिपत्त्यप्रतिपत्ती' इत्येवं स्वल्पाक्षरसमासपदस्य प्रयोगं न कृत्वा कथं 'विप्रतिपत्तिरप्रतिपत्तिश्च' इत्येव असमासवद्धवाक्यस्य प्रयोगः कृतः? प्रश्नस्यास्य समाधानं भाष्यकारेण तथा वृत्तिकारेणापि प्रदत्तम्। किन्तु वृत्तिकारेण अधिकव्याख्यया स्पष्टतया सर्वं वर्णितम्। तथाहि भाष्यकारेण अस्य समाधानमेवं प्रदत्तम्- " असमासाच्च नैते एव निग्रहस्थाने इति।"[५९८] इति। अत्रायमाशयः- केवलं विप्रतिपत्तिः तथा अप्रतिपत्तिः एव न निग्रहस्थानम्, अन्यरूपनिग्रहस्थानमपि (यथा- पुनरुक्तः तथा अधिनामकः निग्रहस्थानम्) विद्यते इत्येव बोधयितुं सूत्रे न समासः कृतः सूत्रकारेण इति भाष्यकारस्याशयः। वृत्तिकारनये वादिनः प्रतिवादिनो वा आत्मगता या विप्रतिपत्तिः अप्रतिपत्तिश्च वस्तुतः तस्योद्भावनं न कर्तुं शक्यते। केवलं वादिनः प्रतिवादिनो वा वाक्यात् प्रकाशितं भवति। तथा च, विप्रतिपत्तिः तथा अप्रतिपत्तिः इत्येतयोः केवलं निग्रहस्थानत्वे प्रतिज्ञाहान्यादेः निग्रहस्थानानुपपत्तिः स्यात्। अतो विप्रतिपत्तिः अप्रतिपत्तिः इति एतयोः अन्यतरस्य उन्नायकः अनुमापको वा धर्मः, तद्वत्त्वमेव निग्रहस्थानपदार्थस्य लक्षणं स्यात्। वस्तुतः वादिनः प्रतिवादिनो वा विप्रतिपत्तिः

[५९६] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४०४
[५९७] न्या.भा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४०३
[५९८] तत्रैव

अप्रतिपत्तिश्च प्रतिज्ञाहान्यादिभिः सूचितत्वात् प्रतिज्ञाहान्यादिधर्म एव निग्रहस्थानपदार्थः इति। तदुक्तं वृत्तिकारेण विश्वनाथेन- "यद्यप्येतदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुपपत्तिश्च तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोन्नायकधर्मवत्त्वं तदर्थः।"[५९९] इति।

किञ्चात्र ज्ञेयं यत् वादकथायां परारूपनिग्रहः न सम्भवति। अतो जल्पे वितण्डायां चैव निग्रहस्थानस्य उक्तरूपव्याख्या बोध्या। किन्तु वादकथायां यद् निग्रहः भवति, तस्य प्राचीननाम 'खलीकार' इति। न्यायदर्शनस्य प्रथमसूत्रवार्त्तिके उद्द्योतकरेणोक्तं- "कः पुनः शिष्याचार्ययोर्निग्रहः ? विवक्षितार्थाप्रतिपादकत्वम्।"[६००] इति। अर्थात् वादकथायां तत्काले गुरुशिष्ययोः विवक्षितपदार्थप्रतिपादने अक्षमता एव निग्रहः। वाचस्पतिमिश्रेण तदेवोक्तं 'खलीकार' इति। उद्द्योतकरेणापि परं (५/२/१७ इति सूत्रवार्त्तिके) 'खलीकार' इति शब्दप्रयोगः कृतः। तदनुसारं वृत्तिकारविश्वनाथेनापि व्याख्यां कृत्वा निगदितं- "निग्रहस्य खलीकारस्य स्थानं ज्ञापकं निग्रहस्थानम्।"[६०१] इति। भाष्यकारेण तु खलीकारशब्दस्य प्रयोगः न कृतः।

एवं भाष्यवृत्त्योः व्याख्यागतवैलक्षण्यं केवलमत्र दृश्यते। किञ्च, वृत्तिकारेण अन्येषां मते निग्रहस्थानलक्षणं प्रदत्तम्। तदुक्तं तेन- "उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतरमत्वं वा

---

[५९९] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४०४

[६००] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-६२

[६०१] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-४०४

लक्षणमित्यपि वदन्ति।"[६०२] इति। भाष्यकारेण तु अन्येषां मते निग्रहस्थानस्य लक्षणं न प्रदत्तमिति भेदः।

[६०२] तत्रैव

# ।।उपसंहृतिः।।

प्रथमन्यायसूत्रस्य व्याख्यानावसरे 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासछलजातिनिग्रहस्थानानाम्' इति पदे कः समासः स्वीकार्यः, तत्र कारणं किमिति विषये तु भाष्यकारेण तथा न चर्चितं परं वृत्तिकारेण तत्सर्वमुपवर्णितम्। वृत्तिकारमते अत्र 'सर्वपदार्थप्रधानो द्वन्द्वसमासः' स्वीकार्यः। यतो हि द्वन्द्वसमासे प्रत्येकपदस्य प्राधान्यात् मोक्षेऽपि सकलपदार्थानामुपयोगिता विद्यते इति सूचयितमेव द्वन्द्वसमासः स्वीकार्यः। अपि च, द्वन्द्वसमासस्य भेदे विधानात् प्रमाणादिपदार्थानाञ्च पदार्थात्मकत्वेन अभेदत्वे द्वन्द्वसमासोऽत्र कथं स्वीकार्यः ? अस्याः आशङ्कायाः उत्तरं भाष्यकारेण न प्रदत्तम्, किन्तु वृत्तिकारेणास्याः शङ्कायाः समीचीनमुत्तरं प्रदत्तम्। तथाहि तन्नये पदार्थात्मकत्वेन प्रमाणादिपदार्थानामभेदेऽपि पदार्थतावच्छेदकधर्मपुरस्कारेण तत्र भेदसम्भवात् द्वन्द्वसमासः भवत्येव। किञ्च, प्रस्तुतसूत्रस्य व्यासवाक्ये कुत्रापि एकवचनं कुत्रापि च बहुवचनं दृश्यते। अस्य कारणत्वेन भाष्यकारेण तु 'निर्देशे यथावचनं विग्रहः' इत्येव निगदितम्, किन्तु स्पष्टतया तेन किमपि न चर्चितम्। किन्तु वृत्तिकारेण तु 'निर्देशे' इति पदं व्याख्याय निगदितं यत् लक्षणविभागसूत्रे यद्वचनव्यवहारः कृतः अर्थात् महर्षिणा गौतमेन लक्षणविभागसूत्रे यद्वचनस्य व्यवहारः कृतः विग्रहवाक्येऽपि तद्वचनमेव स्यात्। यथा- प्रमाणविभागसूत्रे[६०३] 'प्रमाणानि' इत्येवं बहुवचनान्ततया व्यवहारः कृतः, अतः व्यासवाक्येऽपि बहुवचनं स्यात्। तथा च, प्रमेयपदार्थानां द्वादशसंख्यात्वेऽपि प्रमेयविभागसूत्रे[६०४]

---

[६०३] न्या.सू.-१/१/३

[६०४] न्या.सू.-१/१/९

'प्रमेयम्' इत्येवमेकवचनान्ततया व्यवहारः कृतः, अतः व्यासवाक्येऽपि एकवचनं स्यात्। एवमन्यत्रापि उररीकार्यम्।

अत्र प्रथमन्यायसूत्रे 'प्रमाण'-इति पदस्यादौ उल्लेखे किं कारणमिति विषयेऽपि भाष्यकारेण तथा नालोचितम्। तेन हि केवलं यस्य कस्यापि पदार्थस्य तत्त्वज्ञानं प्रमाणादेव भवतीत्यतः प्रमाणपदस्यादौ उल्लेखः इति वर्णितम्। किन्तु वृत्तिकारेण स्पष्टतया व्याख्याय निगदितं यत् मोक्षलाभः आत्मादिद्वादशप्रमेयपदार्थेभ्यः भवतीति कृत्वा प्रमेयपदार्थस्यादौ उल्लेखः करणीयः स्यात् इति चेन्न, द्वादशप्रमेयपदार्थानां तत्त्वज्ञानं तु प्रमाणादेव भवति। अतः प्रमाणपदस्यादौ उल्लेखः। किञ्च, प्रस्तुतदर्शने मङ्गलाचरणं कृतं न वेति विषये भाष्यकारेण तु किमपि न उल्लिखितम्। किन्तु वृत्तिकारेण अत्र दर्शने मङ्गलाचरणं कृतमिति सयुक्त्या दर्शितम्। तथाहि 'प्रमाणं तु प्राणनिलयः प्राणभृत्प्राणजीवनः, तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः' इति विष्णुसहस्रनामस्तोत्रे प्रमाणशब्दस्योल्लेखात् प्रमाणशब्दस्य माङ्गलिकत्वं तावत् सूचितं भवति। अतो माङ्गलिकप्रमाणशब्दस्यादौ उल्लेखात् तत्र प्रकारान्तरेण मङ्गलाचरणमपि अनुष्ठितं ग्रन्थकारेण महर्षिणा गौतमेन। एवञ्च प्रथमन्यायसूत्रव्याख्यायां भाष्यवृत्त्योः वैलक्षण्यं तु स्पष्टं प्रतीयते। अत्र च वृत्तिकारस्यैव व्याख्या अधिकस्पष्टा।

'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'[६०५] इति प्रत्यक्षलक्षणसूत्रे प्रत्यक्षशब्दस्य का व्युत्पत्तिः को वाऽत्र समासः इति विषयेऽपि भाष्यकारेण किमपि न भणितम्। किन्तु वृत्तिकारेण विश्वनाथेन

[६०५] न्या.सू.-१/१/४

तत्सर्वमालोचितम्। अत्र अव्ययीभावसमासं परित्यज्य कथं प्रादिसमासः स्वीकृतः इति विषयेऽपि वृत्तिकारेण वर्णितम्। तन्मते अव्ययीभावसमासस्वीकारे तत्समासस्य च नित्यतया अव्ययीभावसमासनिष्पन्नपदस्यापि नित्यक्लीबलिङ्गे प्रयोगः स्यात्। तथा सति प्रत्यक्षा बुद्धिः, प्रत्यक्षः घटः इत्यादिव्यवहारोऽपि न निष्पन्नः स्यात्। अपि च, प्रस्तुतसूत्रमिदं प्रत्यक्षप्रमाणस्य लक्षणसूत्रमुत प्रत्यक्षप्रमायाः लक्षणसूत्रमिति विषये तु भाष्यकारेण किमपि न चर्चितम्। किन्तु वृत्तिकारेण तु 'यतः' इति पदाध्याहारेण एतत् प्रत्यक्षप्रमाणस्यैव सूत्रमिति प्रमाणीकृतम्। किञ्च, प्रस्तुतप्रत्यक्षलक्षणसूत्रमिदम् ईश्वरप्रत्यक्षे अव्याप्तित्वात् तत्र का संगतिः स्यात् का वा तत्र व्याख्या स्यादिति विषयेऽपि भाष्यकारेण किमपि न चर्चितम्। किन्तु वृत्तिकारेण तु ईश्वरप्रत्यक्षे अव्याप्तेः समाधिः प्रदत्ता। तन्नये अत्र 'इन्द्रियार्थसन्निकर्षात्' इति पदम् अवधारणयुक्ततया ग्रहणे सति अव्याप्तिः निवारिता स्यात्। किन्तु तथापि अवधारणार्थकः एवकारः कुत्र संयोजनीयः इत्यपि प्रश्नः स्यात्। अस्यापि प्रश्नस्य समाधानं वृत्तिकारेण कृतम्। किन्तु भाष्यकारस्तु अत्र मौनमेव। तथाहि वृत्तिकारनये अवधारणार्थकस्य एवकारस्य १. इन्द्रियार्थयोः एव सन्निकर्षादुत्पन्नम्, २. इन्द्रियार्थसन्निकर्षादुत्पन्नमेव, ३. इन्द्रियार्थसन्निकर्षाद् एव उत्पन्नम् इति त्रिविधेषु अर्थेषु तृतीयोऽर्थस्तावद् ग्रहणीयः। एवं प्रत्यक्षलक्षणव्याख्यानेऽपि न्यायसूत्रभाष्यवृत्त्योः वैलक्षण्यं स्फुटमेव।

'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च'[६०६] इति अनुमानप्रमाणलक्षणसूत्रे 'अथ'-शब्दः प्रत्यक्षप्रमाणानन्तरम् अनुमानप्रमाणमिति

---

[६०६] न्या.सू.-१/१/५

संगतिसूचनार्थं प्रयुक्तः इति विषये अर्थात् 'अथ'-शब्दस्य व्याख्यानविषये भाष्यकारेण किमपि न भणितम्। किन्तु वृत्तिकारेण 'अथ' इति शब्दस्य संगतिः प्रदर्शिता तथा तेन षड्विधसंगतिषु अत्र 'हेतुहेतुमद्भावसंगतिः' अभूदिति युक्तिभिः प्रतिपादितम्। किञ्च, अत्रापि वृत्तिकारेण 'यतः' इति पदाध्याहारेण प्रस्तुतसूत्रमिदम् अनुमानप्रमाणस्यैव लक्षणसूत्रमिति प्रतिपादितम्। किन्तु भाष्यकारेण अत्रापि किमपि न भणितम्। अपि च, वृत्तिकारेण अनेन पथा गौरवदोषः स्यात् इति प्रतिपाद्य 'अनुमानम्' इति पदस्य व्युत्पत्त्याः अपि अनुमानप्रमाणस्य लक्षणं स्यात् इति दर्शितम्। किन्तु विषयेऽस्मिन् भाष्यकारेण किमपि न गदितम्। किञ्च, 'अथवा' इति शब्दप्रयोगद्वारा भाष्यकारेण तथा वृत्तिकारेण उभाभ्यामेव 'पूर्ववत्', 'शेषवत्', 'सामान्यतो दृष्टञ्च' इति अनुमानविभागानां भिन्नव्याख्या प्रदत्ता। भाष्यकारेण तु एतत्त्रिविधानुमानस्य भिन्नव्याख्यां प्रदाय उदाहरणं प्रदत्तम्। किन्तु वृत्तिकारेण तु एतत्त्रिविधानुमानं यथाक्रमं केवलान्वयि, केवलव्यतिरेकि तथा अन्वयव्यतिरेकि इति नाम्ना वर्णनं कृत्वा तेषामुदाहरणानि प्रदर्शितानि। अत एव अत्रापि अनुमानप्रमाणलक्षणसूत्रे भाष्यवृत्त्योः वैलक्षण्यं स्पष्टतया स्फुटमेव।

'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्'[६०७] इति उपमानप्रमाण-लक्षणसूत्रे 'प्रसिद्धसाधर्म्यात्' इति पदं भाष्यकारमते तृतीयातत्पुरुषसमास-निष्पन्नमिति 'प्रज्ञातेन सामान्यात्' इति भाष्यवचनादवगम्यते। वार्त्तिककारेण तु अत्र द्विप्रकारकबहुव्रीहिसमासः स्वीकृतः- १.प्रसिद्धं साधर्म्यं यस्य, २. प्रसिद्धेन साधर्म्यं यस्य इत्येवम्। वृत्तिकारेण तु अत्र षष्ठीसमासः उररीकृतः - 'प्रसिद्धस्य

[६०७] न्या.सू.-१/१/६

पूर्वप्रमितस्य गवादेः साधर्म्यसादृश्यात्' इत्येवम्। आचार्यजयन्तभट्टेन तु 'कर्मधारयसमासः', 'तृतीयातत्पुरुषसमासः', 'बहुव्रीहिसमासश्च' इति त्रिप्रकारकसमासोऽङ्गीकृतः। एवं दृश्यते यद् वृत्तिकारं विहाय अन्येन केनापि षष्ठीसमासः नाङ्गीकृतः। तर्हि विश्वनाथेनात्र षष्ठीसमासः कथमङ्गीकृतः ? अत्रोत्तरं तु शास्त्रं हि गूढतत्त्वप्रकाशकम्। तत्समासोऽपि तत्पदे गूहितोऽस्ति। तदेव आचार्यविश्वनाथेन प्रकाशितम्। अन्येन केनापि न स्वीकृतः षष्ठीसमासः इति कृत्वा विश्वनाथस्य व्याख्या प्रमादग्रस्था इति वक्तुं नालम्। अथवा विश्वनाथेन समासस्यार्थमात्रं प्रकाशितम्, तेन विग्रहवाक्यं न प्रकाशितमित्यपि वक्तुमलम्। किञ्च, वृत्तिकारेण अत्रापि 'यतः' इति पदाध्याहारेण प्रस्तुतसूत्रमिदम् उपमानप्रमाणस्यैव लक्षणसूत्रमिति प्रमाणीकृतम्। अत्रापि पूर्ववत् भाष्यकारेण किमपि न व्याख्यापितम्। अपि च, प्रस्तुतसूत्रमिदं साधर्म्योपमितेः उत वैधर्म्योपमितेः लक्षणसूत्रमिति विषये भाष्यकारेण किमपि न व्याख्यापितं परं वृत्तिकारेण प्रस्तुतसूत्रमिदं साधर्म्योपमितिवत् वैधर्म्योपमितेः लक्षणसूत्रमिति प्रतिपादितम्। एवं दृश्यते यत् उपमानप्रमाणलक्षणसूत्रेऽपि भाष्यवृत्त्योः वैलक्षण्यं स्फुटं भवति।

'आप्तोपदेशः शब्दः'[६०८] इति शब्दलक्षणे 'शब्द'-शब्दः प्रमाविशेषः उत प्रमाणविशेषः इति विषये भाष्यकारेण किमपि न परिष्करणं कृतं किन्तु वृत्तिकारेण 'शब्द इति लक्ष्यकथनम्, तदर्थः प्रमाणशब्दः इति' इति वचनेन 'शब्द'-शब्दः प्रमाणपरः इति प्रतिपादितम्। अपि च, आप्त-शब्दस्य व्याख्यानेऽपि भाष्यवृत्त्योः भिन्नता दृश्यते। किञ्च, शुकादिपक्षिवचनेभ्योऽपि शाब्दबोधत्वे

[६०८] न्या.सू.-१/१/७

तत्राव्याप्तिरिति चेत् वृत्तिकारेणात्र भणितं यद् ईश्वरीयतात्पर्यज्ञानमेव कारणम्। किन्तु भाष्यकारेण किमपि नोक्तं विषयेऽस्मिन्। किञ्च, मौनिश्लोकादौ शाब्दबोधः कथं स्यादिति विषये भाष्यकारेण किमपि न भणितं किन्तु वृत्तिकारेण आप्तपदं व्याख्याय निगदितम् - 'अथवा आप्तः- यथार्थः उपदेशः शाब्दबोधो यस्मात्' इति। एतेन यस्मात् यथार्थशाब्दबोधो जायते तदेव शब्दप्रमाणम् इति प्रतीयते। तथा च, भाष्यकारेण शब्दलक्षणमिदम् अधिकं न व्याख्यापितमिति सत्यं किन्तु तेन शब्दलक्षणस्य व्यापकत्वं प्रदर्शितम्। तथाहि तेन निगदितं यत् प्रस्तुतशब्दलक्षणमिदम् ऋष्यार्यम्लेच्छानां कृतेऽपि प्रयोज्यम् इति। वृत्तिकारेण तु शब्दलक्षणस्य व्यापकत्वे किमपि नोक्तम्। एवं दृश्यते यत् शब्दलक्षणसूत्रेऽपि भाष्यवृत्त्योः वैलक्षण्यं कुत्रचित् कुत्रचित् विद्यते।

'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्'[६०९] इति प्रमेयलक्षणसूत्रे 'तु'-पदस्य किं तात्पर्यमिति विषये तु भाष्यकारेण किमपि न चर्चितम्। किन्तु वृत्तिकारेण 'तु'-पदस्य तात्पर्यविषये निगदितं यत् प्रमेयपदार्थानां प्रमेयत्वं तु अविसंवादितमेव तथापि पुनः तेषां प्रमेयत्वविधानाय पुनरर्थे 'तु'-पदस्य प्रयोगः। प्रमेयपदार्थानां पुनः प्रमेयत्वविधानेन मोक्षलाभे तेषां पदार्थानां तत्त्वज्ञानम् अधिकगुरुत्वपूर्णमिति विस्पष्टं प्रकाशितं भवति। तथा च, प्रस्तुतसूत्रे महर्षिणा गौतमेन 'सुख'-पदस्य ग्रहणं न कृतम्। अत्र कारणविषये तु वृत्तिकारेण विश्वनाथेन किमपि न चर्चितं परं भाष्यकारेण तु तत्कारणं विशदतया उपवर्णितम्। तथाहि भाष्यनये सुखं तथा सुखसाधनं जन्मादि सर्वमेव दुःखरूपेण चिन्तयित्वा वैराग्यं घटते जीवानाम्। एवं

---

[६०९] न्या.सू.-१/१/९

सन्तप्तजीवानामेव तत्त्वज्ञानेन मोक्षलाभो भवति। अतो मुमुक्षुजीवः सुखमपि दुःखरूपेण चिन्तयेत् इति उपदेशदानाय महर्षिणा गौतमेन सुखपदस्य ग्रहणं न कृतं प्रस्तुतसूत्रे। किन्तु प्रस्तुतसूत्रस्य समस्तपदस्य विग्रहवाक्यं किं स्यात् ? विग्रहवाक्यस्थितपदानां वचनं किं स्यात् ? प्रमेयादिपदार्थानां प्रथमादिक्रमेण उल्लेखे किं कारणम् ? कोऽत्र समासः ग्राह्यः इत्यादिविषये तु केवलं वृत्तिकारेण व्याख्या कृता, भाष्यकारेण तु काऽपि व्याख्या न प्रदत्ता। एवं दृश्यते यत् प्रमेयपदार्थवर्णनेऽपि भाष्यवृत्त्योः वैलक्षण्यं परिस्फुटं भवति। कुत्रचिच्च भाष्यकारस्यापि गरीयस्त्वं प्रतीयते।

'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्'[६१०] इति आत्मरूपप्रमेयपदार्थस्य लक्षणे भाष्यकारेण सूत्रस्थितस्य 'लिङ्ग'-पदस्य हेतुः अनुमापको वा इत्यर्थः स्वीकृतः तदनुसारञ्च प्रस्तुतसूत्रमिदं भाष्यकारेण व्याख्यापितम्। किन्तु वृत्तिकारेण विश्वनाथेन तु 'लिङ्ग'-पदस्य तदर्थः न स्वीकृतः अपि तु तेन प्रतिपादितं यत् तदर्थस्वीकारे दोषद्वयमापतेत् इति। अतो विश्वनाथेन एतद्दोषद्वयम् अपनेतुं 'लिङ्ग'-पदस्य लक्षणमित्यर्थः स्वीकृतः। अतोऽत्र भाष्यवृत्त्योः वैलक्षण्यं तु विस्पष्टतया प्रकाशितं भवति।

'पृथिव्यापस्तेजो वायुराकाशमिति भूतानि'[६११] इति सूत्रे पृथिव्यादिपदार्थानां समासेनैव उल्लेखः सम्भवात् पृथिव्यादिपदार्थानां पृथक् पृथक् उल्लेखे किं कारणमिति विषये तु भाष्यकारेण किमपि नोक्तम्। किन्तु वृत्तिकारेण अत्र कारणत्वेन उक्तं यत् पृथिव्यादिपदार्थानां निरपेक्षत्वसूचनार्थमेव

[६१०] न्या.सू.-१/१/१०

[६११] न्या.सू.-१/१/१३

तेषां पदार्थानां पृथक् उल्लेखः। एतेन च अद्वैतवादिनां पृथिव्यादिपञ्चभूतपदार्थाः मिथः सापेक्षाः इति मतमपि निराकृतम्।

'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'[६१२] इति संशयपदार्थलक्षणसूत्रे 'विमर्श'-पदं हि सामान्यलक्षणघटकम्। तथापि भाष्यकारेण अस्य पदस्य पृथक्तया व्याख्या न कृता यत्र तु वृत्तिकारेण पदमिदं पृथक्तया व्याख्याय संशयपदार्थस्य सामान्यलक्षणं तथा विशेषलक्षणम् अपि प्रदत्तम्। किञ्च, संशयपदार्थस्य विभागस्तु भाष्यकारेण तथा वृत्तिकारेण उभाभ्यामेव वर्णितः। किन्तु तयोः व्याख्याने तु भिन्नता दृश्यते। वृत्तिकारेण संशयस्य विभागं तथा तल्लक्षणं व्याख्यायता अपि तेन विभागस्य उदाहरणं न प्रदर्शितम्। किन्तु भाष्यकारेण विभागं तथा तल्लक्षणं वर्णयता अपि उदाहरणमपि प्रदर्शितम्। अतः संशयलक्षणेऽपि भाष्यवृत्त्योः वैलक्षण्यं नयनयोः दिक्पथमायाति।

'यमधिकृत्य प्रवर्तते तत्प्रयोजनम्'[६१३] इति प्रयोजनलक्षणसूत्रे 'अधिकृत्य' इति पदस्य अनेकाः अर्थाः भवन्ति। अतः कोऽर्थोऽत्र ग्राह्यः इति विषये तु भाष्यकारेण किमपि न भणितं किन्तु वृत्तिकारेण विश्वनाथेन तु 'उद्दिश्य' इत्यर्थः ग्रहणीयः इति निगदितं तथा तस्य व्याख्यानमपि प्रदत्तम्। किञ्च, वृत्तिकारेण पृथक्तया प्रयोजनपदार्थस्य लक्षणं प्रदाय तस्य व्याख्यानमपि कृतम्। किन्तु भाष्यकारेण तु प्रयोजनपदार्थस्य पृथक् लक्षणं न प्रदत्तम्, तेन हि केवलं प्रयोजनपदार्थस्य स्वरूपं वर्णितम्। एतद्विहाय वृत्तिकारेण प्रयोजनपदार्थस्य

---

[६१२] न्या.सू.-१/१/२३

[६१३] न्या.सू.-१/१/२४

विभागोऽपि कृतः, ततश्च विभक्तानां व्याख्या कृता। किन्तु भाष्यकारेण अस्य पदार्थस्य कोऽपि विभागः न कृतः। अतः प्रयोजनपदार्थवर्णनेऽपि भाष्यवृत्त्योर्वैलक्षण्यं स्फुटमेव।

कथाप्रकरणे कथायाः सामान्यलक्षणं तथा स्वरूपनिर्देशो वृत्तिकारेण कृतः। किन्तु भाष्यकारेण तु कथायाः सामान्यलक्षणं स्वरूपनिर्देशो वा न कृतः। कथायाः अधिकारिविषयेऽपि वृत्तिकारेण विशदव्याख्या प्रदत्ता, किन्तु भाष्यकारेण अधिकारिविषये कापि चर्चा न कृता। वस्तुतः कथाविषये तादृशं किमपि नालोचितं भाष्यकारेण। अत्रेदं ज्ञेयं यत् भाष्यकारेण 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्ष-परिग्रहो वादः'[६१४] इति वादलक्षणसूत्रं प्रतिपदव्यावृत्त्या व्याख्यापितं तथा प्रकारान्तरेण वादलक्षणमपि व्याख्यापितम्। किन्तु वादपदार्थवर्णने तथा वादलक्षणसूत्रव्याख्यायां वृत्तिकारेण तु मौनमेव अवलम्बितम्।

'यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः'[६१५] इति जल्पलक्षणसूत्रे 'यथोक्तोपपन्नः' इति पदस्य व्याख्यायां भाष्यवृत्त्योः वैलक्षण्यं विस्पष्टतया परिस्फुटमेव। अस्य पदस्य व्याकरणगता व्याख्या वृत्तिकारेण कृता, किन्तु भाष्यकारेण न कृता। भाष्यनये 'यथोक्तोपपन्नः' इति पदेन पूर्वसूत्रात् 'प्रमाणतर्कसाधनोपालम्भः', 'सिद्धान्ताविरुद्धः', 'पञ्चावयवोपपन्नः' 'पक्षप्रतिपक्षपरिग्रहः' चेति पदचतुष्टयमनुवृत्तं भवति। किन्तु वृत्तिकारेण अस्य पदस्य व्याकरणगतव्याख्यां कृत्वा प्रदर्शितं यत् पूर्वसूत्रात् प्रस्तुतपदेन

[६१४] न्या.सू.-१/२/१

[६१५] न्या.सू.-१/२/२

'प्रमाणतर्कसाधनोपालम्भः', 'पक्षप्रतिपक्षपरिग्रहः' चेति पदद्वयम् अनुवृत्तं भवति चेत् समीचीनम् इति। किञ्च, वृत्तिकारेण तत्पदद्वयस्य यथाश्रुतार्थोऽपि न गृहीतः। अपि च, जल्पपदार्थस्य लक्षणे अतिव्याप्तिव्यभिचारः (वितण्डायाम्) प्रदर्शितः वृत्तिकारेण। तद्व्यभिचारनिवारणाय वृत्तिकारेण च 'उभयपक्षस्थापनावान्' इति पदं लक्षणे संयोजनाय निर्देशितम्। एवम् अवशिष्टपदार्थानां वर्णनेऽपि भाष्यवृत्त्योः वैलक्षण्यं दरीदृश्यते।

एवञ्च सर्वं पर्यालोच्य वक्तुं शक्यते यत् प्रमाणं प्रमेयं न्यायाङ्गं कथातदङ्गं च व्याख्यातुकामेन महर्षिवात्स्यायनेन सर्वं तथा न वर्णितं यत् आचार्यविश्वनाथेन उपवृंहितम्। न्यायसूत्राणि व्याख्याय महर्षिवात्स्यायनेन सूत्रावबोधने सारल्यं प्रदर्शितं तथा निपुणतया व्याख्यापि कृता। परन्तु कुत्रचित् स्थलविशेषे तेन सर्वं न वर्णितं तथा सूक्ष्मव्याख्या न कृता, यद्धि विश्वनाथकृतन्यासूत्रवृत्तौ दरीदृश्यते। कुत्रचिच्च भाष्यकारवृत्तिकारयोः मतयोः वैलक्षण्यमपि दृश्यते। यद्वा भवतु, न्यायसूत्राणां व्याख्याने तु महर्षिवात्स्यायसनस्यावदानं तु अनस्वीकार्यमेव। तद्दर्शितमार्गेणैव आचार्यविश्वनाथेनापि स्ववैदुष्येण सुनिपुणतया न्यायसूत्राणां सूक्ष्मातिसूक्ष्मव्याख्या कृता। येन न्यायदर्शनस्य महत्त्वमतीव देदीप्यते। किञ्च, न्यायभाष्यकार आसीत् द्वितीयशतकीयः तृतीयशतकस्य पूर्ववर्ती वा चतुर्थशतकीयो वा। वृत्तिकारस्य जनिकालस्तु १६३४ ख्रीष्टाब्दः १६५४ ख्रीष्टाब्दो वा। अतो भाष्यकारवृत्तिकारयोः कालव्यवधानं तु सुदीर्घम्। अतोऽस्मिन् व्यवधानकाले विभिन्नसम्प्रदायस्य विविधप्रश्नः जिज्ञासा वा उत्थापिता। किञ्च, अस्मिन् काले वार्त्तिककारस्य तथा तात्पर्यकारस्य तथा तात्पर्यपरिशुद्धिकारस्य

वा न्यायसूत्रव्याख्यानमपि उपसृष्टम्। अतो वक्तुं शक्यते यत् विविधसम्प्रदायस्य विविधप्रश्नाः जिज्ञासा वा, तथा वार्त्तिककारादीनां न्यायसूत्रव्याख्यानेनापि विश्वनाथस्य न्यायसूत्रवृत्तिगतव्याख्यानमतिपल्लवितं तथा सुसमृद्धीकृतम्। किञ्चात्र न हि अत्र भाष्यकारस्य काऽपि पाण्डित्यन्यूनता विद्यते। अपि तु, न्यायभाष्यमाधारीकृत्यैव न्यायसूत्रवृत्तिः रचिता इति वक्तुमलमिति शिवम्।

# अनुशीलितग्रन्थसूची

१. अन्नंभट्टः। *तर्कसंग्रहः* (सटीकः *अध्यापना*सहितश्च)। सम्पा. नारायणचन्द्रगोस्वामी। कोलकाता : संस्कृतपुस्तकभाण्डारः, १४१३ (बङ्गाब्दः)।

२. अन्नंभट्टः। *तर्कसंग्रहः* (प्राचीननवटीकासहितः) । सम्पा. सत्कारिशर्मा। वाराणसी : चौखम्भा संस्कृत संस्थान, २०११।

३. अन्नंभट्टः। *तर्कसंग्रहः* । सम्पा. गोविन्दाचार्यः। वाराणसी : चौखम्भा सुरभारती प्रकाशन, २०११।

४. ईश्वरकृष्णः। *सांख्यकारिका* । सम्पा.भावघनानन्दः। कोलकाता : उद्बोधनकार्यालयः,२०१०।

५. उदयनाचार्यः। *न्यायकुसुमाञ्जलिः* (*हरिहरसंस्कृतटीकया* शंकरमिश्रकृताऽऽ*मोदटीकया* च सहिता)। सम्पा.प्रो.हरेरामत्रिपाठी। नवदेहली : राष्ट्रीयसंस्कृतसंस्थानम्, २००९।

६. उद्योतकरः। *न्यायभाष्यवार्तिकम्* । सम्पा॰ अनन्तलालठाकुरः। नवदेहली : इण्डियन्-काउनसिल्-आफ्-फिलोसफिकाल्-रिसर्च्, १९९७।

७. एन.एस. रामानुजताताचार्यः। *शाब्दबोधमीमांसा* (१-४) । प्रका.इन्स्टिट्यूट् फ्रेञ्च डि पाण्डिचेरी। नवदेहली : राष्ट्रिसंस्कृतसंस्थानम्, २००५।

८. कौटिल्यः। *अर्थशास्त्रम्*। सम्पा.अनिलचन्द्रवसुः। कोलकाता : संस्कृत बुक डिपो,२००९।

९. कणादः। *वैशेषिकदर्शनम्*। प्रका.एइच्.डि.गुप्ता। बेनारस : चौखम्बा संस्कृत बुक् डिपो, १९८२।

१०. कुमारिलभट्टः। *मीमांसाश्लोकवार्त्तिकम्* (हिन्दिव्याख्योपेतम्) । सम्पा. पण्डितदुर्गाधरझा। दरभंगा : कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः, १९७९।

११. कृष्णदैपायनव्यासः। *महाभरतम्* (नीलकण्ठरचितभारतभावदीपटीकासमेतं हरिदाससिद्धान्तवागीशकृतभारतकौमुदीटीकासमेतञ्च) (शान्तिपर्व) । कलिकाता : सिद्धान्तविद्यालयः, १३६१ (बङ्गाब्दः)।

१२. कणादः। वैशेषिकदर्शनम् (श्रीपञ्चाननभट्टाचार्यकृत*परिष्कारटीका*-श्रीशङ्करमिश्रकृतो*पस्कारटीको*पेतम्) । सम्पा.श्रीपञ्चाननभट्टाचार्यः। कोलकाता : बङ्गवासी इलेक्ट्रोमेसिन प्रेस,१३१३(वङ्गाब्दः)।

१३. केशवमिश्रः। *तर्कभाषा* (प्रथमखण्डः) । सम्पा.श्रीगङ्गाधरकरन्यायाचार्यः। कोलकाता : यादवपुरविश्वविद्यालयः,२००८।

१४. तदेव। द्वितीयखण्डः। सम्पा.श्रीगङ्गाधरकरन्यायाचार्यः। कोलकाता : यादवपुरविश्वविद्यालयः,२०१४।

१५. गौतमः। *न्यायदर्शनम्* (*वात्स्यायनभाष्य*सहितम् उद्योतकर*वार्त्तिक*सहितं विश्वनाथ*वृत्ति*सहितञ्च)। सम्पा॰ तारानाथन्यायतर्कतीर्थः अमरेन्द्रमोहनतर्कतीर्थश्च। नवदेहली मुन्सीराममनोहरलालपाब्लिशार्स प्राइभेट् लिमिटेड १९८५ (द्वितीयसंस्करणम्)।

१६. गौतमः। *न्यायसूत्रम्* (*वात्स्यायनभाष्य*सहितम् उद्योतकर*वार्त्तिक*सहितञ्च)। सम्पा॰ महामहोपाध्यायगङ्गानाथझा। दिल्ली : मोतीलालवनारसीदासः, १९८४ (पुनर्मुद्रणम्)।

१७. गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः* (प्रमालक्षण) । सम्पा॰ श्रीविश्वबन्धु भट्टाचार्यः। प्रका॰ स्वामी प्रभानन्द, कोलकाता : रामकृष्ण मिशन् इन्स्टिटिउट् अव कालचार, २०००।

१८. गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः (व्याप्तिपञ्चक)* । सम्पा. श्रीयुक्त राजेन्द्रनाथघोषः। कलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०११।

१९. गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः (व्याप्तिपञ्चकम्)* । सम्पा. श्रीशैलजापति- मुखोपाध्यायः। कलकाता : संस्कृत पुस्तक भण्डार,१४१४ (वङ्गाब्दः)।

२०. गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः* (रहस्यटीकासमेतः) । सम्पा.वादरीनाथशुक्लः। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,१९७६(pdf)।

२१. गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः* (शब्दखण्डः) । सम्पा.एस्.आर. साहा पि.के.मुखोपाध्यायश्च। कोलकाता : यादवपुरविश्वविद्यालयः,१९९१।

२२. गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः* (सिद्धान्तलक्षणम्) । सम्पा.शैलजापतिमुखोपाध्यायः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्, १९९१।

२३. गौतमः। *न्यायदर्शनम्* (*वात्स्यायनभाष्य*सहितम्) । सम्पा. श्रीनारायणमिश्रः। वाराणसी : चौखम्भा संस्कृत भवन, २०१४।

२४. गौतमः। *न्याय दर्शन* (प्रथमखण्डः) । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्,२०१४।

२५. तदेव। द्वितीयखण्डः । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्,२०१५।

२६. तदेव। तृतीयखण्डः। सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्,२०१७।

२७. तदेव। चतुर्थखण्डः । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्,२०१५।

२८. तदेव। पञ्चमखण्डः । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्,२०१५।

२९. जयन्तभट्टः। *न्यायमञ्जरी* (चक्रधररचित *ग्रन्थिभङ्ग*-टीकासहिता) (खण्डः१-३)। सम्पा॰ गौरीनाथशास्त्री। वाराणसी : संपूर्णानन्दसंस्कृतविश्वविद्यालयः, १९८२।

३०. जयन्तभट्टः। *न्यायमञ्जरी*। सम्पा.ड.अमितभट्टाचार्यः। कोलकाता : संस्कृत बुक डिपो, २०१६।

३१. नारायणद्वयी। *मानमेयोदयः*। सम्पा.श्रीदीननाथत्रिपाठी। कोलकाता : संस्कृत कलेज, १९८९।

३२. नारायणद्वयी। *मानमेयोदयः*। सम्पा.स्वामी योगीन्दानन्दः। वाराणसी : षड्दर्शनप्रकाशनप्रतिष्ठानम्, १९८९(pdf)।

३३. नारायणः। *हितोपदेशः*। सम्पा.सत्यनारायणचक्रवर्ती। कोलकाता : संस्कृत पुस्तक भाण्डार, २०१२।

३४. ड.ब्रह्ममित्र-अवस्थी। *भारतीय न्यायसास्त्र एक अध्ययन*। दिल्ली : इन्दुप्रकाशनम्, १९६७।

३५. पतञ्जलिः। *महाभाष्यम्* (पस्पशाह्निकः)। सम्पा.दण्डिस्वामी दामोदर-आश्रमः। कोलकाता : अभिनवमुद्रणी, १४१७(बङ्गाब्दः)।

३६. पतञ्जलिः। *महाभाष्यम्* (प्रत्याहाराह्निकः)। सम्पा.अयोध्यानाथस्यान्यालः। वर्धमान : वर्धमानविश्वविद्यालयः, २०१४।

३७. प्रशस्तपादाचार्यः। *प्रशस्तपादभाष्यम्* (भाष्यानुवादविवृत्ति-*न्यायकन्दली*-तदनुवादसहितम्) (प्रथमो भागः) । अनुवादादिकारकः दण्डीस्वामी दामोदराश्रमः। कलकाता : दामोदराश्रमः, , २०१०(तृतीयसंस्करणम्) ।

३८. प्रशस्तपादाचार्यः। *प्रशस्तपपादभाष्यम्* (भाष्यानुवादविवृत्ति-*न्यायकन्दली*-तदनुवादसहितम्) (द्वितीयो भागः) । अनुवादादिकारकः दण्डीस्वामी दामोदराश्रमः। कलकाता : दामोदराश्रमः, २००० ।

३९. फणिभूषणतर्कवागीशः। *न्यायपरिचयः* । कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्, २००६।

४०. *बृहदारण्यकोपनिषद्* । सम्पा.करुणासिन्धुदासः, वेचारामघोषः, सुबुद्धिचरणगोस्वामी च। कोलकाता : संस्कृत बुक् डिपो,२०१०।

४१. बलदेवोपाध्यायः। *संस्कृतशास्त्र का इतिहास* । बाराणसी : चौखम्बा विद्याभवनम्, २००६।

४२. भासर्वज्ञः। *न्यायसारः* । सम्पा.के.साम्बशिवशास्त्री। त्रिवान्दारम् : राजकीयमुद्रणयन्त्रम्,१९३१।

४३. भीमाचार्यः। *न्यायकोषः* । वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, २०१५।

४४. मथुरानाथतर्कवागीशः। *व्याप्तिपञ्चकरहस्यम् सिंहव्याघ्ररहस्यञ्च* । सम्पा. श्रीढुण्डिराजशास्त्री। बनारस: चौखम्बा संस्कृत सीरिज आफिस, १९८५।

४५. मनुः। *मनुसंहिता* (*कुल्लुकभाष्य*सहिता) । सम्पा.पञ्चाननतर्करत्नः। कोलकाता : संस्कृत पुस्तक भाण्डार,१९९३।

४६. याज्ञवल्क्यः। *याज्ञवल्क्यसंहिता* । सम्पा.न्यारायणरामाचार्यः। दिल्ली : राष्ट्रीयसंस्कृतसंस्थानम्,२०१०।

४७. याज्ञवल्क्यः। *याज्ञवल्क्यसंहिता* । सम्पा.के.एल.जोशी। दिल्ली : परिमल पाब्लिकेशन्,२००५।

४८. वरदराजाचार्यः। *लघुसिद्धान्तकौमुदी* । सम्पा.पण्डितश्रीनारायणदत्तत्रिपाठी पण्डितश्रीनारायणदत्तशास्ती च। गौरखपुर : गीताप्रेस्, १९९१।

४९. वाचस्पतिमिश्रः। *सांख्यतत्त्वकौमुदी* । सम्पा. श्रीनारायणचन्द्रगौस्वामी। कोलकाता : संस्कृत पुस्तक भाण्डार,२०१६।

५०. वात्स्यायनः। *न्यायभाष्यम्* । सम्पा.स्वामी द्वारिकादासशास्त्री। वाराणसी : साधनाप्रेस्, १९९८।

५१. वामनशिवराम-आप्ते। *संस्कृत-हिन्दीकोषः* । दिल्ली : न्यु भारतीयबुककर्पोरेशन्, २००६।

५२. वामनशिवराम-आप्टे। *संस्कृत-हिन्दी कोश* । दिल्ली : मोतीलाल बनारसीदास पाब्लिशर्स,२००७ (पुनर्मुद्रणम्)।

५३. विजयरानी। *प्रमाण एवं प्रामाण्य-विमर्श* । दिल्ली : परिमल पब्लिकेशनस, २००६।

५४. श्रीविश्वबन्धुभट्टाचार्यः। *अनुमानचिन्तामणिः* । कोलकाता : यादवपुरविश्वविद्यालयः,१९९३।

५५. विश्वनाथन्यायपञ्चाननः। *कारिकावली* (*मुक्तावली-दिनकरी-रामरुद्री*समेता)। सम्पा॰ हरिरामशुक्लः। बनारस : चौखम्बा संस्कृत सीरिज आफिस, १९५१।

५६. विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः* (*सिद्धान्तमुक्तावली आशुबोधिनी* च सहिता) । सम्पा.प्रवालकुमारसेनः। कोलकाता : विजयायन, १४२२ (बङ्गाब्दः)।

५७. विश्वनाथन्यायपञ्चाननः। *न्यायसिद्धान्तमुक्तावली* (*दिनकरी-रामरुद्री*सहिता) । सम्पा.हरिरामशुक्लशास्त्री। वाराणसी: चौखम्भा प्रकाशन, २०११।

५८. वेदव्यासः। *वेदान्तदर्शनम्* (प्रथमखण्डः) । सम्पा.स्वामी चिद्घनानन्दपुरी श्री-आनन्दझान्यायाचार्यश्च। कोलकाता : उद्बोधनकार्यालयः,१९८०।

५९. तदेव। द्वितीयखण्डः । सम्पा.स्वामी चिद्घनानन्दपुरी श्री-आनन्दझान्यायाचार्यश्च। कोलकाता : उद्बोधनकार्यालयः,१९८०।

६०. तदेव। तृतीयतीयखण्डः । सम्पा.स्वामी चिद्घनानन्दपुरी श्री-आनन्दझान्यायाचार्यश्च। कोलकाता : उद्बोधनकार्यालयः,१९८०।

६१. व्यासदेवः। *श्रीमद्भगवद्गीता* (शङ्करभाष्यसमेता) । सम्पा.स्वामी वासुदेवानन्दः। कोलकाता : उद्बोद्धनकार्यालयः, २०००।

६२. शङ्करमिश्रः। *वैशेषिकसूत्रोपस्कारः* । सम्पा.सेखसाविर-आलिः। कोलकाता : संस्कृत बुक डिपो, २०१३।

६३. श्रीदीनेशचन्द्रभट्टाचार्यः। *वाङ्गालीर सारस्वत अवदान बङ्गे नव्यन्यायचर्चा* । कोलकाता : संस्कृत बुक् डिपो, २०२२।

६४. श्रीमद्भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः) । सम्पा.गिरिधरशर्मा परमेश्वरानन्दशर्मा च । वारणसी : मोतीलाल बनारसीदास,२०१०।

६५. तदेव। द्वितीयभागः। सम्पा.गिरिधरशर्मा परमेश्वरानन्दशर्मा च । वारणसी : मोतीलाल बनारसीदास,२००५।

६६. तदेव। तृतीयभागः। सम्पा.गिरिधरशर्मा परमेश्वरानन्दशर्मा च । वारणसी : मोतीलाल बनारसीदास,२००५।

६७. S.N. Dasgupta. *A History of Indian Philosophy* . England : Cambridge University,1932.

६८. Satischandra chatterjee. *The Nyāya Theory of Knowledge* . Delhi : Motilal Banarasidass Publishers, 2017.

६९. Sayanamadhava. *Sarvadarshanasamgraha* with the commentary by VasudevShastriAbhayankar. Ed. T.G. Mainkar. NO1, Poona: BhandarkarOriental ResearchInstitute, 1978 (Third Edition).

Internet : www.quara.com, www.indiankanoon.org, www.wikipedia.org, www.jusdicere.co.in, www.thecuint.com, www.archive.org, www.sanskrit.nic.in,ebook and etc.

************